ॐ नमः श्रीविघ्नराजाय ॥ प्रवालाद्रिभ्रस्वद्द्युतिमिव यपपर्यायवपुषे नमो विघ्नेशाय विघटनपविष्टाय महसा ॥ अ
स्माद्दुर्णावलम्बि जयति रा... सरवनाविनोदासक्ताय प्रणतफलजालविलिन्तु वा ॥ यत्कण्ठवलक्षुण्डजस्र
वकघृष्टगण्डस्थं जं महार्हमणिमेखलं मरकताकुरस्यामलं । करोतु कल्याणं सदा कलितपंचषाध्यक्रमं महः ॥ १
मोहनेकपटौ श्रावंकेशा... ते... नागसिरूषापरूषभुवाणी ऊठी रूतायरस्त नार्थे नियंत्रणे नामो ने
नमानमधिगच्छति याद... ॥ हरविनक्तानतनुःस्मरो बवः ॥ २ ॥ अस्ति पुरा स्वविजवोपगतश्रयास्ति
विस्तारिणी स्तु निशाका... ठिच्चीति विश्वविदिता नगरी मनलीपव्लीविजातिपुरत स्थिदिवोपियस्या :।
४ ॥ तामनुतरेणयमुनानदे... दैत्यचूडनुपमानगरीगरिष्ठा ॥ पुस्यामनल्पविजवोपविना बाभूत्तुष्टाका
च्चयेमहितकीर्त्तिजुषामहा... पुनस्मिन्नचूडिमजयाकृष्णा लोकुराशौबुद्धन्यचूतश्रुतकीर्त्तिघनप्रकाराः
जोकैसदाहृदिष्टवोगुणानां... विष्टश्रीरत्नपालनृपतिस्त्रुवनैककरत्नं ॥ ५ ॥ तस्यात्मजोऽत्र रत्नपालइतिप्रसि म.पा
द्धस्सिकागनाजनसमाजस्समिद्धकीर्त्ति...) दानेन यःस्तुरुचिमां द्विपतिस्पदेनां सैन्यं च वैन्यं सहशा प्रतिनृपतीनां ॥
७ स्तुतोऽस्य जातःस्तुतोऽत्र तस्य न... कृष्णिराससदृशो बभूव । यमस्य जस्त्पमवेक्ष्य नानौ नानाहरिश्चंद्र १
इतिवधनी ॥ ८ तस्माभजो भूदधनप्र... धारणी भूमिपतिवंदीन्यः । चचूतपूर्वा भवनाच्चराणाम्निजीगुपतमो
ना२

= श्रीउदस्यामृणाविकरेति प

जगतिस्थका ॥ स्त्री प्रयास्मिन्नसाधारणा धैर्यशौर्यगीत्नार्यासोदयग्रिणीकन्धुर्ये गिरीन्द्रनामानुजासं पुराजस्मराश्रम
धाराणतीनजाता ॥ १० लक्ष्मील क्षमावतां विधाय विबुधाहारस्य दारस्यवज्योतिर्गर्भमपास्यपार्वणशरच्चंद्रस्यचंद्रस्यचात्मनी
लन्नवासोरासीधवलसद्गिंडीरपिंडोपमायस्पेतानुविनर्नृतंत्यनुदिनं सन्मूर्त्तयः कीर्त्तयः ॥ ११ वंधच्छिदां विरुदकीर्त्तिमिदाच्चि
तार्थीकृत्यापरत्रचतपेव विधातुमिच्छुः । कीनाशपाशवयबद्धविमोचनार्थं तीर्थत्रयीकरविमुक्तिमवीकरद्यः ॥ १२ महीपतस्त
स्य महानुभावो सूनावत्र्त तौ सुकृतौ तानततस्याद्यो महीजाः सदाजेन्द्रनामा तदानीं श्रीमदनो द्वितीयः ॥ १३ अपारदः
सिद्धरासाजनानामनन्तवृष्टिविद्रुताविधीनौ ॥ अनेनतकोटिश्यराहारिमणिमास्तप्रभुः श्रीसहजाधिनाथः ॥ १४ तस्यानुजः श्री
मदनो ननाम्ना धाम्नास्वरूपेणचसंगतार्थः । रोषारुणेन च... विपद्धिपक्षौनितांतकौतारसमाश्रितोऽभूत् ॥ १५ विश्राणनप्रथ
सनैयदीयैर्विघाप्रसीगनविनोदसौख्यौ । यस्यावदानैनयाशा वितानैर्दिग्मडलीमडनमेकमासीत् ॥ १६ परिशीलयतादला
कलापे विदधानन्नवसूरिशाःप्रबंधान् । मदनेन महीनृताथायनप्रथितान्नूतननाम् राजराजकीर्त्ति ॥ १७ यः कृपाना रामानुधर्मीय
तनानिसन्निबंधीश्चाहृत्यास्वकीर्त्ति मिकामदीदृशः नूर्त्तितादना ॥ १८ श्रीमानयं मदनस्तवकपारिजाततनामौक्तिकं स्मृतिप
थानुगतैनिबंधैः वर्णाश्रमप्रमुखधर्मविविवचनायविदन्मुखेन सुकृती मितमातनोति ॥ १९ मतिर्यषीशास्त्र प्रवृत्तिरम

णीयाश्च वद्वतिः परं। स्त्रीलिंगाधीजगतिहूव स्तोकतिपाया। विरं विज्ञातपी मुकुरतलन्तानस्थितिमियादिष्टैव्यासारण
प्रवरमुनित्रिधस्यन्तणिति॥२०॥ मातापुण्यवरिवकी। नैं विनवायस्थी। बिकानामतः ज्ञाकल्यापरमूर्त्ति यविरितःस्त्री
पदिनद्दः पिता। मा। यौकौशिकवंशाभूषणमणिः श्रीनंदविश्वेश्वरावादस्मात्ममितनायव सपादवाक्यस्तीवद्धता॥१॥ इमा
द्रिकल्पद्रुमसमापरार्द्धस्मृत्यर्थसाराः स्मृतिस्त्वदिकौवा। मिताक्षरादीनवलोक्य यत्नान्निबध्यातसैयद्गतानि बंधः॥२॥ स्तबकः प्र
थमोह्यत्र ब्रह्मचर्यानिषोपरः। गृहस्थाख्यः तृतीयः स्यादाह्निकै तदनंतरं। गर्भाधानादिसंस्कारास्तुरीयः स्तबको मतः। आ
शौचस्तबकः पश्चाद्वास्तुस्याद्धायामतः। सप्तमः श्राद्धसंज्ञोहि विनागाख्योष्टमस्ततः। नवमः स्तबकश्चात्र प्रायश्चित्तास्त्रि
ति मतः। स्तबकानवनिर्दिष्टान्निबोधस्मिन्ननुक्रमात्। स्मर्तृप्रदर्शितकर्म्मविशीसातदनंतरं॥३॥ धर्म्मसाधारणाः कालादयो मौंजी
विधिविधिः। नमस्कारस्य गुर्वादिलक्षणानि ततः परं। भिक्षाचर्याप्रकारादिनियमा ब्रह्मचारिणः। उद्धारस्य विधिश्चोत्र विधिस्त्वा
चमनस्य च। प्रातःस्नानस्य संध्यायाः प्राणायामस्य वैवदि। मार्जनादिविधिः संध्या मध्याह्नस्य तथापरा। जपसंख्याविधानाद्य
उपाकर्म ततः परं। उत्सर्जनं तथा वेदव्रतान्यध्ययनविधिः। ततः परमनध्याया कुलेवासो गुरोस्ततः। नैष्ठिकस्य तथा धर्म्माः
समावर्तनामव च। स्मो स्नातकस्य व्रतादीनीत्येव प्रकरणानि च। स्तबाकब्रह्मचार्याख्ये प्रथमसप्तविंशतिः॥४॥ सापिंड्यवर्ण

र्णपश्चाल्लक्षणनिवरस्य च। दारानुकल्पोदातुश्च निरूपणमतः परं। विवाहभेदास्त्वाधानमावसथ्या
नलस्य च। आवसथ्यस्य कालाद्या गौणकालनिरूपणे। द्विरागमनकालश्च ततः स्यादधिवेदनं। स्त्री
धर्मश्च द्वितीयेस्मिंस्तबके गृहमेधिनः। एवं प्रकरणान्येकादशाख्यातानि संग्रहात्॥५॥ ब्राह्मे मुहू
र्तेकिं कर्तव्यं ततः स्याद्दंतधावनं। केशप्रसाधनाद्याश्चापाष्यवर्गस्य चिंतनं। वृत्तिः क्षत्रस्य वैश्यस्य
शूद्रवृत्तिस्ततः परं। अपद्वृत्तिश्च मध्याह्नस्नानं नैमित्तिकं तथा काम्यस्नानं ततः प्रोक्तं माङ्ग
स्नानविधिस्ततः। मलापकर्षणं स्नानं क्रियास्नानमतः परं। गौणस्नानानि वासोसितिलक
स्य विधिस्तथा। ब्रह्मयज्ञविधानं च तर्पणं यमतर्पणं। अर्चनं देवतानां च पुष्पाद्यस्य यस्तथैव च
। नित्यश्राद्धमहायज्ञस्वरूपाणि ततः परं। नित्यश्राद्धं ततो वैश्वदेवं तस्याकनिर्णयः। तत्कालनि
र्णयः पूजा तिथेर्भोजने विधिः॥ भोज्याभोज्यं तथान्नोल्पान्नोल्पान्नाः शयने विधिः। एवं प्रक
रणान्यत्र द्वात्रिंशच्चाह्निकाह्वये। तृतीये स्तबके सम्यग्वर्णितानि यथाक्रमात्॥६॥ ऋतुकालस्त
थागर्भाधानं पुंसवनं ततः। सीमंतोन्नयनं जातकर्मस्यान्नामकर्म च। ततो निःक्रमणाख्य

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

स्यसंस्कारस्य विधिः स्मृतः। कर्णवेधस्तथो चान्नप्राशनं चौलकर्म च। स्त्रीसंस्कारास्ततो विद्यारंभो वै
स्वानसाश्रमः। तुर्याश्रमस्तुरीयेस्मिन्नेवं प्रकरणन्नितु। गर्भाधानादिसंस्कारस्तबके दश पंच च
॥४॥ स्त्रावाशौचं तु पूर्वस्या प्रसवाशौचमेव च॥ आशौचमनुपेतस्य दशाह प्रमुखास्ततः। अनुलो
मस पिंडस्य चाशौचं स्यादतः परं॥ समानसलिलानां च प्रोषिते परतो तथा॥ मृतस्य प्रोषितस्य
वदाह विधिः रतः परं। उपध्वस्य या प्रपरतो ह्रत्रजादिमृते तथा॥ अनुगच्छस्तु चाशौच माशौचानां
परस्परं॥ संकरे निर्णयो दाहकालेग्नौ विरते विधिः। दशाहमध्ये दर्शस्य संपाते तत्य निर्णयः। दे
शांतरगते जीवद्धार्त्तानाकर्णने विधिः। एवं प्रकरणान्यत्र स्तबके दश पंच च। पंचमे तु षि निर्दिष्टान्या
शौचपदसंज्ञिते॥५॥ शुद्धिः सोवर्णपात्रादि वस्त्रादेस्तदनंतरं॥ धान्यादेश्चापि शुद्धिः स्यात्सिद्धान्नादेस्ततः परं। नृपादि
श्च ततः शुद्धेरपवादस्तथेति षट्। षष्टेस्मिंस्तबके द्रव्यशुद्धौ करणानितु॥६॥ अदौ श्राद्धस्य महिमा तस्वरूपं च तद्वि
दां। तत्राधिकारिणस्तद्वदामश्राद्धे धिकारिणः श्राद्धकालास्तथा देशाः श्राद्धानस्य चैव हि॥ अन्वाधानस्य पिंड
पितृयज्ञस्य चाप्यथ। दर्शश्राद्धस्य चैत्येषामेकस्मिन्वासरे ततिः। अपराह्णस्य समयः अमावास्या विनिर्णयः 3
मृताह कालस्यैवाऽज्ञाने काल विनिर्णयः। आमश्राद्धस्य कालश्च नित्ये नैमित्तिके तथा। प्रत्याब्दानं श्राद्धाया
श्च ततः स्वा परपक्षिकं। काम्यकालाश्च संक्रांतिकालाराहुग्रहे तथा कालायुगादिमन्वाद्यौः श्राद्धे जीवत्पितुस्तथा। विहितानि निषिद्धानि
॥ मलमासे तत पुनः। हविर्विशेषा वर्ज्यानि ब्राह्मणानां परीक्षणं। पंक्त्यर्घ्या ब्राह्मणास्तेषामनुकल्पास्ततः परं। वर्ज्या विप्रा ब्राह्मण
नामामंत्रणविधिस्ततः। दिने श्राद्धस्य पूर्वस्मिन् तत्पंच ह्यापराह्णिकं। अग्नौ करणमिमी।
मांसात थाग्नौकरणे विधिः परिवेषण कर्म्मादि श्राद्धं धिपितृकस्य च। सीकल्पसिद्धकं श्राद्धमेकोदिष्टमतः परं न
वश्राद्धानि तद्वच्च सपिंडीकरणं ततः। वृद्धिश्राद्ध विधानं च जीवच्छ्राद्धमतः परं। इत्थं प्रकरणान्यक च चारिंशदनुक्रमा
त्। श्राद्धाद्धये सप्तमस्मिन्स्तबाके तु समासतः॥७॥ आदौ विभागकालाः स्युर्मुख्यागौणास्तु ताश्च तथा। विजातीयसुतानीं च वि
भागस्तदनंतरं। पितामहधनापौत्रभागो मात्रंशा समिमितिः। स्त्रुत स्त्रीधनग्राह्यद्यधिकार निरूपणं। तथा पुत्रधनग्राह्यन
गः संसृष्टिनी ततः। स्त्रीशानदी स्नाता द्व्यमविभाज्यमतः परं। शेषः सर्वविभागस्य चेवं प्रकरणानि तु। एकादशास्मिन्स्त
बके दायभागपादस्ष्टमा॥८॥ प्रवं पाप फलोद्दिष्टं निरकास्तदनंतरं। विपाकः कर्म्मणां प्रायश्चित्त कर्तव्य निर्णयः। कामाकाम का
महापाप प्रायश्चित्त विकल्पानी। वृद्धवीर्द्रायणादीनां लक्षणानि पृथक् पृथक्। रतिकर्तव्यतातपीयश्चाप्रायणाप्येव च। सामा
न्येन तथा सर्व पापानिष्कृतिस्तदनंतरः। पर्षत्परिषद्वृद्धा पस्थानं प्रायश्चित्तविनिर्णयः। व्रतस्य ग्रहणे कालाविप्रशस्यग्रहतथा। उद्देशः
पातकानां च ब्रह्महत्यादि निष्कृतिः॥ उपपातकनिर्द्दिष्टं शास्त्रनिष्कृतिरतः परं। असत्प्रतिग्रहादीनां निष्कृतिस्तदनंतरं। जाति भ्रंश
करादीनां निष्कृतिश्च ततः परं। प्रकीर्णकेषु पापेषु प्रायश्चित्तमिति क्रमात्। एवं प्रकरणान्येकविंशतिर्नवमे पुनः। प्रायश्चि
त्ताभिधानस्मिन्स्तबके तु समासतः॥९॥ धर्म्मशास्त्रप्रवृत्तानां तदधिगमोपायतया तच्छास्त्रप्रणेतारः प्रदर्शनीयाः तत्र तौ दि कि
या।

च मनुरवदत्ताद्भ षजमिति मानार्वदाद्ध तत्त्वेन तत्स्मृत्या धर्मशास्त्रप्रणेतारः प्रथमं प्रदर्शयति। तत्र याज्ञवल्क्यः। मन्वत्रि
विष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः। यमापस्तम्बसंवर्ताः कात्यायनबृहस्पती। पराशरव्यासशंखलिखिता दक्षगौ
तमौ। शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः। इति। नयं परिसंख्या। किंतु प्रदर्शनार्थमिति। तायतो बौद्धायनाद
योऽपि धर्मशास्त्रप्रयोजका भवंति। न चैतेषां मन्वादिधर्मशास्त्राणां वेदमूलत्वेन परस्परमनापेक्षप्रमाणत्वान्नान्यो
न्यमाकांक्षा। तत्र च क्वचिदधिकांगकर्मविधिः क्वचिन्न्यूनांगकर्मविधिरिति परस्परविरोधादप्रामाण्यप्रसंग इति चे
त्। मैवं। सर्वशाखाप्रत्ययमेकं कर्मेति न्यायेन सर्वत्र विधेयस्य कर्मण एकत्वेन प्रधानविरोधाभावादंगेषु प्रातीतिको
यः परस्परविरोधः। तत्परिहारो मृग्यः। स च परिहार आकांक्षावशात्। आकांक्षा चेति कर्तव्यतायां सा चेतिकर्तव्यताय
स्मिन्शास्त्रेऽन्यूनातच्छास्त्रस्यावगतार्थेन नापेक्ष प्रमाणमपि न्यूनवगतौ शास्त्रान्तरमपेक्षते इति नात्यंतमनपेक्षा। अत एवा
विरोधान्नाप्रामाण्यं। एवं समग्रांगकर्मण्यनुष्ठिते धर्मोऽपि समग्रो भवतु। धर्मो ह्यदृष्टसिद्धिः। धर्मश्चाचारप्रयत्नः। तथा च मनुः॥
आचारः परमो धर्मो विद्भिः परिकीर्तितः इति। अत्र कार्यकारणयोरभेदोपचारः। धर्मश्चिन्त्यः संयुक्ता श्रुतीर्वा तथा। श्रुतिस्मृत्युदि ॥४॥
तः सम्यक् साधुभिर्निषेवितः। तमाचारं निषेवेत धर्मकामो जितेन्द्रियः। इति। आचारश्च मध्यदेशादिप्रवृत्तेभ्यो विज्ञेयः। यथाह मनुः। स

रस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरं। तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते॥ तस्मिन्देशे य आचारः पारंपर्यक्रमागतः। वर्णा
नां सान्तरालानां स सदाचार उच्यते। हिमवद्विंध्ययोर्मध्ये यत्प्राग्विनशनादपि। विनशनं सरस्वत्या अन्तर्धानदेशः। प्रत्यगेव
प्रयागाच्च मध्यदेशः प्रकीर्तितः। आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात्। तयोरवांतरं गिर्योरार्यावर्तं विदुर्बुधाः। इति। श्री
खण्डप्रकारान्तरेणार्यावर्तमाह। कृष्णमृगो यावद्विचरति तावदार्यः स्यादिति। यावद्विचरति स्वतन्त्र इत्यर्थः। आर्यावर्त इत्यनुवृत्ते
वसिष्ठोऽपि। यावत्कृष्णमृगो विचरतीति॥ अन्यच्च मनुराह। कुरुक्षेत्रं च मत्स्याश्च पंचालाः शूरसेनकाः। एष ब्रह्मर्षिदेशो वै
ब्रह्मावर्तादनन्तरः। अनन्तर ईषन्न्यून इत्यर्थः। एतद्देशप्रसूतस्य सकाशादग्रजन्मनः। स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवाः।
आचाराद्विच्युतो विप्रो न वेदफलमश्नुते। आचारेण तु संयुक्तः संपूर्णफलभाग्भवेत्॥ तथा। एवमाचारतो दृष्ट्वा धर्मस्य मुनयो
गतिं। सर्वस्य तपसो मूलमाचारं जगृहुः परं॥ इति। अथ कर्मप्रशंसा॥ तत्र मत्स्यपुराणे। ज्ञानयोगसहस्राद्धि कर्मयोगः प्रशस्यते।
कर्मयोगोद्भवं ज्ञानं तस्मात्तत्परमं पदं। कर्मज्ञानाद्भवेद्ब्रह्म न च ज्ञानमकर्मणः। तस्मात्कर्मणि युक्तात्मा तत्त्वं प्राप्नोति शाश्वतं।
वेदोऽखिलो धर्ममूलमाचारश्चैव तद्विदां। अष्टावात्मगुणास्मिन्प्रधानत्वेन संस्थिताः। क्रियास सर्वेषु शास्त्रेषु दीक्षा नीरस्य उरस्य
रा॥ अनसूया तथा लोकाः शौचमंतर्बहिर्द्विजाः। अनायासस्तु कायस्य मंगलाचारसेवनं। नवद्रव्येषु कार्पण्यमात्मसू पा(र्श्वि)

त्तेषु वा तथाऽस्पृहा परस्त्रीषु परार्थेषु च सर्वदा। अष्टावात्मगुणाः प्रोक्ताः पुराणे वेदवादिभिः। अयमेव क्रियायोगो ज्ञा
नयोगस्य साधकः॥ कर्म्मयोगं विना ज्ञानं कुत्रचिन्नेह दृश्यते। देवानीच मनुष्याणीपि दृष्णीव सर्वदा। त्वत्तिं करोति
चिउली कर्म्म कुर्वन्नियपोदिती॥ ७॥ अथ साधारणधर्म्माः। तत्र मनुः। यद्यत्परवशं कर्म्म तत्तद्यत्नेन वर्ज्जयेत्॥ यद्यदा
त्मवशं कर्म्म तत्तत्सेवेत यत्नतः। सर्वं परवशं दुःखं सर्वमात्मवशं सुखं। एतद्विद्यात्समासेन लक्षणं सुखदुःखयोः। य
त्कर्म कुर्वतोऽस्य स्यात्परितोषोऽन्तरात्मनः। तत्प्रयत्नेन कुर्वीत विपरीतं तु वर्जयेत्। यत्कर्म्म कुर्वतिस्तेति। शास्त्रविरुद्ध
मिच्छ्यर्थः। शास्त्राविरुद्धमपि क्वचिदपवादो दृश्यते। यथाह याज्ञवल्क्यः॥ ॥ कर्म्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत्। अ
स्वर्ग्यं लोकविद्विष्टं धर्म्ममप्याचरेन्न तु। तच्च कर्म्म कथं कार्यमित्याकांक्षायां सारसंग्रहे। यात्रा पवीतिना कार्यं सर्वं कर्म्म
प्रदक्षिणं॥ मनः प्रमोदात्सात्त्विक्या तपसा ज्ञानकर्मणा। आचीर्णं ... शुद्धिं त्वाचामेत्समाचरेत्। कर्म्म उ यथा तत् पाचमेत
ज्ञायोतावादव अनुसारत्। प्रधानस्य क्रियायां तु सांगं तत्क्रियते बुधैः। तदंगाकरणं कुर्यात्प्रायश्चित्तेन कर्मतत्। प्राचीदि
शामनुक्तौ स्यादुदीची शानदिक्तथा। तिष्ठेच्च प्रह्वता नुक्तावासीनश्चैव कर्म्मसु। कर्त्तॄणामनुक्तौ तु दक्षिणो गौतवत्तथा। ॥पु॥
कुंचितत्वामहस्तः स्याद्दक्षिणः स्यादकुंचितः। प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते। स नाप्नोति फलं तस्य परत्रेति श्रुतिः

स्मृतिः। बाह्वृच्यैवास्वर्ग्यं ह्याह्वयस्याकर्म्मावादिति। न स्यतावतिशास्त्रार्थेन्नानसंवन्नितेन्त वत्। श्रौतेषु सर्वशाखोक्तेषु स
र्वास्वेव यथाविति। स्मार्त्तं साधारणी तेषु ग्राह्यी श्रौतेषु कर्म्मसु। सामयाचारिका धर्म्मा दृश्यन्ते कुलोद्भवाः। ग्रामाचा
राः परिग्राह्यास्य च विधिविरोधिनः। युगधर्म्माः परिग्राह्याः सर्वा त्रेवयथोचितं। देवरेण सुतोत्पत्तिर्वानप्रस्थाश्रमग्रहः। द
त्ताक्षतायाः कन्यायाः पुनर्दानं परस्य वा। सहुद्रयात्रास्वीकारः कमंडलुविधारणं। कमंडलुविधारणमिति। नैष्टिकब्रह्मचारि
त्वह्यात। महाप्रस्थानगमनं गोपशुश्च सुराग्रहः॥ सुराग्रह इति सोत्रामणी। अग्निहोत्रहवण्याश्च लेहो लीढापरिग्रहः। अग्नि
होत्रहवण्यां यज्ञपात्रविशेषः। तत्रस्थितस्य हविषो लेहः आस्वादनं चमसस्थितसोमवत्। लीढायाः अग्निहोत्रहवण्याः प
रिग्रहः स्वीकारः। असवर्णासु कन्यासु विवाहश्च द्विजातिषु। हतो च्याध्याय सापेक्षमघसीकाचनेतथा॥ ७॥ वृत्तस्वाध्यायवत्यू
हस्त्वाघाचारः। स्वाध्यायावदः। अघमाशौचं। प्रायश्चित्तविधानं च विप्राणां मरणांतिकं। संसर्गदोषः पापेषु मधुपर्के पशो
र्वधः। दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः। शामित्रं चैव विप्राणां सोमविक्रयणं तथा। शमितायज्ञपशुहिंसकः। तस्य क
र्म्म शामित्रं। दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधको। कलौ युगे त्विमान् धर्म्मान्वर्ज्यानाहुर्मनीषिणः। इज्याचारदमाहिंसा
दानस्वाध्यायकर्म्मणां। अयं तु परमो धर्म्मो यद्योगेनात्मदर्शनं। अहिंसा सत्यमस्तेयं शौचमिंद्रियनिग्रहः। दानं दमो द

याद्धांतिःसार्वपीधर्म्मसाधनी॥ अथोपनयनकालादयः॥ द्विजन्मनामुपवीतानामेवाश्रौतस्मार्त्तकर्म्माधिकारस्याधारत्वाध
र्म्मानितरस्मुपनयनकालानिरूप्यते। तत्र मनुः। गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनं। गर्भादेकादशे राज्ञो गर्भात्तु
द्वादशे विशः। अथ काम्यकालः। ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमे। इति। सप्तमे ब्रह्मवर्चसकामं। अष्टमे आयुःका तथा३
मं। नवमे तेजस्कामं। दशमे अन्नाद्यकामं। एकादशे इंद्रियकामं। द्वादशे पशुकाममुपनयेदिति। तथा। वसंते ब्राह्मण
मुपनयेत्। ग्रीष्मे राजन्यं। शरदि वैश्यमिति। पारस्करोऽपि। ब्राह्मणस्याष्टवार्षिकस्य गर्भाष्टवर्षस्य वा क्षत्रियस्यैकादश
वार्षिकस्य वैश्यस्य द्वादशवार्षिकस्य उपनयनं कुर्यात्। यथामंगलं वा सर्वेषामुपनयनमिति। यथामंगलं। सर्वेषां ब्र
ह्मवर्चसादिकामानतिक्रमेण। तथा मासविशेषाद् विफलविशेषः। तत्र सुराचार्यः। माघे मासि महाधनो धनपतिः प्राज्ञो
बली फाल्गुने मेधावी तत्त्ववतिव्रतोपनयानविन्नवद्याचितः। वैशाखेषु नगः सुखी पटुमतिर्ज्येष्ठे बलिष्ठो बुधोऽथाषाढ
पिमद्याविपद्विजयी स्यातामहापेक्षितः। तथा नक्षत्रादिविशेषाश्चापि। हस्तत्रयदित्यरिपुत्रयेचशाक्रे द्रष्टापुष्ये विनिरवि
तीषु। वारस्तु शुक्रार्कबृहस्पतीनां हितानुबंधी द्विजसूत्रबंधः। द्वितीयैकादशीपंचमीदशमीतथा। द्वितीयायाश्च मथा ६
वीना वेदार्थवित्। रिक्तायामर्थहानिःस्यात् खोर्ममासीतथैव वा। प्रतिपद्य पिवाष्टम्यो कुलवृद्धिविनाशकृत्। सप्तम्यामष्ट

म्यां प्रतिपदि रिक्तासु चतुर्दश्यां। आयुर्विद्याधनानाशो नवबैधेपंचदश्यां वा। नवपद्मामष्टम्यां पंसदृश्यां न पवीत। प्रतिप
त्सु न कर्त्तव्यो न विष्टिकरणे तथा। रिक्तासु न कर्त्तव्यस्य हस्तृ दिवसे तथा। न विप्रजन्मताराषु न धनप्रत्यरासु च। सं
पत्कारे तथा लक्ष्मीसाधकमित्रसंज्ञिता। परमष्टमे त्रिचतारासंवत्र श्लाघ्यनाः। मेषे च वतिशुरापोधीमानाविरोग
श्रीकृपरिहीनः। गद्वान्मन्मथलग्ने विधुराधीः कुलीरवाकरिकुल वेरिणि बलवान्विद्यावान्नवर्याषितिकूरः। सुनगः सुखो
पलोक्ता तौलिनिकीटे विनाशमुपयाति॥ धनुषि धनाढ्यः श्रेयान्याद्विसिसद्देधातेःपरित्यक्तः। षट्कर्मी निरतः स्यान्मीनधन
वान्प्रवक्ता च। वृषभश्च तुला कन्या ब्राह्मणानामुदाहृताः। सिंहोधन्वी तथा मीनः क्षत्रियाणां प्रकीर्तितः। मेषोयुग्मस्तथा कर्की
विश्यानां परिकीर्त्तितः। कुर्यात्काकालवार्षिच व्रतोपनयने द्विजः। नानध्याये नकूर्चे पे निबीतनगलग्रहे। एवं विधे स्वर्वो
क्तविशिष्टकाले आचार्यो माणवकं स्वर्वे भोजयित्वा कर्म्म मसि मारभेत। तथा च गोभिलः। प्रगए वैनं तदहर्भोजयंतीति। प्र
ग प्रातः सर्वमित्यर्थः। स्वर्वतो वस्तु गृह्योक्ता विशेष्या। अपरादिशेषः शौनकानोक्तः। अलीकृते कुमारे कुशली कृतशिरसम
हातनवासमासीवीतमिति। कुशली कृतशिरसी कृतशिरोवपनं। वस्त्रधारणादिकर्म्मस्तु स्वस्वगृह्योक्तो विहेयः।
वासीसिवमनुना क्वानि। वसीरूंत्रानु प्रवीणशाणक्षोमाविकानि चेति। आउ प्रत्वीणं। गोतमः। वासांसि शोणक्षोमचीर

=कुतपोनेपालकंबलः १

+रवं १

रकुतैपाःसद्वर्षीकार्पासिं वाविहृतमिति। वीरंवस्त्रचूर्णः। वसिष्ठः शुक्लमहतं वासो ब्राह्मणस्य मांजिष्ठं क्षौमं वा क्षत्रियस्य
पीतं कौशेयं वैश्यस्येति। कौशेयं पट्टविशेषः। मौंजीलक्षणं च मनुराह॥ मौंजी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेख
ला। क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतांतवी॥ मुंजालाभे तु कर्तव्याः कुशाश्मंतकबल्बजैः। त्रिवृता ग्रंथिनैकेन त्रिभि
र्वा पंचभिरेव वा॥ मौर्वी मुर्वीतृणनिर्मिता। ज्या धनुर्गुणः। अत्र त्रिवृत्त्वं नास्ति। ज्याया विनाशप्रसंगात्। शणजाद्यला
भे क्रमेण कुशाद्या ग्राह्याः। अश्मंतकाख्यवृक्षः। बल्वजमपि ग्रंथिलं दस्युमुखा मुंगोणी इति वा। यज्ञोपवीतलक्षणं छंदोग
परिशिष्टे। त्रिवृदूर्ध्ववृतं कार्यं तंतुत्रयमधोवृतं। त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रंथिरिष्यते। तथा। पृष्ठवंशे च नाभ्यां च धृ
तं यद्विंदति कटिं। तत्कार्यमुपवीतं स्यान्नातिलंबं न चोच्छ्रितं। मनुः॥ कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत्॥ शणसूत्र
मयं राज्ञो वैश्यस्याविकसौत्रिकं। ऊर्ध्ववृतलक्षणमाह संग्रहकारः। कराद्दक्षिणतो नाभिगतेन त्रिगुणीकृतं। वलितं मानवे सू
त्रे शास्त्र ऊर्ध्ववृतं स्मृतं। ऊर्ध्वगतेन नाभिस्थितेन दक्षिणेन करेण यद्वलितं तदूर्ध्ववृतमित्यर्थः। उक्तोपवीताभावे देवलः। कार्पा
साद्यो मगो वाल शणवल्कतृणोद्भवं। सदासंभवतो धार्यमुपवीतं द्विजातिभिः। कुशमाश्वतरीबर्हैः तरुत्वक्। असंभ
तः। सावित्रिक्रिकृत्स्न सिल मुख्यासंभवे त्वर्थः॥ तथा। अथो दशोर्ध्वविंशसूत्रे सहतो गुलिमूलाकाराव स्पर्शसवध्यात त्रिगु

णीकृत्य यत्नतः। अब्लिंगकैस्त्रिभिः सम्यक्प्रक्षाल्योर्ध्ववृतं त्रिवृत्। सप्रदक्षिणमावृत्य सावित्र्या त्रिगुणीकृतं। ततः प्रदक्षिणाव
र्त्तं समं स्यान्नवसूत्रकं। त्रिरावेष्ट्य दृढं बध्वा ब्रह्मविष्णुशिवान्नमेत्॥ अजिनान्याह मनुः। कार्ष्णरौरववास्तानि चर्माणि ब्रह्म
चारिणः। तथा दंडानपि ब्राह्मणो बिल्वपालाशौ क्षत्रियो वटखादिरौ। पैलवौदुंबरौ वैश्यो दंडानर्हंति धर्मतः। तथा।
केशांतिको ब्राह्मणस्य दंडः कार्यः प्रमाणतः। ललाटसंमितो राज्ञः स्यात्तु नासांतिको विशः। ऋजवस्ते तु सर्वे स्युरव्रणाः सौ
म्यदर्शनाः। अनुद्वेगकरा नॄणां सत्वचो नाग्निदूषिताः। इति। यथासमयं च गायत्रीमुपदिशेत्। तीव प्रणवव्याहृतिस्त्रिर्विकी
पच्छोऽर्धर्चशस्ततः सर्वामिति। गायत्रीछंदस्कां वेदमातरं सूर्यदेवतां महाव्याहृतिपूर्विकां ब्राह्मणाय ब्रह्मचारिणे क्षत्रिया
य त्रिष्टुप्छंदस्कां बृहस्पतिदृष्टां सवितृदेवतां देवसवितरित्यादिकां वा जपाय विनियुंज्यात्। वैश्याय प्रजापतिदृष्टां जगती
छंदस्कां सवितृदेवतां रुक्मपाशप्रमोचनीं उषासं चरणे विनियुक्तां विश्वारूपाणि प्रतिमुंचते कविरित्येतां सर्वे ब्रूयात्। सावि
त्रीं वा ब्रह्मक्षत्रियविशां गायत्रीमेव ब्रूयात्। गायत्रीछंदस्कां उक्तलक्षणां। शातातपः। तत्सवितुर्वरेण्यमिति
सावित्री ब्राह्मणस्य। देवसवितरिति राजन्यस्य। विश्वारूपाणीति वैश्यस्येति। कात्यायनोऽपि। सावित्र्या ब्राह्मणमुपनयेत्।
त्रिष्टुभा राजन्यं जगत्या वैश्यं सर्वेषां वा सावित्रीति। आह लौगाक्षिः। अथ चतुर्वर्णस्वरित्युक्त्वा तत्सवितुरिति सावित्रीं त्रिरन्वाह

डाक्टर भाऊदाजी इत्याख्यस्मारकम्
Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्याख्यस्मारकम्
Dr. BHAU DAJI MEMORIAL

पश्चाद्दर्विंशाः सर्वामेतत्तदिति। अथ समिदाधानमुपनयनीगत्नूतं कर्त्तव्यं स्वस्वशाखोक्तविधिना। एवं प्रतिदिनमपि अ-
ग्निकार्यं कुर्वीत। समधावीतदनंतरमिति। सिवर्क्ष्मरणात्। तदनंतरं संध्योपासनादनंतरं। एतच्च कालद्वयेपि कार्यं।
आह याज्ञवल्क्यः॥ अग्निकार्यं ततः कुर्यात्संध्ययोरुभयोरपि। केचित्सायमेवेच्छंति। तथा चालोगाक्षिः। सायमेवाग्नि-
मिंधनमित्येके इति। मनुरपि। दूरादाहृत्य समिधः संनिदध्याद्विहायसि। सायंप्रातश्च जुहुयात्ताभिरग्निमतंद्रितः। दूरात् अ-
न्यापरिगृहीताद्देशाद्दिग्यर्थः। विहायसि। मेडपादौ। अन्यपरिगृहीतनिषेधमाहापस्तंबः। यथाकथंचित्परपरिग्रहम-
भिमन्यते। स्तेनो हि भवतीति। अत्र विशेषः स्मृत्यंतरे। पुराणमयात्वापुरीवीं दिशं गत्वा समिधमाहरेदिति। पुराणमया-
दित्यभिधानादस्तमिते निषेधः। अत एवापस्तंबः। नास्तमिते समिद्धारो गच्छेदिति। समिन्नियमो वायुपुराणे। पालाश्यः स-
मिधः कार्याः खादिर्यस्तदलाभतः। शमीरोहितकाश्वत्थास्तदभावेर्कवेतसाविति। समिल्लक्षणं कात्यायनेनाह। नांगु-
ष्ठादधिका कार्या समित्स्थूलतया क्वचित्। न वियुक्ता त्वचा चैव न सकीटा न पाटिता। प्रादेशान्नाधिका न्यूना तथा न स्याद्वि-
शाखिका॥ अथाभिवादनं॥ तत्र याज्ञवल्क्यः॥ नाम्नाभिवादयेद्वृद्धानसावहमिति ब्रुवन्। ततोग्निकार्यादनंतरमित्य- ८
र्थः। ब्रह्मपुराणे। उत्थाय मातापितरौ पूर्वमेवाभिवादयेत्। आचार्यश्च ततो नित्यमभिवाद्यो विजानता। मनुः। लौकि-

कं वैदिकं वापि तथाध्यात्मिकमेव वा। आददीत यतो ज्ञानं तं पूर्वमभिवादयेत्। अभिवादात्परं विप्रो ज्यायांसमभि-
वादयन्। असौ नामाहमस्मीति स्वं नाम परिकीर्त्तयेत्। अभिवादात् अभिवादयिष्ये तस्मादूर्ध्वं परं अमुकनामाहम-
स्मीति स्वं नाम परिकीर्त्तयेत्। विप्रग्रहणं द्विजात्युपलक्षणार्थं। आपस्तंबः। दक्षिणं बाहुं श्रोत्रसमं प्रसार्य ब्राह्मणोभि-
वादयेत्। उरःसमं राजन्यो मध्यसमं वैश्यो नीचैः शूद्रः प्रांजलिः। सर्वत्र मनुः। भोःशब्दं कीर्त्तयेदंते स्वस्य नाम्नोभिवादने।
नाम्नां स्वरूपभावो हि भोभाव ऋषिभिः स्मृतः। आयुष्मान्भव सौम्येति वाच्यो विप्रोभिवादने। अकारश्चास्य नाम्नोंते वा-
च्यः पूर्वाक्षरः प्लुतः। भोःशब्दो नाम्नां स्वकीयानां स्वरूपभावः स्वरूपस्य संबोध्यं प्रति प्रापकहेतुः। अयमर्थः। भोःशब्देन हि बोधि-
तोसावस्य नाम बुध्यत इति। अत्र भूधातुः प्राप्त्यर्थः। भोभाव इति पाठे भोःशब्दस्य भावः सत्ता। आयुष्मान्भव सौम्येति वाक्यस्यां-
ते अस्याभिवादकस्य नामवाच्यं विष्णुशर्मन्निति तस्यांते अकारो वाच्यः। तस्याकारस्य पूर्वाक्षरः प्लुतः। पूर्वस्मिन्प्लुते छां-
दसो लिंगव्यत्ययः। यद्यपि पूर्वाक्षरं नकारस्तथापि तस्य व्यंजनत्वेन प्लुतत्वायोगात् तच्छर्मन्नित्यत्र योयमकारः स एव पूर्व-
पदाभिधेय इति। नास्त्येव प्लुतता। पूर्वाक्षरः प्लुत इत्यत्र पाठः। तत्र पूर्वस्मिन्प्लुत मस्येति वक्तुरस्य। अथवा अकारश्चास्य ना-
म्नोंते नरस्य तस्यायमर्थः। अस्याभिवादकस्य नाम्नोंते योयमकारः। अकार इति स्वरमात्रोपलक्षणं। सर्वेषां नाम्नामकारांत-

१५२

च्च नियमाभावात्। स एवांत्यस्वरः पूर्वाद्वैरः प्लुत्वाणिनामगतान्यक्षराणि यस्य स तथोक्तः। एवंविधः प्लुतो वाच्यो न पुनरत्य
एवाकारानामीनवाच्य इति। तथा च वसिष्ठः। आमंत्रिते स्वरोंत्यास्य प्लवत इति। आमंत्रितकर्तृत्वज्ञ अभिवादकनाम्नोंऽ
त्यः स्वरः स प्लवते त्रिमात्रो भवतीत्यर्थः। न तत्राभिवादनप्रत्यभिवादनयोरवैप्रयोगो भवति। अभिवादयीवे
त्रनामाहमस्मि भो इति। आयुष्मान्भव सौम्य विष्णुशर्म्मन् इति। अथवा आयुष्मान्भव सौम्य विष्णुशर्मन् इति।
क्षत्रियवैश्ययोश्च वर्म्मगुप्तशब्दप्रयोगः। यत्तु स्वनामगृहीत्वा भवति। आत्मनामगुरोर्नाम नामातिकृपणस्य चायुष्का | यत्रा
म्यानगृह्णीयाज्ज्येष्ठपुत्रकलत्रयोः। इत्यादिविधिनिषेधोऽस्त्वभिवादनव्यतिरिक्तस्थलविषय इति विज्ञेयं। एतच्चाभिवा
दनं हस्तद्वयेन कर्तव्यं। अन्यथाकरणे विष्णुना दोषसंकीर्तनात्। जन्मप्रभृति यत्किंचिच्चेतसा धर्ममाचरेत्। सर्वं तन्निष्फ
लं याति एकहस्ताभिवादनादिति। एतदपि विद्वद्विषयं। यतस्स एवाह। अजानत्सु न विदुषीमूर्खाणामकपाणिनेति। अजाक
र्मिन श्रोत्रसामोकारोन्त्यापुनःस्त्री प्लुतितन करद्वयानत्यर्थः। त्रिःपिबाजाकस्मैसि प्लुटितोयथा। तथैव स्प्लुटिनेकरद्वयम | श्रीः ३
पीत्यनकर्णोक्तिः। प्रत्यभिवादानपि दीक्षितस्य नामग्राह्यं। तथा च मनुः। अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत्। भो
भवत्पूर्वकं चैनमभिभाषेत धर्मवित्। सोदीक्षित भवन्दीक्षित इति। सोमवत्पूर्वकं यौगिकैः शब्दैरेनं प्रत्यभिवादनादिष्वभिभाषेतेत्यर्थः।

यान्तवर्णस्याभिवादस्य विप्रः प्रत्यभिवादनं॥ नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः। यमः॥ अभिवादजयो विप्रआ
शिषं न प्रयच्छति। श्मशाने जायते वृक्षः काकगृध्रादिसेवितः। शातातपः। पाषंडं पतितं व्रात्यं महापातकिनं शठं। सोपा
नत्कं कृतघ्नं च नाभिवादयेत् क्वचन। धावंतं च प्रमत्तं च मूत्रोच्चारकृतं तथा। भुंजानमाचमार्हं च नास्तिकं नाभिवादयेत्। वमं
तं जृंभमाणं च कुर्वंतं दंतधावनं। अभ्यक्तशिरसं चैव स्नांतं चैव नाभिवादयेत्। बृहस्पतिः। उपयज्ञगणं स्मृत्वा समित्पुष्पकुशान
लान्। उदपात्रं त्वपि भैक्षान्नं वहंतं नाभिवादयेत्। उदक्यां सूतिकां नारीं भर्तृघ्नीं ब्रह्मघातिनीं। अभिवाद्य द्विजो मोहाद्दहोरात्रेण
शुध्यति। जमदग्निः॥ देवताप्रतिमां दृष्ट्वा यतिं दृष्ट्वा त्रिदंडिनं। नमस्कारं न कुर्याच्चेत्प्रायश्चित्ती भवेन्नरः। मनुः। अभिवादनशी
लस्य नित्यं वृद्धोपसेविनः। चत्वारि तस्य वर्द्धंत आयुः प्रज्ञा यशो बलं। एतच्चाभिवादनमधिकवयसामेव कार्यं। तथा च मनुः॥
ज्यायांसमभिवादयेदिति॥ अत एव गौतमः। ऋत्विक्श्वशुरपितृव्यमातुलानां यवीयसां प्रत्युत्थानमभिवाद्या इति। ज्याय
स्त्वं क्रियतां कालं नाचष्टे आयौ। मनुः। दशाब्दाख्यं पौरसख्यं पंचाब्दाख्यं कलाभृतां। त्र्यब्दपूर्वं श्रोत्रियाणां स्वल्पेनापि स्वयोनि
षु। दशाब्दपर्यंतमाख्यायत इति दशाब्दाख्यं। एवं पंचाब्दाख्यमिति। व्यत्ययेनैकविधानमिति कश्चित्। पौरवाः पौराः। एकपु
रनिवासिनो विद्याहीनानां दशभिर्वर्षैः पूर्वैः सख्यं भवति। तादृशानां ज्यायान्। कलाभृतां गीतादिविद्यावतां पंचाब्दपूर्वं

वः शिखा॥ श्रोत्रियाणां वेदाध्यायिनोऽत्यन्तं प्रवृद्धः॥ तात्ताऽधिकाऽध्यायान्॥ स्वयोनिक्षुत्वात्रादिषु स्वल्पेनापि कालेन एकदिनम्
र्वत्रिनापि ज्येष्ठता॥ एकदिनजातत्वेत्र सखा॥ तदुक्तमापस्तंबेन॥ वयस्यः समानेह्नि जात इति॥ ७॥ अथ प्रसंगात् गुर्वादि
लक्षणं॥ तत्र याज्ञवल्क्यः॥ स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति॥ उपनीय ददद्वेदमाचार्यः स उदाहृतः॥ एकदेशमुपा
ध्यायः ऋत्विक् यज्ञकृदुच्यते॥ एते मान्या यथापूर्वमेभ्यो माता गरीयसी॥ मनुः॥ उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः॥ स
कल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥ एकदेशं तु वेदस्य वेदांगान्यपि वा पुनः॥ योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उ
च्यते॥ वेदस्यैकदेशं संहितां ब्राह्मणं वा वेदांगमात्रं वा धर्मार्थमध्यापयति॥ अपरिभाषितवृत्त्यभिसंधानेन वा पूर्वोक्त
मध्यापयति॥ एतेन यो वृत्त्युपाध्यायादन्यः॥ निषेकादीनि कर्माणि यः करोति यथाविधि॥ संभावयति चान्नेन स विप्रो गुरुरुच्य
ते॥ विप्रपदं पित्रुपलक्षणं॥ अत्रास्थानेन विधिः पितेव न गुरुरिति गम्यते॥ अग्न्याधेयं पाकयज्ञान् अग्निष्टोमादिकान्मखान्॥ यः करो
ति वृतो यस्य स तस्य र्त्विगिहोच्यते॥ तथा॥ उपाध्यायान्दशाचार्य आचार्याणां शतं पिता॥ सहस्रं तु पितॄन्माता गौरवेणातिरिच्यते॥
उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता॥ ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतं॥ ब्रह्मजन्म निब्रह्मणो वेदाज्जन्म उपन १०
यनं॥ प्रेत्यामात्रसाधनपर्यंतयोत्पत्यतापादकत्वात्॥ इह च सर्वकर्माधिकारापादकत्वात् शाश्वतं स्थायिफलं भवति॥ अल्पं वा बहु वा यस्य

श्रुतस्योपकरोति यः॥ तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तया॥ ब्राह्मस्य जन्मनः कर्ता स्वधर्मस्य च शासिता॥ बालोपि
विप्रो वृद्धस्य पिता भवति धर्मतः॥ विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः॥ धनधान्येन वैश्यानां शूद्राणामेव जन्मतः॥
॥ ७॥ अथ भिक्षाचरणं॥ तत्र याज्ञवल्क्यः॥ आदिमध्यावसानेषु भवच्छब्दोपलक्षिता॥ ब्राह्मणक्षत्रियविशां भैक्षचर्या यथाक्र
मं॥ भैक्षं भिक्षाकदंबकं॥ भिक्षादिभ्योऽण्॥ मनुः॥ प्रतिगृह्येप्सितं दंडमुपस्थाय च भास्करं॥ प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथा
ध५ विधि॥ ईप्सितं यथा स्याद्विहितं॥ वचनांतरप्रतिनियतदंडविधानादनेन विजातीयग्रहणनिषेधः॥ भास्करं सौरमंत्रैरुप
स्थाय॥ अग्निं प्रदक्षिणीकृत्य परित्रितयं भिक्षांगं विधाय यथाविधि वक्ष्यमाणविधिना भिक्षेताचरेत्॥ भवत्पूर्वं चरेद्भैक्षमु
पनीतो द्विजोत्तमः॥ भवन्मध्यं तु राजन्यो वैश्यस्तु भवदुत्तरं॥ आचरदित्यनेन याञ्चा लक्ष्यते॥ अस्तु मेवार्थं याचनयति॥ भैक्षमि
तिकर्म विचक्षणान्न चार्थसिद्धा भिक्षां देहीति वाक्यरचना॥ तत्र च सा गौरवसंबोधनार्थं भवत्पदमादिमध्यावसानेषु ब्राह्म
णादिभिः क्रमेण कार्या॥ तत्र संबुध्येतां॥ प्रायशो गृहमेधिनीगृहस्त्रिय एव भिक्षां ददतीति सामर्थ्यात् स्त्रीप्रत्ययवत् तत्पदं
भवति॥ तत्रायं प्रयोगः॥ भवति भिक्षां देहीति ब्राह्मणः॥ भिक्षां भवति देहीति क्षत्रियः॥ भिक्षां देहि भवतीति वैश्यः॥ नायं निय
मः स्त्रिय एव भिक्षणीया इति॥ अत एवाह शौनकः॥ अप्रत्याख्यायिनमग्रे भिक्षेताप्रत्याख्यायिनीं वेति॥ भिक्षाचरणे विशेषमा

दंडं याज्ञवल्क्यः ॥ ब्राह्मणेषु चरेद्भैक्षमनिंद्येष्वात्मवृत्तये इति । भैक्षं चरन् । भैक्षं प्राप्नुयादित्यर्थः । आत्मवृत्तये
स्वशरीरयात्रार्थमेव नाधिकं । यदा चाचार्यः सीदति निर्धनादिविकलस्तदा तत्पोषणायापि भैक्षं चरेत् । अन्यथा प्रधान
स्यैव वेदाध्ययनविरोधात् । ब्राह्मणेषु चरेदित्येतद् ब्राह्मणविषयं । अत एव व्यासः । ब्राह्मणक्षत्रियविशां चरेद्भैक्षमन्वहं ।
सजातीयगृहेष्वेव सार्ववर्णिकमेव वा । इति । सर्वशब्दः प्रकृतवर्णत्रयपरः ॥ नायमैच्छिकः विकल्पः । अपि तु व्यवस्थितविक
ल्पः । तथा च भविष्यपुराणे । सर्वं वा विचरेद्ग्रामं पूर्वोक्तानामसंभवे । आर्यवर्जं सदा त्यागी इति । आर्यः शूद्रः । उक्तेष्वपि वि
दपवादमाह मनुः ॥ गुरोः कुले न भिक्षेत न ज्ञातिकुलबंधुषु । ननु मातरं वा स्वसारं वा मातुर्वा भगिनीं निजां ॥ भिक्षेत भिक्षां प्रथ
ममित्यनेन विरोधः स्यादिति चेन्मैवं । एतदुपनयनांगभिक्षाविषयं । पूर्वोक्तं तु नित्यभिक्षाविषयं । एवं भिक्षां निर्वर्त्य ब्र
ह्मचारी गुरवे भैक्षं निवेद्य अहःशेषं वा यतः तिष्ठेत् । आसीनः शयानो वा न भवेत् ॥ छ ॥ ततः सायं संध्यां विधाय यस्मिन्नुप
नयनहोमो विहितस्तस्मिन्नग्नौ समिधस्त्र्यग्न्युक्तप्रकारेणाधाय वारं विसृजेत् । ततश्च तद्भैक्षं भुंजीत । तत्र याज्ञ
वल्क्यः । कृताग्निकार्यो भुंजीत वाग्यतो गुर्वनुज्ञया । आपोशानक्रियापूर्वं सत्कृत्यान्नमकुत्सयन् । अस्यार्थः । आपस्तरणमसीच्या ११
दिका आपोशानक्रिया । तां पूर्वं कृत्वा भुंजीतेत्यर्थः । गौतमः । सायंप्रातस्त्वन्नमभिपूजितमनिंदन् भुंजीतेति । सायंप्रातरि

त्यनेन मध्ये भोजननिषेधः । तथा च श्रुतिः । सायंप्रातराशयवेत्स्यादिति । तत्र वसिष्ठः । अष्टौ ग्रासा मुनेर्भक्तं वानप्र
स्थस्य षोडश । द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणः । भोक्तृनियममाह ॥ मनुः ॥ आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षि
णामुखः । श्रियं प्रत्यङ्मुखो भुंक्ते ऋतं भुंक्ते उदङ्मुखः ॥ आयुषे हितमायुष्यं । यशसे हितं यशस्यं । श्रियमिच्छन् ऋतमिच्छन्निति च
यः । पात्रनियमो हारीतेनोक्तः । लौहे मृन्मये वा पात्रे भुंजीतेति । तच्च स्वयमेव प्रक्षालयेत् । उच्छिष्टस्य ममत्वं प्रक्षालयेदि
त्यापस्तंबस्मरणात् । एवं नित्येन व्रतेन नियममित्युक्तं तत्रापवादमाह याज्ञवल्क्यः । ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपी
डयन्निति । व्रतमपीडयन् मधुमांसादि वर्जयेदित्यर्थः । अकामोपपन्ने मधुमिश्रादोषमाह वसिष्ठः । अकामोपनतं मधु वाज
सनेयिनो न दुष्यतीति । उपनयनकालस्य परमावधिमाह मनुः । आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्तते । आद्वाविंशात्क्ष
त्रियस्य आचतुर्विंशतेर्विशः ॥ अत ऊर्ध्वं त्रयोप्येते यथाकालमसंस्कृताः ॥ सावित्रीपतिता व्रात्या भवंत्यार्यविगर्हिताः । उक्तप
रमावध्यतिक्रमेपि व्रात्यस्तोमरूपप्रायश्चित्तानंतरं संस्कार्या एव । तथा च याज्ञवल्क्यः ॥ सावित्रीपतिता व्रात्या व्रात्यस्तो
मादृते क्रतोः ॥ इति ॥ छ ॥ तथान्यापि विशेषः स्मृत्यंतरे ॥ षंढांधबधिरस्तब्धजडगद्गदपंगुषु । कुब्जवामनरोग्यार्त्त
क्लीवांगविकलांगिषु । मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिंद्रिये । ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितं । यथोचितं । यास्मि निआ १

नंसंस्कारेक्रियमाणेतद्विहितकर्मसुसमर्थोभवति।तैःसंस्कारैःसंस्कार्यइत्यर्थः॥अकोन्यत्रोनसंस्कार्योविधेयके।एतेषा
मेसंस्कृतानामपिपातित्यैनास्तिकर्मस्वनधिकारात्॥तदपत्यैसुसंस्कार्यमिवाब्राह्मण्यांब्राह्मणेनोत्पन्नोब्राह्मणएवेति
श्रुतेः।अत्रब्राह्मणग्रहणात्क्षत्रियादीनामप्युपलक्षणम्।असंस्कृतानांपितातिमात्रस्यानपायात्।ब्राह्मणएवभवति।द्विजा
तिरित्यर्थः।स्त्रीणांतुविवाहएवोपनयनं।तथाचमनुः॥वैवाहिकोविधिःस्त्रीणामौपनायनिकःस्मृतइति।यत्तुहारीते
नोक्तं।द्विविधाःस्त्रियोब्रह्मवादिन्यःसद्योवध्वश्च।तत्रब्रह्मवादिनीनामुपनयनमग्नीन्धनंवेदाध्ययनंस्वगृहेचभिक्षाचर्येति।स
द्योवधूनांतूपस्थितेविवाहेकथंचिदुपनयनमात्रंकृत्वाविवाहःकार्यइति॥तत्कल्पान्तराभिप्रायं।पुराकल्पेकुमारीणांमौंजीब
धनमिष्यते।अध्यापनंचवेदानांसावित्रीवचनंतथेति।यमस्मरणात्॥यदातुमेखलादीनित्रुटितानि।तदातेषांप्रतिपत्ति
कर्ममनुनाविहितं।मेखलामजिनंदंडमुपवीतंकमंडलुं।अप्सुप्रास्यविनष्टानिगृह्णीयान्यानिमंत्रवदिति॥यस्यगृह्ये
मंत्रउदितस्तन्मंत्रवत्तस्याहीं।इत्युपनयनं॥७॥अथब्रह्मचारिनियमाः।तत्रयाज्ञवल्क्यः॥मधुमांसांजनोच्छिष्टशुक्तस्त्रीप्रा
णिहिंसनं।भास्करालोकनाश्लीलपरिवादादिवर्जयेत्।मांसवर्जनंव्याधिराहित्येविदितंवी।तथाचवशिष्ठः।मांसवध्याधिको १२
गुरुरुच्छिष्टंशाधयेमौषधार्थंसर्वंप्राश्नीयादिति।व्याधीयतव्याधिमान्मनुः।वर्तीयथीअंजनं।तैलादिनाशरीरस्य।कज्जला

यात।२

=बो१

दिना।नेत्रयोः।एतन्निषिद्धंचौषधादन्यत्र।तथाचस्मर्यते।अष्टौतान्यव्रतघ्नानिआपोमूलंफलंपयः।हविर्ब्राह्मणका
म्यागुरोर्वचनमौषधमिति।उच्छिष्टंगुरुव्यतिरिक्तस्यपरस्परवर्जयेत्।तथाचवशिष्ठः।उच्छिष्टमगुरोरभोज्यंस्वमु
च्छिष्टमुच्छिष्टोपहितंचेति।गुरुस्तूक्तत्वाद्गोणोनिषेकादिकृत्।शुक्तंपरुषंवचः।पशूनांविनाकन्याजनोभावेनतद्विषयप्रेक्षणालि
ङ्गनालम्बनात।तथाचगौतमः।स्त्रीप्रेक्षणालंभनेमिथुनशंकायामिति।भास्करालोकनंतुमनुनाविशेषादर्शितः॥नादी
ताद्यंतमादित्यंनास्तंयातंकदाचन।नोपसृष्टंनवारिस्थंनमध्यंनभसोगतमिति।अश्लीलंमिथ्याभाष्यवचः।परिवादः।स
दसद्रूपपरदोषप्रकाशनं॥आदिशब्दाद्गंधमाल्यादिनिषेधः॥मनुः।वर्जयेन्मधुमांसंचगंधमाल्यंरसान्स्त्रियः।शुक्तानि
चवसर्वाणिप्राणिनांचैवहिंसनं।अभ्यंगमंजनंचाक्ष्णोरुपानच्छत्रधारणं।कामंक्रोधंचलोभंचनर्तनंगीतवादनं।द्यूतं
चजनवादंचपरिवादंतथानृतं।स्त्रीणांचप्रेक्षणालंभमुपघातंपरस्यच।एकःशयीतसर्वत्रनरेतःस्कंदयेत्क्वचित्।कामाद्धि
स्कंदयन्रेतोहिनस्तिव्रतमात्मनः।व्रतेब्रह्मचर्याख्येभिक्षाब्रह्मचारीद्विजःशुक्रमकामतः।स्नात्वार्कमर्चयित्वात्रिःपुन
र्मामित्यृचंजपेत्।पुनर्मामैत्विंद्रियमितिस्मादनसोविध्यान्तुचत्वःहसः।यदिदिवायदिनक्तमेनांसिचकृमावयमिति।इंद्रियाणां
विचरतांविषयेष्वपहारिषु।संयमेयत्नमातिष्ठेद्विद्वान्यंतेववाजिनां।बुद्धींद्रियाणिपंचैषांश्रोत्रादीन्यनुपूर्वशः।कर्मे

द्रियाणि पंचैव पाय्वादीनि प्रचक्षते॥एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकं।यस्मिन्जिते जितावेतौ भवतः पंचकौ
गणौ।इंद्रियाणां प्रसंगेन दोषमृच्छत्यसंशयं॥सन्नियम्य तु तान्येव ततः सिद्धिं नियच्छति।न जातु कामः कामानामुप
भोगेन शाम्यति।हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते।यश्चैतान्प्राप्नुयात्सर्वान्यश्चैतान्केवलांस्त्यजेत्।प्रापणा
त्सर्वकामानां परित्यागो विशिष्यते।न तथैतानि शक्यंते नियंतुमसेवया।विषयेषु प्रदुष्टानि यथा ज्ञानेन नित्यशः।इं
द्रियाणां तु सर्वेषां यद्येकं क्षरतींद्रियं।तेनास्य क्षरति प्रज्ञा दृतेः पादादिवोदकं।वशे कृत्वेंद्रियग्रामं संयम्य च मनस्तथा।
सर्वान्संसाधयेदर्थानक्षिण्वन्योगतस्तनुं।सेवेतेमांस्तु नियमान्ब्रह्मचारी गुरौ वसन्।संनियम्येंद्रियग्रामं तपोवृद्ध्यर्थ
मात्मनः।इंद्रियाणां विचरतामित्यादयोन्ये निहिता धर्म्मा नाकवले ब्रह्मचारिणः॥अपि चैतेरेषामपि भवंति॥७॥अथोत्सर्ग ब्रा०५
विधिः।तत्र विष्णुः।ब्राह्मे मुहूर्त्ते उत्थाय मूत्रपुरीषं कुर्यादिति।ब्राह्ममुहूर्त्तलक्षणमपि नामदेवाह।रात्रेस्तु पश्चिमे यामे मु
हूर्त्तो ब्राह्म उच्यते॥इति।पश्चिमे यामे पश्चिमार्द्धप्रहरे ब्राह्मो मुहूर्त्त इत्यर्थः।अंगिराः।उत्थाय पश्चिमे यामे रात्रेराचम्यावाद
की।अंतर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा।वाचं नियम्य यत्नेन निष्ठीवोच्छ्वासवर्जितः।कुर्यान्मूत्रपुरीषे तु शुचौ देशे समा १२
हितः॥इति॥आवश्यकावापाद्यावमननिमित्तं सति।तृणैरयज्ञियैः।तृणग्रहणं काष्ठादेरप्युपलक्षणार्थं।तिरस्कृत्योच्चारं तु का १३

ष्ठपत्रलोष्ठतृणानि वा।मनुस्मरणात्।पराशरः।ततः प्रातः समुत्थाय कुर्याद्विण्मूत्रमेव च।नैर्ऋत्यामिषुविक्षेपमती
त्याभ्यधिकं भुवः।यामात्क्रमशतं गच्छेन्नगराच्च चतुर्गुणं।इति॥याज्ञवल्क्यः॥दिवासंध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः।
कुर्यान्मूत्रपुरीषे तु रात्रौ च दक्षिणामुखः।यमः॥ प्रत्यङ्मुखस्तु पूर्वाह्णे अपराह्णे प्राङ्मुखस्तथा।उदङ्मुखस्तु मध्याह्ने निशायां
दक्षिणामुखः॥देवलोपि॥ सदैवोदङ्मुखः प्रातः सायाह्ने दक्षिणामुखः।विण्मूत्रमाचरन्नित्यं संध्यासु परिवर्जयेत्।सं
ध्यासु वर्ज्जनं निरुद्धेतरविषयं।नावगेधारयान्नापरुद्धः क्रियां कुर्यादिति मनुस्मरणात्।दिङ्नियमविकल्पो वदितव्यः।य
थमनुना चोक्तं।छायायामंधकारे वा रात्रावहनि वा द्विजः।यथासुखमुखः कुर्यात्प्राणबाधाभयेषु वेति।तन्नीहाराद्यंधका
रजनितदिङ्मोहविषयं॥विष्णुः।ब्राह्मणस्य समाविष्टपिचामृद्धारीग्रीवायामासाज्याद्धारत्।मृद्धारी मृत्तिकाधारी।ग्रीवायाम
शक्तौ न मासज्या।अंगिराः।स्वाययज्ञोपवीतं तु पृष्ठतः कंठलंबितं।विण्मूत्रे तु गृही कुर्याद्यद्वा कर्णे समाहितः।कर्णनिधानाम
कवस्त्रविषयं॥तथा च सांख्यायनगृह्ये॥यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा मूत्रपुरीषं कुर्यादिति।हारीतः।उच्चारमै
थुने चैव प्रश्रावे दंतधावने।स्नानभोजनकाले तु षट्सु मौनं समाचरेत्।उच्चारः पुरीषोत्सर्गो विष्णुपुराणे।दूरादावसथान्मू
त्रं पुरीषं च विसर्जयेत्।पादावसेचनोच्छिष्टं न क्षिपेच्च गृहांगणे॥इति॥ अंतर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा॥

वाचं नियम्य यत्नेन निष्ठीवोच्छ्वासवर्जितः॥ मनुः। वाय्वग्निविप्रमादित्यमपः पश्यंस्तथैव गाः॥ न कदाचित्कुर्वीत विण्मू
त्रस्य विसर्जनं॥ पश्यन्न सन्मुखः। न फालकृष्टे न जले न चित्यां न च पर्वते। न जीर्णदेवायतने न वल्मीके न शा
द्वले न ससत्त्वेषु गर्तेषु न गच्छन्नपि च स्थितः। न नदीतीरमासाद्य न भस्मनि न गोमये। न च पर्वतमस्तके इति। पाठे
पूर्वस्य पर्वतग्रहणेनैव तन्मस्तकसिद्धावपि पुनर्ग्रहणाद्दोषाधिक्यं ध्याप्यते। तद्भावे अत्यन्तमपि पर्वते दोषाभा
वप्रतिपादनार्थमित्यके। विष्णुपुराणे॥ उत्सर्गे वै पुरीषस्य मूत्रस्य च विसर्जने। तिष्ठेन्नातिचिरं तत्र न च किंचिदुदीरये
त्। भरद्वाजः॥ अपकृष्य च विण्मूत्रं काष्ठलोष्टतृणादिना। उदस्तवासा उत्तिष्ठेद्दृढं विधृतमेहनः॥छ॥ अथ शौचविधिः॥ ॥ या
ज्ञवल्क्यः॥ गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः॥ गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः॥ उद्धृतैरिति जलान्तर्निषेधः।
गंधलेपक्षयकरमिति सार्वधीसाधारणं शौचं। वक्ष्यमाणमृत्संख्यानियमस्त्वदृष्टार्थः। दक्षः॥ शौचे यत्नः सदा कार्यः शौच
मूलो द्विजः स्मृतः। शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः॥ यमः। आहरेन्मृत्तिकां प्राज्ञः कूलात्ससिकतां तु या। कूलश्र
दणमनुपहतादेशोपलक्षणार्थं। वापीकूपतडागेभ्यो नाहरेद्बाह्यतो मृदं। आहरेज्जलमध्यात्तु परतो मणिबंधनात्। शाता २४
तपः। मृद्विदेशात्तु संग्राह्या शर्करास्मादिवर्जिता॥ रक्ता गौरा तथा श्वेता मृत्तिका त्रिविधा स्मृता। कश्यपः। विप्रे गौरा मृदः प्रो

त्रमा

क्ताः क्षत्रे रक्तास्तथोदिताः। वैश्यस्य हरिताः प्रोक्ताः कृष्णाः स्त्रीशूद्रयोस्तथा॥ विष्णुपुराणे। वल्मीकमूषिकोत्खातां मृदं नांत
र्जलात्तथा॥ शौचावशिष्टां गेहाच्च मृदः शौचविवर्जिताः॥ विष्णुः॥ अंतःप्राण्यवपन्नां च हलोत्खातां न त्वाहरेत्। मनुः॥ आहृता
मन्यशौचार्थं वालुकां पांशुरूपिणीं। न मार्गान्न च श्मशानान्नाद्यानां दध्याद्भुक्ताः कचित्। तथा। यस्मिन्देशे तु यत्तोयं या च यत्रैव मृ
त्तिका। सैव तत्र प्रशस्ता स्यात्तया शौचं विधीयते। मृत्संख्यानियममाह दक्षः। एका लिंगे करे तिस्र उभाभ्यां मृद्द्वयं स्मृतमिति
कारस्याध्या। एतच्च मूत्रशौचविषयं। एका लिंगे करे सव्ये तिस्रो द्वे हस्तयोर्द्वयोः। मूत्रशौचं समाख्यातं शुक्रे तु द्विगुणं तावदिति।
शातातपस्मरणात्। विट्शौचस्य तु मनोक्तो विशेषः। एका लिंगे गुदे तिस्रस्तथैकत्र करे दश। उभयोः सप्त दातव्या मृदः शुद्धिम
भीप्सता। एतच्च विशिष्टशौचपर्यवस्यति। पुरीषोत्सर्गे मूत्रोत्सर्गस्य नान्तरीयकत्वात्। विष्णुपुराणे। एका लिंगे गुदे तिस्रो दश
वामकरे तथा। उभयोः सप्त दातव्या मृदः शौचापपादिकाः। यमदक्षौ। एका लिंगे मृत्तिके द्वे गुदे पंच करे दश। उभयोः सप्त
दातव्या इति॥ शंखः। मेहने मृत्तिकाः सप्त लिंगे द्वे परिकीर्तिते। एकस्मिन्विंशतिर्हस्ते द्वयोर्ज्ञेयाश्चतुर्दश। तिस्रस्तु मृत्तिका
देयाः कर्तुर्विनखशोधने। तिस्रस्तु पादयोर्ज्ञेयाः शौचकामस्य सर्वदा॥ शौचमेतद्गृहस्थानां तथा उरुनिवासिनां। द्विगुणी
स्याद्वनस्थानां यतीनां त्रिगुणी स्मृता। मृत्तिकास्तु समादिष्टास्त्रिपर्वपूर्यातयेति। अत्र मृत्तिकाधिक्यं तन्मूत्रपुरीषानिर्हा

रणे श्री कार्या॥ यदा चेवमपि गंधालेपक्षयो न भवति। तदा तत्संख्यातिक्रमेणापि कार्या। तथा च मनुः॥ यावन्नापैत्यमेध्याक्ताग
धो लेपश्च तत्कृतः। तावन्मृद्वारि चादेयं सर्वासु द्रव्यशुद्धिषु इति। हस्तशौचे तु हारीतोक्तो विशेषः। दश सप्त षट् पृष्ठे सप्तान्त
न्यो तिसृभिः पादौ प्रक्षालयेदिति। हृष्टे सव्यपश्चाद्भागे। लिंगशौचे तु मृत्प्रमाणमाह दक्षः। लिंगे तु मृत्समाख्याता त्रि
पर्वपूर्यते यया इति। विट्शौचे तु मनुः। अर्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता। द्वितीया तु तृतीया च तदर्धार्धा प्रकी
र्तिता॥ एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणां। वानप्रस्थस्य त्रिगुणं यतीनां च चतुर्गुणं। न्यूनाधिकेन कर्तव्यं शौचं शु
द्धिमभीप्सता। प्रायश्चित्तेन युज्येत विहितातिक्रमे कृते। वाधूलः। तीर्थे शौचं न कुर्वीत कुर्वीतोद्धृतवारिणा। कथमप्युद्ध
रणाशक्तावादित्यपुराणे। रत्निमात्रं जलं त्यक्त्वा कुर्याच्छौचमनुद्धृते। पश्चात्तच्छोधयेत्तीर्थमन्यथा चाशुचिर्भवेत्। दक्षः। यद्दि
वा विहितं शौचं तदर्धं च निशि स्मृतं। तदर्धमातुरे प्रोक्तमातुरस्यार्धमध्वनि। आदित्यपुराणे। स्त्रीशूद्रयोरर्धमानं शौचं प्रो
क्तं मनीषिभिः। यो विण्मूत्रयोरुत्सर्जनाय प्रविष्टः सन्न करोति। तस्याप्यर्धशौचं। आह वृद्धपराशरः। उपविष्टस्तु विण्मूत्रं क
र्तुं यस्तु न विंदति। स कुर्यादर्धशौचं तु स्वस्य शौचस्य सर्वदा इति। यत्र संख्याया विषमत्वेनार्धकरणासंभवस्तत्र मध्या मृ १५
दर्धपरिमाणा ग्राह्या। आतुरः कुर्याद्यथाशक्ति स्वस्थः कुर्याद्यथोदितं। बालस्यानुपनीतस्य गंधलेपक्षयावधि। वृद्धपराशरः। अ

द्या। द

अरण्ये निर्जले रात्रौ चौरव्याघ्राकुले पथि। कृत्वा मूत्रपुरीषं वै द्रव्यहस्तो न दुष्यति। मृद्वारिके हस्ते धारयित्वा न दुष्य
तीत्यर्थः। अन्ये तु द्रव्यहस्तो न दुष्यतीत्यस्यान्यथार्थं वर्णयंति। एवंविधस्थलेऽदनीयद्रव्यं हस्ते यदा चामूत्रपुरीषकर
णापि तद्द्रव्यं शुद्धमेव भवति। न द्रव्यं हस्तस्पृष्टं शौचावमननात् अशुद्धं भवतीत्यर्थः। भोजनकाले तु दक्षो विशेषमाह बृहस्प
तिः। भुंजानस्य तु विप्रस्य कदाचित्स्रवते गुदं। उच्छिष्टमशुचिर्वापि तस्य शौचं विधीयते। पूर्वं कृत्वा तु शौचं तु ततः पश्चादु
पस्पृशेत्। ततः शुद्धोपवासेन पंचगव्येन शुध्यतीति। विण्मूत्रादुपलक्षणार्थं शौचे हस्तनियममाह। धर्मविद्दक्षिणं
हस्तमधःशौचे न योजयेत्। तथा च वाममुद्धरणं नाभेरूर्ध्वं नाशाधयेत्। अत्रेदं विचारणीयं॥ विण्मूत्रयोर्मिलितयोः क
रणे। एका लिंगे गुदे तिस्र इत्येतच्छौचं प्रवर्तेत। अहोस्वित्प्रत्येककरणे पाति। प्रत्येककरणे तावत्पुरुषः। केवलमूत्रोत्सर्गे
प्राप्तात् एव वचनविरोधात्। वचनं तु। एका लिंगे करे सव्ये तिस्रो द्वे हस्तयोर्द्वयोः। मूत्रशौचं समाख्यातमिति। अथ केवलपुरी
षोत्सर्गविषयत्वमुच्यते। लिंगशौचनिमित्ताभावेपि नैमित्तिकं तच्छौचमापद्यते। सेत्युक्ते। अदृष्टार्थप्रसंगात्। वचनाद
स्थिति चेतान एका लिंगे इत्यस्य शौचस्य केवलमूत्रोत्सर्गविषयत्वे नोपपन्नः। अगतिका हीयं गतिः। यददृष्टकल्पना। अ
तोर्धशिष्टोऽस्य एवेति युक्तं। तत्रापि लिंगशौचे पूर्वं वचनं प्रतीत क्रमातिक्रमकरणाभावात्। संनिहितत्वात्। प्रथमं तए

तदंकरणे साक्षान्मूत्रालपस्य मलित्वं योपरित्यागोपि ससंक्रमसाक्षाद्स्य पादादिशौचं तु नैव गणे वा। देशकालकाङ्क्षी
कर्तव्यं शौचं रूपापकारस्यैकत्वाच्च। अत्र विण्मूत्रव्यतिरिक्तशारीरमलशौचं॥ मनुः। ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि
सर्वशः। यान्यधस्तान्यमेध्यानि देहाच्चैव मलाश्च्युताः। खानि इंद्रियछिद्राणि मलानपि स एवाह। वसा शुक्रमसृङ्मज्जा
मूत्रविड्घ्राणकर्णविट्। श्लेष्माश्रुदूषिकास्वेदो द्वादशैते नृणां मलाः। वसा कायस्नेहः। मज्जा शिरास्नवस्नेहः। कर्णविट्
कर्णमलः। दूषिका अक्षिमलः। एतेषु पर्यात बौधायनः प्राह॥ आददीत मृदोऽपश्च षट्सु पूर्वेषु शुद्धये। उत्तरेषु तु षट्स्वद्भिः के-
वलाभिर्विशुध्यति॥ मनुस्तु। विण्मूत्रोत्सर्गशुद्ध्यर्थं मृद्वार्यादेयमर्थवत्। दैहिकानां मलानां च शुद्धिषु द्वादशस्वपीति। विण्मूत्र
मुत्सर्गापातयनतन्नाद्दशौ। तच्छुद्ध्यर्थं अर्थवत् प्रायोजनवत्। एवं च बौधायनमनुवचनयोर्विकल्पः। स च देशकालाद्यपेक्ष-
या। तथा च बौधायनः। देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं। उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत्। यमः॥ मूत्रवतिस्र
पादयोस्तु हस्तयोश्च एव च। अष्टदः पेवदशामध्ये हस्तादीनां विशेषतः। एतदात्मीयमूत्रादिस्पर्शे शौचमुदाहृतं। उत्सर्गका-
लादन्यत्र परकीये तु पश्यात॥ परस्पृष्टो तु तस्य त्रिरात्रं विण्मूत्राजनयोः। चतुर्णामपि वर्णानां द्वात्रिंशन्मृत्तिकाः स्मृताः। वि- १६
ष्णुः। नाभेरधः स्पृष्ट्वा बाहुव कायिकैर्मलैः सुराभिर्मद्यैर्वा उपहतो मृत्तोयैस्तदंगं प्रक्षाल्याचांतः शुध्येत्। अन्यत्रोपहताम्

त्तोयैस्तदंगं प्रक्षाल्य स्नात्वा वा। इंद्रियोपहतस्तूपोष्य स्नात्वा पंचगव्येन दशनच्छादोपहतात्वेति। इति शौचप्रकरणं॥ ॥
अथाचमनं। वृद्धपराशरः। कृत्वाथ शौचं प्रक्षाल्य पादौ हस्तौ च मृज्जलैः। निबद्धशिखकच्छस्तु द्विज आचमनं चरेत्। प्रचेताः
अनुष्णाफेनशीताभिरद्भिराचामेदिति। अनुष्णामुष्णोदकमत्र विरुद्धं। तथा चापस्तंबः। उदकेनानुष्णेनावत्पोष्णेनाप्सपा-
यिनामिति। अत्र आचमनं नवतीति शेषः। योगीश्वरः॥ अंतर्जानु शुचौ देश उपविष्ट उदङ्मुखः। प्राग्वा ब्राह्मेण तीर्थेन द्विजो
नित्यमुपस्पृशेत्। तथा॥ कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रं करस्य वा। प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्। दक्षः। प्र-
क्षाल्य पादौ हस्तौ च त्रिः पिबेदंबु वीक्षितं। संमृज्यांगुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखं। वीक्षितमित्यनेन दृग्विषयीकृतत्वं वी-
क्षितानि वस्तु द्विरुक्तामनोपि सिरितियमस्मरणात्। मनुः। त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखं। खानि चोपस्पृशेदद्भि-
रात्मानं शिर एव च। गौतमः। त्रिस्तु चतुर्वाचामेदिति। चतुर्ग्रहणं देवपित्र्यकर्मापेक्षयेति कश्चित्। त्रिर्ग्रहणेन तुष्टत्वाव-
स्थान्याचरणं। ऋजुः। संहतांगुलिना तोयं गृहीत्वा दक्षिणेन तु। मुक्तांगुष्ठकनिष्ठेन शेषेणाचमनं चरेत्। ब्राह्मेण विप्रस्तीर्थेन
नित्यकालमुपस्पृशेत्। कायत्रिदशिकाभ्यां वा न पित्र्येण कदाचन। कायं प्राजापत्यं त्रैदशिकं दैवं। यस्मिन्नाचमनप्रयोग-
यत्र ब्राह्मादितीर्थस्वीकृतौ तेनैव सप्रयोगः कार्यो न तीर्थांतरेण। दक्षः। संहतांगुलिना पूर्वमास्यमेवमुपस्पृशेत्। अंगुष्ठे

न प्रादेशिन्या घ्राणे विवस्तुपस्पृशेत्। अंगुष्ठानामिकाभ्यां च चक्षुःश्रोत्रं पुनः पुनः। कनिष्ठांगुष्ठयोर्नाभिं हृदयं च तलेन वै।
सर्वाभिस्तु शिरः पश्चात् बाहू चाग्रेण संस्पृशेत्॥ याज्ञवल्क्यः। अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः। त्रिः प्राश्या
पो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत्। अत्र विशेषमाहापेगीतसिः सव्यपाणौ शाखान्नापो निनयेदिति॥ शाखाश्चा
मनशिष्टाः। हृद्वैरवस्तून्यायापस्पर्शनिमाह॥ तर्जन्यंगुष्ठयोगेन स्पृशेन्नासापुटद्वयं। मध्यमांगुष्ठयोगेन स्पृशेन्ने
ए त्रद्वयं ततः। अंगुष्ठस्यानामिकाया योगेन श्रवणे स्पृशेत्। कनिष्ठांगुष्ठयोगेन स्पृशेत् स्कंधद्वयं ततः। नाभिं च हृदयं
च स्पृशेत्पाणितालेन तु। संस्पृशेच्च तथा शीर्षमिति। शीर्षस्तु॥ तालांगुलिचतुष्केण स्पृशेन्मूर्द्धनि मादितः। तर्जन्यंगुष्ठयोगेन स्पृ
शेन्नेत्रद्वयं पृथक्। मध्यमानामिकाभ्यां तु स्पृशेन्नासापुटे क्रमात्। अंगुष्ठेन कनीयस्याः कर्णौ संयोगतः स्पृशेत्॥ तर्जन्यंगु
ष्ठयोगेन नाभिं हृदयं तलेन च स्पृशेत्। पैठीनसिः। अग्निरंगुष्ठस्य स्थाने तेन वा सर्वाणि स्थानानि स्पृशेदिति। अत्र च स्वशाखानुसारे
ण व्यवस्थितो विकल्पः। यत्र शाखायामंगस्पर्शनिमं नाम्नातं। अंगुष्ठादिविशेषो वा नाम्नातः। तत्र शाखीयानां च्छिन्ना विकल्प
यथेषु स्वशाखायां कतिपयांगस्पर्शनिमाम्नाते। तेषु स्वशाखोक्तक्रमानुसारेण शाखांतरोक्तक्रमः अनुक्तांगस्पर्शश्च वि
ति व्यवस्था। उदकपरिमाणमाह याज्ञवल्क्यः। हृत्कंठतालुगाभिस्तु यथासंख्यं द्विजातयः। शुद्ध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभि

रंततः। अंततः॥ तालुगाभिः हृदंतं परिमाणमाह। उशनाः। माषमज्जनमात्रा हृदयं गम्या नवंतीति॥ आचमनप्रसंगात्पवित्राच
मने कश्चन विशेषः प्रदर्श्यते। तत्र मार्कंडेयः॥ सपवित्रेण हस्तेन कुर्यादाचमनक्रियां॥ नोच्छिष्टं तत्पवित्रं तु भुक्तोच्छिष्टं तु व
र्जयेत्। एतद्दक्षिणकराभिप्रायं। हारीतेन वामे निषेधात्। वामहस्ते कुशान् न्यस्य समाचामति यो द्विजः। उपस्पृष्टं तावत्तेन
रुधिरेण मलेन च। एतच्च केवलवामहस्ताभिप्रायं। हस्तद्वयाश्रयाणां गोभिलस्मरणात्। उभयत्र स्थितैर्दर्भैः समाचाम
ति यो द्विजः। उपस्पृष्टं तावत्तेन रुधिरेण मलेन च। एतच्च केवलवामहस्ताभिप्रायं। हस्तद्वयाश्रयाणां गोभिलस्मरणात्।
उभयत्र स्थितैर्दर्भैः समाचामति याज्ञिकः सोमपानफलं तस्य भुक्त्वा यज्ञफलं लभेदिति। अत्र विशेषमाह हारीतः। सव्योप
साभ्यां कुर्वीत सपवित्रौ करौ बुधः। ग्रंथिर्यस्य पवित्रस्य न तेनाचमनं चरेदिति। पवित्रलक्षणमाह कात्यायनः। अनं
तर्गर्भिणं साग्रं कौशं द्विदलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्। मार्कंडेयः। चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्य प
वित्रकं॥ एकैकं न्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमं। त्रिभिर्दर्भैः शांतिकर्मणि पंचभिः पौष्टिकं तथा। चतुर्भिश्चाभिचाराख्यं कुर्वीत
यात्रिपवित्रकमिति। अथाचमननिमित्तानि॥ तत्र यमः॥ उत्तीर्योदकमाचामेदवतीर्य तथैव च। हारीतः। स्नात्वा श्वा द्राच्छिष्टा नि
ष्ठीव्य मूत्रपुरीषोत्सर्गदर्शनादवता गंडूकामश्वा चामेत्। अथ द्विराचमननिमित्तानि। तत्र याज्ञवल्क्यः। स्नात्वा पीत्वा क्षु

डाक्टर भाऊदाजीइत्याख्यस्मारकम्
DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्याख्यस्मारकम्
DR. BHAU DAJI MEMORIAL

ानमुप्रमुञ्चारथ्याप्रसर्पणे। आवीतःपुनराचामद्वासोविपरिधायच।।बोधायनः।भोजनेदेवदानेउश्रास्त्रप्रतिग्रहे॥
हविर्भक्षणकालेवातक्षिरावमनेस्मृतौ।ब्रह्मपुराणे।होमेभोजनकालेचसंध्ययोरुभयोरपि।आवीतःपुनराचामद
न्यत्रवसनस्रस्तत्॥श्रीगिराः।वउालादीन्जापहोमेद्द्रव्यविशुद्धिति।एतांदीन्स्पृष्ट्वापिचाचामेत्कर्णंवादक्षिणंस्पृशे -स्वा ३
ताजानुनारभ्यशास्त्रादिस्पर्शश्चाचमनी।अन्यत्रस्नानविधानात्॥उदकानावेशसामर्थ्यादक्षिणकर्णस्पर्शः।आननि
वोन्निप्रायणंहृदस्पतिः।पिहमेत्राचारारोदाआत्मालेत्तःधामक्षणे।अधोवायुसमुत्सर्गेआक्रंदक्रोधसंनावामार्जारऋषि
कास्पर्शेप्रवासेऽनृतनाषणे।निमित्तेष्वेषुसर्वेषुदक्षिणंश्रवणंस्पृशेत्।तथा॥आर्द्रंतृणंगोमयंवाभूमिंवासंस्पृशेत्द्विज
रति।सांख्यायनः।क्षुतेनिष्ठीवनेचैवदंतोच्छिष्टेतथानृते।पतितानांचसंभाषेदक्षिणंश्रवणंस्पृशेत्।आदित्यावसवोरुद्रा
वायुरग्निश्चधर्मराट्।विप्रस्यदक्षिणेकर्णेनित्यंतिष्ठंतिसर्वदा।आचारसागरे।अपश्यान्नोपधंजश्चारुचातोबलंवर्णो।सो
गीधिकानिसर्वाणिनाचामेत।विवदृणः।आपोजाम्बुतिः।अमृतापिधानमसीत्यादिनिर्मंत्रैरपोजश्चानन्निमित्तैर्नाचामेत्॥र
त्र्यर्थः।बोधायनः।पादप्रक्षालनशेषेणनाचामेद्वारिणाद्विजः।शुद्धानापिबेत्किंचित्दक्षिणाद्भूमौजलेस्पृशेत्।आपस्तंबः
सीध्यार्थीभोजनार्थेवापित्रार्थेवातथैवच।शूद्राहृतेननाचामेत्पादिहवानशुचायमः।तावन्नापस्पृशेद्विप्रोयावच्छामेन

 स्थ जले

नस्पृशेत्।नाचामेद्दिवादक्षा।दिग्यावरुणश्चैवआसुरः।उदकस्थोदकस्थलेनस्थःस्थले।शुचिः।पादेस्थायोनयत्रापि
आवीतोनयतःशुचिः।जलस्थलेचिककर्पादेनचाआवीतउनयत्रस्थलेकमणिजलकर्मणिचशुद्धानवतीयर्थः।
अलंचापादयोःशेवेतिष्ठन्मुक्तशिखोपिवा।विनायज्ञोपवीतेनआचांतोप्यशुचिर्द्विजः।तिष्ठन्निति स्थलविषये।विष्णु
नातिष्ठतापिजलस्थनुज्ञानात।जान्वोरूर्ध्वंजलेतिष्ठन्नाचांतःशुचितामियात।अधस्ताच्छतकृत्वोपिसमाचांतोनशुध्य
ति।अधस्तान्नाषधाजानुदाघ्नेप्यविरुद्धं।तथास्मर्यते।जानुमात्रेजलेतिष्ठन्निति।अनाचांतःशुचिरितिवाक्यान्नाषः
तथासोपानकोननोष्णीषीपर्यंकासनयानगः।दुर्दृष्टोऽपदांबुचनाचामन्शुद्धिमाप्नुयात्।नरगोवरयानाश्वहस्त्यधी
रादकस्तथा।आचीतःकर्मशुद्धःस्याच्चीवरलोपधजश्चितस्तात्।शुचासनस्थोथाचामेन्नान्यकालेकदाचनानपादुकस्थःशूरि -नत्व ५
तानवाययज्ञोपवीतवान्।सांख्यायनः।दानमाचमनेहोमेभोजनेदेवतार्चने।प्रौढपादोनकुर्वीतस्वाध्यायेपितृतर्पणे।
आसनारूढपादस्तुजानुनार्वापजंघयोः।कृतावसक्थिकोयश्चप्रौढपादःसउच्यते।स्पृशंतिबिंदवःपादौयआचामयतः
परान्।भूमिकेस्तेसमाज्ञयाननतिरप्रयतोभवेत्।परणामाचमनायोदकदीयमानेयबिंदवःपादयोःपतंति।तेनी
शुद्धइत्यर्थः।इत्याचमनविधिः॥छ॥ अथप्रातःस्नानं॥तत्रमार्कंडेयः।अस्नातस्यक्रियाःसर्वानवंतीहाफलायतो।प्रातःस्मा

१८

चारस्नानेनत्वनित्यमितिस्मृतं॥ प्रातःस्नाने मंत्रवर्ज्जं मध्याह्ने मांत्रिको विधिः॥ नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्प्पणं॥ यो
गीश्वरः॥ स्नानमब्दैवतैर्मंत्रैर्मार्जनं प्राणसंयमः॥ सूर्यस्य चाप्युपस्थानं गायत्र्याः प्रत्यहं जपः॥ याज्ञवल्क्यः॥ प्रात
र्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः॥ यतेस्त्रिषवणं प्रोक्तं सकृत्तु ब्रह्मचारिणः॥ वानप्रस्थस्य कालद्वये स्नानं॥ ब्रह्मचा
रिणश्च सकृत्स्नानमशक्तविषयं॥ अत एव याज्ञवल्क्यादीनां त्रिषवणस्नायी निवृत्तश्च प्रतिग्रहादिति स्मृतिसंग्रहः॥ स्नाया
त्प्रातश्च मध्याह्ने ब्रह्मचारी तथा गृही॥ शंखः॥ प्रातःस्नानं प्रशंसंति दृष्टादृष्टकरं हितं॥ सर्वमर्हति शुद्धात्मा प्रातःस्नायी
जपादिकं॥ दृष्टं मलापनयनादंगशुद्धिः॥ अदृष्टं निश्चयेन पापक्षयः॥ अलक्ष्मीं कालकर्णीं च दुःस्वप्नं दुर्विचिंतितं॥ याम्यंहियो × दृष्टं
तेनादुःखे नित्यस्नायी न पश्यति॥ कालकर्णी दुःसहदुहिता॥ नित्यस्नानं न त्यजेत अपि पापकृतो नराः॥ कात्यायनः॥ यथाह
नि तथा प्रातर्नित्यं स्नायादनातुरः॥ दंतान् प्रक्षाल्य नद्यादौ गेहे चेत्तदमंत्रवत्॥ अमंत्रवदिति प्रातःस्नाने नसकीर्त्तनामं
त्रनिषेधः॥ अपितु मंत्रबहुत्वनिषेधः॥ यतः स एवाह॥ अल्पत्वाद्धोमकालस्य बहुत्वात्स्नानकर्म्मणः॥ प्रातर्न तनुयात्स्नानं हो
मलोपो विगर्हितः॥ इति॥ दक्षः॥ अत्यंतमलिनः कायो नवछिद्रसमन्वितः॥ स्रवत्येव दिवारात्रौ प्रातःस्नानं विशोधनं॥ वाम १९
नपुराणे॥ निषिद्धतीरं च कुशापिंजलानि मार्वा त्ररात्र्याणि मृदं च सेक्ष॥ प्रक्षाल्य पाणी च मुखे च कर्णे देयज्ञोपवीतेच जले पिबेत्रिः॥

न२

कंठेयज्ञोपवीतमासज्य च यथाहारः॥ एवेवेनदुक्रत्वर्द्वैति॥ उपवीतं निवीतं च चाप्रक्षालयदिति॥ रर्जितलिंपिबेदोस
मदिंद्रियर्थः॥ करास्यांधारयद्दर्भान्शिखां बध्वं विधाय च॥ प्राणायामांस्ततः कुर्यात् कालज्ञानं यथाविधि॥ यथाविधिका
लज्ञानं॥ तिथिनक्षत्रादिज्ञानं कुर्यादित्यर्थः॥ मृत्तिकां तु त्रिधा कृत्वा भागमेकेन लेपयेत्॥ दक्षिणेन वहस्तेन अष्टादेतान
नुक्रमात्॥ अष्टवक्ष्यमाणाः॥ ललाटं चांसद्वयं हृदयं पृष्ठं उदरं कक्षिद्वयं त्वस्यांगानि विज्ञेयाः॥ ललाटमंसौ हृत्पृष्ठमुदरं वस
कुक्षिकं॥ ततो वामकरेणैव नाभिवक्षस्सुरूजंघकं॥ दक्षिणादिक्रमेणैव चरणौ च त्रिषु क्षिपेत्॥ मृदा तृतीयभागेन कारोत्वनिः
ससार्जयेत्॥ इति॥ ततो मृदा स्नाने च्छया विम्यजले विशेत्॥ नाभिमात्रे जले गत्वा चाक्षच्या कशात् द्विधा द्विजः॥ निरुध्य कर्णौ नासा
वत्रिः कुर्यान्मज्जनं ततः॥ दिशावस्थानि षेकं च कुर्याद्दृष्ट्वा ह्येरणं तु॥ आयोगोरिति सूक्तेन द्विजश्चानमेयेद्वपः॥ जेबु कायेति मे त्रण
विद्ध्यात्वघमर्षणं॥ जेबु कायेतिनार्यां नियमः॥ अपि तु तावद्धत्यादि दृष्टसूक्तानामुपलक्षणार्थं॥ गोद्दशवारांस्तु महापापा + ऋ पंन्
पतुरयोऽघमर्षणक्रियया धूतपापः समाहितः॥ ततो निमज्य वारीं स्नानं ततस्तर्प्पणमारभेत्॥ तर्पणमिति स्नानांग
तर्प्पणं॥ यथाते त्रिरीयशाखायां॥ ७० भूर्द्देवांस्तर्प्पयामि भुवर्द्देवांस्तर्प्पयामि॥ स्वर्द्देवांस्तर्प्पयामि॥ भूर्भुवःस्वर्देवांस्त
र्प्पयामि॥ एवं भूःऋषींस्तर्पयामि॥ एवं भूः पितॄंस्तर्प्पयामीत्यादि॥ शंखः॥ आब्रह्मस्तंबपर्यंतं जगत्तृप्यत्विति क्रमात्॥ जलांज

अ पी २

लित्र्यं दद्यादतस्संप्रत्यपर्यन्तमिति। एवमेव माध्याह्निकस्नानमपि॥ विशेषस्त्वाह्निकप्रदर्शित॥ ॥ अथ प्रातःसंध्या। प्रा +तत्रप्रा
तःसंध्यां सनक्षत्रां मध्यमां स्नानकर्मणि। सादित्यां पश्चिमां संध्यामुपासीत यथाविधि॥ मध्यमां स्नानकर्मणि इति। माध्याह्नि
कस्नानजातस्यार्थः॥ संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु। स यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत्। संवर्त्तः। अथाचम्य
ऊँकारोद्युक्त आसनसमुपस्थितः। करसंपुटकेनैव संध्यां निर्वर्तयेन्नराः। नद्यादौ पुण्डरीकाक्षमुपान्त्राद्यप्रेक्षणाया। ब्रह्म वर्च
सकामार्थं प्रातः संध्यामुपास्महे॥ इत्थं त्वाचम्य संकल्प्य कुशानादाय पाणिना। नद्यां न च तत्रावतिष्ठेत गृहे वामकरे स्थितः। त्रिर्निर्व
र्त्तिमीत्रेस्तु प्रत्येकमिलितेश्वातिः। गायत्र्याश्च ततः कुर्यादन्तिषकं तु तत्क्रमेण। आर्षं छंदादि देवत्वं विनियोगविधिं स्मरेत्। आवा
हनीं च गायत्र्याः प्राणायामे समन्यासेत्। गायत्री त्र्यक्षरी बाला साक्षसूत्रकमण्डलुः। रक्तवस्त्रा चतुर्हस्ता हंसवाहनसंस्थिता। ब्रह्माणी ब्रह्मदैवत्या ब्रह्मलोकनिवासिनी। आवाहयाम्यहं देवीं गायत्रीं सूर्यमण्डलात्। ऊँकारस्य ब्र
ह्मा ऋषिर्देवाग्निस्तस्य कथ्यते। गायत्री च तथा छंदो नियोगः सर्वकर्मसु। त्रिमात्रस्तु प्रयोक्तव्य आरंभे सर्वकर्मणि। व्याहृ
तीनां तु सर्वासामार्षं चैव प्रजापतिः। गायत्र्युष्णिगनुष्टुब्बृहती पंक्तिरेव च त्रिष्टुब्जगती चैव तथा छंदांस्येतानि स २०
प्तैवाग्निर्वायुस्तथा सूर्यो बृहस्पतिरपांपतिः। इन्द्रश्च विश्वेदेवाश्च देवताः समुदाहृताः। प्राणस्यायमानाच्चैव विनियोग उ

दाहृतः॥ भूर्लोकं पादयोर्न्यस्य तु वाली कं तु जानुनोः। स्वर्लोकं तु न्यसेन्नाभौ दशे महस्तथा। जनलोकं तु हृदये कंठदेशे
तपस्तथा। सत्यलोकं ललाटे संयोज्य सप्तलोकप्रतिष्ठिता। सविता देवता यस्या मुखमग्निस्त्रयात्मकं। विश्वामित्र ऋषिश्छंदो गा
यत्री सा विशिष्यते। जपहोमोपनयने विनियोगो विधीयते। व्यासः॥ ॐ न्यस्य हृदये तु वः शिरसि विन्यसेत्। स्व
रिति दंशिखायां तु गायत्र्याः प्रथमे पदे। विन्यसेत्कवचे चैव द्वितीयं नेत्रयोर्न्यसेत्। तृतीयं नास्त्रं विन्यासे एवं न्यासो साध
नाः स्तः। यासंध्या सा च गायत्री त्रिधा भूत्वा व्यवस्थिता॥ इति बीजावत्तु गायत्री सावित्री मध्यमा स्मृता। याजावत्पश्चिमा संध्या
सा च देवी सरस्वती। आगच्छ वरदा देवि त्र्यक्षरे ब्रह्मवादिनि। गायत्रि छंदसां मातर्ब्रह्मयोनि नमोऽस्तु ते। कात्यायनः॥ ॐ भूर्भुवः
स्वरित्यापस्त्वेनमेवं परिक्षिपेत्। रक्षार्थमिति शेषः॥ ॥ अथ प्राणायामः। तत्र योगीश्वरः। सव्याहृतिकां सप्रणवां गायत्रीं शिर
सा सह॥ त्रिः पठेदायतप्राणः प्राणायामः स उच्यते। गायत्रीशब्दनिरुक्तिमाह॥ व्यासः॥ गायतं त्रायसे यस्माद्गायत्री चैव त
तः स्मृता इति। मार्कंडेयपुराणे। प्रथमे साधने कुर्यात्प्राणायामस्य योगवित्। प्राणापानविरोधस्तु प्राणायाम उदाहृतः।
स लघुर्मध्योत्तरीयाख्यः प्राणायामस्त्रिधोदितः॥ तस्य प्रमाणं वक्ष्यामि। तदलर्क शृणुष्व मे। लघुर्द्वादशमात्रस्तु द्विगुणः स
तु मध्यमः। त्रिगुणाभिस्तु मात्राभिरुत्तमः स उदाहृतः। विष्णुपुराणे। प्राणाख्यमनिलं वश्यमभ्यासात्कुरुते तु यः। प्राणा

यामः स विज्ञेयः सबीजो ऽबीज एव वा॥ पूरकः कुम्भको रेचको वा यः ॐ न कस्थापने कचितः। बहिर्निःसरणे नस्यास्य कः परिकीर्त्ति
तः॥ सबीजो ध्यानजपसहितः॥ सगुणोपासिभिः॥ अबीजो निर्गुणोपासने॥ तत्र परमहंसविषये। यथाह पराशरः॥ सालंब
नगवन्मूर्त्तिस्थूलरूपं द्विजोत्तमा॥ अनालंबमनेनस्य योगिनां न्यासतः स्मृतौ। इडया कर्षयेद्वायुं बाह्यात्षोडशमात्र
या॥ धारितं पूरयेद्योगी चतुःषष्ट्या तु मात्रया॥ सुषुम्नामध्यमे सम्यक् द्वात्रिंशन्मात्रया शनैः। नाड्या पिंगलया चैनं रेच
येद्योगवित्तमः॥ व्यासः॥ अंगुष्ठेन पुटं यातु दक्षिणं तु नः। कनिष्ठानामिकाभ्यां तु वामं प्राणस्य संग्रहः। अंगुष्ठत
र्जनीभ्यां तु ऋग्वेदी सामगायनः। अंगुष्ठानामिकाभ्यां तु यजुः सार्वे रथर्वणिः॥ मनुः॥ प्राणायामा ब्राह्मणस्य त्रयो ऽपि विधिवत्कृ
ताः॥ व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः॥ प्राणायामत्रयं कार्यं संध्यासु च तिसृष्वपि। प्राणस्यायमनेनेच्छ्वा आचामत्प्रयता
पि सन्। अन्नं राक्षि घातयस्मात्तस्मादाचमनं स्मृतं॥ ७॥ अथ मार्जनं॥ योगियाज्ञवल्क्यः॥ आपो हि ष्ठेति तिसृभिस्त्रिस्त्रिस्तु प्रय
तः शुचिः। नवप्रणवसंयुक्ता निर्जलं शिरसि निक्षिपेत्॥ प्रतिपादं आदौ प्रणव उच्चार्यमाणाः ऋक्त्रयपि नवप्रणवा नवेति ति
नवप्रणवसंयुक्ता च नवति। ब्रह्मोउपुराणानधीवाथडादवाथ जानमन्त्रायः पवा॥ उदुंबरपासो वमेरिजातदाराव्ज २१
ली। कृत्वाथ वामहस्ते वा संध्यापात्रिं समाचरेत्। एवं च वामहस्तादकसंध्यानिषेधवचनानि पात्रीतरसद्भावे सावकाशानि॥

क्षिपायनः॥ दत्वा चाति मुखेनैतायै मूर्ध्नि ब्रह्ममुखेन तु। आपो हि ष्ठेति सूक्तेन दर्भैर्मार्जनमाचरेत्। यस्य दृष्ट्या ये तिज
लीसकृत्री प्रक्षिपेत्त्र्यधः। नारायणः। ऋगंतमार्जनं कुर्यादित्यादौ तत्र समाहितः। आपो हि ष्ठेत्यृचा कार्यं मार्जनं च कुशोदकैः।
प्रति प्रणवसंयुक्तं क्षिपेन्मूर्ध्नि पादपादं। अस्यैतत्र वा कुर्यात् ऋषीणां मतमीदृशं। आपो हि ष्ठेति सूक्तस्य सिंधुद्वीप ऋ
षिः स्मृतः। आपो देवता छंदो गायत्री मार्जने स्मृतं। मार्जने तीर्थविशेषमाह॥ हारीतः॥ मार्जनार्चनबलिकर्मभो
जनानि देवतीर्थेन कुर्यादिति। एवं मार्जनं कृत्वा सूर्यश्चमेत्यपः पिबेत्॥ आह शौनकः॥ सायमग्निश्च मेत्यृचा प्रातः सूर्य
श्च पः पिबेत्। आपः पुनंतु मध्याह्ने ऽप्येतेनाचमनं चरेत्॥ तत्र सूर्यश्च मा मन्युश्चेत्यस्य मंत्रस्य प्रजापतिश्छंदः। अग्निरृषिः सू
र्यमन्युमन्युपतिरात्र्यादेवताः प्रातः संध्याचमने विनियोगः। केचन नारायणऋषिः त्रिष्टुब्छंदः सूर्यमन्यौ ता॥ अग्नि ८
श्च मन्युश्चेति याजुर्वेदिको मंत्रः॥ बौधायनेपि॥ अथातः संध्योपासनविधिं व्याख्यास्यामः। तीर्थं गत्वा प्रयतो ऽपि सिक्तः
प्रक्षालितपाणिपादः प्रक्षाल्याग्निश्च मे मन्युश्चेति सायमपः पीत्वा सूर्यश्च मा मन्युश्चेति प्रातः सपवित्रेण पाणिना
सुरभिमत्याब्लिंगाभिर्वारुणीभिर्हिरण्यवर्णाभिः पावमानीभिरिति व्याहृतिभिरन्यैश्च पवित्रैरात्मानं प्रोक्ष्य प्रयतो भ
वतीति। सुरभिमती दधिक्राव्णो इति। अस्या वामदेव ऋषिः अनुष्टुप् छंदः दधिक्रा वा देवता मार्जने विनियोगः। अब्लिंगा

दुर्गा

त्रिरापोहिष्ठीयाभिः। हिरण्यवर्णाभिः। हिरण्यवर्णाः शुचयः॥ यासां राजा॥ यासां देवाः॥ शिवेन मा चक्षुषा॥ इति चतसृभिः।
आसां त्रिष्टुप् छंदः॥ अग्निरृषिरापो देवता मार्जने विनियोगः। केवलेनात्र ऋषिं कश्यपं मन्यते। पावमानीभिः स्वादिष्ठये
त्यादिभिः। पावमानीनां बहूचां दृष्टिर्देवतानां च भिन्नत्वादिस्तर प्रयाज्ञोक्तेन तत्तद्रूपीः देवगानां तु संध्याचमना-
ङ्गानां मार्जने मैत्रावरुणो दृष्टो। अहश्च मादित्यश्च पुनात्विति प्रातः। रात्रिश्च मा वरुणश्च पुनात्विति सायमिति। एतौ प्रजापतिदृ
ष्टौ लिंगोक्तदेवतौ च। संध्याचमनानंतरं नारायणः॥ स्पृष्ट्वा चाविकृतं तोयं मूर्ध्नि ब्रह्ममुखेन तु। आपो हि ष्ठेति सूक्तेन दर्भै
र्मार्जनमाचरेत्। स्पृष्ट्वा। आचम्य। ब्रह्ममुखमिति। तेन। ओंकारं व्याहृतिकाश्चतस्रो महाव्याहृतायाश्च याः। त्रिपदा सावित्री गायत्री य५
विज्ञेयं ब्राह्मणो मुखम्। इति। सूक्तस्य कश्यपादिकमाह मनुः। आपो हि ष्ठा नव स्मृत्वा सिंधुद्वीप ऋषिः स्मृतः। अहं च याः सुस
४प्र सप्तमी गायत्र्यो द्वे चानुष्टुभाविति। मार्जनानंतरं ब्रह्मा॥ जलस्पर्शं तथा दत्त्वा नासिकाग्रं समर्प्य यत्। ऋतं चेति पवित्राणु
तं जलं तेन क्षितौ क्षिपेत्। यमः॥ गृहीत्वा पाणिना वारि मन्त्रानुक्तान् समुच्चरेत्। विसृज्यान्नासिकाग्रे तु निरुध्य प्राणमारुतम्।
डु२ य एवं द्रुपदां नित्यं त्रिरभ्यस्य यतात्मवान्। जपेत् नवतिर्ष्टं तिपापानि तस्माद्देहे द्विजन्मनः। इति। ऋतं च सत्यं चेति सूक्तं स्पृष्ट्वा अघ २२
मर्षणं दृष्टं भाववृत्तं देवता कं रुद्रानुष्टुभे। द्रुपदादिव मुमुचान इति। द्रुपदा अस्याः कोकिलो राजपुत्र ऋषिरापो देवता।

अनुष्टुप् छंदः। ततः सूर्यायार्घ्यं निवेदयेत्। व्यासः। करान्पीत्वा तयमादाय गायत्र्या चाभिमंत्रितम्। आदित्याभिमुखस्तिष्ठंस्त्रि
रूर्ध्वं संध्यायां क्षिपेत्। मध्याह्ने तु सकृद्देवा रूपाणीयं द्विजातिभिः। अर्घ्यदाने मंत्रांतरमाह नारायणः। कराभ्यामंज
लिं कृत्वा जलप्रस्य समाहितः। उदुत्यमिति मंत्रेण त्रीयेत् उत्क्षिपेत्ततः। इति। इति शाखानुसारेण व्यवस्था। उदकक्षेप
णकारणमाह कश्यपः। त्रिंशत्कोट्यो महावीर्या मंदेहा नाम राक्षसाः। ग्रसंति दारुणा घोराः सूर्यमिच्छंति खादितुं। त
तो देवगणाः सर्वे ऋषयश्च तपोधनाः। उपासते तदा संध्यां प्रक्षिपंत्युदकांजलिं। दह्यंते तेन नातादेया वज्रीभूतेन वारि
णा। एतस्मात्कारणाद्विप्राः संध्यां नित्यमुपासते। ततः प्रदक्षिणमावृत्य जलं स्पृशेत्। तथा पुराणे। सायं मंत्रवदाचम्य प्रो
क्ष्य सूर्यस्य चांजलिं। दत्त्वा प्रदक्षिणं कृत्वा जलं स्पृष्ट्वा विशुद्ध्यति। सायमित्युपलक्षणं। सूर्यार्घ्यदानरूपनिमित्तस्य सर्व
त्र विद्यमानत्वात्। स्मृतिरपि। यस्प्रदक्षिणीं प्रक्रमेति। तेन पाप्मानमवधुन्वीतेति॥ अथ सूर्योपस्थानं॥ तत्र कश्यपः। ह
स्तौ स्वस्तिकं कृत्वा प्रातस्तिष्ठेद्दिवाकरं। मध्याह्ने तु ऊर्ध्वबाहुः सायं मुकुलितौ करौ। देवलः। मित्रस्य चर्षणीति स्तोत्रस ति२
वास्यतिवोदयो इमं मे वरुणेन सायं कुर्यादुपस्थितिं। व्यासः। संध्यात्रये कमेव उपस्थानं प्रवर्तयेत्। उदयं उदि
त्यं चित्रं तच्चक्षुः स्थित्वा दिवाकरं। एतद्वोपस्थानं प्रातर्जपान्नराग्रे च कार्यं। तदुक्तं कूर्मपुराणे। ओंकारं व्याहृतिं युतां गायत्री

अस्त्वा १ घा २ त १

देवमातरं। छंदोऽनुष्टुप्। जलांजलिं दद्याद्दूराद्भास्करं प्रति। ओं नमो देवमातरं सहब्रह्मार्यम्णा धात्रा। उन्मना द्विजन्मा नाध्यायाद्भूमंडल
गतो सावित्री विजापद्बुधः। अथोपतिष्ठेदादित्यमुदयंतं समाहितः। अथ जपः। तत्र व्यासः। तेजोऽसीति मंत्रेण गाय
त्रीमावाहयेद्द्विजः। उपस्थाय तु रायणं नमस्कृत्य जपेत्सुधीः। योगियाज्ञवल्क्यः। ओंकारं पूर्वमुच्चार्य भूर्भुवः स्वस्तथै
व च। गायत्री प्रणवश्चांते जपो ह्येष उदाहृतः। गायत्र्या विश्वामित्र ऋषिः सविता देवता गायत्री छंदः जपे विनियोगः। ध्या
येच्च मनसा मंत्रं जिह्वोष्ठौ न विचालयेत्। न कंपयेच्छिरोग्रीवां दंतान्नैव प्रकाशयेत्। मध्यमादिद्वयं पर्वजपकाले तु व
र्जयेत्। एवं मेरुं विजानीयाद् ऋषितं ब्रह्मणा स्वयं। विश्वतश्चक्षुरिति मंत्रेण जपं तत्रास्कारं द्विजः। कुर्यात्प्रदक्षिणेनैव उपक्षिप्य
स्थानं ततः। देवागातुविदा मंत्रेण नु कुर्याज्जपविसर्जनं। प्रातःसंध्यां गत्वा तु न गायत्र्या जपितेन च। यथा सिरखेन जाप्येन
ब्रह्मा मे प्रीयतां रविः। उत्तमे शिखरे जाता भूम्यां पर्वतवासिनी। ब्राह्मणैः समनुज्ञाता गच्छ देवि यथासुखमिति। अथ नं
तसंध्यायां सूर्यादयं सति प्रायश्चित्तं स्मर्यते। आदित्योऽस्तु दयाद्धस्य संध्या पाशिमनु ईहितः। आचार्यः शीरायम्युगा
य अष्टशतं जपेत्। प्राणायामत्रयं कृत्वेय थी। अथ मध्याह्नसंध्यायां सो कर्त्तव्य विशेषः कथ्यते। संकल्पावाहनाचमनो २३
पस्थानजपनिवेदनं तु नद्यथा॥ यथोक्तफलप्राप्तये माध्याह्निकीं संध्योपासिमहं करिष्ये इति संकल्प्य। सावित्री युवती

शुक्लां शुक्लवस्त्रां त्रिलोचनां। त्रिशूलहस्तां वृषारूढां रुद्राणीं रुद्रदेवत्यां। यजुर्वेदसहितां संगी जयामुकुटमंडितां॥ कैलाश
विहितावासां आयांतीं सूर्यमंडलात्। वरदां अक्षरां साक्षाद् देवीमावाहयाम्यहं। अक्षरं प्रणवात्मिका। इत्यावाहनं। आ
पः पुनंतु चेत्याचमनमंत्रः। अस्य नारायण ऋषिः। आपो देवता अनुष्टुप् छंदः। आचमने विनियोगः। एकांजलिं प्रक्षिपेत् उ
र्ध्वबाहुः सूर्यमुद्दिश्य मान उपतिष्ठेत्। उपस्थानमेव विशेषाः स्मृत्यंतरे प्रदर्शिता। गायत्र्या सं यथाशक्त्या उपस्थायादित्यो
त्य ५ ऽसावित्र्या उद्विंत्युवाकेन सूक्तेन पुरुषस्य च। शिवसंकल्पेन वा तथा मंडल ब्राह्मणेन वा पवित्रैर्विविधैश्चान्यैर्गुह्योपनिषदे
स्तथा। जपेद्यज्ञादिकर्त्तव्यः सर्वविद्प्रणीतकैः। सर्वविदप्रणीतकैरिति स्वशाखाभिः यायैः। उपस्थानस्य केमंत्रेरादित्य त्य ६
स्थाउकारायादिति वशिष्ठस्मरणात्। मध्याह्नसंध्यां गत्वा न गायत्र्या जपितेन च। यथा सिरखेन जाप्येन रुद्रो मे प्रीयतामिति।
॥ अथ क्रमप्राप्तसायंसंध्या विशेषाः। संकल्पावाहनाचमनोपस्थानजपनिवेदनं तु। उपात्तदुरितक्षयार्थं ब्रह्मप्राप्त्यै सायंसंध्यो
पासनमहं करिष्ये। वृद्धां सरस्वतीं कृष्णपीनवस्त्रां चतुर्भुजां। शंखचक्रगदापद्महस्तां गरुडवाहिनी। बदर्याश्रमवासिनी
मायांतीं सूर्यमंडलात्। सामवेदसहितां संगीवनमाला विभूषितां। विष्णुदैवत्यामक्षरां शांतां देवीमावाहयाम्यहं। अग्नि
श्चमेति नारायण ऋषिः अग्निर्देवता अनुष्टुप् छंदः आचमने विनियोगः। इमं मे घर्मरुणश्रुधी ति वरुणस्तृतिरुपस्थानं। अव

स्नानुमन्त्रुपस्थानि १

शिष्टोपस्थानं प्रातर्वत्। सायंसंध्यां गत्वा तत्र गायत्र्यान्न पितनव। यथासंख्येन जापेन विष्णुर्मे प्रीयतामिति॥ नोदकस्थो जप
त्प्राज्ञो गायत्रीं वेदमातरं। अग्नित्रयमुखीयस्मात् तस्मादुच्छायतीजपेदिति। उच्छायतिन सायंसंध्याविधिविषयं। जपन्ना
सीत सावित्रीं प्रत्यगातारकोदयात्। इतियाज्ञवल्क्यस्मरणात्। मध्याह्ने तु योगियाज्ञवल्क्योक्तो विशेषः। तिष्ठंश्चेदीक्ष
माणोऽर्कं जपेत्क यस्मिमादिनः। अन्यथा प्राङ्मुखः कुर्यादिति॥ ७॥ अथ जपसंख्यादिविधिः॥ ॥ तत्र मनुः। ब्रह्मचारी गृहस्थ
श्चशतमष्टोत्तरं जपेत्॥ वानप्रस्थो यतिश्चैव द्विसहस्राधिकं जपेत्। योगियाज्ञवल्क्यः। प्रबंसिंध्यौ जपेन्निष्टेस्सावित्रीमार्क
दर्शनात्। पश्चिमां तु समासीनः सम्यगृक्षविभावनात्। यहरासमन्नानि सिद्धविद्याधरोरगाः। हरंति प्रसन्नीयस्मात्तस्माद्
संतुकारयेत्। न चंक्रमन्न च हसन्न पार्श्वमवलोकयन्। उपाश्रितो न कुर्यात् दीनं न मनः प्रयातान शःनापाश्रितो न जल्पंश्च न प्रा
वृतशिरास्तथा। न पदा पदमाक्रम्य न चैव हि तथा करो। न चासमाहितमना न च संश्रावयन्पठेत्। बृहस्पतिः। मनःसंहरणं शौ
चं मौनं मंत्रार्थचिंतनं। अव्यग्रत्वमनिर्वादो जपसंपत्तिहेतवः। न क्लिन्नवासाः स्थलगो न जपादीन चरेद्बुधः। जपकाले न भाषे
त स्नानहोमादिके तथा। रुद्राक्षमासीत जपन् चैव जलपतितादिकान्। दृष्ट्वाचाचार्यं पस्पृश्य जाप्यमाचारो विशुध्यति। विधियज्ञा २४
ज्जपयज्ञो विशिष्टो दशभिर्गुणैः। उपांशुः स्याच्छतगुणः सहस्रो मानसः स्मृतः। विनाशायं जपेद्व्यस्तु चलजिह्वाद्विजस्तथा। उपांशुं तं जपा

दुर्मतिसामान सं बुधाः। वशिष्ठः। मानसः शीतिकोजप उपांशुः पौष्टिकः स्मृतः। सशब्दश्चाभिचारो यौ त्रिविधो जप उच्यते
ग्रास्तु प्राह्नतीसंध्या प्राह्नतीयथावस्थितर्नैधिकफलेतियावत्। गोष्ठे दशगुणा नावत् नदीषु शतसाहस्रमनंतं शिव
सन्निधौ। शातातपः। अन्तं तमघगौधं च दिवामैथुनाम चवाप्नोति वृषलस्यान्नसंध्या बहिरूपासिता। ब्रह्मपुराणे। अं
गुष्ठेन जपन्मोक्षं तर्जन्यामभिचारकं। मध्यमा धनसंपत्तिः शीतिः पुष्टिरनामिका। स्कंदपुराणे॥ ॥ सौवर्णराजतैस्ताम्रैः
स्फाटिकै रत्नजैस्तथा॥ अरिष्टपुत्रजीवैश्च शंखपद्मैस्तथा मणिं। कुशग्रंथिं च रुद्राक्षैरुत्तमैरुत्तरोत्तरैः॥ ब्रह्मपुराणे॥ अनुसा
समरंध्रावपरिष्वर्गी दृढा नवा। निखिलाग्रंथिता ग्रंथेगाः अन्योन्यो घृष्टिवर्जिता। सशब्दा चैव लाया उत्तुटिता ग्रंथिताञ्चया। नि
न्निन्नसूत्रगाग्रथितापाषंडस्य पुरातनी। पाषंडस्य पाषंडसंबंधिनी त्यर्थः। माला दुःखप्रदायिन्यो यथितानि घतं तु सितः
आष्टोत्तरशतं कुर्याच्चतुःपंचाशिका तथा। सप्तविंशतिका कार्या ततो नैवाधमा हिता। उमासंवादे। उच्छिष्टो वा विकर्मस्थः
संलिप्तः सर्वपातकैः। नासौ लिप्यति पापेन रुद्राक्षस्य तु धारणात्। लक्षं तु स्पर्शने पुण्यं कोटिर्भवति चालनात्। दशको
टिसहस्राणि धारणात्तु न तत्फलं। लक्षकोटिसहस्राणि लक्षकोटिशतस्य च। जपेच्च लभ्यते पुण्यं नात्र कार्या विचा
रणा॥ योगियाज्ञवल्क्यः। अतोवश्च माला याः कृत्वा ग्रंथ्या वपाणिना। जपएव हि कर्त्तव्यः प्रकाशं मनसा सदा। पाणिरखा
ग्र१

न्तिः परिगणनाप्रकारमाह॥ स एव॥ अनामिकाद्यौ मध्ये च मध्याधः प्रक्रमेण तु। तर्जन्यादिगतौ तत्र अक्षमाला करे स्थिता॥
अस्यार्थः। अनामिकामध्यारेखामादिं कृत्वा तदधः क्रमेण प्रदक्षिणावर्त्तं तर्जन्यादिरेखाश्रितेन कनिष्ठया। इत्येकारस्थिताक्ष-
मालात्र वर्तीति॥ मध्यमादिद्वयीपर्वं जपकाले तु वर्जयेत्। एतां मेरुं विजानीयात् स्थितं ब्रह्मणा स्वयं। तर्जन्या न स्पृशेदक्षं तेन कं-
पन्नं विधूनयेत्। अंगुष्ठस्य तु मध्ये तु परिवर्त्तं समाचरेत्। नार्द्रवासा जपं कुर्यान्न होमदानप्रतिग्रहं। सर्वं तद्राक्षसं ह्येय बहि-
र्जानु च यत्कृतं। अंगुष्ठाग्रेण यज्जप्तं यज्जप्तं मेरुलंघने। असंख्यातं तु यज्जप्तं तत्सर्वं निष्फलं भवेत्। यमः। जातके मृतके वापि
संध्याकर्म न संत्यजेत्। मनसोच्चारयेन्मंत्रान् प्राणायाममविवर्ज्जितान्॥ योगीश्वरः। संध्यां स्नानं त्यजन्विप्रः सप्ताहाच्छूद्रतां
व्रजेत्। तस्मात्स्नानं च संध्यां च सूतकेपि न संत्यजेत्। शिवविष्णुदीनदीक्षा यस्य चाग्निपरिग्रहः। श्रौतकर्माणि कुर्वीत स्नात्वा तत्र शु-
द्धिमवाप्नुयात्। सहस्रकृत्वस्तु बहिर्ज्जप्त्वा त्रिकं द्विजः। महतोप्येनसो मासात्त्वचेवाहिर्विमुच्यते॥ योधीतेह्यन्वहं त्वेतां
त्रीणि वर्षाणि मानवः। स ब्रह्मपदमाप्नोति वायुभूतः खमूर्तिमान्। एतदक्षरमेतां च जपन्व्याहृतिपूर्विकां। संध्ययोरुभयोर्वि-
प्रो वेदपुण्येन युज्यते। सप्तावर्त्ता तु नाशयेत्पापं दशभिः प्राप्नुयाद्दिवं। विंशत्याहृत्य आ उसादवीन यात ईश्वरालये। अष्टोत्तरशतं ज- २५
प्त्वा तारयेज्जन्मसागरात्। सावित्री विपापानी संसारसमुपस्थिता। दशसाहस्रिकाभ्यासो गायत्र्याः शोधने परः॥ वायुजङ्घोदिने।

द्वीणापितदीयामव प्रायश्चित्तं विज्ञेयं। अथोपपातकादिप्रायश्चित्तं। याज्ञवल्क्यः। प्राणायामशतं कार्यं सर्वपापापनुत्तये।
उपपातकजातानामनादिष्टस्य चैव हि। अनादिष्टस्य प्रकीर्णकस्य उपपातकस्य ज्ञानतः सकृत्कृतस्य शतं प्राणायामाः।
अन्यास्त्वकामतस्तु द्विगुणीकृत्य जातिभ्रंशकरादिषु किंचिन्न्यूनं कल्पनीयं। बौधायनः। अपि वाक्चक्षुःश्रोत्रघ्राणमनोव्यतिक्र-
मेषु त्रिभिः प्राणायामैः शुद्ध्यति। एतत्प्रकीर्णकात्रिप्रायी। तथा शूद्रस्त्रीगमनान्नभोजने पृथक् पृथक् सप्ताहं सप्त सप्त प्राणा-
यामान् धारयेत्। एतदुपपातकविशेषात्रिप्रायी। तथा। अनह्यानोज्यामेध्यप्राशनेषु तथा चापण्यविक्रयेषु मधुमांस-
घृततैललाक्षालवणरसान्नवर्जेषु यच्चान्यदप्येवंयुक्तं स्याद्द्वादशाहं द्वादश प्राणायामान् धारयेत्। एतदप्युपपातकविशे-
षात्रिप्रायी। तथा। अथ पातकोपपातकवर्जं यच्चान्यदप्येवंयुक्तं स्यादर्द्धमासं द्वादश द्वादश प्राणायामान् धारयेत्। एत-
ज्जातिभ्रंशकरादित्रिप्रायी। तथा। अथ पातकपतनीयवर्जं यच्चान्यदप्येवंयुक्तं मासं द्वादश द्वादश प्राणायामान् धारयेत्।
एतद्गोवधाद्युपपातकविषयं। तथा। अथ पातकवर्जं यच्चान्यदप्येवंयुक्तं द्वादशाहं मासान् द्वादश प्राणायामा-
न् धारयेत्। एतदुपपातकमहापातकमध्यवर्त्तिदिष्टसमविषयं। तथा। अथ पातकेषु संवत्सरं द्वादश द्वाद-
श प्राणायामान् धारयेदिति एतन्महापातकविषयं। अनह्यानोज्ये तु पक्रम्योक्तं प्रायश्चित्तं यमकस्यादीतान्यासे स-

PAGE(S)MISSING

NOT AVAILBLE

FOLIO NOS.
26 – 35

सुद्ध्यत्यवादितच्चौ। मनुः। पुनसंस्थूलसूक्ष्माणां विकीर्षत्रपानादनौ। अत्र त्वत्त्वेऽपदर्थ यक्तिं त्वद मितीतिच। अवति।
अवान्ते देहलीवानावरुणनामानि रिष्यप्रायश्चित्तं वरुणादव्यादन्ये पापसंख्यायात्र उक्तं चादावपकर्ममविं राधिकाले
पुरः पञ्चकार्यः। एतद्न्यासविषये योज्यं। अकामतो रात्रौ विण्मूत्रप्राशने याज्ञवल्क्यो क्तोऽदृश्यः। उकारान्निष्ठुतेसोमसलि
लपावने पिबेत्। ज्ञात्वा रतौ विण्मूत्रप्राशने हि द्विजोत्तमः। सोमसलिलैसोमलतारसैरुकारणमिति मित्रितं पिबेत्। का
मतस्तु सुमन्त्रकौ। रात्रौ विण्मूत्रप्राशने कृत्वा लशुनपलाण्डुगृञ्जनकुम्भीकादीनामन्येषां चान्नस्य प्राणे। नस्य णीकृत्वा दंसय
मर्कटश्वसृगालादिभिः सन्दष्टो कृत्वा ततः कं चमात्रमुदकमवतीर्य स्थितवांस्तिःप्राणायामैः कृत्वा ब्रह्मव्याहृतिभिराग
मुदकं पीत्वा तदेतस्मात्पूतो भवतीति। व्रताणं उकारेण व्याहृतिभिश्चाभिमन्त्रितं त्वदिन्यर्थः। मनुः प्रतिगृह्य प्रतिग्राह्यं उक्ता
चान्त्रिविग्रहितो। जपित्वा त्रसमिदार्थं प्रयातमानवस्त्रग्राहात्। मानसिकउपपातके चाज्ञानकृते प्रकीर्णके च याज्ञवल्क्यो
क्तं। निशायां यदिवावापि यदज्ञानकृतं भवेत्। त्रिकालसंध्याकरणात्सर्वं विप्राणश्यति ज्ञाताज्ञातपापे। अत्रतेमहत्वा
दीत्र दिवामैथुनमेवावधुनातिदृष्टपलान्नैरबहिः संध्यामुपासीतेति। आचारप्रविवेचनाय विड्भी प्राचीप्रपीतापिक्का।
श्रो तस्मात्पथ्यप्रसुप्तमनुष्योग्यानसेतीतिनारे ग्रामकृतिरत्र कश्चन गुणो यद्यपि सैनाष्पतीकर्त्वाविन्नविरतनः

५८१

तकौ च परदाररतौ तथा। एतद्वहि कर्तव्यं प्रायश्चित्तं विशोधनमात्मनः। स्त्रीदेहस्य दर्शमानवीद्दृष्ट्वा नरकेऽपि प्रक्षिप्तौ। स्प
स्पर्शादि विड्दृष्ट्व्याः सोमानलदिवाकराः। सोमादीनां यथासंख्यं वा विकल्पः। विष्णुः। नकुलस्पृग् रामुखेन तिलोदकयोः
स्वीकृत्यामलवत्यादर्शे पिन्निमज्जनसमये न स्त्रियेन ग्रीन किंचन रहमानेन वा बालीन नत्र दृष्टकुञ्जरन विप्रमर्त्यो दृषा दि
युद्धं नोत्सर्शनम त्रौ। मनुः। नाश्नीयाद्भार्यया सार्धं नैनामीक्षेत चाश्नतीं। क्षुवतीं जृम्भमाणां च न चासीनां यथासुखं। नाञ्जयन्तीं
स्वके नेत्रे न चाभ्यक्तामनावृतां। न पश्येत्प्रसवन्तीं च तेजस्कामो द्विजोत्तमः। ॥ अथ अकुलकराणि। तत्र यमशातातपव्यासाः।
देवद्रव्यविनाशेन ब्रह्मस्वहरणेन च। कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च। यमः। गोभिरश्वैश्च यानैश्च कृष्या राजो
पसेवया। अयाज्ययाजनैश्चैव नास्तिक्येन च कर्मणां। कुलान्यकुलतां यान्ति यानि हीनानि मन्त्रतः। मन्त्रतस्तु समृद्धा
नि कुलान्यल्पधनान्यपि। कुलसंख्यां च गच्छन्ति कर्षन्ति च महद्यशः। अनृते पारदार्ये च तथाऽभक्ष्यस्य भक्षणे। अगम्यागमने चै
व हिंसायां स्तेय एव च। श्रौतकर्मपरित्यागे मैत्रे धर्मबहिष्कृते। एतानि षट्कर्माणि वर्जयेन्मानवः सदा। अथ नि
वासः। तत्र बृहस्पतिः। दूरिमात्यक्तशोधान्नशिष्टो बहुद्विजनिगमे। निष्कण्टके धार्मिके च वसेत्स्थाने निरामये। निग
मो वाणिजकः। एककूपोदके ग्रामे ब्राह्मणो वृषलीपतिः। वर्षेण शूद्रो भवति ... मुपाश्रितः। व्यासः। धनिकः श्रो

त्रियाराज्ञानदीवेघश्च पंचमः॥ पि च यत्र न विद्यंते न तत्र दिवसं वसेत्॥ मार्कंडेयपुराणे॥ जितामित्रो नृपो यत्र बलवान्ध
र्मतत्परः। तत्र नित्यं वसेत्प्राज्ञः कुतः कुनृपतौ सुखं। यस्मिन्कृषीबला राष्ट्रे प्रायशो नातिमानिनः। यत्रौषधान्यशेषा
णि वसेत्तत्र विचक्षणः। प्रायमाणा नरा यत्र प्रयच्छंत्यनुरूपितं। वसेत्तत्र वसेत्तत्र तत्रत्रयस्त्रयः वासवान्॥ दंडो यत्रावि
नीतेषु सत्कारश्च कृतात्मसु। वरं तत्र वसेद्विद्वान्धर्मशीलेषु साधुषु। शुद्धबलः॥ अरण्यं पादपच्छाने तीर्थान्यायतनानि च
तस्मात्तेषु वसन्लोकान्याति नाकं दिवौकसां॥ अरण्यं नैमिषादि। तीर्थं गंगादि। आयतनं अविमुक्तादि। अथ गमने व
र्ज्यानि। तत्र मनुः॥ नाविनीतैर्व्रजेद्धुर्यैर्न च क्षुद्व्याधिपीडितैः। न भिन्नशृंगाक्षिखुरैर्न वालधिविरूपितैः। विनीतैस्तु व्र
जेन्नित्यं आशुगैर्लक्षणान्वितैः। वर्णरूपोपसंपन्नैः प्रतोदेनातुदन्भृशं॥ नातिकल्यं नातिसायं नातिमध्यंदिने॥
स्थिते। नाज्ञातेन समं गच्छेन्नैको न वृषलैः सह। तथा च॥ गावो वयानीपृष्ठेन सर्वथैव विगर्हितं। विष्णुः॥ नैकोऽध्वानं
प्रपद्येत नाधार्मिकैः सार्द्धं। विष्णुपुराणे॥ वर्षातपादिके छत्री दंडी रात्र्यटवीषु च॥ शरीरत्राणकामो वै सोपानत्कः सदा
व्रजेत्॥ नोर्द्ध्वं न तिर्यग्दूरं वा निरीक्षन्पर्यटेद्बुधः। युगमात्रं महीपृष्ठं नरो गच्छेद्विलोकयन्॥ तथा॥ न दुष्टयानमारोहेत्कू
लच्छायां न वाश्रयेत्। नैकः शून्याटवीं गच्छेन्न शून्यं च गृहे वसेत्॥ नासहायो व्रजेद्रात्रौ नोत्पथेन च वा पथे। वशिष्ठः॥ नाग्नि

DR. BHAU DAJI MEMORIAL
डाक्तर भाऊदाजी इत्यस्य स्मारकम्

ब्राह्मणौ तरव्यापयात्। नाग्न्योर्न ब्राह्मणयोः। न गुरुशिष्ययोः॥ अनुज्ञया वा व्यापयात्। न बाहुभ्यां नदीं तरेत्। नौं नावि
सांशयिकीमारोहेत्॥ आपस्तंबः॥ अग्निमुखमग्निमाह्रियमाणं प्रतिष्ठितं भूमौ प्रदक्षिणीकृत्य अन्यापयात्। विष्णुर्वा
रिप्रकरणे स्नातकप्रकरणे वाय साधारणधर्माः अनिहिताः। ते आनि शिष्टाः गृहस्थादीनामपि न वंद्ये वा अकृ वे क्रममाणाः स्त्री
मा पाययाग्गिरन्तां ब्रह्मचर्यस्वरूपं च तद्भेदश्च प्रदर्श्यते। तत्र हारीतः॥ ब्रह्मचर्यं नाम अप्रार्थनमस्मरणं कल्पनमननिप्रेक्ष
णसंकीर्त्तनमननिज्ञापणमननिगमननमसंदर्शनासमागमश्चासौ अप्रार्थने सामन्नूयादि चाशाविरहः। असंकल्पने
एवं करिष्यामीत्यनभिधानात्भावः। अननिप्रेक्षणं आनिमुखावलोकनं। असंदर्शनं कलावयवावलोकनाभावः। तद्ब्र
ह्मचर्यं चतुर्विधं भवति। कृष्णं रक्तं शुक्लं विमलमिति। तत्र परदारवर्जं नित्यं स्वदाराभिगमनं कृष्णं। पर्ववर्जं नित्यदार
कौ ऋतुकालाभिगमनं शुक्लं। ऊर्द्ध्वरेतस्कं विमलं। कृष्णेन मानून् जायघ्नो कान्मध्यमं रक्तेन कान्पयात शुक्लेन तु जयेत्स्वर्गं
विमलान्मोक्षमाप्नुयादिति॥ छ॥ इह मदनपारिजाते मदनक्षितिपालदानजलपूरे दाखबाकारय माघ आसीद्वामादास छपीडि
तत्त्वमरः। समतिर्यषि शास्त्रप्रकृतिरमणीया व्यवहृतिः पराशी लंकाधीजगति स्मृज वस्तेक तिपाय। चिरं चिन्तोलिषी
मुकुरतलन्यूतनद्धितिमियादियं धासारएपप्रवरमुनिशिष्यस्कणिभिः॥ २॥ इति पंडितपारिजातकहारमाधवचादि विरु

DR. BHAU DAJI MEMORIAL
डाक्तर भाऊदाजी इत्यस्य स्मारकम्

राजीविराजमानस्य श्रीमदनपालस्य निबंधे मदनपारिजाते निधे प्रथमः स्तबकः॥ छ॥ ॥श्रीः॥ ॥अथ ब्रह्मचारि
स्तबकानंतरं क्रमप्राप्तो गृहस्थस्तबक आरभ्यते। तत्रोपयुक्ता सापिंड्यमीमांसा प्रथमं प्रक्रम्यते। तत्र सापिंड्यं केचिद्
देवमर्पयंति। एकस्यां पिंडदानक्रियायां दातृत्वेन यजमानस्य। देवतात्वेन पितृपितामहप्रपितामहानां लेपभाक्त्वेन प्रपि
तामहस्य पितृपितामहप्रपितामहानां यजमानादीनां यो पत्न्या सह कर्तृत्वे नैकशरीरारंभकत्वेन वा त्वगादीनां
परस्परमेकशरीरारंभकत्वे साक्षात् शरीरारंभकत्वेन। यजमानप्रभृति पितृपरंपरायां सप्तमपुरुषावधिकसंततिजातानां म
ध्ये केषांचित् पिंडदेवतात्वेन दृश्यमानात्वायनात् केषांचित् लेपभाक्त्वेनो दृश्यमानात्वायनात्वतिदाशादिषु च सापिं
ड्यविषयमस्य पुराणोक्तवचनमप्युदाहरंति। लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागिनः। पिंडदः सप्तमस्तेषां सापिं
ड्यं साप्तपौरुषमिति। अत्रात प्रष्टव्याः कल्पनागुरौ कल्लघुनावयोः का वाज्यायानिति। यदि दिक् कल्पनागौरवं ज्यायस्तर्हि स
पिंडशब्दप्रवृत्तौ प्राचीनैर्निमित्तान्येव स्युः। अथ कल्पनालाघवं ज्यायः। तत्र वयं ब्रूमः पिंडादिदः समान एकः पिंडो दाता य ३८
स्य स सपिंडः तस्य भावः सापिंड्यं। तच्च पुत्रादीनामेकशरीरावयवान्वयेन। पत्न्यादीनां त्वात्पर्याग्दीनां चैकशरीरारंभक
त्वेनैकशरीरावयवान्वितेः सा हि एककार्यकर्तृत्वेन भवति। एवं च शब्दप्रवृत्तौ निमित्तत्रयमनुयोगीकृतं स्यात्। आद्यैवमन्यसे।

एकपिंडदानक्रियान्वयित्वं एकपिंडदानक्रियान्वयान्वयित्वं वा इति निमित्तद्वयाभावे तिन कल्पनागौरवमिति। तर्हि
सत्यपि एकमेव निमित्तमिति तत्तापि लाघवे। तत्रैकशरीरान्वयित्वमेव। अवयवान्वयश्च पित्रादिषु अवयवानां सम
वायिकारणत्वेन पत्न्यादिष्वेकशरीरावयववान् प्रति साक्षात् परंपरया वा अधिकरणत्वेन तत्तन्निमित्तिकात्वात्त्वेवं कल्पना
गौरवं च गर्हितमाचार्यैः। कल्पनालाघवेयत्नतत्परैरेव यामहे। तादव कृतरावतिनिपुणैः संप्रधार्यतामिति। ततश्चैनि
छ्या मंध्यापि कजादि वत्वेग कूटोर्यं शब्दः शरीरावयवान्वयश्च। श्रुतौ श्रूयते। आत्मा हि य तत्त्वात्मानः इति। तथा प्रजामनु प्रजा
यस इति। तथा च गर्भोपनिषद्यपि। एतत्स्मात् षाट्कौशिकं शरीरं त्रीणि पितृतस्त्रीणि मातृतः। अस्थिस्नायुमज्जानः पितृतः। त्वङ्मांस
रुधिराणि मातृत इति। आपस्तंबोपि। स एवायं विरूढः प्रत्यक्षेणोपलभ्यत इति। मस्य पुराणवचनस्य चायमर्थः। लेपभा
जश्चतुर्थाद्याः प्रपितामहपितावंतुर्थः। तदाद्याः प्रतिलोमक्रमेण त्रयो लेपभाजः। पिंडदाने कृतवतः स्ववंशस्य हस्तालेपे
भागभुजः। इति पित्राद्याः पिंडभागिनः पिंडदानादेवतात्वात्। पिंडदः सप्तमस्तेषां। तेषां पिंडदाता सप्तमः सा
पिंड्यं साप्तपौरुषं। एतान् सप्तपुरुषान् सापिंड्यं व्याप्नोतीत्यर्थो न वति। न तु सापिंड्यं सर्वेषां लेपभक्त्वादिकं निमित्तमि
ति। तथा सति प्राचीनागौरवादोषापातः। अतोस्मदुक्तमेव युक्तं। अथ प्रकृतमनुसरामः। तत्र मनुः॥ वदानधोयावादोवा

त्वदं वापि यथाक्रमं ॥ अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाश्रयेत् ॥ उद्वाहत द्विजो भार्यां सवर्णां लक्षणान्वितां ॥ कश्यपः ॥ दारा
धीनाः क्रियाः सर्वा ब्राह्मणस्य विशेषतः ॥ दारान् सर्वप्रयत्नेन विशुद्धानुद्वहेत्ततः ॥ विष्णुर्दीप्तः ॥ कुलात्तां रूपतश्च ॥ याज्ञव
ल्क्यः ॥ अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ॥ अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीं ॥ अरोगिणीं भ्रातृमतीमसमा
नार्षगोत्रजां ॥ अविप्लुतब्रह्मचर्यो बाह्याभ्यन्तरलक्षणयुक्तां स्त्रियमुद्वहेत् ॥ बाह्यलक्षणानि मनुराह ॥ अव्यङ्गाङ्गीं
सौम्यनाम्नीं हंसवारणगामिनीं ॥ तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत्स्त्रियमिति ॥ यान्याभ्यन्तराणि संदिग्धानि च तत्
ज्ञानोपायमाश्वलायन आह ॥ दुर्विज्ञेयानि लक्षणानि ॥ अष्टौ पिण्डान् कृत्वा ॥ ऋतमग्रे प्रथमं जज्ञ ऋते सत्यं प्र
तिष्ठितं ॥ यदियं कुमार्यभिजाता तदियमिह प्रतिपद्यतां ॥ यत्सत्यं तद्दृश्यतामिति ॥ पिण्डानभिमन्त्र्य कुमारीं ब्रूयादेषामेकं गृहा
णेति ॥ क्षेत्राच्चेदुभयतःसस्याद्गृह्णीयात् ॥ अन्नवत्यस्याः प्रजा भविष्यतीति विद्यात् ॥ गोष्ठात्पशुमती ॥ वेदिपुरीषाद्ब्रह्म
वादिनी ॥ अविनाशिनो ह्रदात्सर्वसंपन्ना ॥ देवनात्कितवी ॥ चतुष्पथाद्द्विप्रवाजिनी ॥ इरिणादधन्या ॥ श्मशानात्पतिघ्नीति ॥ अस्या
यमर्थः ॥ ऋतमग्र इत्यादिमन्त्रं यत्सत्यं तद्दृश्यतामित्यन्तेनाभिमन्त्र्य पिण्डानिमान्गृहाणेति कुमारीं ब्रूयात् ॥ मृदाहरणस्थानमाह ॥ क्षेत्रादिति ॥ पा ३९
र्श्वद्वयेपि सस्यपरिपूर्णात्क्षेत्राद्याहृता या मृत् तत्कृतं पिण्डं यदि गृह्णाति ॥ तदा अस्याः प्रजा अन्नवती भविष्यतीति विद्यात् ॥ एवं गोष्ठा

२

दिष्येवमादि ॥ वेदिपुरीषं वेदिमृत्तिका ॥ देवनं द्यूतस्थानं ॥ द्विप्रवाजिनी विविधं प्रजननशीला स्वैरिणीति यावत् ॥ इरिणमूषरं ॥
अधन्या धनरहितेत्यर्थः ॥ अनन्यपूर्विकां दानेनोपभोगेन वा पुरुषान्तरापरिगृहीतां ॥ असपिण्डां समान एकः पिण्डः
शरीरं यस्याः सा सपिण्डा ॥ न सपिण्डा असपिण्डा ताम् ॥ सपिण्डता चैकशरीरावयवान्वयेनेति निरूपितं प्राक् ॥ मनुरपि ॥ असपि
ण्डा च या मातुरसगोत्रा च या पितुः ॥ सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥ अस्यार्थः ॥ या मातुरसपिण्डा चकारादसगोत्रा
च या च पितुरसगोत्रा चकारादसपिण्डा च ॥ सा दारकर्मणि मैथुने प्रशस्ता ॥ प्रशस्ता परिणयनार्हेत्यर्थः ॥ एतदुक्तं भवति ॥ अ
नुलोमक्रमेण द्विजातीनां सवर्णापाणिग्रहणसमनन्तरं क्षत्रादिकन्यापरिणयो विहितः ॥ तत्र सवर्णाविवाहो मुख्यः ॥ इत
रस्त्वनुकल्पः ॥ सदारस्य विहितं कर्म द्विधा ॥ एकं यज्ञादिकं ॥ अपरं मैथुनं ॥ यज्ञादिके तु सवर्णया दारैः सहितस्याधिकारः सव
र्णायास्तु वयसा वर्णेन वा ज्येष्ठाया न तस्यामसत्यामन्यस्या अनधिकारात् ॥ असत्यां ज्येष्ठायां नित्ययज्ञादिष्वेवासवर्णासहित
स्याधिकारो न काम्येषु ॥ तथा ज्येष्ठापरित्यागेनान्यग्रहणनिषेधात् ॥ सुरतं तु विवाहितास्वनियमः ॥ एवं स्थिते दारक
र्मणि मिथुनश्च ब्राह्मणबलीवर्दन्यायेन दारकर्मशब्दो मैथुनव्यतिरिक्तयज्ञादौ वर्तते ॥ तथा च दारकर्मणि प्रशस्ते
त्युक्ते यज्ञादिकर्मणि सवर्णाया एवाधिकारात् ॥ तद्विवाह एव ॥ असपिण्डा च या मातुरसगोत्रा च या पितुरित्यादि ग्राह्यं स्यात् ॥

नचसवर्णाविवाहेतन्निवृत्त्यर्थंमिथुनपदग्रहणं।एवंचासवर्णापरिणयेपिप्रवृत्तिवाक्यमर्थंअनुषज्यते।यदिमिथु
नप्रशास्त्रार्थश्चेत्।तदातस्मिन्नुकर्माणिप्रवीक्षायास्मानान्यत्रतिस्यात्।ततस्त्रंशनाश्रमीनतिप्रेतद्गुणामकमपिद्विज
इति॥तत्समावर्त्तनस्यापैवमदायहनिन्योपासनादिदारकर्मनिष्पत्त्यर्थंप्रवृत्तिगुणरहितापिपरिणेयास्यात्।त
न्मातृदितिदारकर्मग्रहणं।ननुच॥एकंचसागताञ्चतुःपिंडगोत्रवस्तूतकरति।मातुर्गोत्रीतरान्तावादसपिंडामातुरित्येता
वतैवालंकिमितिचकारान्मातुरसगोत्राग्रहणंकर्त्तव्यम्।उच्यते।सत्यमेवंतथापिदत्तपुत्री।यस्मैस्यमातापिभवति।सा
चपुत्रिकाकृतादत्तपुत्रीप्रतिगृहीता।इयामवममपुत्रस्थानीयेतितदानस्यपरिणतद्दत्तपुत्रीप्रतिगृहीतृसपिंडाअसपिंडा
भवतीतितत्रपरिणयोमाप्रसीदिदितिचकारणमात्रसगोत्रापरिणेयेत्युच्यते।उक्तंचादत्रिमाणांजनकगोत्रादिनिवृत्त्या
अन्यगोत्रादिप्राप्तिर्मनुना।गोत्ररिक्थेजनयितुर्नहरेद्दत्रिमःसुतः।गोत्ररिक्थानुगःपिंडोव्यपैतिददतःस्वधेति।एवंतर्हिअस
पिंडायामातुरितिनवक्तव्यंचकारेणैवासगोत्राग्रहणेनैवासपिंडायाअपिप्राप्तत्वात्।बाढं।सापत्न्यमातृपितृकुलजासपिं
डामात्रसगोत्रापिनभवतिमातृसपिंडाभवतितत्रविवाहप्राप्तावितदुक्तं।मातुरसपिंडापि।तथाचसापत्न्यमातृसपिंडाथपि ६०
मातुलादिव्यवहारंदर्शयति।सुमंतुः।पितृपत्न्यःसर्वामातरस्तद्भ्रातरोमातुलास्तदुहितरश्चभगिन्यस्तदपत्यानिभागिनेया

नि।अन्यथासीकरिकाःस्फुरिति।असगोत्राचयापितुरित्यत्रचकारेणपितुरसपिंडायाग्रहणंनकर्त्तव्यं।असगोत्रापदेने
वलब्धत्वात्।उच्यते।यस्यपितादत्रिमपुत्रस्तस्यदत्रिमस्ययज्जनककुलंतत्रजातापरिणेयापितुरसगोत्रादानेनजन
कगोत्रनिवृत्त्यभावात्।एवंविधायाःपितुरसगोत्रायाविवाहप्रसक्तौचकारेणदमुच्यते।पितुरसपिंडायाग्रहणाय
थेवंनात्रविष्टत्।असगोत्राचयात्मनइत्येवावहृप्तत्।तस्मान्मातुरसपिंडाअसगोत्रापितुरसपिंडाचअसगोत्रापरि
णेयेतिसिद्धं।यवीयसींवयसाप्रमाणेनच।अरोगिणींअचिकित्सनीयव्याधिरहितां।भ्रातृमतींपुत्रिकाकरणशंकानि
वृत्त्यै।अत्रमनुः।यस्यास्तुनभवेद्भ्रातानविज्ञायेतवापिता।नोपयच्छेततांप्राज्ञःपुत्रिकाधर्मशंकयेति।यस्याःपितापुत्रि
काकरणाभिप्रायवान्भवति।नविज्ञायेत।तांनोपयच्छेदित्यर्थः।एवंयत्रयत्रशंकानास्ति।तामुपयच्छेतेत्यर्थादुक्तंभवति।
असमानार्षगोत्रजां।ऋषिरिदंआर्षंप्रवरइत्यर्थः।गोत्रंवंशपरंपराप्रसिद्धं।आर्षंचगोत्रंचआर्षगोत्रे।समानेआर्षगोत्रे
यस्यसतादृशाः।तस्मादुत्पन्ना।असमानार्षगोत्रजा।आनवविधा॥असमानार्षगोत्रजा।गोत्रप्रवरस्यपृथक्पृथक्पदा
दासेनिमित्तं।परिणीयसगोत्रींचसमानप्रवरींतथा।त्यागंकृत्वाद्विजस्तस्याःतस्यांद्रायणंचारेदिति।पार्थक्येनपरिग
णनात्।त्यागश्चोपभोग्यस्यैव।ननुतस्याः।समानप्रवरीकन्यामेकगोत्रामथापिवा।विवाहयतियोमूढस्तस्यवक्ष्यामि

निवृत्तिः। उत्सृज्यतीं तातान्नार्यां मातृवत्परिपालयेदिति॥ ज्ञानातनपस्मरणात्। अत्रापस्तंबः। समानगोत्रप्रवरीकन्या
मूढ्वापगम्य च। तस्यामुत्पाद्य चंडालं ब्राह्मण्यादेव हीयत इति। समानप्रवरेस्वरूपं च बौधायनेनोक्तं। एक एव ऋषिर्या
वत्प्रवरेष्वनुवर्त्तते। तावत्समानगोत्रत्वमृतेत्र भृग्वंगिरोगणात्। समानगोत्रत्वं समानप्रवरत्वमित्यर्थः। भृग्वंगिरोगणे
षु विशेषमाह। सत्यदकारः। पंचानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः। भृग्वंगिरोगणेष्वेवं शेषेष्वेकोपि वारयेदिति।
पंचार्षेयाणामृषित्र्यानुवृत्तावन्योन्यं मिथो विवाहः। त्र्यार्षेयाणामृषिद्वयानुवृत्तौ न त्वार्षेयैकानुवृत्तावपि न विवाह इत्यर्थः॥
बौधायनोपि॥ द्व्यार्षेयसंनिपातेऽविवाहस्त्र्यार्षेयाणां त्र्यार्षेयसंनिपातेऽविवाहः पंचार्षेयाणामिति। संनिपातसाम्य
इत्यर्थः। गोत्रभेदे प्रवरैक्यमस्ति। तद्यथा। संकृतिसंप्तिमाषते उशीर्बुशिवगवानी गोत्राणामांगिरसगौरिवीतसांकृत्येति
प्रवरैक्यं। तथा। यास्कवाधूलमौनमौकानीं गोत्रभेदेपि भार्गववैतहव्यसावेदसेति प्रवरैक्यं। एतेषां मिथो विवाहो मा
भूदित्यसमानार्षग्रहणं। यत्र तु प्रवरविकल्पः। यथा। आंगिरसांबरीषयौवनाश्वमांधात्रेबरीषायौवनाश्वेति॥ तत्रापि प्रव
राभेदः। न तु गोत्रभेदः। तन्निरासार्थमसमानगोत्रग्रहणं। एवं प्रवरगोत्रयोः पृथक्पृथक्पर्युदासनिमित्तत्वं विज्ञेयं। एवं सारा ४१
त्परेपरया वान्वयवानुवृत्तेर्निर्मर्यादत्वात्सर्वत्र निषेधप्राप्तावावधिमाह॥ याज्ञवल्क्यः॥ पंचमात्सप्तमादूर्ध्वं मातृतः पितृत

स्तथा। मातृतः मातृकुले पंचमादूर्ध्वं पितृतः पितृकुले सप्तमादूर्ध्वं सापिंड्यं निवर्त्तत इत्यर्थः। पित्रादयः षट् सपिंडाः त
स्पिबस्वपुत्रादयश्च षट्। आत्मा च सप्तमः। तथा मात्रादयश्चत्वार आत्मा च पंचमः। सैतानन्तेदपि यतः सैतानोत्र सप्तमादा
य गणयेत्। यावत्सप्तमो न वति। पित्रादिबीजता नियोगादिना याकुली नारजानात तत्रापि तद्वंश्ये सप्तमाज्ञा नार्यो विवाहः
पितृबंधुभ्यः मातृबंधुभ्यः पंचमात्। आह वशिष्ठः। असमानार्षेयामस्पृष्टमैथुनामवरवयसीं सदृशीं भार्यां विंदेत पंच
मीं मातृबंधुभ्यः सप्तमीं पितृबंधुभ्य इति। बंधुशब्दोपादानादयमर्थो गम्यते। अन्यथा कुलादिष्वेव ब्रूयात्। यच्च वशिष्ठेनो
क्तं। पंचमीं विवमातृपितृतस्त्थेवचनं तत्सवर्णसापत्न्यमातामहकुलविषयं। ब्राह्मणादीनां क्षत्रियादिदारसमुत्पन्नपितृकु
लविषयं वा। एकत्रान्वयवानुवृत्तेरन्यत्र वादन्यत्र सावर्ण्यं नावान्वयनुपेक्षीनसिराद॥ पंचमात्तः सप्तपितृतः। त्रीनतीत्य मा
तृतः पंचातीत्य वा पितृतः इति। अत्र त्रीनतीत्य इत्यादिकस्यायं विषयः। यस्य माता दत्तपुत्रीतीयः प्रतिग्रहीतापुत्रत्वेन स्वीकरो
ति तत्कुले। यस्य दत्तपुत्रः पितितत्कुले। यस्य दत्तपुत्रः पिता। तस्य दत्रिमस्य जनककुले च। एकत्रावयवानुवृत्तेरन्त्यादन्य
त्रगोत्रानुवृत्तेरन्तावात्। यत्तु शौखवचनं॥ यावत् कज्जाना बहवः पृथक्क्षेत्राः पृथक्कुलाः। एकपिंडाः पृथक्शौचाः पिं
डस्त्वावर्त्तते त्रिषु इति। अस्यार्थः। एकस्माद्ब्राह्मणादुत्पन्नाः पृथक्क्षेत्रा भिन्नमातृजन्याः पृथक्कुला भिन्नजातीयाः। ते एकपिं

ड्राः सपिंडाः पृथग्गोत्राः। पिंडस्त्रिष्वावर्त्तते। त्रिपुरुषमेव साापिंड्यमिति। एतद्भिन्नजातीयसापत्नमातृकुलविषयं। त
त्रापत्नमातृजातीयेनाप्युत्तमजातीयविवाहप्राप्तिरेव नास्ति। अनुलोमतः प्राप्तिरस्ति। तत्र त्रिपुरुषमेव साापिंड्यं युक्तं।
उत्तमजातीयावयवसंयोगान्न जातीयावयवविपरिणामात्। एवं पूर्वोक्तगुणविशिष्टा परिणेयेत्युक्तं। तत्र ये श्रुति
विनिषिद्धेषु दृष्टगुणदोषौ न स्तः। केवलशास्त्रैकसमधिगम्यौ तौ। यथा॥ असपिंडा तु या मातुरित्यत्र शास्त्रसमधिगम्या
गुणास्तदतिक्रमे च दोषा अपि। अत्रातिक्रान्तशास्त्रस्य नार्यैव न सा भवति। भार्यात्वं स्यादवनीयादिवत्संस्कारशब्दत्वात्। आ
यविश्रीयात च। तथा पुत्रिकायाश्च न परिग्रहः स्यात्। आर्यत्वं प्रदानात्मत्वात्। तथा गोत्रमपि न निवर्त्तते। एवमासुरादिविवाहेष्व
पि गोत्रानिवृत्तिः। अभ्रातेव पुंस एति प्रतीचीति मंत्रलिंगाच्चान परिग्रहस्य पुत्रिकाया भार्यात्वं व्याख्यातं च निरुक्तकृता। अ
भ्रातृकत्वदुःस्वपि तृणां संयमसुखाभिसंतानकर्मणि पिंडदानाय च भवति। वशिष्ठः। अभ्रातृकां पुंसः पितृनभ्येति प्रतीचीनं गच्छति
पुत्रत्वमिति। यत्र पुनर्दृष्टगुणदोषदर्शनेन विधिनिषेधाभिधानं। यथा हीनक्रियामित्यादिना। नतदतिक्रमे भार्यात्वाभावः।
किंतु नियमातिक्रमात्प्रायश्चित्तमात्रं भवति। तथा प्रसिद्धश्रोत्रियकुलजा परिणेया। तथा च याज्ञवल्क्यः। दशपूरुषवि ४२
ख्यातात् श्रोत्रियाणां महाकुलादिति। मातृतः पंच पितृतः पंच वेति दश। एवं सर्वत्र शास्त्रापवादमाह स एव। स्फीतादपि न सं

व्यारिरोगदोषसमन्वितात्। संचारिणो रोगाः कुष्ठापस्मारादयः। मातृसापिंड्याभावेऽपि मातृसगोत्राया अपि पाक्षिको नि
षेधो व्यासेन दर्शितः। सगोत्रां तु मातुरप्येके नेच्छन्त्युद्वाहकर्मणि। एके नेच्छंतीत्यनेन पाक्षिकविवाहप्राप्तिर्दर्शिता। अस्तु मनवा
र्थींहत्तु पूर्वकमुत्सर्गस एवाह। जन्मनाम्नोरविज्ञाने उद्वहेदविशंकितः। अत्र दशापि राघवस्था विज्ञेया॥७॥ अथ व
रलक्षणानि। तत्र याज्ञवल्क्यः। एते एव गुणा युक्ताः सवर्णः श्रोत्रियो वरः। यत्नात्परीक्षितः पुंस्त्वे युवा धीमान्जनप्रियः। ए
तैः कन्यागुणैः॥ अनन्यपूर्वकत्वयवीयस्त्वादिमत्त्वव्यतिरिक्तैर्युक्तः। सवर्णस्तुल्यवर्णो वा न हीनवर्णः। श्रोत्रियः श्रु
ताध्ययनसंपन्नः। कात्यायनः। उन्मत्तः पतितः कुष्ठी तथा षंढः सगोत्रजः। चक्षुःश्रोत्रविहीनश्च तथापस्मारदूषितः। वरदो
षाः स्मृता ह्येते कन्यादोषाः प्रकीर्तिताः। नारदः। परीक्ष्य पुरुषं पुंस्त्वे निःशेषं रोगलक्षणैः। पुमान्यद्यविकल्पेन स कन्यां लब्धुम
र्हति। सुबद्धजत्रुजान्वस्थि सुबद्धांसशिरोधरः। यस्यापि त्रवातरागाद्रादिमूत्रं सफेनिलं। पुमान् स्याल्लक्षणैरेभिर्विपरीतस्तु
षंढकः। अपत्यार्थं स्त्रियः सृष्टाः स्त्री क्षेत्रं बीजिनो नराः। क्षेत्रं बीजवते देयं नाबीजी क्षेत्रमर्हति॥८॥ अथ दारानुकल्पः। तत्र म
नुः। सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि। कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशो वराः। अवरा जघना॥ शूद्रैव भार्या शू
द्रस्य सा च स्वा च विशः स्मृते। ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः। अत्र शूद्राविषयप्रकीर्तनामिति स एवाह। शूद्रावेदी

+अपिवात्स्यायनादिनापि सुपन्नरहितस्य केवलशूद्रापत्यत्वं पातित्यहेतुः॥४

पतत्यत्रिरुतथ्यतनयस्य च। शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगुः। शूद्रायां वादापततीति अत्रिरुतथ्यतनयस्य
गौतमस्य च मते। अनयोर्मते शूद्राविवाह एव नास्ति। शौनकमते तु शूद्राविवाहान्न पातित्यं किंतु तत्र सुतोत्पत्त्या। अतः
शूद्रामृतुकाले नाभिगच्छेदिति तन्मते। एवं च ऋतुकालगमनप्रापकाणि अगमनाद्दोषप्रापकाणि वचनान्येतद्व्यतिरि-
क्तविषयाणि ऋतुमानं तु न तत्सुतोत्पत्त्यापि पातित्यादित्युक्तं। तत्र ब्राह्मणादिभ्यः प्रज्ञानात् शूद्रां मृतां नोपगच्छेत्। तद-
पत्यतयेति। तान्य वा शूद्रायामेवोत्पन्नानि अपत्यानि यस्य स तदपत्यः। तस्य भावस्तदपत्यता। एष एवार्थो विवरणकार-
स्य शीलनतः। शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैरिति। अत्र वाक्यशेषः। कुलान्यकुलतां यान्तीति यद्व्रमनुनोक्तौ न
ब्राह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः। कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्योपदिश्यत इति। तत्प्रथमत एव शूद्रापरिण-
यनविषयं। आपद्यपि हि तिष्ठतोः सवर्णामलभमानयोरित्यर्थः। एतच्च विवेकस्यापि नियतं। यतः स एवाह। हीनजातिं
स्त्रियं मोहादुद्वहन्तो द्विजातयः। कुलान्येव नयन्त्याशु ससंतानानि शूद्रतामिति। हीनजातिं शूद्रां। सवर्णालाभे तु क्षत्रियादि-
विवाहमाह पैठीनसिः। अन्याबकन्यायास्नातकव्रतचारतु॥ अपि वा क्षत्रियायां पुत्रमुत्पादयीत वैश्यायां वा। शूद्रायां
वेति केचित्। सर्वेषां शूद्रापरिणयननिषेधमाह याज्ञवल्क्यः। यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः। न तन्मम मतं यस्मा- ४२

त्तत्रात्मा जायते स्वयं। एतत्तु पादृशुयच्छाखीयस्य तृतीयः पक्ष आदृतः। तच्छाखीयस्यापि स एव पक्षः। इत्येवं व्यवस्थि-
तो विकल्पः॥ अथ दातृनिरूपणं। तत्र याज्ञवल्क्यः॥ पिता पितामहो भ्राता सकुल्यो जननी तथा। कन्याप्रदः पूर्वनाशे
प्रकृतिस्थः परः परः॥ सकुल्यो दायादः। दायादश्चेपि संनिहित एवाधिकारी। प्रकृतिस्थः पातित्योन्मादादिदोषरहितः। अ-
प्रकृतिस्थेन पित्रादिना दत्तमप्यदत्तमेव। यथाह नारदः। स्वतंत्रोपि हि यत्कार्यं कुर्यादप्रकृतिं गतः। तदप्यकृतमेवास्यादस्वा-
तंत्र्यस्य हेतुतः। पित्रादिना स्वतंत्रेणापि सता न प्रकृतिस्थेनादत्तं नापरतंत्रेण भवति तदा तत्कृतं वाग्दानादिकं कार्यमकृत-
मेवादितव्यं। यदि तस्मिन्नवारपतनीयादोषः॥ अचिकित्स्यरोगाद्वा अनावृत्तः। नानावृत्ता तथैवोपरितनैकर्मप्रकृतिस्थो
निर्वाह्यः॥ दृष्टादृष्टदोषाभावात्॥ यद्यप्रकृतिस्थदत्ताया विवाहसंस्कारो निष्पन्नस्तदा प्रधानकर्मणो निष्पन्नत्वेनाधि-
कारिमात्रे विकल्प्यात्तत्रापि न संकीर्त्यनापश्चाद्वरणीया कन्या। एवं तर्हि अनधिकारिणा कृतमकृतमेवेत्यतो द्विरूढेति
तिवतू। सत्यं॥ तद्विरोधपरिहाराय परिवृत्तविवाहस्य वतीप्रत्याहृत्य पुनस्तस्मा एवाधिकारी दद्यात्। तत्र पुनर्विवाहोऽपि
परिवृत्तविवाहवद्विज्ञेयः। तथा नारदोऽपि दातृक्रममाह॥ पिता दद्यात्स्वयं कन्यां भ्राता वानुमते पितुः। मातामहो मातुलश्च
सकुल्यो बांधवस्तथा॥ माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते। तस्यामप्रकृतिस्थायां दद्युः कन्यां स्वजातयः इति। सकु-

ल्याः पितृपत्नीयाः बांधवा मातृपत्नीयाः। स्वजाताया ब्राह्मणादयः। यस्य वर्णस्य या कन्या तज्जातीया अधिकारिण इत्य
र्थः। अस्मिंश्च वचने चात्र नैतरं मातामहमातुलयोः क्रमाणाधिकारं प्रतिपाद्य तदनंतरं पितृबंधूनामधिकारः प्रदर्शि
तः। अयं च क्रम औरसकन्यका विषयः पुत्रिकादि विषयत्वादित्यः। पुत्रिका चौरसस्समैव। औरसो धर्मपत्नीजस्त
समः पुत्रिकासुत इति। याज्ञवल्क्यस्मरणात्। क्षेत्रजायौ तु क्रमीतरमाह कात्यायनः। स्वयमेवौरसीं दद्यात् पित्रभा
वे स्वबांधवाः। पितृबांधवा दद्युः। मातामहस्तातान्यां हि माता वा धर्मजौ सुतौ। अस्यार्थः। औरसीं पिता स्वयमेव दद्यात्। पि
त्रभावे पितृबांधवा दद्युः। तातान्यां औरसीव्यतिरिक्तौ धर्मजौ नियोगे जातौ क्षेत्रजौ तु पित्रभावे मातामहो दद्यात्। मा
तामहग्रहणं मातुलस्याप्युपलक्षणं। भ्रातस्य दत्तावमातित्तिक्रमः। युक्तं चैतत्। क्षेत्रजायौ मातामहादयव प्राधान्यात्।
एवं च मातामहादीनामौरसीपुत्रीदाने पितृबंधुषु विद्यमानेष्वधिकारो नास्तीत्युक्तं। तत्र च विषयविशेषे अपवादः स्मर्य
ते। दीर्घप्रवासयुक्तेषु पौगंडेषु च बंधुषु। माता तु समर्थ्येद्याद्दौरसीमपि कन्यकां। पौगंडो व्यवहाराद्यसमर्थः। समये
राज्ञा दर्शीनां चित समयात् पूर्वकालात्। पूर्वोक्तसकलाधिकार्यभावे। मनुः। यदा तु नैव कश्चित्स्यात् कन्या राजानमाव्र
जेत्। अनुज्ञया तस्य वरं सवर्णं वरयेद्वरं। वरयेदित्यनुवृत्तौ नारदः। सवर्णमनुरूपं च कुलरूपवयःश्रुतैः। सह ध ४४

र्मं चरत्वेन पुत्रीश्चोत्पादयत्ततः पित्रादिषु सत्स्वपि कालविशेषे विधत एव स्वयंवरः॥ यदाह बौधायनः। त्रीणि
वर्षाण्यृतुमती काँक्षेत पितृशासनं। ततश्चतुर्थे वर्षे तु विंदेत सदृशं पतिं। अविद्यमाने सदृशे गुणहीनमपि श्रयेत्। यत्तु
विष्णुनोक्तं। ऋतुत्रयमुपास्यैव कन्या कुर्यात्स्वयंवरमिति। तद्गुणवद्वरलाभे वोढव्यं। अत्र विशेषो नारदमाह मनुः। अ
लंकारं नाददीत पित्र्यं दत्तं स्वयंवरा। मातृकं भ्रातृदत्तं वा स्तेया स्याद्यदि तं हरेत्। वरं प्रत्यपि सप्रवाहा। पित्रे न दद्यात् शुल्कं तु क
न्यामृतुमतीं हरन्। स हि स्वाम्यादतिक्रामेत् ऋतूनां प्रतिरोधनात्। यमः। कन्या द्वादशवर्षाणि याप्रदत्ता गृहे वसेत्। ब्रूणहत्या
पितुस्तस्याः सा कन्या वरयेत्स्वयं। एवं चोपगतौ पत्नी नावमन्या कदाचन। न च तां बंधुकीं विद्यात् मनुः स्वायंभुवोऽब्रवीत्।
एवं विधा या बंधुकी चास्ता वा देशकालादिप्रतिबंधान्नावसति। अन्यथा कालातिक्रमे दोषश्रवणात्। तथा च बौधाय
नः। दद्याद्गुणवते कन्यां नग्निकां धर्मचारिणीं। अपि वा गुणहीनाय नापरुंध्याद्रजस्वलां। कुलीनाय रूपादिगुणरहिताय
नग्निकावदर्शिति पुराणे। यावन्न लज्जयांगानि कन्या पुरुषसन्निधौ। योन्यादीन्नावगूहेत तावद्भवति नग्निका। अ
सिंह स्वल्पया प्राह। नग्निका त्वनागतार्त्तवेति। अत्रिकश्यपौ। पितुर्गृहे तु या कन्या रजः पश्येदसंस्कृता। भ्रूणहत्या
पितुस्तस्याः सा कन्या वृषली स्मृता। यस्तु तां वरयेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः। अश्राद्धेयमपांक्तेयं तं विद्याद्वृषलीपतिं।

संवर्त्तः। रोमकाले तु संप्राप्ते सोमो भुंजीत कन्यकां। रजःकाले तु गंधर्वो वह्निस्तु कुचदर्शने। तस्मात्तामुद्वहेत्कन्यां यावन्न
र्तुमती भवेत्। विवाहस्त्वष्टवर्षायाः शस्यते बुधैः॥ कन्यायाः। कल्पतरौ॥ अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी। दशव
र्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला। एवं कन्यादाने अधिकारिणो निरूपिताः। सांप्रतं दत्ताया अपि कन्यायाः प्रत्याहरणं
निरूप्यते। तत्र याज्ञवल्क्यः। दत्तामपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेत्। दत्तामपि हरेद्यदि पूर्वस्य पातकादिदोषो
पसृष्टश्चेतरस्य गुणयुक्तश्चेवस्यात्। तच्च सप्तमपदात्प्राग्द्रष्टव्यं। यथाह नारदः। स्त्रीपुंसयोस्तु संबंधाद्वरणं प्रा
ग्विधीयते। वरणाद्ग्रहणं पाणेः संबंधोयं त्रिलक्षणः॥ तयोरनियतं प्रोक्तं वरणाद्दोषदर्शनात्। पाणिग्रहणिकामंत्रा नि
यतं दारलक्षणं। तेषां निष्ठा च विज्ञेया विद्वद्भिः सप्तमे पदे। इति अस्यार्थः। स्त्रीपुंसयोः संबंधो शास्त्रगम्यो वरणेन भवति।
वरणात्पाणिग्रहणं। एवं संबंधस्त्रिलक्षणः। वरणपाणिग्रहणसप्तपद्या इति त्रिविधः। गांधर्वादिषु नायं क्रमः। तयोः कन्या
वरयोरनियतमनियमः। दत्तापि न परिणीयात। वाग्दत्तामपि न दीयतेत्येवंरूपः। तत्र हेतुः। वरणाद्दोषप्रदर्शनादिति
वरणादूर्ध्वं कन्यावरयोरन्योन्यं दोषदर्शनात्। अनेन च विवाहादूर्ध्वं नानियमस्त्यक्तं भवति। तत्र नियमहेतुमाह॥
पाणिग्रहणिका मंत्रा इति। तैर्मंत्रैः कृत्यादितसंस्कारायाः न परित्यागः इत्यर्थः। पाणिग्रहणमंत्रोत्पाद्यसंस्कारावधिमाह॥ ४५

+पाठांतर२१

तेषामिति। केचनास्मिन्वचने व्याख्यांतरं वदंति। तद्यथा॥ वरणाद्ग्रहणं पाणेः संस्कारोग्निलक्षणः। तयोरनिय
तं प्रोक्तं वरणं दोषदर्शनात्। पाणिग्रहणं यस्याग्निलक्षणः संस्कारः। अग्निविहिताहोमादिनिष्पाद्यः संस्कारः। त
योर्वरणपाणिग्रहणयोर्मध्ये वरणमेव दोषदर्शनादनियतं। न पाणिग्रहणं। तस्माद्वीकपतित्वानुपपत्तेरिति। य
त्तापि पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे। एवं च सप्तपदादर्वाक्परिणेतृमरणेपि न विधवात्वमिति गम्यते। उक्तं च
वशिष्ठेन॥ अद्भिर्वाचा च दत्तायां म्रियेताथो वरो यदि। न च मंत्रोपनीता स्यात्कुमारी पितुरेव सा। सा पितुरेव न प्रतिग्रहीतुरित्यर्थः। सा
च तादृग्वराय प्रदेया। न दत्ता भवतीत्याय। तद्दत्तापि कन्यास्मै। इदमपि लोकविद्विष्टत्वात् देशाचारानुसारेण भवति। बलादप
६५ हृतायां तु विशेषमाह वशिष्ठः यमो। बलाच्चेत्प्रहृता कन्या मंत्रैर्यदि न संस्कृता। अन्यस्मै विधिवद्देया यथा कन्या तथैव सा।
बहुभ्यो वाग्दानकायाय त्नाकेविशेषो द्रष्टव्यः। आनाकन्याहि दत्तायामनूढायां तु यत्र वा। वरागमश्च सार्वर्षीला तत्ता
वरस्तु तां। सार्वर्षी वराणामागमानसतीत्यर्थः। स च पूर्ववरोयदि दोषरहितास्तु गवांश्च भवति। वरयित्वाद्दर्शीतरगमान
नारदः। प्रतिगृह्य तु यः कन्यां वरो देशांतरं व्रजेत्। त्रीनृतून्समतिक्रम्य सा चान्यं वरयेद्वरं। प्रतिगृह्य वरयित्वेत्यर्थः। प्र
दाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं तथा। धार्या सा वर्षमेकं तु देयान्यस्मै विधानतः। अत्र विशेषमाह॥ मनुः॥ कन्यायां

दत्त्वा शुल्कादौ म्रियेत यदि शुल्कदः॥ देवराय प्रदातव्या यदि कन्यानुमन्यते॥ कुलादिरहितत्वेपि कन्या प्रत्याहरणीये
त्यर्थः॥ वशिष्ठः॥ कुलशीलविहीनस्य षंढादिपतितस्य च॥ अपस्मारिविधर्म्मस्य रोगिणां वेषधारिणां॥ दत्तामपि हरेत्क
न्यां सगोत्रोढां तथैव च॥ अत्र पुनः विवाहाविवाहादि विशेषस्तु पूर्वमेव निरूपितः॥ अदुष्टकन्यापरित्यागे विशेष
माह नारदः॥ प्रतिगृह्य तु यः कन्यामदुष्टामुत्सृजेन्नरः॥ विनयः साध्यदं तं च कन्यां तामेव चोद्वहेत्॥ कात्यायनः॥ वर
दोषमनाख्याय पाणिं गृह्णाति यो नरः॥ यावन्नैव प्रकुर्वीत तद्दत्तं नाप्नुयात्तु सः॥ कन्यादोषेप्येवमेव दाता दंड्यो वर
स्तथा॥ नारदः॥ नादुष्टां दूषयेत्कन्यां नादुष्टं दूषयेद्वरं॥ दोषे सति न दोषः स्यादन्योन्यं त्यजतस्तयोः॥ मनुः॥ विधिव
त्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हितां॥ व्याधितां विप्रदुष्टां वा छद्मना चोपपादितां॥ विप्रदुष्टा अन्यगतचित्ता छद्म
ना अन्यकन्योपदर्शनेन॥ एवमुक्तलक्षणाय वराय उक्तलक्षणां कन्यां दद्यादित्यधिकारिणो उक्तो विवाहः स प्रपंचः सो
पि उपदिष्टानुक्रमेणेति शास्त्रनियमः॥ तत्र क्वचिदपवादमाह मनुः॥ षंढांधबधिरादीनां विवाहास्त्रियथोविते॥ विवा
हासीनावतषी कनिष्ठो विवाहे त्वदापि ह्यप्रुत्रे सापत्न्ये परदारसुतादिषु॥ विवाहाधानयज्ञादौ परिवेदो न ४६
दूषणं॥ शातातपोपि॥ नाग्नयः परिविंदंति न वेदा न तपांसि च॥ न च श्राद्धं कनिष्ठस्य या च कन्या विरूपिका॥ अन्यो

व१

पि विशेषश्चावसथ्याधानप्रकरणे वक्ष्यते॥ ७॥ अथ विवाहभेदाः॥ तत्र मनुः॥ यो यस्य धर्म्यो वर्णस्य गुणदोषो
च यस्य यौ॥ तद्वः सर्वं प्रवक्ष्यामि प्रसवे च गुणागुणान्॥ ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः॥ गांधर्वो राक्ष
सश्चैव पैशाचश्चाष्टमोधमः॥ ब्राह्मविवाहलक्षणं तत्संततिफलं चाह याज्ञवल्क्यः॥ ब्राह्मो विवाह आहूय दीयते श
क्त्यलंकृता॥ तज्जः पुनात्युभयतः पुरुषानेकविंशतिं॥ उभयतः पित्रादीन्दश पुत्रादीन्दश आत्मानं चैकविंशकमित्येकविंश
तिं पुनातीत्यर्थः॥ उभयतः॥ मातृतो दश पितृतो दश आत्मा चेत्येकविंशतिः॥ तथा यज्ञस्थऋत्विजे दैव आदायार्षस्तु गोद्व
यं॥ यज्ञे प्रारब्धे कन्यामलंकृत्य यत्र ऋत्विजे दीयते स दैवः॥ वराद्गोमिथुनं द्वे वा गृहीत्वा यथाशास्त्रमलंकृताय तस्मै दी
यते स आर्षः॥ गोद्वयग्रहणं प्रदर्शनार्थं यत आह मनुः॥ एकं गोमिथुनं द्वे वा वराद्दाय धर्मतः इति॥ एतच्च गोमिथुनं पित्रा
दिभिर्गृह्णाति तदा विक्रय एव तथा च॥ मनुः॥ आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत्॥ अल्पोपि वा महान्वापि विक्रय
स्तावदेव सः इति॥ कन्यार्थं यदि गृह्णाति तदा न दोषः इत्याह स एव॥ यासां नाददते शुल्कं ज्ञातयो न स विक्रयः॥ अर्हणं ना३
तत्कुमारीणामानृशंस्यं हि केवलं॥ यच्छुल्कं कन्यार्थं तत्कुमारीणामर्हणं पूजनं॥ आनृशंस्यमपापिष्टं तच्छुल्कं कन्यायै द
द्यादित्यर्थः॥ दैवार्षयोः फलमाह याज्ञवल्क्यः॥ चतुर्दश प्रथमजः पुनात्युत्तरजश्च षट्॥ प्रथमजो दैवविवाहजः॥ उ

शरजआर्षविवाहजः। स सप्तपूर्वान्सप्तावरानुद्धरति चतुर्दश। त्रीन्पूर्वान्त्रीनवरानिति षट् पुनाति। उत यत्र स्वस्य म
ध्यस्थितत्वादेव पवित्रता। तथा॥ इत्युक्त्वा चरतां धर्मं सह या दीयतेऽर्थिने। स कायः पावयेत्तज्जः पावयेत्तज्जः षट्ष
ड्वंश्यान्सहात्मना। सह धर्मं चरतामिति परिभाषणपूर्वकमलंकृता कन्या यत्र दीयते स कायः प्राजापत्यः। प
त्न्यां जातः षट्पूर्वान् षडपरान् आत्मानं चेति। त्रयोदश पावयेत्। अथवान्यार्थः। आत्मना सह षट्पूर्वानात्म
ना सह षडवरानिति एकादश पावयेत्। न पा[तिरिशि]गिणः। जडमूकान्धबधिरकुब्जवामनकीटकान्। आर्तिवृद्धान्नार्यो
यन्तपिसक्तान्रूपस्याबाधनहृद्धि प्रसा। कीयकामातोकारिणस्तथा। कुटिलान्मन्त्रारागीश्च परिविंदन्नदुष्यति। एते
षामाधानाद्यधिकाराभावाद्वा न दोष इत्यर्थः॥ देशान्तरस्थितज्येष्ठे सोदरे वसिष्ठेन विशेषः कथितः। अष्टौ दश द्वा
दश वर्षाणि ज्येष्ठं भ्रातरमनिविष्टमप्रतीक्षमाणः प्रायश्चित्ती भवति। अनिविष्टमकृतविवाहाग्निहोत्रम्। कालं
विकल्पस्त्वेवं विज्ञेयः। तत्र तत्र पुनः पुनः श्रूयमाणेषु प्रादेशस्थितश्चेद्दश वर्षाणि। किं विश्रूयमाणे नातिसुप्रादेश
स्थितदेशान्नदीपर्वतादिव्यवधानाकुलदूरतरादेशस्थिते अश्रूयमाणे चाष्टौ वर्षाणि इति। यत्र ज्येष्ठो धिकार्यपेक्षा
क्षीणेन कारणेन तत्र तदनुज्ञया कनीयसा कर्तव्यं यथाह सुमैत्रः॥ ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव काश्रयेत्

पं२ ४२ -

आसुराद्द्रविणादानाद्गांधर्वः समयान्मिथः। राक्षसो युद्धहरणात्पैशाचः कन्यकाछलात्। आत्मार्थं द्रविणमादा
य यत्कन्याप्रदानं स आसुरः अस्य मानुष्य इत्यपि संज्ञा। तथा च हारीतः॥ शौल्केन मानुष इति। कन्यावरयोरन्योन्या
नुरागेण यः समयः चौमन्नार्या मे पतिरिति स गांधर्वः समयपूर्वकमुपगमोऽपि गांधर्व एव। युद्धहरणाद्राक्षसः।
शात्रस्त्यगृह्य त्रिधा यता। यथाह हारीतः॥ अलंकृतामपि जयन् ह्मात्र इति। कन्यकाछलात्। छलेनेछलः कपटेन
स्वापाद्यवस्थासु कन्यकाछलाद्धरणात् पैशाचो विवाहः। कन्यकीछलादित्यपि पाठः। न चासुरादिविवाहेषु सप्त
पदातिक्रमणाभावात्पतित्वं नार्यायायारसुत्पत्तिः शंक्यानीकनीयं। तथाप्येषां कादोनंतरानेतरामेव संस्कारविधाना
त्। तथा च देवलः॥ गांधर्वादिविवाहेषु पुनर्वैवाहिको विधिः। कर्तव्यश्च त्रिभिर्वर्णैः समयेनाग्निसाक्षिकः। गृह्यप
रिशिष्टेपि। गांधर्वासुरपैशाचविवाहा राक्षसश्च यः। पूर्वं परिणयास्तेषां तत्ता होमो विधीयते। परिणयः स्त्रीकार
दिः। एवं स्थितवर्णविवस्थया विवाहनियममाह मनुः। षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान्। विट्शू
द्रयोस्तु तानेव विद्याद्धर्म्यान्नराक्षसान्। अस्यार्थः॥ ब्राह्मादीन् षडानुपूर्व्या क्रमेण ब्राह्मणस्य धर्म्यान् धर्मादनाप

MEMORIAL
MEMORIAL

तानूविद्यात्तत्रषट्ब्राह्मोदैवआर्षःप्राजापत्यआसुरोगांधर्वश्चेतियत्तुकश्यपेनोक्तं।क्रीताद्रव्येणयानारीनसाप
त्नीविधीयते।नसादैवेनसापित्र्येदासींतांकश्यपोब्रवीदिति।तानक्ष्द्रव्यमाणप्रशस्तविवाहसंतानविषमितिद्रष्टव्यं।
क्षत्रस्यचवरान्पश्चादुक्तानआसुरगांधर्वराक्षसपैशाचान्धर्म्यान्विंद्यात्।विट्शूद्रयोस्तुआराक्षसानूराक्षस
वर्जितान्तानेवासुरपैशाचीनान्धर्म्यान्विंद्यात्।कवानेवंव्यावहृते।षट्ब्राह्म्यादिगांधर्वांतान्विप्रस्योक्तंक्षत्रस्य
प्राजापत्यादिराक्षसांतान्।चतुरःविट्शूद्रयोस्तुआराक्षसान्प्राजापत्यादीन्तानेवधर्म्यान्विंद्यात्।पैशाचपरित्यागे
वाहत्रयमुपदिशंति।हेतुश्चनारदस्मृतिवचनंचत्वारोब्राह्मणस्याद्याःशस्तागांधर्वराक्षसौराज्ञस्तथासुरोविट्शूद्र
योस्तुगर्हितः॥सपापिष्ठोविवाहानांपैशाचःकथितोऽष्टमइति।एषामपिमध्येप्रशस्तानाहमनुः।चतुरोब्राह्मणस्या
द्यान्प्रशस्तान्कवयोविदुः।राक्षसंक्षत्रियस्यैकमासुरंवैश्यशूद्रयोः।अयमर्थः।ब्राह्मोदैवआर्षःप्राजापत्यश्चेति
चतुरोब्राह्मणस्यप्रशस्तानाहुः।क्षत्रियस्यैकंराक्षसमेवप्रशस्तं।वैश्यशूद्रयोरासुरमेव।ब्राह्मणस्यब्राह्मादिप्रा ४८
जापत्यांतामुख्यःकल्पः।राक्षसोऽनुकल्पः।अनंतरक्षत्रधर्मत्वात्।क्षत्रस्यराक्षसोमुख्यः।क्षत्रस्यचतुरोवरानित्यत्रये

षामातआसुरगांधर्वराक्षसपैशाचाइतिचत्वारस्तन्मतेआसुरगांधर्वपैशाचाअनुकल्पाः।यन्मतेतुप्राजापत्यादयश्च
त्वारःप्राजापत्यासुरगांधर्वराक्षसाइतितन्मतेतुप्राजापत्यादयस्त्रयोऽनुकल्पाः।तथाविट्शूद्रयोरासुरोमुख्यक
ल्पःगांधर्वपैशाचावनुकल्पौ।प्राजापत्यगांधर्वावेव।एवंस्थितब्राह्मणस्यापकल्पमाहमनुरवा।पंचानांतुत्रयोधर्म्या
द्वावधर्म्यौस्मृताविह।पैशाचश्चासुरश्चैवनकर्त्तव्यौकदाचन।पंचानांप्राजापत्यासुरगांधर्वराक्षसपैशाचानांम
ध्येत्रयःप्राजापत्यगांधर्वराक्षसाधर्म्याःद्वावधर्म्यौ।तावेवदर्शयतिपैशाचश्चासुरश्चेतिमुख्यकल्पमध्यपरिगणितस्या
पिप्राजापत्यस्यापकल्पमध्यमपरिगणनमार्षीपद्युयाप्राजापत्यस्यापकृष्टत्वाद्यातनार्थं।पुनश्चस्तरजश्चषड्या
षविवाहजापत्यासकायःपावयत्रजः।षट्षट्वंश्यान्सहात्मानेति।प्राजापत्यविवाहजस्याधिकश्रवणात्प्राजापत्यस्या
धिक्यंद्योत्यतेतन्मानूदिति।क्षत्रियस्यापत्कल्पमाह।पृथक्पृथग्वामिश्रौवाविवाहौपूर्वचोदितौ।गांधर्वोराक्षस
श्चैवधर्म्यौक्षत्रस्यतौस्मृतौ।पृथक्पृथक्मुख्योनुकल्पश्चावतिष्ठितविकल्पाविनानिहितः।तत्रस्त्रावीक्तोविशे
षोयदिमिश्रितोनवतःसमिश्रोविवाहउच्यते।मिश्रविवाहमाचारादृत्यदर्शयतिगांधर्वराक्षसइति।तथाप्रथ
मंगांधर्वेणपरिगृह्यतदुभुविरुद्धेषुयुद्धेनहरणं।एतच्चप्रदर्शनार्थं।अनेनैवन्यायेनवर्णांतराणामपूह

नीयं॥ विरूपश्च द्वयोरप्यापत्कल्पेऽनतिनिंदितत्वात्पिपेशाचो याह्यः॥ तथा विरूपस्य शूद्रद्वयेरपि विप्रादेः॥ तथा च वसिष्ठः
सार्वणिप्रायेर साध्यः स्यात्शुक्रन्यासुरूपस्य विवाहार्थिणापि विवाहेन सा विवाह्या रहस्थित तिवोधी पिशाचेन सक
ल विवाहोपयोगी विशेषायज्ञपार्श्वेनोक्तः॥ विवाह वितात तंत्र होमकाल उपस्थिता कन्या यान्येनानुरागच्छे तदा यं ऊर्ध्वं
नियाधिकाः स्नापयित्वा तु तां कन्यामर्चयित्वा यथाविधि गुरुजानामाहुतिं दत्त्वा ततस्तेन प्रवर्त्तयदिति॥ याज्ञवल्क्येना
प्यन्ये विशेषादर्शितः॥ पाणिग्रहिः सवर्णासु गृह्णीयात्क्षत्रिया शरं॥ वैश्या प्रतोदमादद्याद्वेदने च ग्रजन्मनः॥ स्त्री
शरादि वंचहुलातितत्पाणिं स्थितं च वारा गृह्णीयादित्यर्थः॥ अग्रजन्मनः स्यन्ने वेदने पल्लवणे॥ तथा च मनुः॥ वसनस्य दसा
ग्राह्या शूद्रयोत्कृष्टवेदने इति॥ विधवा नियोगानात्र विचार सरणिमारोपितः युगांतरविषयत्वात्॥ विवाहवर्षमा
सादिशुद्धिज्योतिःशास्त्रे निहिता॥ सिंहस्थे मकरस्थे च गुरु सर्वत्रैनवर्जयेत्॥ सिंहस्थे तु मघासंस्थे गुरुः सर्वत्रैनवर्जयेत्॥ अ
न्यत्र सिंहगेणगत्तु विवाहादि विधीयत॥ लल्लः॥ नर्मदापूर्वभागे तु शोणस्योत्तरदक्षिणे॥ गंडक्याः पश्चिमे पारे मक
रस्थो न दोषकृत्॥ ज्योतिःसारसागरे॥ अतिचारगता जीव स्तं राशिं नैति चेद्यदि॥ लुप्तसंवत्सरो ज्ञेयः सर्वकर्म्म बहिः
ष्कृतः॥ माघफाल्गुनवैशाखज्येष्ठाषाढमृगाद्रयाः॥ षडेते शुभदा मासास्तु चा च स्यापि निश्चयाः॥ मार्गेमासि तथा ज्ये ४९

ष्ठे द्वौ रपरिणयं व्रतं॥ ज्येष्ठपुत्रदुहित्रोस्तु यत्नेन परिवर्जयेत्॥ श्रेष्ठं पक्षशुभं तिथ्युल्कमसितस्याद्यंत्रिभागं तथा
रिक्तां प्रायश्चितिर्थिं तथैव यनायाः सेधिवाशाषास्तुताः॥ अमायां विवपक्षयोः करणे विष्टिसंज्ञित॥ यः कारोति विवाहं
सः शीघ्रं याति यमालयं॥ प्रतिपद्दुःखजननी द्वितीया प्रीतिवर्द्धनी॥ सोना श्यदा तृतीया स्याच्चतुर्थी चार्थनाशनी॥ पंच
मी सुखवित्तानि षष्ठी विघ्नप्रदा मता॥ विद्या शील सुखाप्तिः स्यात्सप्तम्या मफला ष्टमी नवमी शोकजनयदा आनंदा दशमी
दिना॥ सुखदे का दशी द्वि यास फला द्वा दशा स्मृता॥ मानप्रज्ञोत्रयादशीणचतुर्दशीणा उदोषादाफलं बहुविधं निन्द्यं पंचदशी ण
विशेषतः॥ नवहस्तुल्कप्रतिपदुदयैतीनि विध्यात॥ अन्नाद्यन्न पक्षस्य दशमीह्यविवाहिकौ॥ वदेयान्यउ दशामीसुनयो
रविवाहिकौ॥ गुरुशुक्र दुपुत्राणामादिनेषु परिणीयात॥ या कन्या साप्नावत्रिंचैत्रर्तुश्चितानुवर्त्तिनी॥ अर्कार्कीभौमवा
राणादिनेषु कलहप्रिया॥ सा पत्नी समवाप्नोति उषारक रवासार॥ अत्र दिनक्षिय निधानाद्वात्रावप्यनुज्ञागम्यात॥
तथा च स्मर र तिनवारादोषाः॥ प्रजंवेतिरात्राविति याव जीवं कन्या सर्व्वासिद्ध नियुज्यत॥ दुःखं प्रथा दामयाराागे रवि
न्नीयाति पेच चौ॥ सौम्ये षड्मिमी सेविर्धियौयाति निर्धनचैवा धनकनकभूषण युता पाणिग्रहणादुत्तित्रिकायोग॥
उपसुरूपा तस्य पश्चात्सुष्टे ह्दयाति पंच चौ॥ प्राजापत्ये शुभगा पतिव्रता मानिनी प्रियाभर्तुः॥ शुचिरनुकूला भर्तुः प्रियैव

दासाम दिवाते। कन्या। आर्द्रापाणिग्रहणे वर्षेकनयाति पंचत्रित्रिनिरार्द्रादिय कन्यासमुपैतिपतिमन्त्री।
अर्द्धचतुष्कात्कन्याकुलविद्वेषिणी भवतिपुष्ये। अश्लेषास्वपि कन्या पाणिग्रहणे सामश्वश्रूनरिसहानिरर्द्धे ईर्ष्या
दघकुलटाचैसमाप्नोति। भवति त्रिवर्गयुक्ता पित्र्ये पाणिग्रहे हि सौभाग्येन्या सुतासौनाथेदासिचैयाति नित्यं या क
न्या अर्द्धे केति ख्यातपतिमरणंप्राप्नुयाद्वेवाथपगतशोकासुभगाजागवतीसुप्रजाप्रियाभर्तुः। अर्यम्णि शशियुक्ते
कन्याद्वर्षद्वायतीतादहस्ते पाणिग्रहणे समेत्य कन्या पतिव्रतानित्यं। आत्मप्राणवियोगमवाप्नुयात्कन्यकावाह्ना तुत्वा
थवाशीलत्वेशोच्याष्टे प्राप्नोति बोधवकुलान्तु। स्वातौधर्मसामतापतिदयिताबंधुवत्स सा साध्वी। ऐंद्राग्न्याख्येकन्यापु
त्रिचरुपप्रयातिपतिमन्त्री। अर्द्धचतुष्के नातमित्रकन्याप्नुयाद्धनं सौख्यं। भर्तुर्वशीकृत्यादुःखान्यनुभूयभ्रातृमनुका।
न्या द्वशामाद्वे विधवोप्रयातियद्यष्टमे न मृता। मूल सधनासाध्वीपश्चरतिप्रियतमाप्रकृष्टाचा। अश्युविरताचाराद्
सरताथान्यामतिनर्तारी। अर्द्ध ह्वायनकन्याद्वैयासाप्रर्वषाढासु। विदधातिवेश्यादावनन्तुर्विंत्रैवगुरुजनानुरक्तापा
णिग्रहणमुपयातश्रवणे निकत्रसारमाता। बिन्नष्टस्मृतिःशौचामृच्यसुखैयातिवसुदावार्ईर्थ्या रागगणे हृताय ५०
मसदनंयातिवारुणपश्चात्। अजैकपादकन्यादुःशीलादुर्भगादरिद्रा। आहिर्बुध्ने कन्यामणिकनकविभूषणेप्र

भूतमाप्नोति प्राप्नोति शीलशौचे पौष्णे न्याय्या सा नापकरणं नित्यं। विधृतात्कपरिणीता कन्या विकलेंद्रिया व्यतीपा
तविष्ट्यां मरणं नित्यं सुभगा पद्ध पित्रा रेषु करणेषु। ध्रुवकरणैः शकुनाद्यैः पाणिग्रहणाद्वैधव्यं। दुष्टस्य ह्रर्व
मपहाय दिनार्द्धत्यागं विष्टिप्रदुष्टमपि न ष्टविध्रुंतिथिं वा। शेषाः शुभा निगदिता अशुभा शयान्या पूर्वोक्ति मन्त्र
सकलीं हि विवितं नीया। शनैश्चरदिने प्राप्ते यदा रिक्ता तिथिर्भवेत्। तस्मिन् विवाहिता कन्या पतिसीनतिवर्द्धनी।
मेषे कुमार रथनुरक्ता विद्या विद्वान वित्राग विगाव्रताचा। कलह्या नंदकरी दृतायै कुलीर लग्ने कुलटा नृशंसा। ह
रौ प्रसूता सद्रवा सृता पितुः परिप्रिया श्वशुरस्य षष्ठे। रूपाचिमानार्थवती तुलाधार तयालिनि त्रैदति नि
यमस्थिरा। धनुषि कुलटा नत्न वीर्द्धमती यवारजगुः। मृगघटकाख्ये खन्यासक्ताजरासुपगच्छति। पंच पा
णिग्रहे दोषा वर्जनीयाः प्रयत्नतः। दरिद्रीं मरणं व्याधिः दुःखल्पमनपत्यतेति। तथागुरुशुक्रास्तादिषु पिवि
वाहादिनिषिध्यते। तिः सारसागार। बालत्वात्कृष्णजीव नष्टे जीवा। बालेजीव सिंहजीव सिंहादिये जीवा
दित्यौ तथा मलिम्लुचमासिमुरावायति चारमौ। वापीकूप विवाहादिक्रियाः प्रागुदिताः पूजेन्तु। अस्तादि

लक्षणे च ब्रह्मसिद्धान्ते रविणा सप्तत्रिंशन्ये षोडश हायना मता उच्यते। अर्वाक् षोडशवर्षात्स्यात् न्मोद्याद्वाईकशैशव इति।
बालवृद्धच्छायारवधिर्दीमादरीयप्राग्बालादिवसत्रयं दशदिने पश्चात्सिता वृद्धौ पक्षे वासरपंचकं च लत्र
तपाद्धगुरुः सर्वतः। तत्पश्चाद्गुरुशुक्रयोर्विमिलायाः कुर्याद्विवाहे सितनष्टे वासरपंचकं च शिवदन्नस्या
द्दशाहः पर इति॥ बार्हस्पत्ये तु। प्राक्पश्चादुदितः शुक्रः पंच सप्त दिने शिशुः। विपरीतो गुरुर्वृद्धस्त्वेत द्वाद व
गुरुरपीति। अत्रवादशतादन आपद्यायव्य वत्साम हा गार्ग्यः॥ शुक्रो गुरुः प्राक्परावा बाल्ले विंध्ये दशाहं
तिषु सप्तरात्रं। वंगेषु हूणेषु च षडहं चाशाषे चादाश त्रिदिनं वदंतीति। अस्मिंश्च चानायधिककालास्त्वाद
शादिनव्यवस्थिता इति न विरोधः। मिहिरादिभिर्बहवो दर्शिताः कालाय बाल्यवार्द्धिकपिवा। ग्राह्यास्त्र
त्राधिकारैशषादशाजदाद्युतापादिति॥ इति विवाहविधिः॥ ७॥ ॥ अथावसथ्याधानं॥ ॥ आ
वसथ्यस्य गृह्यस्याग्नेराधानमावसथ्याधानं। तद्विवाहकाले चतुर्थीकर्म्मानंतरं कुर्यात् प्रयोग
मध्ये प्रयोगांतरकरणाधिकाराभावात्। दायाद्यकाले आवसथ्याधानमित्येकेषां मतं। दायाद्यकाले ५१

नाम भ्रातॄणां पितृधनविभागकालः। अविभक्तेऽपि धानं सार्वेषां भ्रातॄणां स्वस्वस्य साधारणाच्च नवि
नियोगानर्हत्वात्तु धनविनियोगसाध्यं हि आवसथ्यादिकर्मानुष्ठानं। आतो भ्रातृमातावित्तत्रास्येवाध
नेऽधिकार इति तेषामभिप्रायः। आन्येषां तु मातसमुदितधनस्वस्वापित्वं च मस्त्यतीतरानुज्ञया विवाह
कालेपित्तवतीत्यपि प्रायः। तथा च पारस्करः॥ ॥ आवसथ्याधानं दारकाले दायाद्यकाल एकेषामिति॥
व्यासोपि। अग्निर्विवाहिकास्तेन न गृहीतः प्रमादिना। पितर्युपरते तेन ग्रहीतव्यः प्रयत्नतः। यो गृह्यो वा वि
वाहाग्निं गृहस्थः प्रतिमन्यते। अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृतः। एतच्च ज्येष्ठस्याधिकारिणो द्रष्ट
व्यं। कनीयांस्तु ज्येष्ठे कृताग्निपरिग्रहे विद्यमाने स्वयमध्ययनादिनिष्ठोऽग्निपरिग्रहमकुर्वन्नपि न प्रत्यवैति
तथा च गर्गः। पितृपाकोपजीवी वा भ्रातृपाकोपजीवकः। ज्ञानाध्ययननिष्ठो वा न दुष्येताग्निना विना। अ
ध्ययननिष्ठ इति। प्रथमाध्ययनपरः। अत्र वा ज्येष्ठे विद्यमाने न कनीयसामधिकारः। तथा च मनुशातातपौ
दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते। परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः॥ अग्रजे सोदरे ए
डौं: १

च। अन्यमातृजेन॥ आह वसिष्ठः॥ ७॥ ॥ पितृव्यपुत्रान्सापत्न्यान्परनारीसुतांस्तथा दाराग्निहोत्रसंयोगे
न दोषः परिवेदने॥ परनारीसुता दत्तकादयः॥ अन्यमपि विशेषं छंदोगपरिशिष्टे कात्यायन आह॥ दे
शांतरस्थक्लीबैकवृषणानसहोदरान्। वेश्यातिसक्तपतितशूद्रतुल्यातिरोगिणः॥ जडमूकांधबधिर
कुब्जवामनकुंठकान्। अतिवृद्धानभार्यांश्च कृषिसक्तान्नृपस्य च॥ धनवृद्धिप्रसक्तांश्च कामतोकारिणस्त
था॥ कुटिलोन्मत्तचौरांश्च परिविंदन्न दुष्यति॥ एतेषामाधानाद्यधिकाराभावाद्वा न दोष इत्यर्थः॥ देशां
तरस्थितत्वासादर वसिष्ठेन विशेषः कथितः॥ अष्टौ दश द्वादश वर्षाणि ज्येष्ठं भ्रातरमनिविष्टमप्रती
क्षमाणः प्रायश्चित्ती भवति॥ अनिविष्टमकृतविवाहाग्निहोत्रं। कालविकल्पस्त्वेवं विज्ञेयः॥ तत्र तत्र पुनः पुनः
श्रूयमाणे सुप्रदेशस्थिते द्वादश वर्षाणि किंवदंत्या श्रूयमाणे नातिसुप्रदेशस्थिते दश। नदीपर्वतावरोधा
कुलदूरतरदेशस्थिते अश्रूयमाणे वाष्टौ वर्षाणि इति॥ यत्र ज्येष्ठाधिकार्यपि आधानं न करोति तत्र त
दनुज्ञया कनीयसा कर्तव्यं॥ यथाह सुमंतुः॥ ॥ ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव कारयेत्॥ अ ५२

अनुज्ञातस्तु कुर्वीत शंखस्य वचनं यथा॥ वृद्धवशिष्ठोपि॥ अग्रजस्तु यदानग्निरादध्यादनुजः कथं। अग्रजानुमतः कु
र्यादग्निहोत्रं यथाविधि॥ दाराणामपि अधिकारित्वात्तदनुज्ञापूर्वकमाधानमनुजानीते न तु विवाहं। सोदराणां तु
सर्वेषां परिवेत्ता कथं भवेत्। दारैस्तु परिविद्येत नाग्निहोत्रेण नेज्यया॥ पितृविषयेपि सुमंतुः॥ पिता यस्य तु ना
धीतः कथं पुत्रस्तु कारयेत्॥ अग्निहोत्राधिकारोस्ति शंखस्य वचनं यथा॥ वृद्धवशिष्ठोपि॥ अग्रजस्तु येद अग्निरा
हित इत्यर्थः॥ अत्राप्यनुज्ञापूर्वकमित्यवगंतव्यं। समानन्यायत्वात्॥ आधानार्थमग्निः कुतो ग्राह्य इत्याकांक्षायां स्मृत्यं
तरदर्शितं आधानं विधिवद्वैरूपकलाद्भ्राष्ट्राद्यापि वा। महानसाद्वारण्योर्वा दारदायादकालयोः॥ वैरूपस्य पशुसमृद्ध
स्य गृहात्। महानसात् बहुपाकवतो ब्राह्मणस्य महानसात्॥ तथा च कात्यायनः॥ वैश्यस्य बहुपसोरंबरीषाद्बहुया श्रो।५
जिनो ब्राह्मणस्येति॥ अरणिलक्षणं च स्मृत्यंतरे निरूपितं॥ अश्वत्थो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः। तस्य या प्राङ्मु
खी शाखा वोदीची वोर्ध्वगापि वा। अरणिस्तन्मयी प्रोक्ता तन्मय्येवोत्तरारणिः॥ सारवद्दारवं चात्रमोविलीच प्रशस्यते।
सारवत्बलवत्त्वात् खदिरादिदृढकाष्ठनिर्मितमित्यर्थः। चात्रं यस्मिन्काष्ठे रज्जुं वेष्टयित्वा प्रमथ्यते तत्॥ ओविली चा
त्रस्योपरि बिलयुक्तं तन्नियंत्रणार्थं यद्दीयते तत्॥ संसक्तमूलो यः शम्याः स शमीगर्भ उच्यते। अलाभे त्वशमीगर्भादुद्धरेद

वा वल्लेवितः। चतुर्विंशत्यंगुला दीर्घा विस्तारेण षडंगुला। चतुरंगुलमुत्सेधा अरणिर्याज्ञिकैः स्मृता॥ मूलादष्टांगुले
त्यक्त्वा अग्राच्च द्वादशांगुली। अंतरं देवयोनिः स्यात्तत्र मंथ्यो हुताशनः॥ अष्टांगुलः प्रमंथः स्यात् चात्रं स्याद् द्वादशांगुलं
तु विली स्याद् दशोत्स्यादेतन्मंथनयंत्रकं। प्रमंथः॥ चात्रस्याधो नागं अरणिकाष्ठनिर्मितं अग्निप्रमंथनार्थं गृहीयते
स उच्यते॥ अधो नागं प्रमंथकाष्ठं संबद्धं चात्रस्योपरि अविली विधाय चात्रं नेत्रेणावेष्ट्य विद्वान् प्रमथनेन कुर्यात्। गो
वालैः शणमिश्रैस्त्रिवृद्वृत्तमनेत्रकं। व्यामप्रमाणेन तत्र स्यात्तेन मंथ्यो हुताशनः॥ चात्रबुध्ने प्रमंथाग्रे बादंहू चाविचक्षण
इति॥ अत्र नक्षत्रनियमस्तु ज्योतिःशास्त्रे। उत्तरात्रितयं पौष्णं रोहिणी पौरुहूतं बहुलादितिदेवताः। पुष्यः सोम्यसहिते
द्विजन्मनः स्याद्धुताशनपरिग्रहे हिताः॥ इत्यावसथ्याधाने॥ ॥ आवसथ्योपासनस्यावसथ्यस्य वोपासने॥ कृतश्चार
त्तिज्याकी ह्यायामाह पारस्करः। उपयमप्रभृतीति। अत्र स एव कालनियममाह। अस्तमितानुदितयोरिति। अस्तमिते
वा उदिते वा। अस्तमितानुदिततायाः अस्तमितलक्षणं॥ छंदोगपरिशिष्टे यावत्सम्यङ् न भाव्यंते नभस्यृक्षाणि सर्वतः।
न च लौहित्यमापैति तावत्सायं तु हूयते॥ अनुदितस्य तु द्विविधं अनुदितः समयाध्युषितश्च। तथा च मनुः॥ उदिता
नुदिते चैव समयाध्युषिते तथा। सर्वथा वर्तते यज्ञ इतीयं वैदिकी श्रुतिरिति। अनुदितसमयाध्युषितलक्षणमाह ५३

कात्यायनः। रात्रेः षोडशमे भागे ग्रहनक्षत्रभूषिते॥ काले त्वनुदितं ज्ञात्वा होमं कुर्याद्विचक्षणः॥ तथा प्रभातसम
ये नष्टनक्षत्रमंडले रविर्यावन्न दृश्येत समयाध्युषितं तु तत्। रेखामात्रस्तु दृश्येत रश्मिभिश्च समन्वितः। उदितं तं
विजानीयात्तत्र होमं प्रकल्पयेत्। तत्र वाजसनेयिनो नियमेनानुदितहोमः सूर्यो ह वा अग्निहोत्रमित्यारभ्य तस्मा
दुदितहोमिनो विच्छिन्नमग्निहोत्रं मन्यामहे इत्युदितहोमनिंदापूर्वकमनुदितहोमसमर्थनात्। तथा तत्समान
तंत्राणां छंदोगादीनामपि। आश्वलायनादीनामुदितहोमः॥ तथा तैत्तिरीयकब्राह्मणे अनुदितहोमनिंदा श्रूयते।
प्रातःप्रातरनृतं ते वदंति पुरोदयाज्जुह्वति येऽग्निहोत्रं। दिवाकीर्त्यमदिवाकीर्तयंतः सूर्यो ज्योतिर्न तदा ज्योतिरे
षामिति। होमद्रव्याणि च स्मृत्यंतरे प्रदर्शितानि। दध्ना तंडुलैरग्नौ तैर्वर्तिः दृष्टा वज्रश्यामाकनीवारा वेणुयवकंदमू
लफलादीनां। तंडुलशब्दो व्रीहियवोपलक्षणार्थः॥ अत एव श्रुतौ व्रीहिनिर्यजेत यवैर्वा यजेतेति। वेणुयवा वेणु
बीजानि। आहुतिपरिमाणं च स्मृत्यर्थसारे। व्रीहीणां च यवानां च शतमाहुतिरिष्यते। व्रीहिवद्वा तंडुला अपि। यद्वा
धान्यं चतुःषष्टिराहुतिः परिकीर्तिता। तिलानां तु तदर्धं स्यात्तदर्धं स्याद्घृतस्य तु। यावति प्रदेशे उक्तसंख्याकाः तिला
स्तिष्ठंति तदर्धदेशव्यापि घृतमाहुतौ भवतीत्यर्थः॥ एवं सायंप्रातर्नित्यहोमा निर्वर्तनीयः॥ होमे कर्तारो दर्शिताः॥

तुर

स्मृत्यर्थसारे। यजमानः प्रधानः स्यात्। पत्नीपुत्रश्च कन्यका। ऋत्विक्शिष्यो गुरुर्भ्राता भागिनेयः सुतापतिः। एते
एव हुतं यद्धि तद्धुतं स्वयमेव तु। पत्नी कन्या च हुतं दुर्याद्विना पर्युक्षणं क्रिया। असमर्थं तु दंपत्योर्होतव्यं ना विगा
दिना। छायासमीपे असमर्थं वज्रं वा हुतमनर्थकं। सन्निधौ यजमानः स्यादुद्देशत्यागकारकः। असंनिधौ तु पत्नी स्या
दुद्देशत्यागकारिका। असंनिधौ तु पत्न्याः स्यादध्वर्युस्तदनुज्ञया। उन्मादि प्रसवे चवर्त्तोक्त्वीनां तु ज्ञया विना। नापवा
सी प्रवासं स्यात्। पत्नी धारयते व्रतं। सर्वदा यजमानो वा याजकः दक्षिणामुखः शुचिः। अग्निधमनेन विशेषाद्दर्शितः
कात्यायनेन। ऊर्ध्वं पक्षषु तिर्यक्पाणिसूर्पस्फ्यदारुभिः। न कुर्यादग्निधमनं न कुर्याद्व्यजनादिना। मुखेनैव धम
मेदग्निं मुखादेषोऽध्यजायतेति॥ तथा॥ नाग्निं मुखेनेति च यल्लौकिके याजयन्निति। यदा मुखेन धमनं तदा
नलिकादिव्यवधानेन साक्षादिति ज्ञेयं। बोधायनः॥ आसायं कर्मिणः प्रातरा प्रातः सायं कर्मिणः॥ आहुतीनामतिय
द्येत पार्वणी पार्वणं नरात्। मैत्रायणीयपरिशिष्टे विशेषाद्दृश्यं प्रायश्चित्तं। आसायमग्निहोत्राणात थं धीस्त्र
समस्ताहोमानपरशी स्यात् द्विरात्राय षष्ठं त्र्यादिमासाया दिमासायाग्निहोत्रमजुहुः तस्माद्यायावरेन्नामेयावा ५४
त्रीवा दिमसायाग्निहोत्रं जुहुयात् दर्शादौ पार्वणं तु सायं प्रातरेव वतु दिशा चतुर्दशीनां निसहदुन्नयनमकासमि

ड्डार

साक्षं होमः सकृत्पाणिमार्जनमिति। पक्षादौ यजनीयदिने प्रतिपदि पर्वणोऽन्ते पक्षहोतः। अमावास्यादावौपवस
थ्येऽन्वाधानदिने अत्र च पक्षहोतसायं काल चतुर्दशी पञ्चदशी वा आगामिदिनपरिगणनेन स्वशाखोक्तप्रकार
णैव तु रवत्सादीनिर्वीष्यपादाय सकृत्सर्वमार्जनादिकं विधाय सकृदेव होमः कर्तव्यः॥ देशकालकर्तृ दिवता
द्विषामकथात्रेत्रे। एवं पक्षादौ यजनीयदिने प्रातः। एतद्वानेण कालाश्रयणे पक्षहोमश्च देवाः कर्माणि उत्क
षे प्रवासादिनिमित्तत्वाविदितव्येन सर्वदा। एवं छिन्नादिविवीर्थमपि निमित्तसंज्ञा वर्तेत तेन होमाजवति पक्षरू
मविशेषमाद मरीचिः। पक्षहोमानथादवाग्याकस्मान्निवर्तितः। होमं पुनः प्रकुर्वीत तत्त्व विज्ञ न सदा षत्का। पक्ष
होमानिष्कपलक्षणे। आतान्यत्रापि एव मेवा। अत्र च सायं होमयद्रव्यं स्वीकृतं तदविस्खेन दव प्रातर्होममपि नान्यत्। य
तः सायमुपक्रमः प्रातरपवर्गो यिमक एव प्रयोगः। एकस्मिंश्च प्रयोगे प्रक्रान्त द्रव्य परित्यागेन द्रव्यान्तरस्वीकरणं
न युज्यत इति ब्रीहियववाक्य मीमांसाया ममीमांसि मीमांसकैः। अथादेवासाये होम गृहीत द्रव्ये प्रातर्होमेन प्रा
प्येतं नदाल द्रव्य प्रतिनिधिः नृते द्रव्यान्तरं गृहीत्वा यान्न स्कब्रीह्यादिमध्ये अन्यतमं ग्राह्यं अ प्रतिनिधि द्रव्याणां स्व प्रकृति
द्रव्यावयवाभावात्। प्रतिनिधेः प्रकृति द्रव्यावयव संबन्धात्। एतदपि प्रतिनिधिपादनिर्णीतं। स्मृत्यर्थसारे। द्रव्यार्थे

णा घृतेयाद्यैतदलाभे तु माषैः॥ आज्यं वा तदलाभे तु साक्षात्तैलं यदीष्यते। तिलाभावे यदी तद्वा तैलजं तिलसंभवं।
तदभावे तु सौम्भिदः। कौसुंभः सर्षपोद्भवः। वृक्षस्नेहोऽथवा ग्राह्यः पूर्वालाभे परः परः। तदलाभे यवव्रीहिश्यामाका
न्यतमोद्भवं। पिष्टमालोड्य तेनैव घृतार्थे याजयेत्सुधीः॥ वृक्षतैलं कुसुंभानां निंबैरंडोद्भवं त्यजेत्। यष्टीकषीति
दान्यष्टीद्विषामध्यसीत्तावा। सर्वत्राज्यमुपादेयं भरद्वाजमुनेर्मतात्॥७॥ ॥अथ प्रसंगात् सकलनित्यनैमित्तिक
कर्मणामपि गौणकालाः। मुख्यकालातिक्रमे गौणकालो निरूप्यते। तत्र को मुख्यः को वा गौण इत्यत आह। यो विहितः स नु ५
मुख्यः। यथा दृढश्राद्धादौ प्रातरादिः। यस्तु विहितस्तत्समीपवर्ती उपरितनस्तत्पूर्वकर्मस्वीकृत्य नीयमानः संगवा
दिकालः स गौणः। तदाह त्रिकांडमंडनमिश्राः। स्वकालादुत्तरो गौणः कालः स्यात्सर्वकर्मणः। यद्यागामिक्रियामु
ख्यकालस्याप्यंतरालवत्। गौणकालत्वमिच्छंति केचिदाकर्मणामिति। अस्यायमर्थः। पूर्वोत्तरयोः कर्म
णोर्मध्ये पूर्वस्य कर्मणः स्वकालादुत्तरो यः कालः उत्तरकर्मकालावधिकः स पूर्वकर्मणो गौणः कालः। अथवा
आगामिक्रियायाः उत्तरक्रियाया या मुख्यकालस्तस्यापि प्राक्तनकर्मणि पूर्वकर्मणि केचिद्गौणकालत्वमिच्छंति। त ५५
त्र दृष्टांतः अंतरालवदिति। यथा पूर्वोत्तरकर्मणोर्मध्यकालः पूर्वकर्मणो गौणस्तद्वदुत्तरकर्ममुख्यकालोऽपि पू

र्वकर्मणो गौण इत्यर्थः। नन्वुत्तरकर्ममुख्यकालः पूर्वकर्मानुष्ठाने हि न स्वीकर्तुमुचितः। तथा हि। पूर्वं क
र्मतावत्स्वकालात्प्रच्युतं विनष्टप्रायं। तदुत्तरकर्मकालं क्रियमाणं तस्मादुत्तरकर्मापसारयति। ततश्च
स्वकालाद्विच्युतं तदपि प्रनष्टरूपं भवति॥ तदपि उत्तरकर्मकालं यदि क्रियेत तर्हि विनष्टसमाधानं नाशे तं प्रस
ज्येतेति चेत्। बाढमेवं॥ उत्तरकर्मकाले पूर्वोत्तरयोः कर्मणोरवकाशसंनिदृश्यते। न पुनरसत्ता इति न दो
षः। एवं स्थिते विचार्यते किमयं गौणकालः सर्वेषां नित्यनैमित्तिककाम्यकर्मणां मुख्यकालासंभवे उत
नेति तत्र ब्रूमः॥ काम्यवर्जं नित्यनैमित्तिकानि सर्वाण्यपि मुख्यकालातिक्रमे गौणकाले कर्तव्यानीति। अत्र उप
कस्तु नित्यनैमित्तिकेषु यथाशक्त्या कुर्यात्तथा कुर्यादिति विधानात्। विहितो गौणोऽपि न समर्थः प्रतिनिधिग्रहणस्य न्यायत्वा
त्। मुख्यकालातिक्रमे गौणकालो ग्राह्यः। तथा च मंडनमिश्राः। मुख्यकाले यदावश्यं कर्म कर्तुं न शक्यते। गौणकालेऽपि
कर्तव्यं गौणोऽप्यत्रेदृशो भवेदिति। ईदृशः मुख्यकालस्य दृशः अत्रापि विशेषस्तेनैवोक्तः। गौणेष्वेतेषु काले
षु कर्माण्याचरन्। प्रायश्चित्तप्रकरणप्रोक्तं निष्कृतिमाचरेत् निष्कृतिं प्रायश्चित्तं। तथा। प्रायश्चित्तमकृत्वा वा

गौणकालसमावश्यदिति।द्वाकालशङ्कायापञ्चम्या प्रायश्चित्तकरणमकरणे त्वतिव्यवस्था।तथास्मृत्यर्थसारेऽपि।य
थाकथंचित्कर्त्तव्यं नित्यकर्म्म विजानता।न प्रारब्धविलोपो हि पितृकस्य विशेषतः॥ तथा।दिवादिनानि कर्म्मा
णि प्रमादादकृतानि वै।यामिन्याः प्रहरं यावत्तावत्सर्वाणि कारयेदिति।श्राद्धं तु विशेषतः।संध्यारात्र्योर्नकर्त्तव्यं
श्राद्धं खलु विचक्षणैरिति।संध्यायां रात्रौ च श्राद्धं न कर्त्तव्यमित्यर्थः॥एतदुक्तं भवति यदा शक्त्या तदा कुर्यादित्यपवं
धाक्यैश्च न गौणस्वीकारः।नित्यनिमित्तिकेषु यथाशक्त्यादित्यपवंधाद्गौणपरिग्रह इति।यथाव्यपि हीनं सि॥ प्र
धानस्य विवाह्य गौणानि नवैति नन्तवेति वति।कात्ये प्रधानस्य विवक्षमित्तरक्षामविचवैसदृशश्च प्रधानमिवाङ्गान्यपि मु
ख्यान्येव न गौणानीत्यर्थः॥ यद्येवं तर्हि दर्शपौर्णमासपार्वणश्राद्धादीनाममावास्यादिविहितकालातिक्रमे तद
नंतरगौणकालकर्त्तव्यता प्रसज्येतेति चेत्।अस्तु नाम का नो हानिर्गौणकालस्वीकारवादिनः एवं प्राप्ते सिद्धांतो
ऽभिधीयते।कालो हि कर्म्माभिधीयते न कर्म्माणि कालः॥यस्येच्छा विनियोगार्हं तदुपादेयं यदुपादेयं तद्विधेयं।का
लस्त्विच्छया कर्त्तुं न शक्यः।अत एवानुपादेयपरत्वकमाध्यमीमांसकैः कालः परिगणितः कालाद्युपादानकर्म्मविधात ५६

वी तथा च कालानिमित्तं निमित्तं तत्कालात्तावदधिकारात्तावत्कालीनत्वेन तन्मन्तामवेति गौणकालयद्गौणो
चिन्तै।विहितकालात्तावदधिकारात्तावत्सीतपनाधिकरणे आपणात्व निमित्तस्यैवास्मिन्सूत्रे प्रतिपादितं।लौगा
क्षिरपि गौणस्यापरिग्राह्यत्वमाह।गणितानां ज्ञायते कालः कालतिष्ठंति देवताः।वर्षे चैकाद्धतिः कालेन कालल
क्षकाटयः॥यत्तु मंडनमिश्रैरभिहितं।गौणकालेपि कर्त्तव्यं गौणं यत्र दृश्यते वादिति।तत्तु दिवादिनानि कर्म्मा
णीत्यादिना यत्र गौणकालान्यनुज्ञानं वा वचनैक तद्विषयं।अत एव मंडनमिश्रैः मुख्यकाले हि मुख्यं च साधनेन वल
व्यात।तत्कालद्रव्यायां कस्य मुख्यत्वं गौणतापि वा।मुख्यकालमुपाश्रित्य गौणमुख्यं तु साधनं।न मुख्यद्रव्यलाभे
न गौणकालप्रतीक्षणमिति।यत्तु यथाकथंचित्कर्त्तव्यं नित्यकर्म्म विजानतेति नस्मात्।यमत्रि प्रायः।स्वकालप्राप्तस्य
कर्म्मणो मुख्यद्रव्याभावेन विलोपो न कर्त्तव्यः अपि तु मुख्यकाल एव मुख्यद्रव्याभावेपि प्रतिनिधिद्रव्येण क
र्म्म निवर्त्तनीयमिति।आतावचनमीतारणसी वत्सरर्तुमासतिथ्यादिकालविशेषविहितानि कर्म्माणि स्वकाला
तिक्रमकालान्तरे कर्त्तुं न युज्यंते अपितु तदतिक्रमप्रायश्चित्तमेव कुर्यात्।यत्र गौणकालानुष्ठाने दृश्यते तत
द्विषयगर्हीपरिहारायस्व मनःपरितोषाय वा इति सर्वमनवद्यं॥ इति मुख्यगौणकालनिर्णयः॥७॥ अथ समासार

प्राप्तद्विरागमनस्तुनकालादि। तत्रसुरेश्वरः। द्विशाखमुत्तगाप्रत्तूतधनिनीमार्गेश्विस्तुत्वान्विता।फाल्गुनेप्रियव
र्ज्जताप्रियतमानित्यप्रियापुत्रिणी।वंध्यानिर्धनदुर्भगाविरहिणीसाद्विगतानित्यशशानूनेदिवसमापिदुःखम
त्तुलीलेत्यन्यमासगताभाग्यफाल्गुनविशाखेशुक्लपक्षेशुभदिन।गुर्वादित्यविशुद्धिस्यान्निश्चैपत्नीद्विरा
मः॥बादरायणः॥नीहारीभुधानान्नरादितिगुरुत्वाङ्गानुराधाश्विनी।शाकांत्यास्कंरवायुविष्णुवरुणाद्याद्ध्रथशास्त्रोदितो।
क्तैर्ताज्ञालिगतरावास्तुनकरेप्राप्तेदायनागीविजीवरासुक्तितीदिनेनववधूसमप्रवेशःशुभाः।नर्तुःश्रामनाडिवि
रहिमकारतास्तेगातत्ताशीवा॥सूर्यकोदयुदाजगमस्तुतदिनपाडुत्तत्त्वक्षेतारा।द्विचादिकातिशीनगुरुबुधसितोनम्न
लाटकदिकमना।वानीताशुणशालिनानववधूर्निंद्योसर्वैर्ननंदता।प्रवीतान्यदितस्तुंक्रप्रयायाद्दक्षिणापारापश्चाद्दक्ष
द्वितविवयायात्स्या।विनारदिशो॥स्वत्तवनपुनःप्रावाशादशानीविसावनाप्योष्ठाहानववधायहगमानप्रतिशुक्रवि
चारणानास्ति॥इतिद्विरागमनं॥७॥अथाधिवेदनं॥७॥तत्रमनुः॥मद्यपासत्यवृत्ताचप्रतिकूलाचयाभवेत्।व्याधिता
ध्याधिवेत्तव्याहिंस्रार्थघ्नीचसर्वदा।मद्यपतियज्ञातीयायन्निषिद्धंमद्यंतत्पानकर्त्रीनिधीयते।असत्यवृत्ता। ४९
असाध्वाचारा।प्रतिकूलाभर्तुरनिष्टकारिणी।हिंस्रापुत्रदास्यादिताडनशीला।अर्थघ्नीउपस्कारादिनाअर्थविनाशकारि

MEMORIAL

णी।अधिवेदनं।भार्यांतरपरिग्रहः॥याज्ञवल्क्यः।सुरापीव्याधिताधूर्त्तावंध्यार्थघ्न्यप्रियंवदा।स्त्रीप्रसूश्चाधिवेत्तव्या
पुरुषद्वेषिणीतथा।धूर्त्तावंचनप्रधाना।स्त्रीप्रसूःस्त्रीमात्रजननी।अधिवेदनप्रतीक्षणेकालामनुनोक्तः।वंध्याष्ट
मेधिवेद्याब्देदशमेतुमृतप्रजा।एकादशेस्त्रीजननीसद्यस्त्वप्रियवादिनी।अधिवेत्तव्येतिशेषः।देवलः।आकां
क्षिताष्टवर्षाणित्रीनिशसदास्त्रियं।दशवंध्यावनिंद्यचद्वादशस्त्रीप्रसूयनी।ततोविंदतविधिनापुत्रार्थंधर्मतस्त्रि
यः।पुत्रलाभाद्यःलोकनास्तिहिप्रशंशावाद्विता।अतिप्रजावः।प्रसवः।पुत्रैरजःतद्योग्यकालमतिक्रांतानिद्याश्चित्रादि
षुकाप्रशावाःफलानितपुत्राः।एकामूढ्वातुकामार्थमन्यांलुब्धायरञ्जति।समर्थास्तोषयित्वार्थेपूर्वोढामपरांवहे
त।अष्टदशकालप्रतीक्षाविकल्पावयःशक्त्यपेक्षयाव्यवस्थिताबोद्धव्यः।समर्थस्तोषयित्वार्थ्यैःस्त्रियपौर
न्त्रुपलक्षणीअनउपायीतारणापिसापरितोषणीयायथुक्तअधिवेदननिमित्तंशुनकालविशेषःश्रूयता।तेसु
यावताकालेनतद्दोषनिश्चयोभवतितावकालेप्रतीक्षेत।याज्ञवल्क्यः।अधिविन्नस्त्रियेदद्यादाधिवेदनिकंस
मं।नदत्तंस्त्रीधनंयस्यैदत्तेत्वर्धंप्रकीर्तितं।अधिवेदनिकंअधिवेदनप्रयोजनमलीकरणादियास्यैपूर्वोविवाहा
दिसमयस्त्रीधनमलंकारादिनदत्तंतस्यैसमंदानंचपश्चादुद्यमानायायावद्दीयाततायंवतश्शाम्यैनवदिद्यर्थः।

MEMORIAL

दत्तेश्चपूर्वामिवालंकारादिकं दत्तेन ऽंशत्वाद्देशाद्दीशमात्र पारान्तुसमांशपरः।पूर्वस्यैदत्त्वमलंकारादिकं नवो
ढालंकारान्यूनीवद्यावतातत्रासमुन्नत तिनाविद्यातव्यमित्यर्थः॥ ॥मनुः॥अधिविन्नातुयानारीनिर्गच्छेद्रुषितागृहात्।
सा सद्यः सन्निरोद्धव्यात्याज्यावाकुलसन्निधौ॥याज्ञवल्क्यः॥अधिविन्नातुभर्त्तव्यामहदेनोन्यथाभवेत्।यत्रानुकू
लंदंपत्योस्त्रिवर्गस्तत्रवर्द्धते॥मनुः॥वतस्त्रस्तुपरित्याज्याः शिथगागुरुगातया।पतिघ्नीचविशेषेणजुंगितापग
ताचया॥जुंगितः प्रतिलोमजः॥अत्रविशेषमाहयाज्ञवल्क्यः॥हृताधिकारांमलिनांपिंडमात्रोपजीविनीं।परिभूता
मधःशय्यांवासयेद्व्यभिचारिणीं॥इत्यधिवेदनं॥७॥अथस्त्रीधर्म्मास्तत्रादौतासामवश्यरक्षणीयत्वंप्रदर्श्यते।त
त्रमनुः।प्रजनार्थंमहाभागाःपूजार्हागृहदीप्तयः।स्त्रियःश्रियश्चगेहेषुनविशेषोस्तिकश्चन।उत्पादनमपत्यस्यजा
तस्यपरिपालनं।प्रत्यहंलोकयात्रायाःप्रत्यक्षंस्त्रीनिबंधनं।अपत्यंधर्म्मकार्याणिशुश्रूषारतिरुत्तमा।दाराधीनस्त
थास्वर्गःपितृणामात्मनश्चह।तस्माद्यत्नेनरक्षेतनारीत्यामनुरब्रवीत्।अस्वतंत्राःस्त्रियःकार्याःपुरुषैःस्वैर्दिवानिशं।
विषयेषुचसज्जंत्यःसंस्थाप्याह्यात्मनोवशे॥पितारक्षतिकौमारेभर्त्तारक्षतियौवने।पुत्रारक्षंतिवार्द्धक्येनस्यातंत्र्यं ५८
क्वचित्स्त्रियः।सूक्ष्मेभ्योपिप्रसंगेभ्यःस्त्रियोरक्ष्याविशेषतः।द्वयोर्हिकुलयोःशोकमावहेयुररक्षिताः।पानं
+द्धति२

दुर्जनसंसर्गःपत्याचविरहोटनं।स्वप्नोन्यगेहवासश्चनारीणांदूषणानिषट्।नैतारूपंपरीक्षंतेनासांवयसिसंस्थि
तिः।सुरूपंवाकुरूपंवापुमानित्येवभुंजते।एवंस्वभावंज्ञात्वासांप्रजापतिनिसर्गजं।परमंयत्नमातिष्ठेत्पुरुषोरक्ष
णंप्रति।शय्यासनमलंकारंकामंक्रोधमनार्जवं।द्रोहभावंकुचर्यंचस्त्रीभ्योमनुरकल्पयत्।यादृग्गुणेनभर्त्रास्त्रीप्र
युंजीतयथाविधि।तादृग्गुणासाभवतिसमुद्रेणेवनिम्नगाः।अथरक्षोपायः।नकश्चिद्योषितःशक्तःप्रसह्यपरिर
क्षितुं।एतैरुपाययोगैस्तुशक्यास्ताःपरिरक्षितुं।अर्थस्यसंग्रहेचैनांव्ययेचैवनियोजयेत्।शौचेधर्म्मेन्नपक्त्यांच
पारिणाह्यस्यवीक्षणे।अथस्त्रीकर्त्तव्यधर्म्माः।तत्रमनुः॥बालयावायुवत्यावावृद्धयावापियोषिता।नस्वातंत्र्येणकर्त्त
व्यंकिंचित्कार्यंगृहेष्वपि॥पित्राभर्त्रासुतैर्वापिनेच्छेद्विरहमात्मनः।एषांहिविरहेणस्त्रीगर्ह्यास्यादुभेकुले।सदा
प्रहृष्टयाभाव्यंगृहकार्येचदक्षया।सुसंस्कृतोपस्करयाव्ययेचामुक्तहस्तया॥याज्ञवल्क्यः॥संयतोपस्करादक्षा
हृष्टाव्ययपराङ्मुखी।कुर्याच्छ्वशुरयोःपादवंदनंभर्त्तृतत्परा।स्त्रीणांनिर्द्देश्ववचःकार्यमिदंधर्म्मःपरःस्त्रियाः।आशुद्धेःसं
प्रतीक्ष्योहिमहापातकदूषितः॥मनुः॥विशीलःकामवृत्तोवागुणैर्वापरिवर्जितः।उपचर्यःस्त्रियासाध्व्यासततंदेव
वत्पतिः।नास्तिस्त्रीणांपृथग्यज्ञोनव्रतंनाप्युपोषणं।पतिंशुश्रूषतेयेनतेनस्वर्गेमहीयते।पाणिग्राहस्यजीवतिसा

स्त्रीस्यादुपाध्यव्रतचारिणी॥ आयुष्यं हरते भर्तुर्नरकं चाधिगच्छति। पाणिग्रहस्य साध्वी स्त्री जीवतो वा मृतस्य वा। प
तिलोकमभीप्संती नाचरत्किंचिदप्रियं। मृते जीवति वा पत्यौ या नान्यमुपगच्छति। सेह कीर्तिमवाप्नोति मोदते
चोमया सह। स्कांदे। प्रसुप्ते तु सुखासीने रममाणे यदृच्छया। आतुरेष्वपि कार्येषु पतिं नोत्थापयेत्क्वचित्। स्त्रीधर्मिणी
त्रिरात्रं तु स्वमुखं नैव दर्शयेत्। स्ववाक्यं श्रावयेन्नापि यावत्स्नाता न शुध्यति। सुस्नाता भर्तृवदनमीक्षेतान्यस्य कस्य
चित्। अथवा मनसि ध्यात्वा पतिं भानुं विलोकयेत्। हरिद्रां कुंकुमं चैव सिंदूरं कज्जलं तथा। कूर्पासकं च तांबूलं मं
गल्याभरणं शुभं। केशसंस्कारकबरीकरकर्णविभूषणं। भर्तुरायुष्यमिच्छंती दूषयेन्न क्विसती। न रजक्या न कारुक्या
तथा श्रवणया पि वा न च दुर्भगया नापि सखित्वं कुरुते तु सा। भर्तृविद्वेषिणीं नारीं न सा संभाषयेत्क्वचित्॥ नैकाकिनी
क्वचिद्भूयान्न नग्ना स्नाति वै क्वचित्। नोलूखले न मुशले न वर्द्धन्यां दृषद्यपि। न यंत्रके न देहल्यां न स्त्री चोपवि
क्वचित्। उक्ता प्रत्युत्तरं दद्यान्नया नारी क्रोधतत्परा। सा शुनी जायते ग्रामे सृगाली निर्जने वने। अपवादो नव ऋ
व्यः कुलहेदूरतस्त्यजेत्। गुरूणां सन्निधौ क्वापि नाब्रूयान्न च वा हसेत्। ताडिता ताडितैवछे सा व्याघ्री वृषदंशिका। ५८
कटाक्षेक्षी हता तया तु तन्त्री शूकरी पिता। हि वा। ककराक्षी तु सा तूनी। तावद्विनात्र सीशयः। तत्ररियासमुच्छ्यामिष्टम

स्यादितिकं वले। ग्रामसा शूकरी वा स्याद्दन्ती वा चर्मविष्टकुरा। याज्ञवल्क्यः। पतिप्रियहिते युक्ता स्वाचारा विजितेन्द्रि
या। इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमां गतिं। शंखः। नानुज्ञाता गृहान्निर्गच्छेत्। नानुत्तरीया न त्वरितं व्रजेत्। न परपुरु
षमभिभाषेतान्यत्र वणिक्प्रव्रजितवृद्धवैद्येभ्यः। न नाभिं दर्शयेत्। आगुल्फाद्वासः परिदध्यात्। न स्तनौ विवृतौ कुर्या
त्। न हसेदपावृतानना। न भर्तारं तद्बंधून्वा द्विष्यात्। न गणिकाधूर्ताभिसारिणीप्रव्रजिताप्रेक्षणिकामायामूलकुहक
कारककारिकादुःशीलादिभिः सह एकत्र तिष्ठेत्। संसर्गेण हि चारित्रं दुष्यतीति। अयं च सकलस्त्रीधर्मो विवाहादूर्ध्वं वेदि
तव्यः। अथ पतिव्रताविशेषधर्माः। तत्र मनुः। कन्या विवाहसमये वाचयेयुरिति द्विजाः। मम सहचरी भूया जीवतो जी
वतोऽपि वा। तत्रोदाहरंति धर्मं तीर्थव्रतानि वा तस्मात्सर्वं परित्यज्य पतिमेकं समर्चयेत्। भुक्ते भुंक्ते पतौ याते याति ह्या
सीना चापि वासिता। विनिद्रिते विनिद्रापि प्रथमं परिबुध्यते। अनलंकृतमात्मानं पत्युर्न दर्शयेत्क्वचित्। कार्यार्थं प्रोषि
ते पत्यौ सर्वमेतन्न वर्जिता। न च नाम गृह्णीयात्तस्यायुष्यविवृद्धये। पुरुषांतरनामापि न गृह्णाति कदाचन। आक्रुष्टापि
न चाक्रोशेत्ताडितापि प्रसीदति। इदं कुरुष्वेति स्वामिन्नमन्यतामिति च वक्क्वचित्। आहूता गृहकार्याणि त्यक्त्वा गच्छति सत्वरं।
प्राजापकरणं सर्वमुक्ता शाधाय स्वयं। नियामोदकबर्हींषि पत्रपुष्पाक्षतादिकं। सेवते भर्तुरुच्छिष्टमिष्टमन्नफला

दिकं।महाप्रसादमित्युक्त्वा प्रतिदत्तं प्रतीच्छति।हारीतः।मातृकं पितृकं चैव यत्रचैव प्रदीयते।कुलत्रयं पुनात्यत्र भर्त्ता
रं यानुगच्छति।अयं च सर्वासां स्त्रीणां पतिव्रतानामगर्भिणीनामबालापत्यानामाचण्डालं साधारणो धर्म्मः।अपतिव्रता
दीनामधिकारात्।ननु च अपतिव्रतादीनामप्यधिकारानुगानिश्चयात्तथा च महाभारते।अवमत्य च या पूर्वं पतिं दु
ष्टेन चेतसा।वर्त्तेत या च सततं भर्त्तृणां प्रतिकूलतः।भर्त्तारमनुम्रियते काले या कुर्वीत तथाविधा।कामात्क्रोधाद्भयान्मो
हात्सर्वा पूता न वैच्युता।आदिप्रभृति या साध्वी पत्युः प्रियपरायणा।ऊर्द्ध्वं गच्छति सा नत्वत्र भर्त्तानुमरणे गतेति।नैतस्मा
त्।उतस्मृत्यश्रवणात्।सर्वाः पूता न वैच्युतेति।पत्युः च मानकत्र्यादीनामपि पापक्षयाभिलिकि मुतादिप्रभृति या साध्वीत
स्याः पापक्षयः परलोकश्च विद्यत इति साध्व्या उत्तमलोकप्राप्तिविधायकवाक्यशेषत्वेन न तत्रावकत्वेनापि चरितार्थ
त्वात् साधारणधर्म्मत्वं च भर्त्तारं यानुगच्छतीत्यविशेषोपादानादवगम्यते।यान्निव ब्राह्मण्यनुगमननिषेधपराणि
पिवीनसीगिरःप्रभृतीनि वाक्यानि मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात्।या स्त्री ब्राह्मणजातीया मृतं पतिम
नुव्रजेत्।सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेदित्येवमादीनि तानि पृथक्चितिविषयाणि।पृथक्चितिं समा शुधि
रुह्य न विप्रा गन्तुमर्हतीति।अन्यासां तु नारीणां स्त्रीधर्म्मोयं परः स्मृत इत्युशनसा विशेषस्मरणात्।इदं चारोहणमनि ६०

त्यं अन्वारोहणस्य स्वर्गादिफलयुक्तत्वेन काम्यत्वात्।अत एव विकल्पमाह विष्णुः।मृते भर्त्तरि ब्रह्मचर्यं तदन्वारोहणं वे
ति।दशीतर मृतपत्यो ब्राह्मण्याय दृष्टिन्तिः।सहानुगमनेन वध्य वरतरासीत्।अस्मन्नावपि पतिपादुकादिकं विदुं किम
पि दृढीचाविङ्गानावपि जवति।पृथक्चित्यनुज्ञानात्।ननु च पतिव्रतायाइदमनुगमने नियामवात्।तथा च हारीतः।आ
र्त्तार्त्ते मुदिता हृष्टा प्रोषिते मलिना कृशा।मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता।अत्र मृते या म्रियेत सा पतिव्रतेत्यने
न नियमत्वं द्योत्यते।अत अनियमत्वं स्मृतिनमनुक्तमितिचेत्।मैवं।।मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता।स्वर्गं गच्छ्य
पुत्रापि यथा ते ब्रह्मचारिण इति।मनुना पतिव्रताया अनुगमनस्याप्यभिहितत्वात्।अत्र साध्वीत्यानन पतिव्रताभिधी
यते।अन्यथा ब्रह्मचर्यव्यवस्थितत्वानेनापौनरुक्त्यप्रसक्तः।।तथा महाभारते।।भगवान्व्यासः।पतिव्रतायाः सत्या अ
ग्निप्रवेशं दर्शयति।न ह्यग्निप्रवेशान पतिव्रताचौ।पतिव्रतासप्रदीप्तं प्रविवेश हुताशनं।तत्र चित्रांगदध्वरं भर्त्तारं सात्वप
द्यतेति।न च तस्मादु ह न पुरायुः कामी प्रयादिति श्रुतिविरोधः।विषयभेदात्।श्रुतिर्हिसामान्येन शास्त्रा विहितस्वेच्छाम
रणं निषेधति स्मृतिस्तु भर्त्तरि मृते ज्वलनप्रवेशविशेषणमरणविशेषं विधत्ते अतो विषयभेदान्न विरोधः।।यथा
न हिंस्यात्सर्वभूतानीति सामान्यशास्त्रम् अग्नीषोमीयं पशुमालभेतेति विशेषशास्त्रविषयस्त्वल्पप्रवर्त्तीति तद्वत्

पीतिन कश्चिद्विरोधः। ननु ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वापि यः पतिः। पुनात्यविधवा नारी तमादाय म्रियते या। इत्येवमा
दि हारीतादिवाक्यानि ब्रह्महत्यादिदोषनिवृत्तिमनुगमनेनाभिदधति। एतदनुपपन्नं शास्त्रफले प्रयोक्तरि तद्ब्रह्मण
त्वादिति न्यायेनापूर्वफलायाः कर्तृसमवेतत्वात् पतिगतदुरितापूर्वस्य पत्नीगतानुगतानुगमनेनानिवृत्तेः। निवृत्त्यस्य
पगमे तु कार्यकारणयोः सामानाधिकरण्ये शास्त्रसिद्धं व्याहन्येतेति चेत्। बाढं। ब्रह्मघ्नो वेत्यादीनि वाक्यानि अनुगमन
विधिशेषत्वेनार्थवादत्वादनुगमनस्य प्राशस्त्यं वर्णयन्ति श्रुतानन्यस्यार्थे प्रमाणानि युक्तमेवार्थवादत्वं। ब्रह्महनना
दिदोषदुष्टस्य पतिश्चिन्तासोपि संस्कारमवतावन्नादीति दूरमनुगमने। अतः प्राशस्त्यपराणीति न काचिदनुपपत्तिः। एवं च॥
द्विविधं कर्म प्रारब्धमप्रारब्धं चेति। तत्र प्रारब्धकर्मणो भोगादेव क्षयात् प्रारब्धमपि अनुगमनरूपप्रतिबंधाकनप्रति
बद्धं विद्यमानमप्यविद्यमानमिव सदुदाहृतं तथा चानुगमनफलस्वर्गादिकमनुभूय पश्चात्प्रारब्धाशेषमनुपस्त्विति अप्रा
रब्धमपि कर्म द्विविधं। फलदानोन्मुखमनुन्मुखं च। यदनुन्मुखमप्रारब्धं कर्म तदनुगमनेनापनोद्यते प्रायश्चित्तेनै
वा। अपरथा पतिपत्न्योः स्वर्गसाधनत्वेनापदिश्यमानानुगमनेन साध्यस्वर्गानुपपत्तेः। पुनात्यविधवा नारी तमादाय मृ ६१
यते या इत्यत्र चापुनातीत्येतदप्यनुपपाद्यता[illegible]फलदानोन्मुखमप्रारब्धं कर्म तस्य निवृत्तिरनुगमनेनत्व

तीयेतादेवमनसिन्त्वचोद्यासाध्यादायादि प्रविष्टो नरकं बद्धः पाशैः सुदारुणैः। संप्राप्नोया तनास्थाने गृहीताय मर्द्धि
कं रेः। तिष्ठति विवशो दीनो वध्यमानः स्वकर्मभिः। व्यालग्राही यथा व्यालं बलादुद्धरते बिलात्। तद्वद्भर्त्तारमादाय
दिवं याति च सा बलादिति फलदानोन्मुखं च प्रारब्धं कर्मानुगमनसाध्यस्वर्गोपभोगेनैतरस्तु पन्नुत्पन्न इति न विरो
धः। ननु फलदानोन्मुखमप्रारब्धं कर्म प्रायश्चित्तस्थानीयेनानुगमनेन यथा विनश्यति तथा फलदानानुन्मुखमपि ते
नैवापगच्छतु विशेषाभावादिति चेत्। पुनातीत्यत्र पापनिवृत्तिः कल्प्यते कल्पना चानुपपत्तिवशात्। सा चानुपपत्ति
र्यावति कल्पिते शाम्यति तावत् कल्पनीयं। तथा च फलोन्मुखप्रारब्धकर्मनिवृत्त्यापि पुनातीत्यस्य चरितार्थत्वान्न सकल
पापनिवृत्तिः परिकल्पनीया। यद्वैकमन्यनिष्ठेनानुगमनेनान्यगतदुरितनिवृत्तिरयुक्तेति तदा पश्चात्। पतिपत्न्योः सहक
र्तृत्वेनाग्निहोत्रादिसाध्यस्वर्गादिफलविशेषः स्मर्यते तस्य यतः। पाल्योभूत्वा पिया पापिता वैधव्यपालये क्वचित्। सा पुनः
प्राप्य तत्तरिं स्वर्गलोकानसमश्नुते॥ विधवाकवरीबंधो भर्तृबंधाय जायते। शिरसो वपनं तस्मात्कार्यं विधवया सदा। एका
हारः सदा कार्यो न द्वितीयः कदाचन। त्रिरात्रं पंचरात्रं वा पक्षव्रतमथापि वा। मासोपवासं वा कुर्यात् चान्द्रायणमथापि वा। कृ
च्छ्रं पाराकं कुर्याच्च प्रतकृच्छ्रमथापि वा। यवान्नेन फलाहारैः शाकाहारैः पयोव्रतैः। प्राणयात्रां प्रकुर्वीत यावत्प्राणाः
× +स्वयं यादि उपपत्तेः। इदं च दुरितं जन्मांतरकृतमेवाभिवर्त्यं। एतज्जन्मकृतदुरितस्य तु पुत्रस्य पतितत्वेन तेन सहा
+नुगमनाधिकाराभावात् ... पालनेपि श्री वा

सुप्ते चैव व्रजेत् । पर्यंकशायिनी नारी विधवा पातयेत्पतिं । तस्माद्भूशयनं कार्यं पतिसौख्यसमीहया ॥ नैवांगोद्वर्तनं
कार्यं स्त्रिया विधवया क्वचित् । गंधद्रव्यस्य संभोगो नैव कार्यस्तया पुनः ॥ तर्पणं प्रत्यहं कार्यं भर्तुः कुशतिलोदकैः ॥ त
र्पणं पुत्रपौत्राभावविषये । विष्णोस्तु पूजनं कार्यं पतिबुध्या न चान्यथा ॥ पतिमेव सदा ध्यायेद्विष्णुरूपधरं हरिं । यद्यदि
ष्टतमं लोके यद्यत्पत्युः समीहितं । तत्तद्गुणवते देयं पतिप्रीणनकाम्यया ॥ वैशाखे कार्तिके माघे विशेषनियमं च
रेत् । स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहुः ॥ एवंविधेषु विधिवत् विधिस्थैर्नियमव्रतैः । वैशाखाद्यांश्च कान्माघान्स
मतातिवाहयेत् । नाधिरोहेदनड्वाहं प्राणैः कंठगतैरपि । कंचुकं न परीदध्यात् वासो न विकृतं वसेत् । अपृष्ट्वा सासुरा
न्किंचित्कुर्याद्भर्तृतत्परा । एवं धर्म्मसमायुक्ता विधवापि पतिव्रता । पतिलोकानवाप्नोति न वेक्षा पिदुःखितेति ॥ ॥ इ
ति मदनपारिजाते मदनक्षितिपालदानजलजलरुहे स्तवको द्वितीयः स्वासीदामोदहृष्टपंडितभ्रमरः ॥ इति पंडितपा
रिजातकहारमरेत्रेत्यादिविरुदराजविराजमानस्य श्रीमदनपालस्य निबंधे मदनपारिजाताभिधे द्वितीयस्तबकः ॥ ॥
॥ छ ॥ अथ गृहस्थस्तवकानंतरं गृहस्थोपयोगिन्याचारादिदैनिककर्मारभ्यते । तत्र विष्णुः ॥ गृहाश्रममधिनियात्याक्तस्वर्यसाधन
मुत्तमं ॥ ब्राह्मे मुहूर्त्ते चोत्थाय तस्य सर्वं समाचरेत् । मनुरपि । ब्राह्मे मुहूर्त्ते बुध्येत धर्मार्थौ चानुचिंतयेत् । कायक्लेशांश्च तन्मू ६२

बो ३

लान् वेदतत्त्वार्थमेव च ॥ विष्णुपुराणे ॥ मैत्रं प्रसाधनं स्नानं दंतधावनमंजनं । पूर्वाह्णएव कुर्वीत देवतानां च पूजनं ॥ मै
त्रं मित्रदेवत्यं मूत्रपुरीषोत्सर्गः प्रसाधनं केशानां अंजनं सौवीरादि अंजनं । ब्राह्ममुहूर्त्तलक्षणं ब्रह्मचारिप्रकरणे निहितं
विष्णुः ॥ उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितं । मरणव्याधिशोकानां किमद्य निपतिष्यति । इति संचिंत्य पूर्वं देवतां स्मर
त् ॥ शयनादुत्थितो यस्तु कीर्त्तयेन्मधुसूदनं । कीर्त्तनात्तस्य पापानि नाशमायांत्यशेषतः । स्कंदपुराणे ॥ अविमुक्ते चरणयुग
ले दक्षिणमूर्तेश्च कूटं च उष्णे । स्मृतमपि वाराणस्यां निहंति दुःस्वप्नमप्रशस्तं च ॥ कात्यायनः ॥ रोचनां चंदनं गंधं दूर्वां
दर्पणं मणिं । गुरुमग्निं रविं पश्येत्तनमस्येत्प्रातरेव हि । श्रोत्रियं सुभगां गामग्निमग्निचितं तथा । प्रातरुत्थाय यः पश्येत्स आप
द्भ्यः प्रमुच्यते । मूत्रपुरीषोत्सर्गादिविधिस्तु ब्रह्मचारिप्रकरणे निहितः ॥ छ ॥ अथ दंतधावनं ॥ तत्र यमः ॥ मुखे पर्युषिते
नित्यं भवत्यप्रयतो नरः । तदार्द्रकाष्ठं शुष्कं वा भक्षयेद्दंतधावनं ॥ विष्णुः ॥ कंटकिक्षीरवृक्षोद्भवं द्वादशांगुलमव्रणं । कनि
ष्ठिकाग्रवत्स्थूलं कूर्चीयं त्वगपर्वकं । दंतकाष्ठस्याग्रेण दंशयित्वा प्रशिथिलावयवं कर्त्तव्यमित्यर्थः । पर्वीर्थं तत्कूर्चकमि
त्यपि पाठः ॥ यदि दंतकाष्ठपर्वयुक्तं न भवति तदा पर्वद्वयमध्यभागेच्छिचात् तत्र कूर्चकं प्रशिथिलावयवं कर्त्तव्यमिति तात्पर्यं
दंतधावनेनाग्रेण कर्त्तव्यं ॥ तथा च कूर्म्मपुराणे ॥ मध्यांगुलसमस्थौल्यं द्वादशांगुलसंमितं । सत्वचं दंतकाष्ठं स्यात्तदग्रे

× तथान्योपि विशेषस्तेनैवोक्तः कनिष्ठिकाग्रवत्स्थूलं पर्वार्धकृतकूर्चकं। दंतधावनमुद्दिष्टमित्युक्त्वा सु
दंष्ट्रा दंतस्य सम दंतस्य मध्यम।५

णं तु धावयेत्॥ मनुः॥ तिक्तं कटु कषायं वा सुगंधं कंटकान्वितं। क्षीरवृक्षलतागुल्मोद्भवं दंतधावनं॥ कात्यायनः॥ उत्थाय
नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः॥ परिजप्य च मंत्रेण भक्षयेद्दंतधावनं। मंत्रमाह विष्णुः॥ आयुर्बलं यशो वर्चः प्रजाप
शुवसूनि च॥ ब्रह्म प्रज्ञां च मेधां च त्वं नो धेहि वनस्पते इति॥ गर्गः॥ दशांगुलं तु विप्राणां क्षत्रियाणां नवांगुलं॥ अष्टांगुलं
तु वैश्यानां इतरेषां षडंगुलं। चतुरंगुलमानेन नारीणां नात्र संशयः॥ विष्णुः॥ द्वादशांगुलकं विप्रे काष्ठमाहुर्मनीषिणः। क्ष
त्रविट्शूद्रजातीनां नवषट्चतुरंगुलं॥ एवं विकल्पः परिमाणे। स्थूले विषमदंतस्य त्रिविधं दंतधावनं॥ गर्गः॥ प्राङ्मुखस्य
धृतिः सौख्यं शारीरारोग्यमेव वा दक्षिणेन तथा कष्टं पश्चिमेन पराजयः॥ उत्तरेण गवां नाशः स्त्रीणां परिजनस्य च॥ मार्कं
डेयः॥ उदङ्मुखः प्राङ्मुखो वा कषायं तिक्तकंटकमिति। उदङ्मुखः प्राङ्मुख ईशानाभिमुखः इत्यर्थः॥ अन्यथा गर्गवच
नेन विरोधात्॥ आननिवासिप्रायणकात्यायनः॥ प्राचीनारक्तदिग्भागसंवीक्ष्यामानवाभुया। दिनिमहारात दंतधाव
नप्रकरणे॥ प्रक्षाल्य दक्षिणं पादौ च मुखं च सुसमाहितः। दक्षिणं बाहुमुद्धृत्य स्वजानौ चेतरां ततः॥ मनुः॥ प्रक्षाल्य दंतधौ ६३
द्ध्यो दंतधावनमुत्सृजेत्। पतितं निमुखे सम्यग्गृह्णो ज्यमा प्रोच्य संशयो मनः॥ आम्रपालाशबिल्वानो अपामार्गश्च शिरीष
षायाः तत्स्थापयेत्ता तत्कृच्छायवाश्चात् दंतधावनं। पलाश आम्रातकः॥ मार्कंडेयपि। प्रातर्भुक्त्वा च यतवाक् भक्षयेद्दंतधावनं।

प्रक्षाल्य भक्षयेत्पूर्वं प्रक्षाल्यैव च संत्यजेत्॥ नारदः॥ खदिरश्च करंजश्च करवीरकदंबायाः। सर्वे कंटकिनः पुण्याः
क्षीरिणश्च यशस्विनः॥ जंबूतिंदुकनूताश्च कदंबोलाध्रचंपकाः॥ बदरीतिंदुकाश्चैव प्रशस्ता दंतधावने॥ काविदारः करंज
श्चकुटजः स्नुह्यमालती॥ सालार्कश्च प्रियंगुश्च तमालः शाक एव च। शाकः शाकवृक्षः। शाकवन इति लोके प्रसिद्धः॥ आम्रात
कारिमेदश्च प्रशस्तान्यपि पादपाः॥ वर्ज्यानि शाल्मली पीलु नव्य किंशुक तिंदुकाः॥ अरिष्टो हुः पारिभद्रोश्च गुग्गुलुर्लिंतिडीन
था॥ आसनं शयनं यानं पादुका दंतधावनं। पालाशं च च्छाको वृक्षो सर्वकर्म्मसु कुत्सितः॥ अनावदंतकाष्ठानां निषिद्धा यानि ति
थ्योतथा॥ अपो द्वादश गंडूषैः पवित्री दंतधावनं॥ षष्ठ्यष्टमी दशी पौर्णमासं क्रामश्च च। नैदाशुचन नवम्यां च दंतकाष्ठं विव
र्जयेत्॥ श्राद्धयज्ञे च नियमे तथा प्रोषितभर्तृका॥ विष्णुः॥ प्रतिपद्दर्शषष्ठीषु चतुर्दश्यष्टमीषु च। नवम्यां नानुवारे च दंतकाष्ठं
विवर्जयेत्॥ मरीचिः॥ नाद्यात् दृजासिविमकास्य श्रासहस्रार्दिता॥ दष्टास्यपार्के हन्ते त्रशिरः कर्म्ममियात पा। हृदयायावल्क्यः॥
इष्टकालोष्टपाषाणेनेरवैरंगुलिनिरूपा। मुक्त्वा नामिकांगुष्ठो वर्जयेद्दंतधावने॥ वाराहपुराणे॥ अज्ञातमचीनि दं
त काष्ठान्यद्यात् पत्रैश्च समन्वितानि। न युग्मवर्णानि निपाटितानि नावाद्य शुष्काणि विना च चर्वा॥ व्यासः॥ ग्यामाहास्त्री
... लक्ष्याद्दंतधावनं। निराशास्तस्य गच्छंति देवताः पितृभिः सह। एतन्मध्याह्नस्नानविषये। तथा च यमः॥ मध्याह्न

लायीत्तद्धायद्दं तथा वनं। निराशाश्च स्पाग छंति देवताः पितृभिः सह इति॥ ॥इति दंध तथा वनं॥ अथा कशप्रसा
धनादि मंगल्य विधिः॥ तत्र विष्णुपुराणे स्नानं कृत्वा ततः कुर्यात्सुमान्विश्च प्रसाधनं। आदर्शांजनमांगल्यदूर्वाद्यालंभ
नानि च॥ ब्रह्मपुराणे॥ स्वमात्मानं घृतपश्येद्यदीच्छेच्चिरजीवितं॥ प्रातःस्नानं ततः संध्या सौम्यापणयथोदिते। संध्यां वापिन
याकुर्यादिति। प्रातःसंध्यासमनंतरं याज्ञवल्क्यः॥ हुत्वाग्नीन् सूर्यदैवत्यान् जपेन्मंत्रान्समाहितः। वेदार्थानधिगच्छेच्च शा
स्त्राणि विविधानि च॥ प्रातःसंध्यावंदनानंतरं अग्नीनाहवनीयादीनौपसनाग्निं वा विधिवद्हुत्वा सूर्यदैवत्यानुदुःत्यं जा
तवेदसमित्यादिकान् जपेत्॥ प्रातःसंध्यादिकं ब्रह्मचारिस्नातकं प्रति वितं॥ होमविधिस्तु गृहस्थस्नातके प्रति वितः। नरसिं
हपुराणे। दिवसस्याद्यभागेतु सर्वमेतत्समाचरेत्। दिवसस्याद्यभागं प्रवर्ह्य स्याद्यभाग इत्यर्थः। द्वितीय च तथाभागे वेदा
भ्यासो विधीयते। वेदस्वीकरणं पूर्वं विचारोभ्यसनं जपः। तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पंचधा। समित्पुष्पकु
शादीनां स कालः समुदाहृतः। उपादानस्येति शेषः॥ द्वितीयभागप्रवर्ह्यस्य द्वितीयभाग॥ ॥अथ पोष्यवर्गचिंतादि
। तत्र दक्षः॥ तृतीय च तथाभागे पोष्यवर्गस्य साधनं। तृतीयो भागः प्रवर्ह्यस्य चापोष्यवर्गस्तु माता गुरुः पिता भार्या प्रजा ६४
दीनाः समाश्रिताः अभ्यागतोतिथिश्चाग्निः पोष्यवर्ग उदाहृतः। याज्ञवल्क्यः॥ उपेयादीश्वरं चैव योगक्षेमार्थसिद्धये। ईश्वर

मभिषेकादियुक्तं अन्यं वा श्रीमंतमकुत्सितं अलब्धस्य प्रापणं योगः लब्धस्य रक्षणं क्षेमः। अष्टांगहृदये। गंतव्यं राज
कुलं द्रष्टव्या राजपूजिता लोकाः। यद्यपि न स्तवं स्यर्थी स्तथाप्यनर्थान्निवर्तते। विष्णुपुराणे॥ ततः स्ववर्णधर्मेण वृत्त्यर्थं च
धनार्जनं॥ कुर्वीत श्राद्धकर्मापि यजेत पृथिवीपते। सामसंस्था हविःसंस्था पाकसंस्थास्तु संस्थिताः। धनायत्तमनुष्याणां
यात्तत च धनार्जनं॥ नारदः॥ धनमूलाः क्रियाः सर्वा यत्नस्तस्यार्जने मतः। रक्षणं वर्धनं भोग इति तत्र विधिः क्रमात्। महाभारते।
धर्मेणार्थं समाहार्यं धर्मलब्धं त्रिसाधनं। कर्तव्यो धर्मपरमैर्मानवैः प्रयत्नतः। एकेनांशेन धर्मस्तु कर्तव्यो भूतिमिच्छता। ए
केनांशेन कामस्तु एकमंशं विवर्धयेत्। मार्कंडेयः। पादेन तस्य पारत्र्यं कुर्यात्संचयमात्मवान्। अर्धेन चात्मभरणं नित्यनैमि
त्तिकान्वितं। पादं चाप्यधिमर्थस्य मूलभूतं विवर्धयेत्॥ नारदः॥ तत्पुनः त्रिविधं ज्ञेयं शुक्लं शबलमेव वा। कृष्णं तस्य तु विज्ञेयो वि
भागः सप्तधा पुनः। श्रुतशौर्यतपःकन्याशिष्ययाज्यान्वयागतं॥ धनं सप्तविधं शुक्लं उदायाद्यस्य तद्विधः। कुसीदकृषिवाणि
ज्यशुल्कशिल्पानुवृत्तिभिः। कृतोपकारादाप्तं च शबलं समुदाहृतं। पार्श्विकं द्यूतचौर्यार्तिप्रतिरूपकसाहसैः। व्याजेनो
पार्जितं यच्च तत्कृष्णं समुदाहृतं। यथाविधेन द्रव्येण यत्किंचित्कुरुते नरः। तथाविधमवाप्नोति स फलं प्रेत्य चेह च। श्रुतेन अध्य
यनेनासोपार्जितं याजनादिना तपसा जपहोमदेवतार्चनादिना कन्यागतं। कन्यायां महागतं श्वशुरादेर्लब्धं। शिष्यागतं गुरुदक्षि

णादियाज्यागतं॥ आर्त्विज्यलब्धं॥ अन्वयागतं दायाद्यलब्धं उदयी फलं॥ तद्विधःता दृशाः॥ शुद्धस्यार्थः॥ ज्ञानवृत्तिः सेवापाल्पि
कं उत्कोचादिलब्धं॥ आर्त्तिः पीडा॥ प्रतिरूपकः कृत्रिमधातुरत्नादिसाहसापातगिर्यारोहणादिव्याजेन घृतव्याजेन तैलादि
कं दत्त्वा यदुपार्जितं॥ स्वारद्वाजः॥ तत्तु नर्द्दादशविधं प्रतिवर्णाश्रयाश्रितं॥ साधारणं स्यात्त्रिविधं विदुः स्याद्यक्रमागतं॥ प्रति
दानं तथैवात्र प्राप्तैव सद्भार्यया॥ अविशेषेण वर्णानां सार्वत्रि त्रिविधं धनं॥ विशेषिकं धनं विद्यात् ब्राह्मणस्य त्रिलक्षणं
प्रतिग्रहेण यल्लब्धं याज्यतः शिष्यतस्तथा॥ त्रिविधं क्षत्रियस्यापि प्राहुर्विशेषिकं धनं॥ युद्धोपलब्धं काराद्वं दंडश्च व्यवहा
रतः॥ कारः करः॥ विशेषिकं धनं ज्ञेयं विशस्यापि त्रिलक्षणं॥ कृषिगोरक्षवाणिज्यैः शूद्रस्यापि चतुर्युदात्॥ इतरवर्णानु
ग्रायाः शूद्रस्यापि त्रिविधागरक्षवाणिज्ये विशेषिकं धनं प्रवर्तितार्थः॥ सार्वेषामेव वर्णानामेष धर्म्मोऽनागमः॥ विपर्यया
द्धर्म्यः स्यान्नत्वदापद्भरोयसा॥ अथ प्रसंगाद्वर्णवृत्तिर्निरूप्यते॥ तत्र मनुः॥ अद्रोहेण व भूतानामल्पद्रोहेण वा पु
नः॥ यावृत्तिस्तां समास्थाय विप्रो जीवेदनापदि॥ याज्ञवल्क्यः॥ इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च॥ प्रतिग्रहोऽधिको
प्रे २ विप्रे याजनाध्यापने तथा॥ अत्र चकाराद्विप्रोक्तस्य तत्र ब्राह्मणस्यैव प्रतिग्रहः प्रतिग्रह याजनाध्यापनानि भवंति नान्यस्य॥
अत एव विप्र इति विषयसप्तमी॥ अनन्यवृत्त्या वश्वविप्रयाग ब्राह्मणस्यैव प्रतिग्रहादित्रयं वृत्तिरित्यर्थः॥ यत्तु गौतमेनो ६५

क्तं॥ आपत्कल्पो ब्राह्मणस्य ब्रह्मणा द्विजोपयोगोऽनुगमने शुश्रूषाद्या समाप्तेः समाप्ते उ ब्राह्मणगुरुरिति तत्र क्षत्रिय
विट्पायां ब्राह्मणप्रेरितायामध्यापनमात्रं कर्तव्यं तत्र तु शानेन वृत्तिविना निधानं॥ अनुगमने शुश्रूषाद्वानुगमन
मेव शुश्रूषेत्यर्थः॥ मनुः॥ षण्णां तु कर्म्मणामस्य त्रीणि कर्म्माणि जीविका॥ याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः॥
दिवलः॥ द्विविधो गृहस्थो यायावरः शालीनश्च तयोर्यायावरो याजनाध्यापनप्रतिग्रहैरिक्वयवर्जनात्॥ शालीन
स्तु प्रतिष्ठावत्स्थः धनधान्ययुक्तः शालायोगा लोकानुवर्ती सवतु विधः॥ यथाह मनुः॥ कुशूलधान्यको वा स्यात्कुंभीधा
न्यक एव वा॥ त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा॥ चतुर्णामपि चैतेषां द्विजानां गृहमेधिनां॥ ज्यायान्परः परो
ज्ञेयो धर्मतो लोकजित्तमः॥ षट्कर्म्मैको भवत्येषां त्रिभिरन्यः प्रवर्त्तते॥ द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति॥ ए
क॰ ४ कः कुशूलधान्यः षट्कर्म्मी उंछशिलायाचितयाचितकृषिवाणिज्यैः॥ अन्यः कुंभीधान्यः त्रिभिरुंछशिलायाचितैः॥ अपरस्त्र्य
हैहिको द्वाभ्यामुंछशिलाभ्यां॥ चतुर्थः श्वस्तनिकः ब्रह्मसत्रेण ब्रह्मलोकप्राप्तिहेतुत्वेन सत्रयागतुल्यफलेनो
ञ्छेन जीवति॥ मनुः॥ ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा॥ सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन॥ ऋतमुञ्छ
शिलं ज्ञेयं अमृतं स्यादयाचितं॥ मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतं॥ सत्यानृतं तु वाणिज्यं तेन चैवापि जीव्यते॥ से

वाध्यद्वत्रिराख्यानातस्मात्तोपरिवर्जयेत्॥ अथापदि प्रतिग्रहवृत्तिः। तत्र याज्ञवल्क्यः। राजांतेवासियाज्येभ्यः सीदन्निच्छे
द्धनं क्षुधा। दंभिहैतुकपाषंडबकवृत्तींश्च वर्जयेत्। राजान्यायपरः शिष्यो यथोक्तलक्षणः। याज्यः। याजनादीक्षे वर्णि
कः। शंखः॥ एतेरवयुग्गोयुक्तिं धर्मार्जितधनं तथा। याजयेत सदा विप्रो ग्राह्यस्तस्मात्प्रतिग्रहः। एतेरिति जन्मकर्मादि
भिः शुद्धः॥ मनुः॥ राजातधनमन्विच्छेत्संसीदन्स्नातकः क्षुधा। याज्यांतेवासिनोर्वापि न त्वन्यत इति स्थितिः। न त्वन्यत इति।
एषामसद्भाव उक्तः। द्विजातिभ्यो धनं लिप्सेत्प्रशस्तेभ्यो द्विजसत्तमः॥ अपि वा द्विजमात्रेभ्यो न तु शूद्रात्कथंचन॥ द्विजाति
मात्रेभ्य इति गुणधर्मरहितेभ्योपि नारदः॥ ब्राह्मणाश्चैव राजा च द्वावेतौ धृतव्रतौ। नैतयोरंतरं किंचित्प्रजाधर्मा
भिरक्षणात्। धर्मज्ञस्यन्नतन्नस्य रक्षार्थं शासतो भुवीन्। अभुवीन्हरतः पराक्षान्। मध्यमं च धनं प्राहुस्तीक्ष्णस्यापि म
हीपतेः। शुचीनामशुचीनां तु सन्निपातो यथांभसाम्। समुद्रे समतां याति तद्वद्राज्ञां धनागमः। यथाग्नौ संस्थितं दीप्ते शुद्धि
मायाति कांचनम्। एवं धनागमाः सर्वे शुद्धिमायांति राजनि। अशुचिर्वचनाद्यस्य शुचिर्भवति पूरुषः। शुचिश्चैवाशुचिः सद्यः क
थं राजा न दैवतम्। विष्णुरेव द्वैराजा ब्राह्मणमितात ज सः॥ तस्मात्प्रतिगृह्णीतो नालिप्यंते कथंचन। देवत्रेत्र शलाकपा ६६
लरूपेण। मनुः॥ न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः। सूनाचक्रध्वजवतां वेशेनैव च जीवताम्। न राज्ञ इति राजन्यत्वर

प्रजापीडकस्य। अराजन्यप्रसूतितः इति। हीनजातिप्रसूतस्य। पाराशरः प्रतिगृह्णाति लुब्धस्योच्छास्त्रवर्तिनः। स पर्यायेण
यातीमान्नरकानेकविंशतिम्। यमश्च॥ अराजन्यप्रसूतस्य राज्ञः शास्त्रेदवर्तिनः। यः प्रतिग्रहस्तस्य मध्वास्वादो विषोप
मः। तथैव राजमहिषी राजामात्यपुरोहिताः। पापेनार्थेन संयुक्ताः सर्वे ते राजधर्मिणः। याज्ञवल्क्यः। प्रतिग्रहे सूनिचक्रि
ध्वजिवेश्यानराधिपाः। दुष्टा दशगुणं पूर्वात्पूर्वादेते यथोत्तरम्। हारीतः। दशसूनासहस्राणि अङ्काराजाकारातिचातान्य
वकुरूलरान्नो यो रस्तस्य प्रतिग्रहः। अदेवतातामात्याः सेनानीदंडनायकाः। तालाहर्दितदहर्दिमाश्रितापाश्रितश्च॥
यदि यदा कथं विदेत्तेभ्यो गृह्णाति॥ तत्र बृहस्पतिः॥ असतोपि समादाय साधुभ्यः संप्रयच्छति। धनस्वामिनमात्मानं स तार
यति दुस्तरात्। अथ प्रतिग्रहविषये आपदनापदोः धारणे किंचिदुच्यते॥ तत्र मनुः। एधोदकं मूलफलमन्नमभ्युद्यतं च य
त्। सर्वतः प्रतिगृह्णीयान्मध्वथाभयदक्षिणाम्। अत्र वा अभयदक्षिणा व्यतिरिक्तेभ्युद्यतमिति संबध्यते। अभ्युद्यतमयाचित
दत्तं। सर्वतः शूद्रादपि। अयं चापदशः प्रतिग्रहप्रवृत्तस्यैव नतु निवृत्तस्य। अभयदक्षिणा उक्तेच्छा। दित्योपि। शय्यासनेऽक्ष
शाखी धान्यत्रेतु घंमणीनदधि। धानामत्स्यान्पयोमांसं शाकं चैव न निर्णुदेत्। मणीन् विषादिनिवारकान्। धाना लाजाः। न
गी २ निर्णुदेन प्रत्याख्यायेत्। तिलधेनुर्गजा वाजी प्रेतान्नमजिनं मणि सुरत्नौ स्थमानाव घोराः सप्त प्रतिग्रहाः। प्रतिग्र

ग्या २
एषः दवनं ४

द्धकिंगुणविशिष्टाधिकारी। का वा नस्याकौ ह्यायां निषेधस्तु खधिकारिणमर्थादधिकारिणो वाद। याज्ञवल्क्यः॥ वि
द्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः॥ गृह्णन् प्रदातारमधो नयत्यात्मानमेव च॥ मनुः॥ हिरण्यं भूमिमश्वं वा अन्नं
वासस्तिलान् घृतं। अविद्वान् प्रतिगृह्णाति भस्मीभवति दारुवत्॥ याज्ञवल्क्यः॥ प्रतिग्रहसमर्थोपि नादत्ते यः प्रतिग्रहं
ये लोका दानशीलानां स तानाप्नोति पुष्कलान्॥ मनुः॥ वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः। अप्यकार्यशतं कृत्वा
भर्त्तव्या मनुरब्रवीत्॥ ॥ अथ क्षत्रियवृत्तिः॥ तत्र हारीतः॥ धनुर्विद्व्रतस्नानअध्ययनयजनदानधर्म्मशिष्टपालना
शिष्टनिग्रहवान्॥ अनिजित्य षड्भागवृत्तिर्विद्रतेकादशीति। अनिर्जितानीशत्रोर्भूम्यादीनि षड्भागग्रहणीवदन्नासि
कदेशानेव वर्त्तितार्थः॥ याज्ञवल्क्यः॥ ग्रहाधीना नरेन्द्राणामुच्छ्रायाः पतनानि वा। भावाभावौ च जगतस्तस्मात्पूज्यतमा ग्र
हाः॥ महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः॥ विनीतः सत्वसंपन्नः कुलीनः सत्यवाक्शुचिः। स्थूललक्षः क्रुद्धादयार्थदर्शी ब
हुप्रद इति यावत्॥ अदीर्घसूत्रः स्मृतिमानक्षुद्रोपरुषस्तथा धार्म्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित्॥ अदीर्घसूत्रः
आवश्यककर्मणामारंभे आरब्धानां परिसमापने वा यो न विलंबते सः। रहस्यवित्। गोपनीयार्थगोपनविचक्षणः। स्वर
ध्राणामान्वीक्षिक्यां दंडनीत्यां तथैव च। विनीतस्त्वथ वार्त्तायां त्रय्यां चैव नराधिपः। आन्वीक्षिकी तर्कविद्या आत्मविद्या दंड
× स तथा मनुः त्रैविद्येभ्यः त्रयीं विद्यां दंडनीतिं च तद्विद्यात् आन्वीक्षिकीं चात्मविद्यां वार्त्तारंभांश्च लोकत इति

डाक्टर भाऊदाजी इत्यस्य स्मारकम्
DR. BHAU DAJI MEMORIAL

६३

नीतिः तर्कशास्त्रं वा। त्रकृषिवाणिज्यपशुपालनरूपा। त्रयी ऋग्यजुःसामरूपा। स मंत्रिणः कुर्वीत प्राज्ञान्मौलान्स्थिरान्
शुचीन्। तैः सार्द्धं चिंतयेद्राज्यं विप्रेणाथ ततः स्वयं॥ मौलान् राज्यवंशपरंपरायातान्। विप्रेण पुरोहितेन। पुरोहितं च कु
र्वीत दैवज्ञमुदितोदितं। दंडनीत्यां च कुशलमथर्वांगिरसे तथा। उदितादितं शास्त्रादितो विद्याभिरुदितं समृद्धं श्रौतस्मा
र्त्तक्रियाद्दतो वृणुयादेव चर्त्विजः। यज्ञांश्चैव प्रकुर्वीत विधिवद्भूरिदक्षिणान्। भोगांश्च दद्याद्विप्रेभ्यो वसूनि विविधानि च।
अक्षयोयं निधी राज्ञां यद्विप्रेषूपपादितं॥ भोगान् सुखसाधनानि। अस्कन्नमव्ययं चैव प्रायश्चित्तैरदूषितं। अग्नेः सकाशा
द्विप्राग्नौ हुतं श्रेष्ठमिहोच्यते। अस्कन्नं द्वारणरहितं॥ अव्ययं पशुहिंसारहितं॥ अलब्धमीहेद्धर्मेण लब्धं यत्नेन पा
लयेत्। पालितं वर्द्धयेन्नीत्या वृद्धं पात्रेषु निक्षिपेत्॥ दत्वा भूमिं निबंधं वा कृत्वा लेख्यं तु कारयेत्। आगामिभद्रनृपतिप
रिज्ञानाय पार्थिवः। निबध्यत इति निबंधः पणनिरकादिः स्वदत्तं परदत्तं वा भूम्यादि नापहरेत्। स्वदत्तां परदत्तां वा यो
हरेत वसुंधरां। षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः इति। ब्रह्मपुराणस्मरणात्। पटे वा ताम्रपट्टे वा स्वमुद्रोप
रिचिह्नितं। अभिलेख्यात्मनो वंश्यानात्मानं च महीपतिः। प्रतिग्रहपरीमाणं दानच्छेदोपवर्णनं। स्वहस्तकालसंपन्नं
शासनं कारयेत्स्थिरं॥ आत्मानं च। वंश्यान् प्रतिग्रहीतारमपि। प्रतिगृह्यत इति प्रतिग्राहानिबंधः। तस्य परिमाणं। दीयत इ

डाक्टर भाऊदाजी इत्यस्य स्मारकम्
DR. BHAU DAJI MEMORIAL

तिदानं दत्त्वादितस्य छेदः॥ छिद्यत इति छादानद्यादिना ततः परता राधर्मान्नृपाणां यद्धनार्जितं। विप्रेभ्यो दायतद्रव्यं प्र
जाभ्यश्चान्यं स दा। यश्चादाव प्रबध्नीतनस्य धर्मपराङ्मुखः॥ अकूटराज्ञा धियीति तस्य गंग्रीयां गिनाय था। पदानिकृत
तुल्यानि त्वग्नेश्च विनिवर्तिनी। राजा मुक्तमादत्तं हतानो विपलायिनो॥ न वादं वादिनं क्लीवं निर्हेतिं परसंगतं। न दन्या द्वि
निवृत्तं च युद्धप्रेक्षणकादिकं॥ ततः स्वः समुत्थाय पश्येदायव्ययो पश्येत्। ततो व्यवहारान् दृष्ट्वा मध्याह्नकालस्नाच
यथारुचि भुंजीत। हिरण्यं व्याप्ततानीतं भांडागारेषु निक्षिपेत्। पश्येच्चारांस्ततो दूतान् प्रेषयेन्मंत्रिसंगतः। व्याप्तता हि
रण्याद्यानयने नियुक्ताः। ततः स्वैरविहारी स्यान्मंत्रिभिर्वा समागतः॥ बलानां दर्शनं कृत्वा सेनान्या सह चिंतयेत्। तत
ऽपराह्णे। स्वैरविहारी अंतःपुरा। तथा च मनुः॥ अंतःपुरे वा विहरन्नेव स्त्रीभिः रतः पुरः सह। विहृत्य च यथाकामं पुनः
कार्याणि चिंतयेदिति। संध्यां तु पास्य शृणुयाच्चाराणां गूढभाषितं। गीतनृत्यैश्च भुंजीत पठेत्स्वाध्यायमेव वा। संध्यो
पासं संध्यां। गीतनृत्यैः किं विद्यालैर्नीचा भुंजीत स्वाध्यायमिति स्मरणार्थं पावना। संविशेत्तूर्यघोषेण प्रतिबुध्येत्तथै
व च। शास्त्राणि चिंतयेद्बुद्ध्या सर्वकर्तव्यतास्तथा। प्रेषितोंश्च एण्यात्मद्भागमादत्तन्यायेन परिपालयन्। सर्वदानाधिकं
यस्मात् प्रजानां परिपालनं। अन्यायेन नृपा राष्ट्रात् स्वकोशं योऽभिवर्द्धयेत्। सोऽचिराद्विगतश्रीको नाशमेति सबा ६८
संविशेत्स्वपात् रत्रौ लोभु कमास्त्रिग्वेष्वालि स्लः क्रोधनो रिपुस्याद्रात्रौ नृत्य वा यथार

धवः। प्रजापीडनसंतापात्समुद्भूतो हुताशनः। राज्ञः कुलं श्रियं प्राणान्नादग्ध्वा विनिवर्तते। आह विष्णुः॥ निधिं ब्राह्म
णो लब्ध्वा सर्वमादद्यात्। क्षत्रियश्चतुर्थमंशं राज्ञे दद्याच्चतुर्थमंशं ब्राह्मणेभ्यः। अर्द्धमादद्यात् वैश्यश्चतुर्थमंशं रा
ज्ञे दद्यात्। ब्राह्मणेभ्यो द्वं अंशमादद्यात्। स्वनिहिताद्राज्ञे ब्राह्मणवर्जं द्वादशमंशं दद्युः। आह वशिष्ठः। अज्ञानमानं
वित्तं याधिगच्छेद्राजा तद्धरेदधिगंतुः षष्ठमंशं प्रदाय। ब्राह्मणश्चेदधिगच्छेत् षट्कर्मसु वर्तमानो न राजा हरेत्।
आह मनुः। प्रनष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत्। अर्वाक् त्र्यब्दाद्धरेत्स्वामी परेण नृपतिर्हरेत्। पारेण नृपते
र्योगानुज्ञामात्रमिदमिति व्याचक्षते। स्वाम्यागमनं तु तदर्पणमेव ममेदमिति यो ब्रूयात्सोऽनुयोज्यो यथावि
धिः। संवाद्य रूपसंख्यादीन् स्वामी तद्द्रव्यमर्हति। आददीताथ षड्भागं प्रनष्टाधिगतान्नृपः। दशमं द्वादशं वापि सतां धर्म
मनुस्मरन्। ममेदमिति यो ब्रूयान्निधिं सत्येन मानवः। तस्माद्ददीत षड्भागं राजा द्वादशमेव वा। विद्वांस्तु ब्राह्मणो दृ
ष्ट्वा पूर्वोपनिहितं निधिं। अशेषमप्याददीत सर्वस्याधिपतिर्हि सः। यं तु पश्येन्निधिं राजा पुराणं निहितं क्षितौ। तस्मा
द्द्विजेभ्यो दत्त्वार्द्धमर्द्धं कोशे प्रवेशयेत्। आह नारदः। परेण निहितं लब्ध्वा राजन्यस्तु पहारन्निधिं। राजगामी निधिः
सर्वः सर्वेषां ब्राह्मणादृते। ब्राह्मणोपि निधिं लब्ध्वा क्षिप्रं राज्ञे निवेदयेत्। तेन दत्तं तु भुंजीत स्तेनः स्यादनिवेदयन्।

॥छ॥ अथ वैश्यवृत्तिः॥ मनुः॥ वैश्यस्तु कृतसंस्कारः कृतदारपरिग्रहः। वार्त्तायां नित्ययुक्तः स्यात् पशूनां चैव रक्षणे।
मणिमुक्ताप्रवालानां लोहानां तान्तवस्य च॥ लोहानां वा धातूनां गंधानां च रसानां च विद्यादर्घबलाबलं। बीजानामु-
प्तिविधियुक्तः स्यात् क्षेत्रबीजगुणस्य च। मानयोगांश्च जानीयात् तुलायोगांश्च सर्वशः। सारासारं च भाण्डानां देशानां च
गुणागुणौ। भाण्डानां विक्रियं द्रव्याणां लाभालाभं च पण्यानां पशूनां वृद्धिवर्द्धनं। भृत्यानां च भृतिं विद्यात् भाषाश्च वि-
विधा नृणां। द्रव्याणां स्थानयोगांश्च क्रयविक्रयमेव च। धर्म्मेण द्रव्यवृद्धौ चातिष्ठेद्यत्नमुत्तमं। विद्याच्च सर्वभूता-
नामन्नमेव प्रयत्नतः। कालिकापुराणे। कृषिगोरक्षवाणिज्यमेतत् वैश्यस्य संमतं। तथाध्ययनं दुग्धस्याप्यौ ऋषिदै-
वसमाचारं। द्विजवात्स्यौ द्विषद्वाम्यौ ब्रह्मराद्विप्रमाणतः। क्षोक्षोयायां तरे वैश्यकारायधर्मता द्विजः। पिण्याकतृ-
णातायं तु तैलं यत्नात् सदा पायेत्॥ धूमकेतुर्यत्न वियं वस्त्रं चैव कारायत्नतः। विणवीमपितृभिंतु अधोमूत्र गताय
वा कुर्वीत नवनसीदत ऋषिं वैश्यो महासुना। राज्ञा षड्भागमहस्त्रज्यं पैवश्यकर्षकस्य वा। शिल्पिनः प्रस्तुतीक्ष्य वदीनी
धांस्य प्रयत्नतः॥ शाद्गमात्मन निर्दुं जीत खलाद्धात्र ष्टयं विधिः। हारीतः॥ अथ गवंधर्मद्रव्यंषड्वंशो विकाददिनी। चतुर्थ ७०
वैनृशीमानां द्विगवे ब्रह्मघातिनी। बालानां दमनं चैव वाहनं चनत्रासयात। वृद्धानां दुर्बलानां च प्रजापतिवाचायथा ऽ ६९

स्त्वापघातनं तासां वाहनं कारयेत्नतः। वृद्धं तु श्रेनयुंजीत जीर्णव्याधितामवरा। अथ कुसीदं। तत्र याज्ञवल्क्यः। अ-
शीतिभागो वृद्धिः स्यान्मासि मासि सबंधके। वर्णक्रमाच्छतं द्वित्रिचतुःपंचकमन्यथा॥ अथ वैतिअर्द्धी धा[illegible]तु॥ नी-
तिसीव असीवृद्धिं नाम्नी ष्टीतुपुनर्हरेत्। चक्रवृद्धिकारिकाचकपिकाकलिकाचया। याज्ञवल्क्यः। वृद्धि[illegible] द्विप्र-
२४ तिमासैतु कालिका। इच्छाकृतां कारिता का। यिकाकायकर्म्मणि। बृहस्पतिः। बहावानत्रीनापायाज्ञषिभिः एरिवा[illegible]ःस-
र्विषामपि वीतपीकुसीदमधिकं विदुः। ज्ञानाद्दृष्ट्या राजनयान्कृषकाद्येरुषद्रवैः। दृष्ट्यादिकजावह्मानिः[illegible]नवि-
धात॥ छ॥ अथ शूद्रवृत्तिः॥ तत्र मनुः॥ विप्राणां वेदविदुषां गृहस्थानां यशस्विनां। शुश्रूषैव तु शूद्रस्य धर्मो नैःश्रेयसः प-
रः॥ हृदस्यतु॥ शौचं ब्राह्मणशुश्रूषा सत्यमक्रोध एव च। शूद्रकर्म्म तथा मैत्रा नमस्कारास्या चादितः। पराशरः। शूद्रस्य
द्विजशुश्रूषा प्रथमे धर्म्मलिक्षणी॥ यदन्यत् कुरुते किंचित्तद्भवेत्तस्य निष्फलं। द्विजशुश्रूषाविचर्य्याशुश्रूषा तस्य निष्फ-
लमिति द्विजसेवाया विरोधे यदन्यत्कुरुते तन्निरर्थकमित्यर्थः। गौतमः॥ चतुर्थो वर्ण एकजातिस्तस्यापि सत्यमक्रो-
धः शौचमाचमनार्थे पाणिपाद[illegible]श्राद्धकर्म्मभृत्यभरणं स्वदारवृत्तिः परिचर्या चोत्तरेषामन्यो वृत्तिं लिप्से-
त। इतरेषां द्विजातीनां याज्ञवल्क्यः[illegible]रितिःशु विर्भृयनन्नौ श्राद्धक्रिया परा। नमस्कारेण मंत्रेण पंचयज्ञान्नहापये

यत्। नमइत्येतावानेव मंत्रः। देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वधायै स्वाहायै नित्यमेव नमो नम इ
ति वा मंत्रः। ननु कथं शूद्रस्य कथमग्निसाध्यकर्माधिकारः। विवाहाग्नाविति चेत्। न शूद्रस्य विवाहहोमाभावा
त्। न ह्यमंत्रको होमः। न च शूद्रो मंत्रवान्। न च नमस्कारमंत्रेणैव मंत्रवान् इति वाच्यं। तस्य पंचयज्ञेष्वेव विहितत्वात्।
तस्मादग्निसाध्यकर्मसु वक्तव्योऽस्याधिकारहेतुः। उच्यते। अनग्नेरपि शूद्रस्य लौकिकेऽग्नौ वैश्वदेवादीनि कर्माणि का
र्याणि। प्रतिमाद्याधिष्ठानवत्। निषादस्थपतीष्टिवत्। किं च द्विजातीनामपि न विवाहाग्नौ नियतं वैश्वदेवकर्म किं तु तच्छू
द्रस्याप्येवं शूद्रस्य यत्राहोमे विधिस्तत्र लौकिकाग्नावेव मंत्रान्तरविधानं च नमस्कारमंत्र एवेति सिद्धं॥ अथाप
द्वृत्तिः। तत्र मनुः॥ अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्मणा। जीवेत्क्षत्रियधर्मेण स ह्यस्य प्रत्यनंतरः। उभाभ्यामप्यजी
वंस्तु कथं स्यादिति चेद्भवेत्। कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकां। वैश्यवृत्त्यापि जीवतो विक्रयमादहस एवास
अर वर्जिसान्व्यापोहेत कृतान्नं च तिलैः सह। व्यापोहेल्लवणीयतान विक्रीणीतेत्यर्थः। व्यापोहेदिति सर्वत्रानुषज्यते। अश्म
नालवणं चैव पशवो ये च मानुषाः। सर्वं च तान्तवं रक्तं शाणक्षौमाविकानि च। अपि चेत्स्युररक्तानि फलमूले तथौषधीः। ७०
अपः शस्त्रं विषं मांसं सोमं गन्धांश्च सर्वशः। क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान्। आरण्यांश्च पशून्सर्वान्दंष्ट्रिणश्च वयांसि

च। मद्यं नीलिं च लाक्षां च सर्वांश्चैकशफांस्तथा॥ अत्र रसग्रहणेनैव लवणस्यापि ग्रहणे सिद्धे पुनर्ग्रहणं दोषाधि
क्यप्रतिपादनार्थं। एतेनान्यदपि पुनरुक्तं व्याख्यातं। क्षौद्रं मधु कल्कः सिक्थकं। माक्षिकस्य मधुशब्देनोपादानात्।
सद्यः पतति मांसेन लाक्षया लवणेन च। त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात्। इतरेषां तु पण्यानां विक्रया
दिह कामतः। ब्राह्मणः सप्तरात्रेण वैश्यभावं निगच्छति। रसा रसैर्निमातव्या न त्वेव लवणं रसैः। कृतान्नं चाकृतान्नेन
तिला धान्येन तत्समाः॥ निमातव्याः परिवर्तनीयाः। जीवेदेतेन राजन्यः सर्वेणाप्यनयं गतः। न त्वेव ज्यायसीं वृत्तिमभिम
न्येत कर्हिचित्। एतेन सर्वेणेति। अनयं आपत्। वैश्योऽजीवन्स्वधर्मेण शूद्रवृत्त्यापि वर्त्तयेत्। अशक्नुवंस्तु शुश्रूषां शू
द्रः कर्तुं द्विजन्मनां। पुत्रदारात्ययं प्राप्तो जीवेत्कारुककर्मभिः। प्रचरितैः शुश्रूषितैः द्विजालयः। तानि कारुककर्माणि शि यैः कर्म
ल्पानि विविधानि च। कुर्वीतेति शेषः। आपद्यपीतरवृत्तिनिषेधवृत्तिरेव ब्राह्मणस्य ज्यायसी। आह मनुः। वरं स्वधर्मो भिः
विगुणः परधर्मात्स्वनुष्ठितात्। परधर्मेण जीवन्हि सद्यः पतति जातितः। वैश्यवृत्तिमनातिष्ठन्ब्राह्मणः स्वे पथि स्थितः। अ
वृत्तिकर्शितः सीदन्निमं धर्मं समाचरेत्। सर्वतः प्रतिगृह्णीयात् ब्राह्मणस्त्वनयं गतः। नाध्यापनाद्याजनाद्वा ग
र्हिताद्वा प्रतिग्रहात्। दोषो भवति विप्राणां ज्वलनांबुसमा हि ते। जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः। आ

न्यो ४४ ग्रंथ

काशमिव पीकेन न स पापेन लिप्यते। तथार्थवादोऽपि। क्षुधार्त्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीं। चंडालहस्तादादाय
धर्माधर्मविचक्षणः। श्वजाघनीग्रहणेनापद्यभ्यागत्या श्वपचस्य कर्मणः स्वीयस्यार्थे वीर्यमपि कृत्वा नानुजानाति।
न्या० २ वानस्पत्यं मूलफलं दार्वग्न्यर्थं तथैव च। तृणानि गाश्च ग्रासार्थं दृष्ट्वा विमनुरब्रवीत्। वानस्पत्यं पत्रपुष्पादि द्विजोऽगृ
ह्णीयाद्वृत्तिकर्षी विद्धूद्धवमूलाकाः। आददानः परात्त्वन्नं दंडं दाहमर्हतीति। तथैव सप्तमे चक्रेण क्रान्ति षष्ठे न स्नात्। अथ स्नानवि
धानेन कृत्वा चीर्णकर्मणः। ब्राह्मणव्यतिरिक्ताः श्रेष्ठक्रियाहीनकर्मेत्यभिधीयते। उत्कृष्टं चापकृष्टं च तयोः कर्मनिविध्य
ते। मध्यमकर्मणा हि वासर्वसाधारणेन हिता। न याज्ञिणः शूद्रयोरुत्कृष्टं ब्राह्मणकर्मापकृष्टं शूद्रकर्मनविद्यते। मध्य
मकर्मणीक्षत्रविट्कर्मणी सर्ववर्णसाधारणे इत्यर्थः। एवमापद्निरूर्य आयश्चित्तेत्याह मार्गनिरतान्तवेत्। तथा
च याज्ञवल्क्यः। निस्तीर्य्य तामथात्मानं पालयित्वा पथि न्यसेदिति। तामापदं पालयित्वा प्रायश्चित्तैः पथि स्ववर्णधर्मे स्ववर्ण
धर्मनिरतानां फलमाह। पिवीनसिः। ब्राह्मणस्य प्राजापत्यामिंद्रपदं क्षत्रियस्य मारुतं विशस्य गांधर्वं शूद्रस्य स्थानं
व्रजंति ते स्वस्वे कर्मण्यनिरताश्चय इति॥ इति वर्णवृत्तिप्रकरणं॥ ॥ अथ प्रासंगिकं परिसमाप्य प्रकृतमनुसरामः॥ त ७१
त्र मध्याह्नस्नानविधिः॥ तत्रादौ तावत्सारोचनार्थं स्नानप्रशंसा॥ याज्ञवल्क्यः॥ अगम्यागमनात्स्तेयात्पापेभ्यश्च प्रतिग्र

हात्। रहस्याचरितात्पापान्मुच्यते स्नानमाचरन्। मनःप्रसादजननं रूपसौभाग्यवर्द्धनं। शोकदुःखस्य प्रहं स्नानं मो
हृद्देद्दाद्दनं तथा। स्नानानि दानान्याह शंखः। स्नाने उक्तविधं प्रोक्तं गौणं मुख्यप्रभेदतः। तथैवोऽब्रुवारुणं मुख्यं तत्पुनः ष
ड्विधं भवेत्। नित्यं नैमित्तिकं काम्यं क्रियांगं मलकर्षणं। क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्त्तितं। एतल्लक्षणान्यपि
स एवाह। अस्नातस्तु पुमान्नार्हो जप्याग्निहवनादिषु। प्रातःस्नानं तदर्थं तु नित्यस्नानं प्रकीर्त्तितं। प्रातरित्युपलक्षणं अ
त्र माध्यंदिनस्यापि नित्यत्वमेव। तथा च साधारणेनाह गालिलः। नित्यं सततनिवर्त्त्यमिति। वियाघ्रपादोऽपि। प्रातःस्नायी
चावश्चित्यं मध्ये स्नानं सदाचरेदिति। चंडालशवयूपादिस्पृष्ट्वा। स्नातो रजस्वला। स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं
हि तत्। पुष्यस्नानादिकं यत्तु देवज्ञविधिचोदितं। तद्धिकाम्यं समुद्दिष्टं नाकामस्तु प्रयोजयेत्। जप्तुकामः पवित्राणि
अर्चिष्यन्देवताः पितॄन्। स्नानं समाचरेद्यस्तु क्रियांगं तत्प्रकीर्त्तितं। पवित्राणि सूक्तानि। मलापकर्षणं नाम स्नानमभ्यंग
पूर्वकं। मलापकर्षणार्थं तु प्रवृत्तिस्तस्य नान्यथा। सरःसु देवखातेषु तीर्थेषु च नदीषु च। क्रियास्नानं समुद्दिष्टं स्नानं
तत्र मता क्रियते। स्नानमेव तत्र क्रिया कर्त्तव्यतया विहितेत्यर्थः। दक्षः। स्तुयेत् तथा तागस्नानार्थं मृदमाहरेत्। तिल
पुष्पकुशादीनि स्नानं चाकृत्रिमजले तु शस्यतेऽगा। पूर्वाह्णे स्पिवा रक्ता गौरा तथाश्वेता त्रिविधा मृत्तिका स्मृता। शूद्रे

ग्रातुस ग्राह्या शर्करास्मादिवर्जिता॥ शेषलक्षणे तु मृत्तिकायाः॥ शौनकप्रकरणे। बाह्यवीतिलाः सुसाः पृथ्व्यां गियथोक्तानि।
कुशा वक्ष्यमाणलक्षणाः कुशा आह कालविशेषमाह कात्यायनः। मासि नभस्यमावास्या तस्यां दर्भोच्चयः स्मृतः। अयातया
मास्ते दर्भा नियोक्तव्याः पुनः पुनः॥ एतच्च प्रतिदिनाशक्तौ बोद्धव्यं। कुशग्रहणे विधिः। सुवर्णो दाशस्तु विरिञ्चास्थि चाप्सवी
शरामुखः। उंकारण उमीत्रणसन्नादवकुशास्पर्शात्। सन्नादव प्रथमत एवादर्भोत्पाटनमंत्रः। विरिंचिना सहोत्पन्न
परमेष्ठीनिसर्गज॥ नुद सर्वाणि पापानि मम स्वस्तिकरो भव॥ कुशमूले स्थितो ब्रह्मा कुशमध्ये तु केशवः। कुशाग्रे तु हरो दे
वस्त्रयो यादेवाः कुशे स्थिताः॥ अच्छिन्नाग्राः सप्रपर्णाः समूलाः कोमलाः शुभाः। पितृदैवजपार्थं ये समादद्यात्कुशान्द्विजः॥ स
मपर्णाः शुभा दर्भा निर्मलास्तत्र मस्तु द्ववाः॥ तप्रशस्तानि पाकव्यादिव पित्र्य च कर्मणि। जातिमात्रा नव दर्भाः सायमूलाः
कुशाः स्मृताः॥ सप्त पत्रस्तु कुतपः छिन्नाग्रस्तृणमुच्यते। अच्छिन्नाग्रस्तु स्यायामाद् इस्ताविच प्रमाणतः॥ कुतपा इति विज्ञया
स्मिस्तु श्राद्धे समाहरेत्॥ छंदोगपरिशिष्टे चनैत गीर्णिलैसाग्रे कौशं द्विदलं अवच प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्र
वित्॥ कौशे ये विस्त्र यान्निथ पवित्रं दक्षिणकरे। तुंजानस्तु विप्रो मणि गर्हितान्नस्य शोधनी॥ किं दोर्ले दक्षिणे दास्म
सावित्री पापनिसत्तोपवीतशिखा यैव पादमूल सम्मसन्त। एकत ह्यर्थः। कौशिकः॥ पवित्रस्यतु नाशो वै ब्राह्मी ७२

तत्तुकदाचन॥ पितॄणां तर्पणं याज्यमु द्वार हूजानतथाशीरवः॥ उत्तरत्र स्थिते दीर्णे समाचाम तीया द्विजः। सोमपा
न फलेतस्यतु श्चावर्तं फललभेत्। ग्रंथिर्यस्य पवित्रस्य न तेनाचमनं चरेत्। आचामेदास्तु मादाय यथा लोकात
थातु सः। यथा लोकाक्ति निर्दिष्टौतः। अत्रैनौ ज न कालपि ग्रंथिर्निषिद्धः॥ ब्रह्मयज्ञजापविवर्ब्रह्मग्रंथिर्विधीयते। सा
ऊनवर्तुलः प्रोक्त एवं धर्मो निदीयते। वामहस्ते कुशान्दत्त्वा दक्षिणेनादकं पिबेत्। रुधिरं तद्भवत्तोयं पीत्वा चान्द्राय
णं चरेत्। कुशा तावत्तथा काशान्दूर्वाद्या द्वियवान पितदत्तावत्तुनीवारान् श्यामकांश्चानियोजयेत्। हारीतः॥ जाप
दानं तथा होमस्वाध्याय पितृतर्पणं। अशून्यं तु करं कुर्यात्सुवर्णरजतैः कुशैः। आपस्तम्बः। ब्रह्मयज्ञेच यदर्भाय
दर्भाः पितृतर्पणे। धृताः सूत्रपुरीषे तु तेषां त्यागो विधीयते। चितौ दर्भाश्च ये मार्गे स्वाध्याये पितृतर्पणे। स्तरणास
न पिंडेषु षण्णाह्याः सप्तविकुशाः। आस्तरणार्जिता दर्भा ये च योग्याश्छिंदितान रवौं ध्वथितौ याग्निदग्धीस्तु कुशान्यज्ञेन वर्ज
यत्। नानीवीमध्ये स्थिता दर्भा ब्रह्मसूत्रे तृणाय धृताः। पवित्रौ तान्विजानीयात् यथा कायस्तथा कुशाः। अत्र विशेषमाह॥
कात्यायनः। हरिताय ज्ञियादर्भाः पीलकाः पाकयज्ञियाः। समूलाः पित्र्यदैवत्याः कल्माषा वैश्वदेविका इति। पितृदेव
त्याः पित्रथी। गणवालपवित्रप्रसज्य। कौशिकः। गवां बाल पवित्रेण धार्यमाणेन नित्यशः। न स्पृशंतीह पापानि श्रीश्च गात्र

षु तिष्ठति। गवां बालपवित्रेण वक्ष्यमाणपालाशं कारयेतियः। पैप्पलाद्यायाद्युक्ता येन यावज्जीवेन संशयः॥ गवां बालपवित्रेण
संध्योपास्तिं कारयेतियः॥ स विप्रो दशवर्षाणि त्यक्तसंध्यो न्नावन्नर इति हारीतः॥ समित्तु अथकुशादीनि श्रोत्रियः स्वयमा
हरेत्स्वदानात्तेः क्रयक्रयात्तेः कर्म कुर्वन्ति जययथः। कुशांश्च पाणिसमिधः अपि च विशेषतः। निषेधे चापि दृष्ट्वा पा
दमावास्यामपि द्विजाः। यत्तु वचनं॥ अमावास्यां न हिंस्यात्तु कुशांश्च समिधस्तथा। सर्वत्रावस्थितसोमहिंसायां ब्रह्महा भ
वेत्॥ तत्तु यस्मिन्काले वनस्पत्यादिषु सोमो वसति तन्मुहूर्तनिषेधपरं सर्वत्रावस्थित इति हेतूपादानात्। सर्वत्र वनस्प
तिकुशादिषु अवस्थानकालविशेषस्योपरि निर्दिष्टः। त्रिमुहूर्तं वसेदर्के त्रिमुहूर्तं जले वसेत्। त्रिमुहूर्तं वसेद्गोषु त्रिमु
हूर्तं वनस्पतौ॥ वनस्पतिगतं सोमं यस्तु हिंस्याद्वनस्पतिं। घोरायां भ्रूणहत्यायां युज्यते नात्र संशय इति। वनस्पति
रपि कुशादीनामपि प्रदर्शनार्थं इति कुशविधिः॥ ॥ अथ वाशिष्ठस्नानविधिः। अथ स्नानविधिं वक्ष्ये प्रवदत्याम्यनुपू
र्वशः। यान् स्नात्वा दिवं यान्ति श्रद्दधाना द्विजोत्तमाः॥ नदीषु देवखातेषु तडागेषु सरस्सु वा। स्नानं समाचरेन्नित्यं गर्त
प्रस्रवणेषु वा। परकीयनिपानेषु न स्नायाद्वै कदाचन। निपानकर्तुः स्नातस्तु दुष्कृतांशेन लिप्यते। अलाभे देवखा ७३
तानां सरसीसरितां तथा। उद्धृत्य चतुरः पिंडान् पारक्ये स्नानमाचरेत्। याज्ञवल्क्यः॥ पंच पिंडाननुद्धृत्य न स्नायात्परवारिषु। यो

गयाज्ञवल्क्यः॥ ह्यरुक्षिप्रावरे स्नाने मध्याह्नस्नाने विशेषतः। प्रयतो मृदमादाय दूर्वामार्द्रं च गोमयं॥ अरुगना उ
रः। विशेष इति वचनादपराह्णेप्यनुज्ञानमस्तीति गम्यते स्थापयिचाच यथावच्चततः स्नानं समाचरेत्। प्रक्षाल्य ह
स्तौ पादौ च शिखाबंधं समाचरेत्। शिखाबंधनप्रकारमाह॥ व्यासः॥ स्मृत्वोंकारं च गायत्रीं निबध्नीयाच्छिखां ततः। पुन
राचम्य हृदयं बाहू स्कंधौ च संस्पृशेदिति। मृदेकया शिरः क्षाल्य द्वाभ्यां नाभेरधो परि। अधश्च तिसृभिः कायः षड्भिः पादौ
तथैव च। प्रक्षाल्य सर्वकायं च द्विराचम्य यथाविधि। ततः संमार्जनं कुर्यान्मृदा सर्वं तु मंत्रवित्। अंगान्यङ्कविधिना मृदा सं
मार्जयेदित्यर्थः। अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरा। उद्धृतासि वराहेण कृष्णेन शतबाहुना। मृत्तिके त्वां च गृह्णामि प्र
जया च धनेन च। मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमंत्रिता। मृत्तिके हर मे पापं सर्वं यन्मया दुष्कृतं कृतं। मृत्तिके देहि मे पुष्टिं
त्वयि सर्वं प्रतिष्ठितं॥ ततश्च गोमयेनैवमग्रमग्रमिति ब्रुवन्। अग्रमग्रं चरंतीनामोषधीनां रसैश्च नाना। तासामृषभपत्नीनां
पवित्रं कायशोधनं। तन्मे रोगांश्च शोकांश्च नुद गोमय सर्वदा। ततो दूर्वया। कांडात्कांडात्प्ररोहंती परुषः परुषः परि। ए
वा नो दूर्वे प्रतनु सहस्रेण शतेन च। या शतेन प्रतनोषि सहस्रेण विरोहसि। तस्यास्ते देवीष्टके विधेम हविषा वयं। इ
ति वै मार्जनं मंत्रैः स्मृतमीहता। एभिरेतैर्मंत्रिता अमृतेनवतीर्थं यातं ज्ञातमिति द्वाभ्यां नीर्थं न्यावादायेन नः। कुरु
सो२ ध्रु२ त१

त्रादीन्यावाहयेत् तु रुद्रो तेगयोगेनां प्रत्तासेषु श्वराणि च॥ ततो महाव्याहृतिभिर्गायत्र्या वा निमित्रयेत्॥ आपोहि
ष्ठेद मापश्च दुपदादिवईत्यपि॥ तथा हिरण्यवर्णाभिः पावमानीभिरेव ततः॥ तातार्कमीन्द्या वीकारनिमज्योनजीलिबु
धः। प्राणायामौ स्त्रकुर्वीतगायत्रीवाघमर्षणी। यथोक्तेः न्दापिततरोसुमाज्ञ त्रिर्दंडवन्नतः। यथोक्तेः प्राणायामादि
भिः न्दापितः हुम्बः पूर्वीवस्थामतिक्रान्तो विगतपापद्वतिया वत्। अन्यं इपि स्नानविधया बहवः सतितेषां थागोरवत्तयान्ने
दप्रदर्शिता॥ एतत्त्व स्नानं सर्वसाधारणं विशेषस्तु स्व स्व शाखाभ्यो विज्ञेयः॥ अत्र रापवादः। जातो लोमत्रयादर्शपानै
दास्तु गुमघासुवा। पिंडदाने मृदा स्नानं न कुर्यात्तिलतर्पणमिति पिंडदानेकाम्येन नित्ये। योगयाज्ञवल्क्यः॥ मृदा स्नानं न
कुर्वीत रात्रौ सेध्या गृहस्थुवा। विधिज्ञ स्नानकाले उत यालोमार्कवारायाः तिलतर्पणस्य प्रतिप्रसवतर्पणप्रकरणे।
कथ्यातसंक्षेप स्नानविधिमाह॥ योगयाज्ञवल्क्यः॥ एष विस्तरतः प्रोक्तः स्नानस्य विधिरुत्तमः। असामर्थ्यान्न कुर्याच्चेत्त
त्रायं विधिरुच्यते। स्नानमेतज्जले चैव मार्जनाचमनं तथा। जलाभिमन्त्रणे चैव तीर्थस्य परिकल्पनं। अघमर्षणसूक्तेन
त्रिरावृत्तेन सर्वशः स्नानाचरणमित्यत्र तदुपदिष्टस्वयंत्तु वा। जाबालिः॥ प्रवाहाभिमुखो मज्जेद्यत्राप प्रवहंति वा स्त्री ९४
वारत्तु च सावित्र्या। ध्यात्वाभिमुखरूपा। विष्णुपुराणे॥ कूपच्छृष्टहृतातायनस्नानं कुर्वीत वा तु तिः। स्नायीताहृततोये

न यदि वा तु दर्शीजरावा॥ मनुः॥ न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि। न वासोभिः सहाजस्रं नाविज्ञाते जलाशये
ष्ठ्यासः॥ अनुत्सृष्टेषु न स्नायात् ज्ञयेचासंस्कृते पुवा। असंस्कृतमप्रतिष्ठितं अनुत्सृष्टमदत्तं परकीयमिति यावत्। जा
बालिः॥ न पारक्यं सदा स्नायान्नैतुक्त्वा न महानिशि। नार्द्रमेकं च वसनं परिदध्यात् कथंचन। दवलः॥ राहुदर्शनसंक्रांतौ
विवाहात्ययवृद्धिषु। स्नानदानादिकं कुर्यान्निशि काम्यव्रतेषु वा। ब्रह्माजः। विद्यमाने न सूर्यांशसंसृष्टहीनत्तु यज
ले। तस्मु वर्म्यादकं तत्त्वा स्नायाच्छा च्छजलौ तिकि। पराशरः॥ आपोराग्नेण गृह्णीयात्स्व विष्टावरूणालयी। आवश्यकथ
मीत्रणक्षात्मा धासूई इति स्वयं। धाम्नो धाम्नई इतिमैत्रणस्य यमेव गृह्णीयादित्यर्थः। योगयाज्ञवल्क्यः। दर्शे स्नानं न कुर्वीत
मातापित्रोस्तु जीवतोः पुत्रं कुर्वन्निराचष्टे पित्रास्ते निजीविता। मातापित्रा रिति साहित्यं विवक्षितं। त्रयोदश्यां तृतीयायां
दशम्यां च विशेषतः। शूद्रवित्छत्रियाः स्नानं नाचरेयुः कथंचन। एवं नित्यनैमित्तिकादिस्नानव्यतिरिक्तविषयं। अत एव जा
रद्वाजः। नो गार्थं क्रियते यत्तु स्नानं यादृच्छिकं नरैः। तन्निषिद्धतृतीयादौ नित्यनैमित्तिकं नतु। पैठीनसिः। नित्यं न हा
पायस्नानं काम्यं नैमित्तिकं चयत्। दशम्यादिषु कर्तव्यं नतु यादृच्छिकं क्वचित्। यादृच्छिकं लक्षणं गर्गेनाक्तं। न य
ती वा न कुर्यान्द्राशास्त्रयंत्रणया विना। मलव्यापादनफलं स्नानं यादृच्छिकं तु तत्। पैठीनसिः। पुत्रजन्मनि संक्रांतौ श्रा

।द्विजन्मदिनं तथा॥ नित्यस्नानं च कर्त्तव्यं तिथिदोषान्न विद्यत इति मार्कंडेयपुराणे॥ मातरं पितरं जायां भ्रातरं सुहृ
दं गुरुं। यमुद्दिश्य निमज्जेत अष्टभागं लभेत सः॥ नार्द्रैकैकवस्त्रेण स्नायात्कौपीनकादृता। नान्यदीयेन नार्द्रेण नष्ट
चाप्रथितेन वा। स्नात्वैवं त्वार्द्रवासास्तु विष्णुस्त्रैकरूतं यदि। प्राणायामत्रयं कृत्वा पुनः स्नानेन शुध्यति॥ मनुः। स्नात
स्य वह्नितप्तेन तथैव परवारिणा। शरीरशुद्धिर्विज्ञेया न तु स्नानफलं लभेत्॥ यत्तु षट्त्रिंशन्मते। आपः स्वभावतो मेध्याः
किं पुनर्वह्निसंयुताः। तेन संतः प्रशंसंति स्नानमुष्णेन वारिणा॥ इति तदातुरविषयं। अनातुरस्यापि नद्याद्यसंभवे उष्णोद
कस्नानमविरुद्धमित्याह यमः॥ नित्ये नैमित्तिके चैव क्रियांगे मलकर्षणे। तीर्थाभावे तु कर्त्तव्यमुष्णोदकपरोदकैः॥ अत्र
मलापकर्षणस्नानं तीर्थे कर्त्तव्यमिति। न विधीयते॥ अपि तु प्रायश उष्णोदकसाध्यत्वादुष्णोदकप्रकरणे परिगणितं॥
उष्णोदकस्नानं कर्त्तव्यं व्यासः॥ सीतास्वप्सु निषिच्याथ मंत्रसंस्कारमेव ताः॥ गृहेपि शस्यते स्नानं तद्धीनमफलं त्व
तां संतारामृदादयः॥ अथ नद्यः स्नानगतास्तासां प्राधान्ययोः प्रथमा गंगा। प्रद्योतिताश्च कनापित यातीर्थादि निर्दिष्टाः।त
यो॥ प्रत्याद्यान्नादिक स्नाने वर्ज्ये नद्यौ द्विजातिभिः। तस्यां रजकती ये तु दशाहं स्नानं वर्जयेत्। प्रतिस्रोतास्तु ज्योत्यागार १५
थ्यो जलनिवेशनी। गंगेत्यां न प्रदुष्यति सा हि धर्मद्रवः स्वयं। देवलः॥ नद्यो नदस्यायां मध्ये सर्वा नद्यो रजस्वलाः। ता

×कुर्वीत वर्जयित्वा समुद्रगाः कात्यायनः नद्यो नदस्यायोर्मध्ये सर्वा नद्यो रजस्वलाः स्नानुस्नानेन

स्नानं न कुर्वीतांबु विधिविवर्जिते पि। एवं श्रावणभाद्रपदयोर्मध्ये सर्वासु नदीषु स्नाननिषेधे प्रसक्ते कश्चिद्विशेषो नि
हितास्त विष्णुपुराणे॥ आदौ कर्कटकादिविमहान्नद्यो रजस्वलाः॥ त्रिदिने तु चतुर्थेऽह्नि शुद्धास्तु जाह्नवी यथेति॥ महानद्य
श्च ब्रह्मपुराणे॥ दर्शिताः॥ गोदावरी भीमरथी तुंगभद्रा च वेणिका॥ तापी पयोष्णी विंध्यस्य दक्षिणे तु प्रकीर्तिताः॥ भागी
रथी नर्मदा च यमुना च सरस्वती॥ विशोका च वितस्ता च विंध्यस्योत्तरतः स्थिताः॥ द्वादशैता महानद्यो देवर्षिक्षेत्रसंभवाः
इति॥ एवं गंगादिष्वपि प्रसक्तावपवादमाह॥ देवलः॥ गंगा च यमुना चैव प्लक्षजाता सरस्वती॥ कुरुक्षेत्रया सरस्वती सा
प्लक्षजाता रजसा नाभिभूयंते। ये चान्ये नदसंज्ञकाः॥ शोणसिंधुहिरण्याख्याः कोकालोहितघर्घराः॥ शतद्रूश्च नदाः
सप्त पावना ब्राह्मणाः स्मृताः॥ निगमः॥ गंगा च नर्मदा चैव पुण्या यमुना च सरस्वती। अंतर्गतरजोदोषाः सर्वावस्थासु चामलाः॥
एवं चन्द्रगंगा रजस्वलेत्यादि। गंगा यमुना सरस्वती नीरजोदोषप्रापका। णियानि तान्यपि अंतर्गतरजोविषयाणि
ज्ञातानादोषः तथा॥ कर्कटादौ रजो दुष्टा गोमती वासरत्रयं। चंद्रभागा सरस्वती सिंधुः सरयूर्नर्मदा तथा॥ यामुनदीषु
रजोदोषस्तितास्वपि तत्तीरवासिनी नादोषः। न पापनिगमः॥ ननु तत्तीरवासिनामिति। अत्र विशेषमाह व्याघ्रपा
दः॥ अजा चक्रूपवापानीमनपायिपायात्म्रती॥ रजो दुष्टेपि पयसि ग्रामोगान दुष्यतरति॥ वसिष्ठः॥ उपाकर्मणि

त्वोसर्ग्रेप्रेतस्नानंतथैवश्चचंद्रसूर्यग्रहेविवसजोदाषानविद्यात॥योगयाज्ञवल्क्यः॥नस्नायाद्दुत्सवतीतमौगल्ले
विनिवर्तयेत॥अनुव्रज्यसुहृद्वंधूनर्चयित्वेष्टदेवताः॥प्रसंगात्प्रत्यग्रदृष्टेप्रतिकश्चनविशेषःकथ्यते॥तत्रस्मृति
संग्रहे॥कालेनवमस्तुदकंप्रत्यग्रमस्तुविज्ञहे॥अकालेतुदशाहंतुपीत्वानाद्यादहर्निशमिति॥कालवर्षकाल
अकालेतद्विपरीतं॥अत्रापिविशेषमाहनविद्योत्तरे॥महानदीषुसर्वासुत्र्यहंतिष्ठेत्तुरागतं॥नवोदुमिश्रितंतन
तद्दृष्टमितिसूरयइति॥उक्तंनित्यस्नानं॥छ॥अथनैमित्तिकानि॥याज्ञवल्क्यः॥उदक्याशुचिभिःस्नायात्संस्पृष्टस्तैरुप
स्पृशेत्॥अब्लिंगानिजपेच्चैवगायत्रींमनसासकृत्॥उदक्यारजस्वला॥अशुचयःशवपतितचंडालसूतिकाशवावहो
चिनः॥एतैःस्पृष्टःस्नायात्॥तैरुदक्यादिस्पृष्टैरुपस्पृष्टआचामेत्॥आचम्यचाब्लिंगानिआपोहिष्ठेत्यवमादीनित्रीणि
सूक्तानि।वाक्यानिवाजपेत्॥त्रिष्टेवप्रकृववनस्यकपिंजलाधिकरणन्यायेनत्रित्वपर्यवसानात्।सूक्तवाक्ययोर्देशकालानुसा
रेणव्यवस्थातेतोगायत्रींमनसासकृज्जपेत्॥पराशरः॥दुःस्वप्नेमैथुनेवांतेविरिक्तेक्षुरकर्मणि॥चितिधूपश्मशानास्थ्नां
स्पर्शनेस्नानमाचरेत्॥मैथुनरतिरूतुकालेअनृतुकालेबृहस्पतिनाशौचमात्रविधानात्॥अन्तोऽयंहास्वरूपोऽतएव॥मूत्र
त्रपुरीषवदिति।सर्वेत्र्यहेसुविकालविशेषस्नानमेव॥तथाचस्मृतिः॥अष्टम्यांचचतुर्दश्यांदिवापर्वणिमैथुने॥त्वचाशवेल
७६

स्नात्वावारुणीभिस्सुमार्जीयदिति॥अष्टमीचचतुर्दशीपर्वसुरात्रावपिअन्यत्रदिवा॥अत्रचगोबलीवर्दन्यायेनाष्टमीचतु
र्दश्यतिरिक्तामावास्यादिषुपर्वशब्दोवर्तते॥अजीर्णादिषुस्नानमात्रमेवनसचेलस्नानंयथाहयमः॥अजीर्णेभ्यु
दितेवांतेश्मश्रुकर्मणिमैथुने॥दुःस्वप्नेदुर्जनस्पर्शेस्नानमात्रंविधीयतइति॥अजीर्णेस्नानंतदुपशमेसतिअभ्यु
दितइतिनिद्रायांक्रियमाणायांरवावभ्युदितेतथैवास्नमितिचएतत्सर्वमकामतस्पर्शविदितव्यं॥शवस्पर्शेदि
वाकीर्तिंचितियूपरजस्वलां॥स्पृष्ट्वाचकामतोविप्रःस्नानंकृत्वाविशुध्यतीति॥बृहस्पतिनाकामतइत्युपादानात्॥
कामतस्तुचयनंसंदृष्टव्यं॥यानैश्चपार्श्वेप्रेतधूमेदवहव्योपजीविनोग्रामयाजकसोमविक्रयिणोयूपचितिचि
तिकाष्ठंमद्यंमद्यपोऽशस्त्रंमानुषास्थिशवस्पृशीरजस्वलामहापातकिनस्सर्वस्पृष्ट्वासचेलमंभोवगाह्योत्तीर्या
ग्निमुपस्पृश्यगायत्र्यष्टशतंजपेद्घृतंप्राश्यपुनःस्नात्वात्रिराचामेदिति॥कश्यपः॥कश्यपः॥उदक्यामाशौचंदिवाकीर्त्य
दानकर्मणिक्रोशानन्विष्यारोहणेयूपस्यस्पर्शनेचसचेलस्नात्वापुनर्मनइतिजपेन्महाव्याहृतिभिःसप्तारण्या
हुतीर्जुहुयादिति॥तथा॥स्पृष्ट्वादेवलकंचैवसवासाजलमाविशेत्॥देवार्चनपरोविप्रोवित्तार्थीवत्सरत्रयं॥आसौ
देवलकोनामहव्यकव्यसुगर्हितः॥बृहद्धारीते॥शैवान्पाशुपतान्स्पृष्ट्वालोकायतिकनास्तिकान्॥विकर्मस्थान्

न्हिजान् शूद्रान्सवासाजलमाविशात्॥ अधिकारश्चविद्यमानयोर्देवाःपाशुपतावानवंतितत्स्पर्शनिस्नानमित्यवगंत
व्यं॥ अन्यथा तत्रद्वीक्षाविधायकपुराणवचनविरोधात्॥ अथवा श्रोत्रियादीनीसादृश्यवदननिषेधोयथावा
चनिकः श्रोत्रियादिष्वपि दोषाभावपि तथा दोषाभावपि वाचनिकस्पर्शनिषेधः। विकर्मस्थानिचेतद्विजोनित्यानानेव
सींबधातनशूद्रानित्याननञ्श्रुत्यर्थाद्यापत्तिः सास्पा शूद्रसंस्पर्शदूषितनिशूद्रमात्रस्पर्शनिनास्तव्यञ्चिप्रतिपाद
नसामर्थ्यात्। व्याघ्रपादः चैंडालेपि तितं विवह्नरनःपरिवर्जीयत्॥ गोवालव्यजनाद्वीकुसवासाजलमाविशेत्॥ ए
तद्यातिसीकोर्मस्थानविषयं। असीकासेतिवृद्धस्पयत्तौ। युगीवद्विधयुगीविवत्रियुगीवचतुर्युगीं। चंडालसूतिकादक्यापतिन
नामधःक्रमात्॥ इति। अधःक्रमात् प्रतिलोमक्रमात्। चतुर्युगं चंडालत्रियुगं सूतिकायामिद्यवपिवानसिः। अनुदक
मूत्रकरणस विलेस्नाने व्याहृति होमश्च। एतच्चशौचमन्तरा चिरकालस्थितो वदितव्यो। अंगिरः। नासवायसमार्जा
खराष्ट्रश्वानसूकरान् अमध्यानि च संस्पृश्य सवासा जलमाविशेत्। मार्जारस्य तु स्नानमुच्छिष्टसमायकर्मकाले च।
मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिरिति स्मरणात्। श्वस्पर्शनात् रूर्द्ध्वं स्नानं। नाभेरूर्ध्वं करौ मुक्त्वा यदङ्गमुप
हन्यात् तत्र स्नानमधस्तात्तु प्रक्षाल्याचम्य शुध्यतीत्यंगिरःस्मरणात्। अस्पृश्यपहस्यादिजानुककर्पा॥ जङ्घानाभिः

करौ मुक्त्वा यदंगसीस्पर्शात् खगाः स्नानं तत्र प्रकुर्वीत शेषं प्रक्षाल्य शुध्यतीति। अमेध्यस्पर्शे तु शौचप्रकरणे विशे
षादर्शितः। प्रवीमवा। शंखः॥ रथ्याकर्दमतोयेन ष्ठीवनाद्येन वा तथा। नाभेरूर्ध्वं नरः स्पृष्टः सद्यः स्नानेन शुध्यति॥ य
मः। सकर्दमं तु वर्षासु प्रविश्य ग्राममध्यतः। जंघयोर्मृत्तिकास्तिस्रः पादयोर्द्विगुणास्ततः। ग्राममशाललप्रवादाद्त्राया
मसीकरः। तेसकर्दमं प्रविश्य मनुः॥ नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुध्यति। आचम्यैव तु निःस्नेहं गां स्पृष्ट्वा वीक्ष्य
वा रविं। एतच्च द्विजात्यस्थिविषयं। अन्यत्र तु मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमाशौचं अस्निग्धे त्वहोरात्रमिति वसिष्ठोक्तं।
अमानुषं तस्थनि विरुक्तं। तद्यपकज्र्यपिंचनरवंशावेनदस्थिसस्नेहं स्पृष्ट्वा स्नानतः सर्वविश्रेस्वयं प्रक्षालितं विज्ञयादिति। अ
न्यथैवं विधाः स्नानादौ स्पृश्यंतरात्तावगंतव्याः। यथागोरवरयान्त्रहलिखिताः। उदक्यादिभिः स्पृष्टानां मनुष्याणां स्ना
नं। आचमनं तैपी[illegible]दीनां प्रक्षालनं। तत्रोदक्यादिस्पृष्टेन तस्पर्शवता माचमनं। उदक्यास्त्र विनिस्नाया इति स्पृष्ट
तिरूपस्पर्शादितियाज्ञवल्क्यस्मरणात्। उदक्यास्पृष्टाव तत्तस्पर्शवद्वितीयस्यापि स्नानमेव। तथा
च मनुः॥ दिवाकीर्तिमुदक्यां च पतितं सूतिकां तथा। शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति। स्नानाही चेतन
स्पर्शेपि द्वितीयस्य क्वचित्स्नानापवादमाह सीग्रहकारः॥ कटधूम्रस्पृशी वीर्ते विरक्तो दुर कर्माणि। मैथुनाचरि

Dr. BHAU DAJI MEMORIAL डाक्तर भाऊदाजीइत्यस्य स्मारकम्
Dr. BHAU DAJI MEMORIAL डाक्तर भाऊदाजीइत्यस्य स्मारकम्

तारेवस्पृष्ट्वाप्यस्नानेन विद्यात इति। एतदुपलक्षणं॥ शातातपस्तु स्नानमात्रमेव प्राप्तेन सचैलं तत्स्पर्शे द्वितीयस्याचमनमेवेति
सिद्धं। तृतीयस्याचमनं। तथाह संवर्त्तः॥ तत्स्पृष्टिनस्पृष्टाद्यस्तु स्नानेनस्याविधीयते। अर्द्धमाचमनं प्रोक्तं द्रव्याणि प्रोक्ष
णं तथेति। एतच्चाकामकारविषयं। कामकृते तु तृतीयस्यापि स्नानमेव। पतितचंडालसूतिकोदक्याशवस्पृष्टिनस्पृ
ष्टेषूपस्पर्शनं सचैलमुदक्याप्रस्पर्शनाच्छुध्येदिति गौतमस्मरणात्। चतुर्थस्याचमनं। यथाह देवलः। उपस्पृश्य पाशुवि
स्पृष्टं तृतीयं वापि मानवः। हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुध्यति। यत्तु कूर्मपुराणे॥ तत्स्पृष्टस्पृष्टिनं स्पृष्ट्वा
बुद्धिपूर्वं द्विजोत्तमाः। आचामेत्तस्य शुध्यर्थं प्राह देवः पितामह इति। तद्दुर्बलत्वेन स्नानाशक्तृतीयविषयं। अन्य
था गौतमादिवचनविरोधात्। अथवा वत्तनपीगादिस्पर्शविषयं। एवं सर्वत्र विषयविवेको वगंतव्यः॥ स्वयमशुचि
ना उदक्यादिस्पर्शे जाते देवलः। अशुचिः स्वयमप्येतानशुचिस्तु यदि स्पृशेत्। विशुध्यत्युपवासेन तथा कृच्छ्रेण वा
पुनः। कृच्छ्रस्य पाकादिविषयः॥ उपवासश्चादिविषयः॥ आतुरस्नाने प्रतिप्रसवो राको विशेषः। आतुरे स्नान मुत्पन्ने
दशकृत्वो ह्यनातुरः। स्नात्वा स्नात्वा स्पृशेदेनं ततः शुध्येत्स आतुरः। स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला। पात्रांते
रिता तोयेन स्नात्वा व्रतं चरेत्। सिक्तगात्रा भवेदद्भिः सांगोपांगा कथंचन। न वस्त्रपीडनं कुर्यान्नान्यद्वासश्च धारये ७८

त्॥ उशनाः॥ ज्वराभिभूता या नारी रजसा च परिप्लुता। कथं तस्या भवेच्छौचं शुद्धिः स्यात्केन कर्मणा। चतुर्थेहनि संप्राप्ते स्पृशे
दन्या तु तां स्त्रियं। सा सचैलावगाह्यापः स्नात्वा स्नात्वा पुनः स्पृशेत्। दशद्वादशकृत्वो वा आचामेच्च पुनः पुनः। अंते च वास
सां त्यागस्ततः शुद्धा भवेत्तु सा। दद्याच्छक्त्या ततो दानं पुण्याहेन विशुध्यति। सूतिकामरणे रजस्वलामरणे च पूर्ववस्त्रा
नि कारयित्वा पंचगव्येन स्नापयेत्। तथा च संग्रहकारः। सूतिकायां मृतायां तु कथं कुर्वंति याज्ञिकाः। कुंभे सलिलमादा
य पंचगव्यं तथैव च। पुण्यैर्मंत्रैरभिमंत्र्यापो वाचा शुद्धिं लभंत ततः। तेनैव स्नापयित्वा तु दाहं कुर्याद्यथाविधि। पंचभिः
स्नापयित्वा तु गव्यैः प्रेतां रजस्वलां। वस्त्रांतरावृतां कृत्वा दाहयेद्विधिपूर्वकमिति। वृद्धशातातपस्तु रजस्वलायाः प्रेतायाः
संस्कारादीनि नाचरेत्। ऊर्ध्वं त्रिरात्रात्स्नातायाः शवधर्मेण दाहयेदिति त्रिरात्रानंतरं दाहादिसंस्कारमाह। अत्र देश
कालानुसाराद्व्यवस्था विज्ञेया। शातातपः। ग्रामे तु यत्र संस्पृष्टिर्यात्रायां कलहादिषु। ग्रामसंदूषणे चैव स्पृष्टिदोषो
न विद्यते। ग्रामे रजमार्गादौ। षट्त्रिंशन्मते। देवयात्राविवाहेषु यज्ञेषु प्रकृतेषु च। उत्सवेषु स्पृष्टास्पृष्टिर्न विद्यते।
बृहस्पतिः। तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे। नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यति। एतच्च यत्राहम
नेन स्पृष्ट इति प्रत्यभिज्ञानं नास्ति तद्विषयं। एतन्मात्रापवादे पि वचनानी चरितार्थत्वात्॥ शातातपः। रात्रौ स्नानं न कु

वीतस्नानं दानं च रात्रिषु। नैमित्तिकं च कुर्वीत स्नानं दानं च रात्रिषु। एतन्मध्यमयामद्वयाभिप्रायं। तथा च पराशरः। महानि
शास्तु विज्ञेया मध्यस्थप्रहरद्वयं। प्रदोषपश्चिमौ यामौ दिनवत्स्नानमाचरेत्। एतद् दृष्टादृष्टविषयी। ततः स एवाह। दिवाक
रकरैः पूतं दिवास्नानं प्रशस्यते। अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात्। राहुदर्शनादि निषु त्रजन्मादिप्रदर्शना
र्थी तथा च पराशरः। पुत्रजन्मनि यज्ञे च तथा संक्रमणे रवेः। राहोश्च दर्शने स्नानं प्रशस्तं नान्यथा निशि। इति नैमि
त्तिकस्नानानि॥छ॥ अथ काम्यस्नानानि। तत्र पुष्यस्नानं पुष्ये तु जन्मनक्षत्रे व्यतीपाते च वैधृतौ। अमायां च नदीस्नानं
पुनात्यासप्तमं कुलं। चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवसंनिधौ। न प्रेतत्वमवाप्नोति गंगायां तु विशेषतः। भविष्यपुरा
णे। शिवलिंगसमीपस्थं यत्तोयं पुरतः स्थितं। शिवगंगेति तत्प्रोक्तं तत्र स्नात्वा शिवं व्रजेत्। यमः॥ कार्तिक्यां पुष्करे स्नातः स
र्वपापैः प्रमुच्यते। माघ्यां स्नातः प्रयागे तु मुच्यते सर्वकिल्बिषैः। पाद्मे॥ कार्तिके नवमी शुक्ला पितॄणां सुखदा च सा। त
स्यां स्नानं हुतं दत्तमनंतफलदं नावहं। विष्णुः। सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी। अरुणोदयवेलायां तस्यां स्ना
नं महाफलं। पुनर्वसौ बुधोपेता चैत्रमासे सिताष्टमी। स्नातस्तु विधिवत्स्नात्वा वाजपेयफलं लभेत्। तथा कार्तिकं ७९
सकलं मासं नित्यस्नायी जितेंद्रियः। जपन्हविष्यभुक् शांतः सर्वपापैः प्रमुच्यते। तुलामकरमेषेषु प्रातःस्नायी सदा भवे

मु॰२

त्। हविष्यं ब्रह्मचर्यं च महापातकनाशनं॥ यमः॥ यदिच्छेद्विपुलान्भोगांश्चंद्रसूर्यग्रहोपमान्। प्रातःस्नायी भवेन्नित्यं
मासौ द्वौ माघफाल्गुनौ। मत्स्यपुराणे। आषाढ्यादिचतुर्मासेषु प्रातःस्नायी भवेन्नरः। विप्रेभ्यो भोजनं दत्वा कार्तिक्यां गो
प्रदानवत्। स वैष्णवं पदं याति विष्णुव्रतमिदं स्मृतं। मार्कंडेयः। गवां कोटिसहस्रस्य सम्यग्दत्तस्य यत्फलं। तत्फलं जा
ह्नवीस्नाने राहुग्रस्ते दिवाकरे॥ वृद्धवसिष्ठः। रविसंक्रमणे पुण्ये न स्नायाद्यदि मानवः। सप्तजन्मनि रोगी स्याद् दुःखभागी सदा
भवेत्। मार्कंडेयः। षष्ठ्यामामलकैर्विष्णुरेकादश्यां विशेषतः। श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः। सप्तमीं नवमीं
चैव पर्वकालं च वर्जयेत्। गर्गः। कुर्यान्नैमित्तिकं स्नानं शीताद्भिः काम्यमेव च। नित्यं याद्दृच्छिकं चैव यथारुचि समाचरे
त्। ब्रह्मांडपुराणे। नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते। तर्पणं तु भवेत्तस्य अंगत्वेन प्रकीर्तितं। अंगतर्पणं तु देवी
स्नपयामीत्यादिकं याज्ञवेदिकं। इति काम्यस्नानानि॥छ॥ अथ माघस्नानविधिः॥ नारदीयपुराणे॥ संप्राप्ते तु माघमासे तु
तपस्विजनवल्लभे। कोटीति सर्वतीर्थो वारीणि समुज्झंति भास्करे। पुनाति सर्वपापानि त्रिविधानि न संशयः। तडागकूपवा
स्नायात् ~~कौं~~ नीउ श्रित तथा। माघमासे वरारोहे हस्ती वे निम्नगाजलं। नीउ श्रित तद्दु विशेषः। सरित्तोयं महाबलं नवजं
नस्थितं तथा। वायुनाताडितं रात्रौ गंगास्नानसमं स्मृतं। अधिकवेगयुक्तायाः सरितश्चानीतातायमित्यर्थः। स्नातावह्निं न सेवे

त्रकौपे २

तत्रस्नाता वा कथंचनासेवेत पितृहा मार्थं नशीनार्थं कथंचन। विष्णुः॥ दर्शं वा पौर्णमासीं वा प्रारभ्य स्नानमाचरेत्। उत्पा
न्यद्दानि त्रिंशत्तु मकरस्थे दिवाकरे। तत्र त्वाष्ठाय नियमं गृह्णीयाद्विधिसर्वकं। माघमासमिमं पूर्णं स्नास्येहं देवमाधव। ता
यस्यास्य जलं निर्ययमिति संकल्प्यासनसि। ततः स्नात्वा शुभजलं तीर्थे द्विजा शिरसि वै मृदं। तदोक्तविधिना राजन् सूर्यस्यार्घ्यं
निवेदयेत्। पितृणां तर्पयित्वा तु उत्तीर्यतीरतो जलात्॥ काष्ठमौनान्नमस्कृत्य पूजयेत्पुरुषोत्तमं। शंखचक्रधरं देवं मा
धवं नाम पूजयेत्। वह्नौ हुत्वा विधानेन ततस्त्वेकाशी मौनवेत्(?)। भूशायी ब्रह्मचारी चाशक्तः स्नानं समाचरेत्॥ अशक्तस्या
धनाद्यस्य स्वेच्छा सर्वत्र कथ्यते। अवश्यमेव कर्तव्यं माघस्नानमिति श्रुतिः। तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी॥
तिलदस्तिलभोक्ता च षट्तिली नावसीदति। तिलमामलकाद्यैर्वा तीर्थे देयास्तु नित्यशः। तथा प्रज्वालयेद्वह्निं सेवनार्थं द्विज
न्मनी। एवं स्नानावसाने तु भोज्यं दद्यं नवारितं। भोजयेद्द्विजदंपत्यौ भूषयेद्वस्त्रभूषणैः। कंबलाजिनरत्नानि वासांसि विविधा
नि च। तूलिकानिचोलानि प्रच्छादनपटी तथा। उपानहौ तथा गुप्तमाचकोपापमोचकौ। अनेन विधिना दद्यान्माधवः प्रीय
तामिति। अत्र समापनमंत्रः॥ सवितः प्रसवितैव परं धाम जले मम। त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा। दिवाकर जगन्ना
थ प्रभाकर नमोस्तु ते। परिपूर्णं कुरुष्वेदं माघस्नानं तवाज्ञया। अहन्यहनि दातव्यास्तिलाः सशर्करयान्विताः। माघावसाने सुभगे ष ८०

ड्रसं स्नाजनी तथा। सूर्योऽमिप्रायतां देवो विष्णुमूर्तिर्निरंजनः। दंपत्योर्वाससी सूक्ष्मे सप्तधान्यसमन्विते। त्रिंशत्तु मोदका
देयाः सशर्करा तिलसंयुताः। नागत्रयं तिलानां तु उपवर्षशर्करीश्चाकः। अनभ्यंगी वराराहे सर्वमासं नयेद्व्रती। इति माघ
स्नानविधिः॥ ॥ तिर्यगस्नानलक्षणं प्राग्विहितं। तत्तु तत्रैव व्याख्यातं॥ ॥ अथ मलापकर्षणस्नानं। तत्र गार्ग्यः। पं
चमी नवमी चैव तृतीया च त्रयोदशी। एकादशी द्वितीया च पक्षयोरुभयोरपि। अभ्यंगस्य शिपानाघे येत्रिततैलं निषेव
तां चात्तिस्य नश्यंति आयुः प्रजा यशो बलं॥ तथा पंचदश्यां चतुर्दश्यां अष्टम्यां रविसंक्रमे। द्वादश्यां सप्तमी षष्ठ्यां तै
लस्पर्शं विवर्जयेत्। गार्ग्यः। त्रयोदश्यां तृतीयायां प्रतिपद्दशमीद्वये। तैलाभ्यंगं न कुर्वीत स्पृशेद्दानवमीं विना। मोहात्स्न तिप
देषु षष्ठ्यां ऊर्ध्वं रिक्तां तिथिं तथा। तैलेनाभ्यंजयेद्यस्तु चतुर्भिः परिहीयते। व्यासः॥ आदित्यादिषु वारेषु तापः कांतिर्मृतिर्धनं
दारिद्र्यं दुर्भगत्वं च कामोऽपि लभते क्रमात्। गार्ग्यः॥ मौसाशानपंचदशी तैलाभ्यंग चतुर्दशी। अष्टमीयाम्यधर्मे च हृतं तमवि
पातयेत्। षष्ठ्यष्टमी च मावास्या उभे पक्षे चतुर्दशी। अत्रसीनिहितं पापं तैले मांसे तरेन ग। अत्र प्रतिप्रसवमाहरत्
नाः। सार्षपं गंधतैलं च यत्तैलं पुष्पवासितं। अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन। तैलाभ्यंगनिषेधे तु तैलानेभ्यो निषे
धात्। अभ्यंगस्य निषेधस्तु सार्षपादरपी स्यात्। स्नेहाभ्यंगान वद्येव सस्नेहः सार्षपादिकः। नत्रोजनाय तैलस्य निषेधो

न्यंग एवसः॥ तैलं त्वाहृ त्रिलस्नेहे सुहृदो नियोगिकः॥ अत। तिल विकारैरपि पिण्याक तिलमोदके। शष्कुलीन्न शराद्ये न निषेधो
निवर्त्तयात॥ मनुः॥ शिरःस्नातस्तु तैलेन नांगं किंचिदुपस्पृशेत्॥ अस्यार्थः॥ तैलेन शिरःस्नातः सन् तस्यैवांगमन्यदपि तैलेन संस्पृ
शेत्॥ न प्राक्कलायदिति। एतच्च तस्मिन् दिवस एव न रात्राविति शिष्टाचाराद् ज्ञेयं। निषिद्ध दिनादिष्वपि मंगल्यादिष्वा न
वाद्येवा। तथा च कात्यायनः॥ मंगले विहितस्नाने वृद्धिसावित्रिसात्वथ। स्वहमात्रसमायुक्तं मध्याह्नात्प्राग्विशिष्यते॥ निषि
द्धतिथिष्वपि श्रुत्वा रयोगात् तैलस्नानं कार्यमिति थापत्यावारस्य प्राबल्यात्॥ तदुक्तं ब्रह्मसिद्धौ तिथिरेकगुणा प्रोक्ता
नक्षत्रं च चतुर्गुणं। करणं षड्गुणं चैव वारस्त्वष्टगुणः स्मृत इति। तैलस्नाने सदा शस्तु एवं कुर्यादामलकैः श्रियै। सप्तमीन
वमीदशरि विसंक्रमणादृते। व्यासः॥ तथा दशैवसप्तमीसंक्रान्तौ तोषरवदिनी। वेदस्तृप्ति परागवस्त्रान मामलकैस्त्यजेत्।
षड्विंशन्मता। सर्वकालं तिलैः स्नायादिति व्यासो ब्रवीन्मुनिः। शिरःस्नाने तु दृष्टं च मजेत् दक्षु यथाविधि॥ ८॥ अथ क्रिया स्नानं।
तत्र शंखः॥ क्रियास्नानं प्रवक्ष्यामि यथावद्विधिपूर्वकं। मृद्भिरद्भिश्च कर्तव्यं शौचमादौ यथाविधि॥ जले निमग्न उन्मज्ज्य उ
पस्पृश्य यथाविधि। तीर्थस्यावाहनं कुर्यात्तत्प्रवक्ष्याम्यतः परं। प्रपद्ये वरुणं देवमंभसां पतिमूर्जितं। याचितं देहि मे तीर्थं सर्व
पापापनुत्तये। सान्निध्यमस्मिंस्तोये तु स्नायतो मे ददातु प्रदात्॥ रुद्रान्प्रपद्ये वरदान्सर्वानप्सुषदस्त्वहं। सर्वानप्सुषदश्चैव प ८१

द्ये प्रणतः स्थितः॥ देवमप्सुषदं वह्निं प्रपद्ये घनिसूदनं। आपः पुण्याः पवित्राश्च प्रपद्ये शरणं तथा। रुद्राश्चाग्निश्च सर्वाश्च वरुण
श्चाप एव च। शमयंत्वाशु मे पापं रक्षंतु च सदा मम॥ इत्येवमुक्त्वा कर्तव्यं ततः संमार्जनं कुशैः। आपो हि ष्ठेति तिसृभिर्यथा
वदनुपूर्वशः॥ हिरण्यवर्णा इति च तिसृभिस्त्रिरनुसृत्य यथा। शन्नो देवीरिति तथा शन्न आपस्तथैव च। इदमापः प्रवहताद्य वैश्व
र्वमुदीरयेत्॥ एवं संमार्जनं कृत्वा छंदआर्षं च दैवतं। अघमर्षणसूक्तस्य संस्मरन् प्रयतः सदा। ततोंऽभसि निमग्नस्त्रिः पठे
दघमर्षणं। प्रदद्यान्मूर्ध्नि तथा महाव्याहृतिभिर्जलमिति॥ इति क्रियास्नानं॥ ॥ अथ गौणस्नानानि। तत्र जाबालिः॥
असामर्थ्याच्छरीरस्य कालदेशाद्यपेक्षया। मंत्रस्नानादिकाः सप्त केचिदिच्छंति सूरयः॥ योगयाज्ञवल्क्यः॥ मांत्रं भौमं तथाग्नेयं
वायव्यं दिव्यमेव च। वारुणं मानसं चैव सप्त स्नानान्यनुक्रमात्। आपो हि ष्ठादिभिर्मान्त्रं मृदालंभं तु पार्थिवं। आग्नेयं भस्म
ना स्नानं वायव्यं गोरजः स्मृतं। यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते। वारुणं चावगाह्यं च मानसं विष्णुचिंतनं। कालदेशा
दसामर्थ्यात् सर्वं तुल्यफलं स्मृतं॥ कूर्मपुराणे॥ स्वेच्छस्य वारुणे स्नाने ब्राह्म्ये व्याधौ जलत्रये। दिव्यं श्रद्धावती पुण्ये वा यद्वा
मुपपायिनो। जाबालिः॥ अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणां। आर्द्रेण वाससा वापि मार्जनं दैहिकं विदुः। नाभेरधः प्रवि
श्य स्नुकटिं प्रक्षाल्य मृज्जलैः। आर्द्रेण कर्पटेनांगं कर्पिलं शोधनं स्मृतं। विद्वत्सरस्वती स्नानं प्राप्तसारस्वतं मतं। विद्यावाक्यं तपा

दं नं सारस्वतं स्नानमित्यर्थः। वृद्धप्रासंगिकं। संप्रति प्रकृतं प्रक्रम्यते। एवं स्नात्वा वस्त्रादिभिरंगं न प्रमृज्यात्। तथा च शा
तातपः॥ अप मृज्यान्न च स्नातो गात्राण्यंबरपाणिभिः। न चापि विधुनायात्केशान् वाससी न विधूनयेत्। तिस्रःकोट्योर्द्धकोटी
च या वद्रोमाणि मानवे। स्रवंति सर्वतीर्थानि तस्मान्न परिमार्जयेत्। देवलः॥ दिवाः पिबंति शिरसो मुखस्य पितरस्तथा।
वक्षसा पितृगंधर्वा अधस्तात्सर्वजंतवः। अनस्त्रेगा निशाटकावस्त्रेण पाणिना वा न मार्जयेत्। अमार्जयन्निति गोदोहमात्रं
तिष्ठेत्। एतच्च शिष्टाचारादवगम्यते। ततो वाससी परिधायोरू प्रक्षालयेत्। तथा च योगयाज्ञवल्क्यः॥ स्नात्वैवं वाससी धौ
ते अक्लिन्ने परिधाय च। प्रक्षाल्योरू मृदाद्भिश्च हस्तौ प्रक्षालयेत्तथा॥ छ॥ अथ वस्त्रविधिः॥ तत्र मनुः ब्राह्मणस्य सितं वस्त्रं
नृपते रक्तमुल्बणं। पीतं वैश्यस्य शूद्रस्य नीलं मलवदिष्यते। उल्बणं निबिडं। रक्तं धातुरक्तं। शातातपः॥ ईषद्धौतं नवं श्वे
तं सदृशं यन्न धारितं। अहतं तं विजानीयात्सर्वकर्मसु पावनं। ईषद्धौतं जलमात्रप्रक्षालितं। यंत्राद्युत्तार्य यदप्रक्षालितं तदप्य
हतं। यथाह सत्यतपाः। अहतं यंत्रनिर्मुक्तं शुक्लं वासः स्वयंभुवा। अस्तीतन्मांगलिकेषु तावत्कालेन सर्वदा। मांगलिक्ये विवा
हादि। प्रागग्रमुदगग्रं वा धौतं वस्त्रं प्रसारयेत्। पश्चिमाग्रं दक्षिणाग्रं पुनः प्रक्षालमाछुकि। अन्यादवन्नवेद्वासः शयनायन
राधिपः। अन्यद्रथ्यासु देवानामर्चायामन्यदेव हि। अन्यद्बालोकयात्रायामन्यदीश्वरदर्शने। बौधायनः। उत्तरं वासकर्त्तर्थे ८२

श्रा१

पि च स्यात् शुक्रकर्मसु। स्वाध्यायोत्सर्गदानेषु भुक्त्याचमनयोस्तथा। उत्सर्गो मूत्रादेः। स्वाध्यायादिग्रहणं विहितसकलकर्मो
पलक्षणार्थं। योगयाज्ञवल्क्यः॥ अस्नात वधौतवस्त्रस्य पट्टक्षौमाजिनानि वा। कुतपं योगपट्टं वा द्विर्वासा येन वा भवेत्
यज्ञोपवीतं द्विधार्यं श्रौतस्मार्त्तेषु कर्मणि। तृतीयमुत्तरीयं च वस्त्राभावे तदिष्यते। जातूकर्ण्यः। वस्त्रोत्तरीयाभावे द्व्यंगु
लं त्र्यंगुलं वा चतुरंगुलं वा सूत्रैर्वस्त्राकृतिपरिमंडलेन दुत्तरीयं कुर्वीत। वस्त्रस्य चीवरं वा उत्तरीयाभावे धौतवस्त्रस्योर्ध्व
भागेनोत्तरीयं कुर्यात्॥ तथा च पारास्करः॥ एकं चेद्वासो भवति तस्योत्तरवर्गेण प्रच्छादयीतेति। योगयाज्ञवल्क्यः॥ व्र
ताद्दते नार्द्रवासा नैकवासाः स्थलजापेत्। कषायेणाक्तवस्त्रं च मलिने केशदूषितं। छिन्नाग्रं वापवस्त्रं च सूत्राग्रथितमेव वा
वर्जयेदित्यर्थः। एतच्च सति विभवे॥ विष्णुपुराणे॥ होमदेवार्चनाद्यासु क्रियासु स्नानेनोज्जाने नैकवस्त्रः प्रवर्त्तेत द्विजवाच
निके जपे। जातूकर्ण्यः। परिधानाद्बहिः कक्षा निबद्धा ह्यासुरी मता। धर्म्मे कर्म्मणि विद्वद्भिर्वर्जनीया प्रयत्नतः। परिधापनस्य व
स्त्रमुत्तरीयं च मंत्रतः। आचामेच्च द्विजो वस्त्रं धौतं विपरिधाय च। तत्राहूर्वग्रहण एव मंत्रः। पारास्करेण दर्शितः। परिधास्यै यशो
धास्ये दीर्घायुत्वाय जरदष्टिरस्मि शतं च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्य इति। उत्तरीयेपि। यशसा मा द्यावा
पृथिवी यशसा मिंद्राबृहस्पती यशो भगश्च मा विदद्यशो मा प्रतिपद्यतामिति तथा वासः छत्रोपानहश्चाप्रवीणि सन्म

त्र इति नव्यवस्त्रपरिधानवारा दृश्या ज्योतिःशास्त्रे प्रदर्शिताः ॥ नक्षत्रसुरस्त्रयः मार्त्रीउत्तधनेत्रणः शान्तार्थश्लेषाः सदान्
मिजेव स्त्रीलाभकरेषु धेनुश्रुतौ विद्यागमः संपदः ॥ नानायोगरतिः प्रासादवनिताशय्यादिलाभास्तृगोदेन्यं शाश्वतेत
गवान् किल नाराधूर्चोंवरं मोरिणा श्रीपतिः ॥ रोहिणीपुष्करपंचाकश्चिनिस्नुत्तरेपि च पुनर्वसुद्वये रेवतीष्ववसुदेवातत्र
जेन व्यवस्त्रपरिधानमिष्यते ॥ छ ॥ अथ क्रमप्राप्ततिलकविधिः ब्रह्मांडपुराणे ॥ ॥ नारायण उवाच ॥ अंगुष्ठः पुष्टिदः प्रो
क्तो मध्यमायुष्करी भवेत् ॥ अनामिकान्नदा नित्यं मुक्तिदा च प्रदेशिनी ॥ एतैरंगुलिभिर्देवं कारयेन्न नखैः स्पृशेत् ॥ वर्त्तिदी
पाकृतिं वापि वेणुपत्राकृतिं तथा ॥ पद्मस्य मुकुलाकारं तथैव कुमुदस्य वा ॥ मत्स्यकूर्माकृतिं वापि शंखाकारमतः परं ॥ दशांगु
लप्रमाणं तु उत्तमोत्तममुच्यते ॥ नवांगुलं मध्यमं स्यादष्टांगुलमतः परं ॥ सप्त षट् पंच चत्वारि … मध्यमं त्रिविधं स्मृतं ॥ चतुस्त्र्यं
गुलैः पुंड्रं कनिष्ठं त्रिविधं भवेत् ॥ ललाटे केशवं विंद्यात् नारायणमथोदरे ॥ माधवं हृदये न्यस्य गोविंदं कंठकूपके ॥ विष्णुं च
दक्षिणे कुक्षौ तद्भुजे मधुसूदनं ॥ त्रिविक्रमं कंठदेशे वामकुक्षौ तु वामनं ॥ श्रीधरं च तथान्यस्य वामबाहौ हृषीकेशं सदा ॥ पद्मनाभं च पृ
ष्ठदेशे ककुदि दामोदरं स्मरेत् ॥ वासुदेवं स्मरेन्मूर्ध्नि तिलकं कारयेत् क्रमात् ॥ व्यासः ॥ जाह्नवीनीरसंभूतो मृदं मूर्ध्नि बिभर्त्ति यः ॥ बिभ ८३
र्त्ति रूपं सो

मत्पुराणे ॥ यदि स्यात्तर्पणादर्वाक् ब्रह्मयज्ञः कृतो न हि ॥ कृत्वा मनुष्ययज्ञं वै ततः स्वाध्यायमाचरेत् ॥ यदि दिवा दिनिमित्तेनो
क्तकाले ब्रह्मयज्ञो न कृतस्तदा कालातिरपि स्ववति ॥ यदा यामम् मध्ये तदा मनसा पठेत् ॥ तथा च श्रुतिः ॥ यामं मनसा स्वाध्या
यमधीयीत दिवा नक्तं वेति ॥ मनुः ॥ नैत्यके नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतं ॥ ब्रह्माहुतिहुतं पुण्यमनध्यायवषट्कृतं
तथा ॥ वेदोपकरणे चैव स्वाध्याये चैव नैत्यके ॥ नानुरोधोस्त्यनध्याये होममंत्रेषु चैव हि ॥ वेदोपकरणे वेदांगे ॥ अत्र विशे
षो गौतमेनोक्तः ॥ अथ यदि वातो वा यास्तनं यद्वा विद्युत् ततो वा अवस्फूर्जेद्वा एकां वर्चमेकं साम … व्याहरेत् ॥ भूर्भुवः स्वः
सत्यं तपः श्रद्धायां जुहोमीति ॥ अत्र वा ला वा यदि चेदनध्यायोपलक्षणी ॥ अनध्याये ह्येकवेदिकमेव पठेत् नाधिकमिति ग
म्यते ॥ तथा ॥ आदावेवीरित सर्वं परस्ताच्च विरम्यत ॥ … ययाशत्तमनमाचरेत् ॥ इति विद्यात … निरयोनिर्वि
पुराश्रितः ॥ ब्रह्मयज्ञाद्विनादेवः प्रीयतां मे जनार्दनः ॥ इति ब्रह्मयज्ञविधिः ॥ ॥ अथ तर्पणं ॥ बृहस्पतिः ॥ ब्रह्मयज्ञ प्रसिद्ध्यर्थं विद्या
ध्यात्मिकी जपेत् ॥ उच्छ्राय प्रवणे वापि ततस्तर्पणमाचरेत् ॥ शातातपः ॥ तर्पणं तु शुचिः कुर्यात् प्रत्यहं स्नानको द्विजः ॥ देवेभ्य
श्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमं ॥ अत्रांजलिनियममाह व्यासः ॥ एकैकमंजलिं देवा द्वौ द्वौ तु सनकादयः ॥ अर्हंति पितरस्त्रींस्त्री
स्त्रियास्त्वेकैकमंजलिं ॥ विष्णुपुराणे ॥ त्रिरपः प्रीणनार्थाय देवानामपवर्जयेत् ॥ ऋषीणां च यथान्यायं सकृच्चापि प्रजापतेः

यथान्यायमित्यनेन देवानामिव त्रिरर्थो गम्यते एवशाट्यायनवाशाध्यायी अपि शाट्यायनं जलिद्वयं गृह्णाति। त्रीनंजलीन्सव्यायी स्व
स्वगृह्यानुसारेण व्यवस्थाय यो श्रु शाखायीनां कापि विशेषश्चाम्नातः शेषे विकल्पः। याज्ञवल्क्यः। अन्वारब्धेन सव्य
तनाम्ना गोत्रेण वा ध्यत्या कूर्मपुराणे। अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु। देवर्षीस्तर्पयेद्धीमानुदकांजलिभिः पितॄन्। अ
त्रापि पूर्ववदेव व्यवस्था। एवं वा एकहस्तेनानायनन कुर्यात्पितृतर्पणे॥ पितरो न प्रशंसंति न प्रशंसंति देवताः। उभाभ्या
मपि हस्ताभ्यामुदकं यः प्रयच्छति समूढो नरो याति कालसूत्रमवाक्शिराः इत्यादि याज्ञवल्क्यादिवचनानि ता
नि तत्तच्छाखाप्रयुक्तानि निषेधकानि न तु सर्वसाधारण्येन ज्ञातानकाध्यनुपपत्तेः। ननु अन्वारब्धेन सव्येन पाणिना द
क्षिणेन तु। देवर्षीस्तर्पयेदिति कूर्मपुराणे यं देवानां देवर्षीणां निमित्ति विशेषोपादानादितरेषां एकहस्ततर्पणवचनानि सा
मान्यानि विशेषविषय कूर्मपुराणवचनविषये देवर्षितर्पणेनु प्रविशेद्विति चेन्न। मैवं। अन्वारब्धेन सव्येन नामगो
त्रेण वाध्येति याज्ञवल्क्येन नामगोत्रसहित सव्यहस्तान्वारब्धदक्षिणहस्ततर्पणविधानात्। गोत्रोच्चारणीय
पितॄणामेव न देवानां नाप्यृषीणां अत एव हस्तत्वर्पणं देवर्षिपितृतर्पणसाधारणी। एवं च हस्तविक्रिया व्यवस्थाप्या ८५
यसौ विवाहादारभ्य कहस्तेनैव तत्पावका स्त्रीजलिः। विवाहश्राद्धकाल च पाणिनैकेन दीयते इति। हारीतः। वसिष्ठाव

कृर्पा॰

सनेत्रधीस्थले विस्तीर्णबर्हिषि। विधिवत्तर्पणीरेवंनतु पात्रकदापन। एतच्चानुद्धृतोदकस्थलतर्पणविषयं उद्ध
तोदके तु स एव पात्राद्धृजलमादाय तु तत्पात्रांतरे क्षिपेत्। जलपूर्णे धवागर्ते निस्थालनविबर्हिषि पात्रे वा त्रपि
तामहानाकं। हेमरूप्यमयी पात्रं तानं मृं कांस्यसमुद्भवं पितॄणां तर्पणे पात्रे मृन्मयं तु परित्यजेदिति। अत्र योगयाज्ञव
ल्क्यः। यद्यद्धृतेन सिंचेत तिलान्संमिश्रयेज्जलं अन्यथा वामहस्तेन तत्स्तर्पणमाचरेत्। अन्यथा अनुद्धृते। अतान्यथा तत्स्थ
प्रत्ये तिलांकृष्णविवर्जयेत् इति पाठः। तथा ऽप्रतान्यथा स्वस्थानेत्यपि पाठः। यथेश्वाखिनो वामहस्तान्वारब्धेन दक्षिणह
स्तेन तर्पणं तथा वामहस्तेन तिलग्रहणमित्युक्तं भवेत्। अपाराधिविशेषश्च निवाक्ष्यः। आबाह्यपूर्वदिन्ये त्रे ग्रात्यहिवि कृ
शान्श्वान्। प्राग्ग्रेषु सुरान्सर्वान् दक्षिणाग्रेषु वै पितॄन्। देवर्षीणामपि। कूर्मपुराणे दैवार्षंसतंर्पिधो॥ षे कृ ५
वतर्पायेद्गोतादकैः। पितॄन्कृष्णतिलैः स्तैः स्वसूत्रोक्तविधानतः। ग्यातिलाः प्रोक्ताः सुतर्प्पयाद्देवान्मनुष्याश्चाव
तिलैस्तिलैः। पितॄंस्तु तर्पयेत्कृष्णैस्तर्पयन्सर्वदा द्विजः। तिलग्रहणं तु विशेषमाह मरीचिः। सुकृहस्तेन दातव्या न मुद्रा
न्तरदर्शयेत्। वामहस्ते तिलायाह्यामुक्तं दक्षसुदक्षिणः। प्रादेशिन्यां मुद्रा असौ या गो मुद्रा अत एव तर्जन्यांगुष्ठेन

तिलायाद्याः न घोनयं दक्षिणा हस्तस्थामवा। अत एव मुक्तहस्तेन दातव्यमित्यक्तापि मुक्तहस्तस्तु दक्षिण इति। पुनरपि
हितं मरीचिना। एतद्वयेषामंजलिना तर्प्पणे तद्विषयं विषयीत रस्तु पूर्वं मा निरिहितं। तिलस्थापनस्थानं तु स्मृत्यर्थसा
रे। वामहस्ते तिलान् क्षिप्त्वा जलमध्ये तु तर्प्पयेत्। स्थलेशाद्यं तालपात्र रामद्रूपनं कुत्र विन्ना जलतर्प्पणे लोमरहित
प्रादेशे वाम बाहौ तिलान् संस्थाप्य मुद्रारहितदक्षिणतर्ज्जन्यंगुष्ठयोरसंयुतान् तिलान्गृहीत्वा वामहस्ततले स्था
पयित्वा तर्प्पयेदित्यर्थः। वामबाहु तिलसंस्थापनव्यतिरिक्तमन्यत् जलतर्प्पणेपि समानं। एवमुक्तेन प्रकारेण स्थले स्थि
त्वा स्थलपात्र चाग्निना तर्प्पणं कुर्यान्न तु जल इति मिदं। तथा च यदुक्तं कार्ष्णाजिनिना। देवतानामपि तृप्तये जलं दद्या
ज्जलांजलिं। असंस्कृतप्रमीतानां स्थले दद्याज्जलं सकृदिति। तत्तु जलतर्प्पणानि प्राप्तानि। एवं च यानि स्थलतर्प्पणानि
षेधकानि तानि जलस्थितस्य यानि च जलतर्प्पणनिषेधकानि तानि स्थलस्थितस्येति वचनानां विरोधः परिहरणीयः। वि
ष्णुसु स्थलस्थितस्यापि जलतर्प्पणं कादिदत्तानीता यत्रास्तु विस्तरं वाप्यादुदकादर्वाता। पितृणां तर्प्पणं तु यथाकाममप्सु
सर्वं प्रतिष्ठितमिति। हारीत।। आर्द्रवासा जले कुर्यात्तर्प्पणाचमनं जपं। शुष्कवासा स्थले कुर्यात्तर्प्पणाचमने जपं। अत्र ८५

अमुकगोत्र अमुकशर्मन् तर्प्यतामिति वा। अमुकं तर्प्पयामीति वा प्रायोगाणि वचनानि। तथा च योगयाज्ञवल्क्यः। तृप्यध्वमिति सम्बोधयेदित्य
तामिच्छयापि वा विधिज्ञः प्रक्षिपन्नो यदेवादीनामाह शंखः। बोधायनः। अथ दक्षिणतः प्राचीनावीती पितॄन् स्वधा नम
स्तर्प्पयामि पितामहमित्यादि। स्मृत्यर्थसारेपि। ब्राह्मादायाया देवांस्तर्प्पयामि ऋषींस्तर्प्पयामि तु वाद्य
वीस्तर्प्पयामि तु विश्वादेवीस्तर्प्पयामि। एवं कृष्णान् पितॄनित्यादि। यमः।। लोहस्तौ युम्मतः तथा समरयेदुदकांज
लिं। गोशृंगमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत्। गोशृंगस्यानियतप्रमाणत्वाद्विवक्षितप्रमाणमाह दक्षः। प्रादेशमात्र
मुद्धृत्य सलिलं प्रांजलिस्सुरान्। उदङ्मुखो ऋषींश्चापि तपितॄन् दक्षिणतस्तथा। अग्रैस्तु तर्प्पयेद्देवान्मनुष्यांस्तु रामध्यतः।
पितॄंस्तु कुशमूलाग्रैर्विधिः कौशो यथाक्रमं।। मरीचिः।। विना रूप्यसुवर्णेन विना ताम्रतिलैस्तथा। विना मंत्रैश्च दत्ते
श्च पितॄणां नोपतिष्ठत इति। नात्र रजतादिसमुच्चयो विवक्षितः। अत एव वसिष्ठ उक्तः। खड्गमौक्तिकहस्तेन कर्त्तव्यं पितृत
र्पणं। मणिकांचनदर्भैर्वा न शुद्धेन कदाचनेति। शुद्धेन केवलेन खड्गादिरहितानतियाचता। अत्र वा शब्दोपादानात्
समुच्चय इत्यर्थः। तथा मरीचिः योगयाज्ञवल्क्यावपि तिलानामप्यलाभे तु सुवर्णरजतान्वितं। तदभावे निषिंचेत्तु
दर्भैर्मंत्रेण वाप्यनु रिति। अत्र च खड्गादिनिरूपणोहरूः कार्यो न तु खड्गादिपात्रस्वीकरणेन श्यासति एकैकमंजलिं

ादेवाश्त्याद्यंजलिविधायकवाक्यबाधापत्तेः। एवंतर्हिखड्गादिपात्रप्रशंसापराणांवाक्यानांविध्यैकवाक्यतायाअन्य
वादप्रामाण्यंस्यादितिचेत्। नैवं। अर्घ्यदानेषड्गादिपात्रविधायकवाक्यैकवाक्यत्वेनप्रशंसावाक्यानांसार्थकत्वा
न्नाप्रामाण्यं। यच्चमनुनात्रिरहितंराजतैर्नजिनैरथामथवारजतान्वितैः। वार्यपिश्रद्धयादत्तमक्षय्यायोपकल्पतइति।
एतदपिश्राद्धप्रकरणपठितत्वादर्घ्यदानविषयमेव। अतएवतर्पणेखड्गादिषुद्रव्येष्वियुक्ताहस्ताः। काम्याः। तथाच
याज्ञवल्क्यः। अनामिकाधृतोहेमतर्जन्यारूप्यमेवच। कनिष्ठिकाधृतंखड्गंतेनपूतोभवेन्नरः। इतियच्छंखेनत
र्पणप्रकरणेवात्रिविहितंसोवर्णेनिपात्रेणराजतेनौदुंबरेणखड्गपात्रेणान्यपात्रेणवोदकंपितृतीर्थस्पृष्टंदद्यादि
तितदपितर्पणप्रकरणादुत्कृष्यार्घ्यप्रकरणेपाठ्यं। अंजलिवाक्यापेक्षयाप्रकरणस्यदुर्बलत्वात्। अथवावाक्यप्रकरण
योश्चाराणामविरोधाययस्मिन्पात्रेधृतोंजलिःप्रशिथिलोनतावत्पात्रकूपात्रविशिष्टेनांजलिनापितृतीर्थस्पृष्टमुदकं
तर्पणेपिदद्यात्। लिखितः। प्राङ्मुखोयज्ञोपवीतीप्राणायामकृत्वोदकेनतर्पणेनद्विजोत्तमः। याज्ञवल्क्यः। याज्ञव
ल्क्योनोक्तः। ब्रह्माणंतर्पयेत्पूर्वंविष्णुंरुद्रंप्रजापतिं। देवान्छंदांसिवेदांश्चऋषीश्चैवसनातनान्। आचार्याश्चैवगंध
र्वान्आचार्यतनयास्तथा। संवत्सरंसावयवंदेवीश्चाप्सरसस्तथा। आचार्यान्व्यासादीन्सावयवंअवयवामासादयः। ८१

= अपसव्यंततः कृत्वाकृत्वाचपितृदिङ्मुखइति। तथासव्योत्तराभ्यांपा... पैठीनसिः

हस्तिश्चतथादेवानुगान्नाणास्सागरान्पर्वतानपि। सरितोथमनुष्यांश्चयक्षान्रक्षांसिवेवाहि पिशाचांश्चसुवर्णांश्चभू
तान्यथपशूंस्तथा। वनस्पतीनोषधीश्चभूतग्रामंचतुर्विधं। विष्णुसमुच्चायततःस्वचानिनीनेदुयज्ञसूत्रमतोद्विजः। प्राजा
पत्येनतीर्थेनमनुष्यांस्तर्पयेत्पृथक्। काष्णीजिनिः। सनकश्चसनंदश्चतृतीयश्चसनातनः। कपिलश्चासुरिश्चैववोढुःपं
चशिखस्तथा। एतब्रह्मसुतांसप्तमनुष्याःपरिकीर्तिताः। ततःस्वस्यशाखानुसारेणमैउलक्षणान्प्राजापत्यादिका
नृषीश्चतर्पयित्वापितृतर्पणमारभेत्। तत्रयाज्ञवल्क्यः। अपसव्यंततःकृत्वाचपितृदिङ्मुखः। पितृन्दिव्या २
नदिव्यांश्चपितृतीर्थेनतर्पयेत्। दिव्यावस्वादयः। अदिव्याःस्वपित्रादयः। तत्रदिव्याश्चतेनवदर्शिताः। ध्रुवाध्रुवश्चसोम
श्चआपश्चैवानिलोनलः। प्रत्यूषश्चप्रभासश्चवसवाष्टौप्रकीर्तिताः। अजैकपादहिर्बुध्न्योविरूपाक्षोथरैवतः। हरश्चबहु
रूपश्चत्र्यंबकश्चसुरेश्वरः। सावित्रश्चजयंतश्चपिनाकीचापराजितः। एतेरुद्राःसमाख्याताएकादशसुरोत्तमाः। इंद्रोधाता
भगःपूषामित्रोथवरुणोर्यमा। अंशुर्विवस्वांस्त्वष्टाचसवितविष्णुरेवच। एतेवैद्वादशादित्यादेवानोप्रवरामताः। अ
त्रवस्वादितर्पणेपृथक्स्वपित्रादितर्पणंचपृथगुपात्तमिति। वसुरूपंपितरंतर्पयामीत्येवंतर्पणेनविधेयो। अपितु
नामगोत्रोच्चारणमेव। श्राद्धेतुवसुरुद्रादित्यरूपायेनापिश्राननेवात्रिप्रायेणस्मृत्यर्थसारेवसुरुद्रादित्यरूपोश्राद्ध

×वर्णेभिन्न ही नव र्णं त्रिति न कार्यं हीन वर्णे नोत्तम ५

र्थे तर्प्पयत्पितृन्। नामगोत्रसमुच्चार्यं तिलैस्तीर्थ्येषु संयत इति। अथवा आरूढश्राद्धयोगोण्यात् तस्मात्तर्प्पणं पि वर्ज्जत इति वस्वादिनाम संहितानामेव पित्रादीनां तर्प्पणमस्तु। यत्नः शिष्टाचारएवाम वप्रायश्चो तत्पात। उदकग्रहण वि शेषमाह याज्ञवल्क्यः। दक्षिणपितृतीर्थेन जलसिंचयथाविधि दक्षिणानेव गृह्णीयात्पितृतीर्थेन संयतः। तथा सवर्णेभ्यो जलादेयं नासवर्णेभ्य एव वा गोत्रनामस्वधाकारेस्तर्प्पयेदनुपूर्वशः इति। अनुपूर्वशः। पित्रादिक्रमेण। अत्र यद्यप्यसवर्णेभ्यः स्यविशेषापादानं कृतं तथाप्युत्तमं वर्णेभ्यो दृष्टानष्टातेन दोषः। यतस्त्वं वर्णेताप स्विदं षच्चेनाभिहितास्मृतिषु। हीनस्योत्कृष्टं चं न दुष्टं उत्कृष्टस्य हीनयं दुष्टमतः सवर्णशब्दोत्कृष्टविसिक्ता दिजातीनामुपल क्षणार्थः। यद्यप्यसवर्णे सापत्नमात्रादयोप्यसवर्णेः तथापि तत्तर्प्पणी कार्यंमुमंतुनातेषां मात्रादिसमत्व प्रति पादनात्। पितृपत्न्यः सर्वा मातरस्तद्भ्रातरो मातुलास्तद्दुहितरस्तदगिन्यस्तदपत्यानि मे भागिनेयानीति। यत्र च समत्वापाद नं तत्र मुख्यापत्त्या किंचिन्न्यूनता जवतीति नात्रतत्प्राधान्यमपि उत्समनिहितमुवर्त्ततर्पणानंतरामेव तत्तर्पणमिति विवेकः। ननु मुमंतुवचनं पि सवर्णानामेव मात्रादिसाम्यं नवतु मानाम सवर्णानामिति चेत्। तथा सति पितृपत्न्यः सर्वा मातर इति न स्यात् उपात्तस्य सर्वत्वानतु पितृपत्न्येवा अतः सर्वशब्दासंकोचाय स्त्राविक्रपवस्तुतः पक्षः। एतन्न जी ८१

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारकम्

वन तर्प्पणमपि ब्राह्मणस्य निषिद्धमित्युक्तं चतुर्विंशतिमते। जीवत्पितृकः प्रतियोग याज्ञवल्क्यः। कव्यवाडनलः सोमो यमश्चैवार्यमा तथा। अग्निष्वात्ताः सोमपाश्च तथा बर्हिषदोपि च। यदि स्याज्जीवपितृक एतान्विद्यात्तदा पितॄन्। यस्त्यो वापि पितादद्या त्तस्यो वापि प्रदापायत्। एतौ चैव प्रमीतौ च प्रमीतपितृको द्विज इति॥ तथा। न जीवपितृकः सव्यं सलिले स्तर्पणमाचरे त्। उक्तं तिलतर्प्पणस्य कविदपवादमरीचिनोक्तः सप्तमी रविवार च गृहे जन्मादिनं तथा। नृत्यपुत्रकलत्रार्थी न कु र्यात्तिलतर्प्पणं॥ तथा पक्षयो रुभयो राजन्स सप्तम्यां निशि संध्ययोः॥ विद्यापुत्रकलत्रार्थी तिलान्नैव तु वर्ज्जयेत्। स्नानेनो तो नि न्यायाद्रूपानंदानं गुमघासु च। पिंडदाने मृदास्नानं न कुर्यात्तिलतर्प्पणं॥ स्मृत्यर्थसारे। विवाहे व्रतोपनयने तो लसतिय थाक्रमं। वर्षमर्द्धं तदर्द्धं च नाचरेत्तिलतर्प्पणं॥ तिथितीर्थ विशेषेषु कार्यं प्रेतेषु सर्वथा। पिंडाश्च पिंडानोदकः। प्रेत पिंडं विनात्र तु। अत्र विवाहादौ पितृयज्ञेव या ज्ञस्त गयायां मघासु च॥ गयामाघी मृताहस्ये च विद्वातुः पुराणगाः। तथा। तीर्थे तिथिविशेषे च गंगायां प्रेतपक्षके। निषिद्धेपि दिने कुर्यात्तर्प्पणं तिलमिश्रितमिति। असमर्थस्य संक्षेपतर्पणे विष्णु पुराणे॥ आब्रह्मस्तंबपर्यंतं जगत्तृप्यत्विति ब्रुवन्। क्षिपेत्पयांजलीन्त्रीन्कुर्वन्सं क्षेपतर्प्पणमिति। निःपीडयति यः पूर्वं स्नानवस्त्रमतर्प्पिते। निराशाः पितरो यान्ति शापं दत्वा सुदारुणं॥ पराशरः। द्वादशैव पंचदश पीत सैक्तो तोआद्ववासरो। व

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारकम्

स्त्रे निःपीडयान्त्रेव नस्त्रं ब्राह्मणो योजायते ॥ शौरकाः ॥ एवं यः सर्वभूतानि तर्पयेद्द्विजः ॥ स गच्छेत्परमं स्थानं तेजोरूप
मनामयं ॥ इति तर्पणं ॥ छ ॥ अथ यमतर्पणं ॥ तत्र स्कंदपुराणे ॥ कृष्णपक्षे चतुर्दश्यामंगारकदिने यदा ॥ तदा स्नात्वा नदीतो
ये तर्पयेद्यमनामभिः ॥ वृद्धमनुः ॥ यां कांचित्सरितं प्राप्य कृष्णपक्षे चतुर्दशीं ॥ यमुनायां विशेषेण नियतो नियतेंद्रियः ॥
यमाय धर्मराजाय मृत्यवे चांतकाय च ॥ वैवस्वताय कालाय सर्वभूतक्षयाय च ॥ औदुंबराय दध्नाय नीलाय परमे
ष्ठिने ॥ वृकोदराय चित्राय चित्रगुप्ताय वै नम इति ॥ तर्पयेदिति शेषः ॥ यमाय नमः ॥ यमं तर्पयामीति प्रयोगः ॥ अ
थ व्यासोपि ॥ कृष्णत्रयोदशीचतुर्दशीषु वा यमाय धर्मराजाय मृत्यवे चांतकाय च वैवस्वताय कालाय सर्वभू
तक्षयाय च ॥ प्रत्येकं त्रिर्नमस्कारमंत्रैः सप्तोदकांजलीं दद्यात्सर्वपापैः प्रमुच्यत इति ॥ वृद्धमनुः ॥ एकैकस्य तिलै
र्मिश्रांस्त्रींस्त्रीन्कुर्याज्जलांजलीन् ॥ तथा ॥ दीपान्वितचतुर्दश्यां कार्यं च यमतर्पणं ॥ अपरापि विशेषः स्कंदपुराणे ॥ द
क्षिणाभिमुखो भूत्वा तिलैः सव्यं समाहितः ॥ देवतीर्थेन देवत्वात्तिलैः प्रेताधिपो यत इति ॥ इति यमतर्पणं ॥ छ ॥ अ
थ देवतार्चनं ॥ एवं तर्पणानंतरं सूर्यार्घ्यं निवेद्य जलदेवं नमस्कृत्यास्य गृहं गत्वा विष्ण्वादिपूजां कुर्यात् ॥ याज्ञ ८६
वल्क्यः ॥ ततः सूर्यमुपस्थाय सम्यगाचम्य वाग्यतः ॥ अग्निकार्यं समादाय स यतात्मा गृहं व्रजेत् ॥ तथा च नृसिंहपुराणे ॥ ततो गृ

हमागत्य दद्यात्तिलपुष्पजलांजलिं ॥ उक्त्वा यमसूक्तपर्यंतं संस्तुवन्विष्णुं चरन् ॥ जलदेवं नमस्कृत्य ततो गच्छेद्गृहं बु
धः ॥ पौरुषेण तु सूक्तेन ततो विष्णुं समर्चयेदिति ॥ हारीतः ॥ कुर्वीत देवतापूजां जपयज्ञादनंतरं ॥ जपयज्ञो ब्रह्मयज्ञः ॥
मरीचिः ॥ विधाय देवतापूजां प्रातर्होमादनंतरं ॥ अत्र पूर्वाह्णो देवतार्चने मुख्यः कालः पूर्वाह्ण एव कुर्वीत देव
तानीव पूजनमिति ॥ एवंकारस्मरणात् ॥ माध्याह्निकानंतरकालोपि मुख्यसदृशः ॥ यथा च कूर्मपुराणे ॥ पौरुषेण तु सूक्तेन
ततो विष्णुं समर्चयेत् ॥ वेदाद्देवं ततं कुर्यादिति कर्मान्ते चैव वाचितं ॥ तथा ॥ कुर्वीत देवतापूजां जपयज्ञादनंतरमिति ब्रह्मय
ज्ञानंतरकालस्याप्यपोदानात् यदा प्रातरेव ब्रह्मयज्ञं होमानंतरं करोति तदा पूर्वाह्ण एव ॥ अथ तर्पणात्पूर्वकाले करोति
तदा तर्पणानंतरमेव ॥ जलदेवतानमस्कारानंतरं गृहं गत्वा विष्णुपूजायां नरसिंहपुराणे विधानात् ॥ पूज्या तद्देवता निगमद
र्शिताः ॥ ब्रह्माणं विष्णुमीशं वा सूर्यमग्निं गणाधिपं ॥ दुर्गां सरस्वतीं लक्ष्मीं गौरीं वा नित्यमर्चयेत् ॥ पद्मपुराणे ॥ आदित्यं गणना
थं वा देवीं रुद्रं यथाक्रमं ॥ नारायणं विशुद्धाख्यमंते च कुलदेवतां ॥ याज्ञवल्क्यः ॥ देवानामर्चनं कुर्याद्ब्रह्मादीनाममत्सरः ॥
विष्णुर्ब्रह्मा च रुद्रश्च विष्णुर्देवो दिवाकरः ॥ तस्मात्पूज्यतमं नान्यमहं मन्ये जनार्दनात् ॥ दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव
वा ॥ अर्चितं स्याज्जगदिदं तेन सर्वं चराचरं ॥ अप्स्वग्नौ हृदये सूर्ये स्थंडिले प्रतिमासु वा ॥ षट्स्वेतेषु हरेः सम्यगर्चनं मुनिभिः स्मृतं ॥ आ

नुष्टुप्नस्यासूक्तस्य त्रिष्टुवेतस्यादवता॥ पुरुषोयाजगद्बीजमृषिर्न्नारायणः स्मृतः॥ प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे॥
तृतीयां वामपादे तु चतुर्थीं दक्षिणे न्यसेत्॥ पंचमीं वामजानौ तु षष्ठीं वै दक्षिणे न्यसेत्॥ सप्तमीं वामकट्यां तु अष्टमीं दक्षिणे
न्यसेत्॥ नवमीं नाभिमध्ये तु दशमीं हृदये तथा॥ एकादशीं कंठदेशे द्वादशीं वामबाहौ तु॥ त्रयोदशीं दक्षिणे तु आस्यादौ च चतु
र्दशीं॥ अक्ष्णोः पंचदशीं विद्यात् षोडशीं मूर्ध्नि विन्यसेत्॥ एवं न्यासविधिं कृत्वा पश्चाद्यागं समाचरेत्॥ आद्ययावाहयेद्देवमृचा तु पु
रुषोत्तमं॥ द्वितीययासनं दद्यात् पाद्यं चैव तृतीयया॥ अर्घ्यं चतुर्थ्या दातव्यं पंचम्याचमनीयकं॥ षष्ठ्या [illegible] प्रदातव्यं सप्तम्या वस्त्रमे स्नाने ५
व च॥ यज्ञोपवीतमष्टम्या नवम्या चानुलेपनं॥ पुष्पं दशम्या दातव्यमेकादश्या तु धूपकं॥ द्वादश्या दीपकं दद्यात् त्रयोदश्या निवे
दनं॥ चतुर्दश्या नमस्कारं पंचदश्या प्रदक्षिणं॥ अर्चयित्वा तु देवेशं षोडश्या तु विसर्जयेत्॥ स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनी
यकमिति॥ एवमितरेषामपि ब्रह्मादीनां पूजने कार्यं तत्तत्कामाशाकार्बादिकैर्मंत्रैः॥ तद्देवताकैस्तत्तन्नामधेयमंत्रैर्नमोन्तैः
पूजयेत्॥ अथवा वेदाविरुद्धस्वस्वदीक्षानुसारेण वा देवतार्चनं कुर्यात्॥ इति देवार्चनं कुर्यात्॥ इति देवार्चनं॥ अथ पू
जोपयुक्तपुष्पाणि॥ तत्र नरसिंहपुराणे॥ पुष्पैरत्यन्तसंपूतैः पवित्रैर्गिरिसंभवैः॥ अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जंतुवर्जि ८४
तैः॥ आत्मारामोद्भवैर्वापि पुष्पैः संपूजयेद्धरिं॥ हरिप्रियपलक्षणं॥ ग्रामपुष्पैर्बिल्वपुष्पैश्चंपकैस्तगरैस्तथा॥ करवीरैस्त ८९

था श्वेतपालाशीकुशपुष्पकं॥ वनमाला[illegible]पाशाकैश्च सेवतीकुब्जमालती॥ त्रिसंध्यं च तथा श्वेतार्कं च शतपत्रकं॥ मल्लि
काविवजातीचसर्वपुष्पाद्विशिष्यात॥ जातीपुष्पसहस्रेण यच्छेन्मालीं शुभोत्तमां॥ विष्णवे विधिवद्भक्त्या तस्य पुण्यफ
लं शृणु॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च॥ वसेद्विष्णुपुरे श्रीमान् विष्णुतुल्यपराक्रमः॥ पत्राण्यपि॥ अपामा
र्गं भृंगराजं च शमीपत्रं च खादिरं॥ दूर्वां च कुशपत्रं च दमनं मरुवकं तथा॥ ततोऽष्टौ बिल्वपत्रं च ततस्तुलसीदलं॥ एतेषां च
यथालाभं पत्रैर्यः पूजयेद्धरिं॥ सर्वपापविनिर्मुक्तो विष्णुलोके महीयते॥ यथा न संति पुष्पाणि प्रशस्तान्यर्चने हरेः॥ प
ल्लवान्यपि तेषां स्युः शस्तान्यर्चाविधौ हरेः॥ वारुधामत्रावनबर्हिषाचार्चयेद्धरिं॥ अपराधसहस्राणि अपराधशतानि च॥
पद्मेनैकेन देवेशः क्षमते दलयार्चितः॥ पद्मेनैकेन देवेन मत्स्यचक्रमलापतिं॥ वर्षायुतसहस्रस्य पापस्य कुरुते क्षयं॥
अगस्तिवृक्षसंभूतैः कुसुमैरसितैः सितैः॥ पूजयेति च देवेशं तैः प्राप्नोति परमं पदं॥ सुवर्णकेतकीपत्रैर्याद्ददाति जनार्दनं॥ को
टिजन्मार्जितं पापं दहत्याशु गरुडध्वजः॥ सकृत्केतकपुष्पेण हेलया हरिरर्चितः॥ सप्तजन्मानि दवर्षेत स्य लक्ष्मी न दूर म ३
गा॥ कुन्तीपुष्पेतु दद्वार्चयः प्रयच्छति वैशाखे॥ सुवर्णपलमात्रं तु पुष्पे पुष्पे तावन्मानं॥ गारुडपुराणे॥ धात्रीफलेन
यत्पुण्यं जयंत्याः समुपोषणे॥ खगेंद्र यत्र नेन्मल्लीतुलसीं प्रजानन तत्त्वं यथाकथंचिदाहृत्य कुसुमैः पूजयेद्धरिं॥ नाक

पृष्टमनाघ्रातिनात्रकार्याविचारणा॥स्कंदपुराणे॥विष्णुमूर्द्धिस्थितंपुष्पंशिरसायोवहेन्नरः।अपर्युषितपापःस्याद्यावद्युग
चतुष्टयी।पुष्पाणांविष्णुपत्राणिद्यानिचसुरार्चने॥पराघ्राताचपायादयंतनपुष्पमुपाकृतं।वर्ज्यानिचविष्णुधर्मे
अनिदिष्टानि॥उग्रगंधीन्यगंधीनिकुसुमानिनदापयेत्।अन्यायतनजातानिकंटकीनितथैवच।रक्तान्यकालजातानि
विद्धदूषाणोद्भवानिच॥श्मशानजातपुष्पाणिदानादावविवर्जयेत्।ककराख्यस्यपुष्पाणितथाधुत्तूरकस्यच।कूटजंचकुटकं
चार्कीनिवादयेजनार्दने।कंकरःकरीरःशाल्मलंचशिरीषंचबृहतीगिरिमल्लिका।सर्जकंचैवकूष्माण्डंवणरंचविवर्जयेत्॥अ
थशिववर्ज्यानिप्रासाददीपिकायां।जपाबंधूकसिंदूरंतथात्रिसंधिकाकुसुमं।दमनीकतकीयूथीमालतीपुरजानिच।धुस्तूरी
चाखमास्थप्रमादेनापिनार्पयेत्।बर्बरीसर्जपत्रीनयावकुसुदद्वयं।अतिपक्वान्यपक्वानिपतितानिविवर्जयेत्।आर
ण्याल्पप्रगंधीनिसकीटानाग्रगंधियेत्।अशुद्धपात्रपाणिगवासानिःकुत्सिताम्नीनि।आनीतेनार्पयेत्तत्रोप्रमादादपिदोष
स्तता।देवीपुराणे।शिवविवर्जयेत्कुंदंउन्मत्तंचहरःसदा।देवीनांचार्कमंदारौआदित्यतगरंतथा।विष्णुरहस्ये।नगु
प्तैःप्रजायद्धिविष्णुंकुसुमैर्नमहीगतैः।नविशीर्णदिलैर्शुक्लैर्नविवाशुविकाशितैः।आशुविकाशितैर्बलाद्विकाशितैः॥ ८५
तथा॥जलेपर्युषितेर्याज्येपत्राणिकुसुमानिच।तुलस्यगस्तिबिल्वानिगांगेवारिनदुष्यति।स्नानेहन्त्यातउयःकश्चित्पुष्पेवि ९०

चतिविद्विजः।दवतीस्नानंनगृह्णंतितस्मान्नवतिदारुवत्।एतच्चमध्यंदिनस्नानानंतरंचदितव्यं॥छ॥ अथनित्यश्राद्धपंचम
हायज्ञानीस्वरूपाणि।तत्रयमः॥पंचसूनागृहस्थस्यवर्त्ततेहरहःसदा।कंडनीपेषणीचुल्हीजलकुंभउपस्करः।ए
तानिवाहयन्विप्रोबध्यतेविप्रुडुमुहुः।एतासांपावनार्थायपंचयज्ञाःप्रकीर्तिताः।सूनाहिंसास्थानं।कंडन्युलूखलादि।
पेषणीदृषदादि॥चुल्लीपाकस्थानं।जलकुंभउदधानं।उपस्करःसूर्यादिः।वध्यतेपापेनयुज्यते।रघुवः।नचकंडन्यादिनिमि
त्तश्रवणान्नैमित्तिकंचपंचमहायज्ञानीपंचयज्ञविधानानुष्ठानित्यंनहापायदिति।शंखेननित्यत्वाभिधानात्।तेचयज्ञाःक
श्याकीहायोयमः।ब्रह्मयज्ञोदेवयज्ञःपितृयज्ञस्तथैवच।भूतयज्ञोनृयज्ञश्चपंचयज्ञाःप्रकीर्तिताः।एतल्लक्षणमाहम
नुः॥अध्यापनंब्रह्मयज्ञःपितृयज्ञस्तुतर्पणं।होमोदैवोबलिर्भौतोनृयज्ञोतिथिपूजनं।अध्यापनमध्ययनं।तर्पणपितृ
तर्पणं।पितृश्राद्धमितियाचत्।यतःसएवाह।स्वाध्यायेनार्चयेतर्षीन्होमैर्देवान्यथाविधि।पितृन्श्राद्धैनृनन्नैर्भू
तानिबलिकर्मणेति।पितृयज्ञेविकल्पमाहकात्यायनः।श्राद्धंवापितृयज्ञःस्यात्पित्र्योबलिरथापिवेति।नित्यश्राद्धं
वापितृयज्ञः।अथवैश्वदेवमध्येपितृभ्यःस्वधास्त्वितियोबलिर्दीयतेसपितृयज्ञइत्यर्थः।तथाबह्वृचोदस्मादेवपि
भूतमनुष्यब्रह्मयज्ञाःपंचमहायज्ञाः।आश्वलायनाचार्यएववैश्वदेविकंबलिकर्मविचारुः।अथवापृथगिति।बोधायनपि।

अग्नयेस्वाहेत्यादिषडाहुतीर्जुहोति।एषवैश्वदेवःसीतिष्ठात।धर्मायस्वाहेत्यादिनमोरुद्रायपशुपतयइत्यादिभिर्बलि
हरणंबलवान्हरत्यनसंतिष्ठात।।देवेभ्यःस्वाहेत्यग्नौजुहोत्येषदेवयज्ञःसीतिष्ठात।पितृन्नुद्दिश्यैकब्राह्मणंभोज
येदपिवादक्षिणानाग्निंदक्षिणाग्रान्दर्भान्संस्तीर्यतेषुपिंडंददातिपितृभ्यःस्वधास्त्वितिपिवाञ्चापस्तम्बसूत्रयज्ञःसीतिष्ठ
ता।उत्तरतोग्नेश्चावोदशाप्रागग्रान्दर्भान्संस्तीर्यगंधपुष्पधूपदीपैरलंकृत्यबलिमुपहरतिनृभ्यःस्वाहानमइतिनृभ्य
स्त्रइक्तयज्ञःसीतिष्ठात।मनुष्ययज्ञार्थमतिथिंभोजयेदपिवाहंतकारंब्राह्मणेभ्योददातिमनुष्येभ्योहंतेति।हंतका
रपर्याप्तान्नदानासमर्थस्यकार्ष्णाजिनिः।जिह्वावोपिहंतकारमथापिवतिग्रासमात्रमयमितिपर्याप्तोनिष्कादिलक्षणे
वमनुनानिहितः।ग्रासमात्रंभवेद्भिक्षाअग्रंग्रासचतुष्टयी।अग्रंचतुर्गुणीकृत्यहंतकाराविधीयतइति।।आपस्तंबपरिशि
ष्टेपि।।वैश्वदेवबलिहरणानंतरमवदेवादवयज्ञार्थंसुकृतान्नाद्देवेभ्यःस्वाहेत्यकामाहुतिमग्नौजुहुयुः।पि
तृयज्ञार्थमपिवैश्वदेवबलिहरणशिष्टादन्नात्प्राचीनावीतिनादक्षिणानाग्निःपितृतीर्थेनपितृभ्यःस्वधास्त्वितिबलिंद
द्युर्नृयज्ञार्थंवैश्वदेवशिष्टान्नादवान्तरतोग्नेर्दैवतीर्थेनबलिमुपहारयुर्नृभ्योनमइतिमनुष्ययज्ञार्थमतिथिं ८६
भोजयेदतिथ्यभावेसंकल्पितंदद्यादिति।एवंविधान्यन्यान्यपिविरुद्धवचनानिग्रंथगौरवभयान्नलिखितानितत्रसर्व ८१

त्रयथाशाखंव्यवस्थाइतिपंचयज्ञस्वरूपनिर्णयः।।अथनित्यश्राद्धं।।मनुनादद्यादहरहःश्राद्धमितिनित्यश्राद्धंविधायवैश्वदे
वस्यसिद्धस्यगृह्येग्नौविधिपूर्वकमित्यादिनापश्चाद्वैश्वदेवविधानात्प्रथमंनित्यश्राद्धंपश्चाद्वैश्वदेवइतिकश्चित्।अत्रा
पिपत्न्हायपीउनित्यश्राद्धमवपंचयज्ञीतःपतितानपीस्वशाखानुसारेणक्रमः।।केचनवैश्वदेवानंतरंकुर्वंतिपाठक्रमेणमनोर्द
यश्राद्धविषय।।मार्कंडेयपुराणे।।कुर्यादहरहःश्राद्धमन्नाद्येनोदकेनवापितॄनुद्दिश्यविप्रांस्तुभोजयेद्विप्रमथवापि।अ
त्रविशेषमाहप्रचेताः।नामंत्रणंनहोमश्चनावाहनविसर्जनं।नपिंडदानंनसुरान्निमंत्र्यद्विजोत्तमः।।उपावइपासनंदद्या
सीहृज्जकुसुमादिभिः।निर्दिश्यभोजयेच्चात्रकिंचिद्दत्वाविसर्जयेत्।नसुरान्।नवैश्वदेवान्।किंचिद्दद्यादितिदक्षिणार्थं।।व्यासः।।
नावाहनंस्वधाकारःपिंडाग्नौकरणादिकं।ब्रह्मचर्यादिनियमोविश्वेदेवास्तथैवच।।इति।।तथा।।तत्तुषड्गुणरूपंस्याद्दक्षिणापि कुरिक प
डवर्जितं।।मत्स्यपुराणे।।यद्येकंभोजयेद्विप्रंत्रीनुद्दिश्यपितॄंस्तथा।।इति।त्रीनितिमातामहादीनामपिप्रदर्शनार्थं।अत्रकात्या
यनोनुकल्पमाह।।एकमप्याशयेद्विप्रंपितृयज्ञार्थसिद्धये।अदेवंनास्तिचेदन्योभोक्ताभोज्यमथापिवा।अप्युद्धृत्ययथा
शक्तिकिंचिदन्नंयथाविधि।पितृभ्यइदमित्युक्त्वास्वधाकारमुदाहरेत्।।२३।।एतदुद्धृतान्नंब्राह्मणायैवदद्यात्।नदन्नावगोभ्यः।।त
थाचकूर्मपुराणे।।उद्धृत्यवायथाशक्तिकिंचिदन्नंसमाहितः।।देवतायार्थविदुषेद्विजायैवोपपादयेत्।तथासविघामथ

लाजतुद्दत्तैर्गान्धो निवेदयेदिति॥ यदा गवामभावस्तदा विमूत्रैर्निक्षुकाभावेन्नं गोभ्यो दद्याद्ग्नौ वा प्रक्षिपेदिति।
मत्स्यपुराणे श्वेवामवप्रतिपत्तिकर्म्म॥ अथाद्यशक्त्यस्य मनुष्यं दद्यादहरहः श्राद्धमन्नाद्येनोदकेन वा आद्यर्थो
न्नष्टेनोदकेन॥ पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन्निति पयः क्षीरं एतच्च नित्यश्राद्धं श्राद्धान्तरेण तन्त्रानियतता तथा
वमार्कण्डेयः॥ नित्यक्रियां पितॄणां तु केचिदिच्छन्ति मानवाः॥ न पितॄणां तथैवान्ये शेषं पूर्ववदाचरेदिति। नित्यक्रियानित्यश्रा
द्धं शेषं वैश्वदेवादिकं। अत्रेयं व्यवस्था। यत्रामावास्यादौ मुख्यश्राद्धादिषु नित्यश्राद्धदेवतास्तत्रान्तर्भवति न तत्र नित्यश्राद्धं
यत्र त्वसी वत्सरिकादिषु नेष्टा नित्यश्राद्धदेवतास्तत्र कर्तव्यमिति॥ तथा च चमत्कारखण्डे॥ नित्यश्राद्धं न कुर्वीत प्रसंगाद्यत्र सिध्य
ति॥ श्राद्धान्तरैस्तन्यत्र नित्यं चान्नं प्रदापायेत्॥ इति नित्यश्राद्धविधिः॥ ॥अथ वैश्वदेवविधिः॥ तत्र प्रथमोपक्रमे आपस्तम्बः।
तयोर्मित्राणामुपयोगेषु दर्शाद्भुत्तायारधःशाय्या ब्रह्मचर्यं क्षारलवणवर्जनं वा उत्तमस्य करात्रमुपवासः इति ततो वैश्व
देवकल्पार्थं मंत्राणामुपयोगः प्रथमोपक्रमः॥ उत्तमस्यापि नृतः प्रवर्त्तितश्चस्यामेत्रस्य उपयोग एकरात्रमुपवासः॥ त
तो वैश्वदेवश्च नु॥ तथा॥ सिद्धान्नेतिष्टद्धुतमिति स्वामिना प्रब्रूयात्तद्धुतं विराडन्नं तस्मात्क्षुयतीति प्रतिवचनमिति॥ त ८२
तो वैश्वदेवादिकं कर्म्म कुर्यात्॥ तच्च सायं प्रातः॥ तथा च कात्यायनः॥ सायं प्रातर्वैश्वदेवः कर्तव्यो बलिकर्म्म चानशनस्य तापि स

ततमन्यथा किल्विषी तावदिति। एतेन पुरुषार्थश्चमुक्तो भवति वैश्वदेवस्य। अत एव परिशिष्टे प्रवासस्थितस्याप्यवश्यकर्त्तव्य
ता दर्शिता। प्रविशदाहिताग्निश्चेदवेक्षाकालपर्ययात्। यस्मिन्नग्नौ पचत्यन्नं काले वैश्वदेवस्तु तत्र वै। मनुरपि। पुरुषार्थत्वम
वाह। वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत्। तस्मै अन्नं यथाशक्ति प्रदद्यान्न बलिं हरेत्॥ वैश्वदेवानंतरमतिथिमजाप्य
त्तायां द्वितीयोऽतिथिर्यदा गच्छति अन्नं च पक्वं नास्ति तदा पुनः पाकं कृत्वा तस्मै दद्यान्न बलिं हरेत्। वैश्वदेवं न कुर्यादित्यर्थः॥
घं यदन्नसंस्कारार्थं वैश्वदेवस्य तदा पुनः करणनिषेधो न स्यादितरथा तस्यैकवचनान्नसंस्कारकत्वे पुरुषार्थत्वे स्यात्तुनया
त्मकं च मिष्ठति। अस्मिन्पक्षे उभयात्मकस्यास्य आश्रयातिसंज्ञायाः पूर्वं विषयाणि द्रव्यसंस्कारकारीणि च कर्म्माणि शिष्टस्तु
त्तमप्रयाजादीनि तान्याश्रयिसंज्ञकानीति व्यवहारं तिमीमांसकाः॥ एतच्च लौकिकवैवाहिकाग्न्यादिषु वा कुर्वीत॥ तथा च या
ज्ञवल्क्यः॥ स्मार्त्तं कर्म्म विवाहाग्नौ कुर्वीत प्रत्यहं गृही। दायकालाहृते वापि श्रौतं वैतानिकाग्निषु॥ शातातपः। लौकिके वैदिके
वापि हुतान्मृष्टे जालक्षितावति। आहृत्योन्मृज्य जुहुयात्॥ लौकिकाग्नेः पात्रांतरकरणमाहरणं स्मार्त्ताग्निषु स्म्युद्धन
माहरणं उन्मार्जनं तस्मात्पाकरणं॥ मनुः॥ वैवाहिकाग्नौ कुर्वीत गृह्यकर्म्म यथाविधि। पंचयज्ञविधानं च पक्तिं चान्वाहि
कीं गृही॥ अत्र विशेषश्चतुर्विंशतिमते। प्रातर्होमं तु निर्वर्त्य समुद्धृत्य हुताशनं॥ शेषमहानसं नीत्वा तत्र पाकं समाचरेत्॥ समु

हुत एवाशेषः तं महानासन्नश्चेत्यर्थः। यस्मिन्नग्नौ पाकस्तत्रैव होमः॥ तथा कूर्मपुराणे॥ यदि स्याल्लौकिके पाकस्ततोऽन्नं तत्र
हूयते। शालाग्नौ तत्र वैदन्नं विधिरेष सनातन इति। एतदनुसारेणान्यान्यपि वचनानि व्यवस्थापनीयानि। स होमः कथमि
त्याकांक्षायां शौनकः। अथ सायं प्रातः सिद्धस्य हविष्यस्य जुहुयादग्निहोत्रदेवताभ्यः सोमाय वनस्पतये अग्नीषोमाभ्यामिन्द्रा
ग्निभ्यां द्यावापृथिवीभ्यां धन्वन्तरये इन्द्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे स्वाहेति। हविष्यं हविर्योग्यं। अग्निहोत्रदेवताः सूर्याग्निप्र
जापतयः। आपस्तंबः॥ अपामानपचानवा पक्षिराशेष प्रतिमंत्रं दक्षिणेन जुहुयादुत्तरतः परिषेचनं यथा पुरस्तादिति॥ आ
श्वः॥ अग्नये स्वाहेत्यादिभिः स्विष्टकृदन्तैः। उत्तरतः परिषेचनं कर्मादावन्ते च। कात्यायनः॥ वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारै
र्जुहुयात्॥ ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतये इति गौतमः॥ अन्नाद्वग्निर्धन्वन्तरिर्विश्वेदेवाः प्रजापतिः। स्विष्टकृ
दिति होम इति। अत्र व्यवस्थामाह स एव कात्यायनः॥ उद्धृत्य हविष्यासिक्तं हविष्येण घृतादिना। स्वशाखाविधिना हुत्वा तच्छेषेण बलिं
हरेदिति। हविष्येण घृतादिना॥ छ॥ हुते हविरासिच्यात न द्विषाज्जुहुयादित्यर्थः। घृताभावे दध्यादिभिः क्षीरेण जुहुयात्। तथा
च व्यासः॥ जुहुयात्सर्पिषाभ्यक्तं तैलक्षारविवर्जितं। दध्यक्तं पयसाभ्यक्तं तदभावे सपिरं वा। हविष्यान्नविशेषस्तु विंशति
मतिविशेषादर्शितः। अलाभे येनकेनापि फलशाकादकादिभिः। पायसं दधि घृतो कुर्याद्वैश्वदेवं सर्ववर्णे तु। हस्तेन ५३

त्रादिभिः कुर्याद्द्विरंजलिना जल इति। अन्यापरा विशेषः परिशिष्टे। शाकैर्वा यदि वा पत्रैर्मूलैर्वा यदि वा फलैः। संकल्प
येद्यदाहारं तेनाग्नौ जुहुयादपीति। पयःप्रभृतिसद्रव्याणां होमः सर्ववर्णे। हविष्यादिकं विनद्रव्याणीउ विशेषा नि
र्दिष्टः परिशिष्टे। उत्तानेन तु हस्तेन अंगुष्ठाग्रेण पीडितैः। संहतांगुलिपाणिस्तु वाग्यतो जुहुयाद्धविरिति। हविष्येष्वपि
मुख्यद्रव्यमाह कात्यायनः। हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः। माषकोद्रवगौरादीन्सर्वालाभेऽपि वर्जयेत्। गौ
सनमपा: रा॥ आपस्तंबः। नद्यग्नौ स्थालीपाके होमो विद्यते तपारान्नसंसृष्टस्य होम उदीचीनमुष्णं भस्मापोह्य तस्मिन्जुहुया
त् हुतमहुतं वाग्नौ नवतीति। क्षारलवणपरान्नसंसृष्टेन हविष्येणाग्निहोमो न कार्यः। अपि त्वग्नेरुत्तस्माद्व्यापतनाद्
त्तरतो पाह्यतस्मिन्होतव्यं उष्णं भस्मेति। अंगारमिश्रितं भस्मेत्यर्थः। अत एव बोधायनः॥ अंगारान्नि भस्ममिश्रान्स्वयं ह्युत्तर
तो निरलात् जुहुयाद्वैश्वदेवं उद्धृत्य क्षारादिमिश्रितमिति। तथा परान्नमन्नमसंस्कृतमसौ ग्रावधिश्रियाद्भिः प्रोक्षेत तद्वप
वित्रमित्याचक्षत इति। अधिश्रयणे तु नरस्येरूपरिस्थापनमात्रं मन्त्रासहितस्य वैश्वदेवपात्रस्य। अधिश्रित्य संस्कृतं तथा
प्राक्त्वादिव्यवहारः। एतच्च सायं प्रातः कर्त्तव्यमित्युक्तं। तत्र प्रातरूपक्रमः सायमपवर्गः। यदा सायं समंत्रकं कर्म कर्त्तव्य
मन्त्रावस्था दा पत्नी सायममंत्रकं बलिं हरेत्। तथा च मनुः॥ सायमन्नस्य सिद्धस्य पत्न्यमंत्रं बलिं हरेत्। वैश्वदेवं हि ना

मेतस्मात्सायंप्रातर्विधीयत इति। अत्र वैश्वदेवं हि नामेत्यादिश्येत तत्पर्यंतामकृत्वा कर्म्मसायंप्रातर्विधीयत इत्यतो दपरं वैश्व
देवस्य कालक्षयपि कर्त्तव्यताविधायकं। अतः सायमेव पत्न्या बलिहरणरूपवैश्वदेवकर्म्माधिकारः। केवलं बलि
ग्रहणं वैश्वदेवस्याप्युपलक्षणार्थमिति वर्णयंति। एवं च तद्वैश्वदेवस्य बहिर्बलिमाह मनुः। शुनां च पतितानां च
श्वपचां पापरोगिणां। वायसानां कृमीणां च शनकैर्निक्षिपेद्भुवि। अत्र मनुः। ये भूताः प्रचरंति दिवानक्तं बलिमिच्छंतो
वित्तदस्य प्रेष्याः। तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर्दधात्विति। अत्र दिवेति दिननक्तमिति रात्रौ दि
वाचारिभ्य इति दिवा नक्तंचारिभ्य इति नक्तमित्याश्वलायनस्मरणात्। एतद्वैश्वदेवाख्यं कर्म्म दिवाह्नि स्तथा रात्रावपि
छिन्नकर्त्तव्यो। धर्मविन्नाचारस्नानमाह्निकं तु पुनः पुनः। तर्पणं ब्रह्मयज्ञं च वैश्वदेवं च नाचरेदिति विष्णुपुराणविधानात्। वै
श्वदेवबलिहृतो सायंप्रातः पंचयज्ञाशुद्धिर्विवा यथाहयमदग्निः। वैश्वदेवं तथा रात्रौ कुर्याद्बलिहृतं तथा। महतः पंचयज्ञै
शुद्धिर्विवर्ज्याद्धर्मविदिति। यच्चोक्तं शाखिनो ब्रह्मयज्ञव्यतिरिक्ता यमदायज्ञा नो वैश्वदेवबलिहृतो। बौतन्नीवः। तथा
दिवेव वैश्वदेवाख्यकर्म्म निरग्नेरायदि स्वशाखायां कालक्षयपि विधानं नास्ति। अथास्ति तदा द्विरपि स्वाग्नौ तीति निर्णयः। द्वि
विधं हि वैश्वदेवादिकर्म्म एकं मन्वादिस्मृत्युक्तं साधारणमपरं स्वस्वगृह्योक्तमिति। तत्र साधारणं स्वशाखाविरुद्धं सर्वैर ९४

।दि॰

पि कार्यं कर्म्माणां सर्वशाखाधिकरणन्यायनिकयात्। अत्राशंक्य स्वस्वगृह्योक्तमेवानावनापि शास्त्रार्थस्य निश्चन्न
यात्। एतद्व सौम्य हिनीमध्योऽप्यष्ट एवं कुर्यात्। तदशक्त्यादिना तदनुज्ञायतरस्यापि कर्त्तव्यमस्ति। अनग्निकस्य विशेष
माह वसिष्ठः। अनग्निकस्तु यो विप्रः सोऽन्नं व्याहृतिभिः स्वयं हुत्वा शाकलमंत्रैश्च शिष्टाद्भूतबलिं हरेत्। अनग्निकः
नि॰ ५ श्रौतस्मार्त्तविवर्जितः। यदा वैश्वदेवादर्वाक् भिक्षुरागच्छति तदा वैश्वदेवार्थमन्नमुद्धृत्य तिष्ठावतिष्ठेद्यात्। तथा च व्या
सः। अकृते वैश्वदेवे तु भिक्षुके गृहमागते उद्धृत्य वैश्वदेवार्थं भिक्षां दत्त्वा विसर्जयेत्। भिक्षुकाश्चापि तेनैव दर्शिताः।
ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः। अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृता इति। इति वैश्वदेवविधिः॥
अथ वैश्वदेवपाकनिर्णयः। तत्र नित्यश्राद्धस्य वैश्वदेवस्य चैकएव पाकः। नित्यश्राद्धं श्राद्धनियमविशेषाभावात्। नव
श्राद्धे चैकपाकः। शौनकेन नास्ति श्राद्धे चेन्मध्ये वैश्वदेवनिषेधात्। एकोद्दिष्टादिकश्राद्धे तु पृथक्पाकः। श्राद्धशेषान्नस्य
ब्राह्मणेभ्यो दयत्वात्। तथा च देवलः। एकादशाहे पर्यंतं ब्राह्मणेभ्यः समुत्सृजेदिति। दर्शश्राद्धे प्रकृति। अपनत्वन्नि
र्णयनिवस्त छिन्नतानामपि निर्णय इति। वक्ष्यतो विचार्यतां। किं श्राद्धार्थं वैश्वदेवार्थमेकएव पाकः। उत पृथगिति। तत
त्र पृथगिति भूमः। तथा च लोगाक्षिः। पित्र्यं निर्वापत्याकं वैश्वदेवार्थमेव च नैश्यस्य च क्षीः पाकस्य पृथक् चैक एक चैव क

द्रव्यप्रतिविशेषापरिज्ञानादपि प्रायेविद्वांसस्तिस एवाग्न्याहुतीर्वैश्वदेवेन पित्र्यर्थं नदार्शी वैश्वदेविकमिति। इतर
दितरार्थं नन्नवतीति पृथक्पाकः कर्त्तव्य इत्यर्थः॥ नदार्शमित्यत्र दार्शशब्देन तद्विकृतया नित्यनैमित्तिककाम्य
श्राद्धानि लक्ष्यंते। वैश्वदेविकमित्यत्र वैश्वदेवशब्देन भूतयज्ञादयः। अयं च पृथक्पाको वैश्वदेवस्य श्राद्धात्पूर्वं मध्ये
वा वैश्वदेवानुष्ठाने नन्तरत्रानुष्ठाने। तथा च पैठीनसिः। पितृपाकात्समुद्धृत्य वैश्वदेवं करोति यः॥ आसुरं तद्भवे
च्छ्राद्धं पितॄणां नोपतिष्ठत इति। न चैतद्वचनमुत्तरकालपि निषेधकं तदपि तस्य पितृपाकत्वात्तमेव॥ उत्तरकाले पितृसं
बंधस्य निवृत्तत्वात्। यदुद्दिश्य न परिकल्पितं यद्विदुरुक्तस्य तदुद्देशेन त्यागः स तत्तदुपभोगसमनंतरमेव तत्संबंधनिवृत्ते
न्यायित्वात्। एवमवशिष्टाद्वा पित्र्यपाता। अनंतानपि प्रायेणापि पैठीनसिरवाह। श्राद्धं निर्वर्त्य विधिवद्वैश्वदेवादिकं त
तः॥ कुर्यात् भिक्षां ततो दद्याद्धंतकारादिकं तथेति। अत्र प्रथमतः शब्दोऽद्धपरः। द्वितीयस्तु श्राद्धावशिष्टान्नपरः। एवं वायम
र्थः सिद्ध्यति। पितृपाकात्समुद्धृत्य वैश्वदेवं करोति यः॥ आसुरं तद्भवेच्छ्राद्धमिति यतः श्राद्धात्पूर्वं मध्ये वा निषेधस्त
तस्मात् श्राद्धात्। श्राद्धं निर्वर्त्य तत्स्थूलोच्छिष्टेन वैश्वदेवादिकं कर्त्तव्यमिति। अत्र वचनस्थादिशब्देन नित्यश्राद्धमपि गृह्यते ८५
। तेन यच्छाखीयो नित्यश्राद्धस्यापि वैश्वदेवयज्ञान्तःपातित्वं नास्ति तच्छाखीयानां श्राद्धपाकशेषेण पृथक्पाकेन वा नित्यश्राद्धं वैश्व

देवात्प्रागेव श्राद्धान्तर्यत्रापि मार्कंडेयः। ततो नित्यक्रियां कुर्यादिति। ततः श्राद्धशेषात् नित्यक्रिया। नित्यश्राद्धादि त
था पृथक्पाकेन नित्यस्यादिति। यदि ब्राह्मणविसर्जनात् वैश्वदेवस्तदा तच्छेषेणान्यत्र पृथगिति निर्णयः।
इति वैश्वदेवपाकनिर्णयः॥ ७॥ अथ वैश्वदेवकालनिर्णयः। तत्र साग्निः श्राद्धात्पूर्वमेव वैश्वदेवं कुर्वीत। तदाह ला
गाक्षिः। पक्षांते कर्म निर्वर्त्य वैश्वदेवं च साग्निकः। पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुधः। इति॥ पक्षांत मन्वाधानं। अ
न्वाहार्यकं दर्शश्राद्धं। ननु वैश्वदेवस्य पक्षांत पिंडपितृयज्ञमध्य विधिबलादेव साग्निककर्तृत्वावगतेः पुनः। साग्निकशब्दो
पादानमपार्थकमिति चेत्। मैवं। अन्वाधान पिंडपितृयज्ञकर्तुरौपासनाग्नेर्निवृत्त्यर्थीयं न सार्थकत्वात्। देवलोपि वै
श्वदेवानंतरमेव पिंडपितृयज्ञादि कर्त्तव्यतामाह। अश्नात वैश्वदेवस्थालीपाकः प्रकीर्त्तितः। अन्यत्रे पिंडयज्ञं तु
स्यापराह्णे विधीयत इति। स्थालीपाकशब्देन स्थालीपाकसाध्यकर्मोपलक्ष्यते। एतानि पक्षादौ नैकमीति। वैश्वदेवात्पू
र्वमेव कर्त्तव्यानि पिंडपितृयज्ञस्यापि स्थालीपाकसाध्यत्वेन तस्यापि पूर्वत्र कर्त्तव्यतायां प्राप्तायामपवादः। अन्यत्रेति।
पिंडपितृयज्ञादन्यत्रान्यः पिः। दर्शश्राद्धस्यापि पिंडपितृयज्ञानंतर्यमाह मनुः। पिंडयज्ञं तु निर्वर्त्य विप्रश्चंद्रक्षये ग्निमान्। पिं
डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकमिति। एवं च यानि श्राद्धात्पूर्वं वैश्वदे[illegible]कर्त्तव्यतापादकानि वचनानि ता

ग्निर

निसीसर्वाणि लोकाक्षिवचनानुसारात्। औतानग्निमद्विषयाणि च व्यवस्थापनीयानि। साग्निकस्याप्येकादशाहश्राद्धे पश्चा
द्वा सपिण्डनात् पार्वणश्राद्धं एकोद्दिष्टं तत्र पैत्र वा न स्यात्। विश्वेदेवाः स्युः तस्मादेकादशेऽहनीति परिशिष्टे विशेषवि
धानात्। तथा सालंकायनोपि श्राद्धं प्राग्न कुर्वीत विश्वेदेवं तु साग्निकः। एकादशाहिकं मुक्त्वा तत्र ह्यैतद्विधीयत इति।
एवं वैदिकाग्नेः श्राद्धात्प्राग्वनियमात्। अपसव्याग्नेरनग्नेश्चार्थात्प्रतिषेधात् यानि श्राद्धमध्ये विकिरान्ते ब्राह्मणविस
र्जनोत्तरं विश्वेदेवविधायकानि तान्यौपासना~~ग्नि~~ग्निविषयाण्यनग्निविषयाणि च व्यवतिष्ठन्ते। यानि च श्राद्धादौ निषे
धकानि तान्यपि तद्विषयाण्येव। अथवा साग्नेरपि श्राद्धपाकविषयाण्येतान्येव तस्य पृथक्पाकात् विश्वेदेवात् यानि निषेधवच
र्दर्शनात्। प्रतिवासरिको होमः श्राद्धादौ क्रियते यदि। दैवाह्यौ न वृद्धि कव्यानि पितरस्तथेति। वृद्धगौतमोपि पि
तृश्राद्धमकृत्वा तु वैश्वदेवं करोति यः। अकृतं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते। वसिष्ठः। वैश्वदेवमकृत्वैव श्राद्धं कुर्या
दनग्निकः। लौकिकेऽग्नौ कृते शेषः पितॄणां नोपतिष्ठते। अनग्निको वैदिकाग्निरहितोपि तस्यौपासनाग्नावपि वैश्वदे
वनिषेधः। अथ मध्ये लौकिकाग्निवानसाग्निकपदस्य सार्थकिं च प्रतिपादनं दर्शितः। अत एवात्र लौकिकाग्निरिति सा ८६
त्ताग्निरप्युपलक्षणम्। औपासनाग्नेरनग्निकस्य च त्रयः काला वैश्वदेवे एकः श्राद्धमध्ये अपरो विधिः कीर्तितः अन्यो ब्राह्मण

वृ त्रिं १

विसर्जनोत्तरं। तत्र मध्ये कर्तव्यतामत्स्यपुराणे। वैश्वदेवाहुतीरग्नावर्वाक् ब्राह्मणभोजनात्। जुहुयाद्भूतयज्ञादि श्राद्धं
त्र कृत्वा तु तत्स्मृतमिति। ब्राह्मणभोजनादर्वाक् अग्नौकरणानन्तरमित्यर्थः। अत्र भूतयज्ञादेः श्राद्धानन्तरकर्तव्यताविधाना
दस्मिन्प्रयोगे यानि भूतयज्ञोत्तरभावीनि कर्माणि सैवद्धक्रमाणि तानि तदा द्युत्कर्षन्यायेनाकृष्टानि श्राद्धान्तकर्तव्यानि।
न तु भूतयज्ञात्पूर्वभावीन्यकृष्टव्यानि। यच्छाखायां बलिहरणादिकमत्र भूतयज्ञादिकं तेषां बलिहरणादिकस्यैवाकृ
ष्टिः। येषां तु बलिहरणादिव्यतिरिक्ता भूतयज्ञाः तेषां बहिर्बलिव्यतिरिक्तभूतयज्ञावधिकानां बलिहरणादीनामपि
श्राद्धमध्ये कर्तव्यतापत्तेरिति विवेकः। न चैवं मंतव्यं। प्रारब्धे पित्र्ये कर्मण्यसमाप्ते तन्मध्ये कर्मान्तरकरणमयुक्तमि
ति निशाक्षिन्यायेन विरोधात्। अत एव हूतपात्रपूर्वकनिर्मितत्वात् तेषु ब्राह्मणेषु श्राद्धापरिसमाप्तावेव सायंप्रातर्होमि
करणी। द्वितीयः कालोऽत्र विष्णुपुराणे। पितॄन्संतर्प्य विधिवद्बलिं दद्याद्विधानतः। वैश्वदेवं ततः कुर्यात्स्वाद्ब्राह्मण
भोजनात्। बलिरत्र विकिरसंज्ञकः। यत्र मात्रे वाप्ये अग्निदग्धा मे त्वं प्रजामि यन्ति हिपन्तु धुधःजानीहि तं बलिं वा रश्रा
द्धकर्माणि सर्वदा। इति। पश्चाद्भुक्ते ब्राह्मणभोजने भूरिभोजने भूरिभोजने। तृतीयः कालो ब्राह्मणविसर्जनोत्तरं मत्स्य
पुराणादर्शितः। उच्छेषणं तु तत्तिष्ठेद्यावद्विप्रा विसर्जिताः। वैश्वदेवं ततः कुर्यान्निवृत्ते पितृकर्मणि। मनुरपि। पूर्वार्द्धं तादृव।

नतोऽथ दद्याद्बलिं कुर्यादिति। धर्मो व्यवस्थित इति। बलिश्चाष्टौ विश्वेदेवप्रदर्शनार्थ इति मत्तो मेधातिथिः॥ तद्विष्णुपुराणे॥ स्व
याश्राद्धमहावाद्या ब्राह्मणाश्च विसर्जयेत्। विश्वेदेवादिकं कर्म्म ततः कुर्यान्नराधिपः इति॥ इति विश्वेदेवकालनिर्णयः॥ ७॥
अथातिथिपूजा॥ तत्र विष्णुपुराणे ततो गोदोहमात्रं वै तिष्ठेत्काले गृही गणे। अतिथिग्रहणार्थाय तदूर्ध्वं च यदृच्छ
या॥ वैयाघ्रपद्यः॥ अचिंतितमनाहूतं विश्वेदेवे त्ववस्थिते। अतिथिं तं विजानीयान्नैकग्रामनिवासिनं। क्षुधार्त्तं श्रित
श्चैव स्नातो गृहमुपागतः। प्रयत्नेन तु संपूज्यः सोऽतिथिः स्वर्गसंक्रमः। इष्टो वा यदि वा द्वेष्यो मूर्खः पंडित एव वा॥ संप्राप्तो
विश्वेदेवान्ते सोऽतिथिः स्वर्गसंक्रमः। नष्टे छेद्योऽन्नवरणे न स्वाध्यायव्रतानि च। वित्तेन तावा यत्नो विसर्ज्जदेवमथ्याहिंसः॥ विष्णुः॥
अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्त्तते। स तस्य दुःकृतं दत्वा पुण्यमादाय गच्छति। याज्ञवल्क्यः॥ दिनं तिथौ तु विमुख
गतं यस्मात्कत्तव्यतां न देवाश्च गुणे प्रोक्तं सूर्यादि विमुखागतं। शंखः॥ शृंगः। गवीयासी चकुर्वीत नित्यामवसमाहितः॥ गवां
कुंडूयनं स्पर्शं यासमाह्निकमेव च। मार्कंडेयपुराणे॥ अस्नाताशी मलं भुंक्ते अजपः पूयशोणितं। अहुत्वाग्निं तु कृमीन्भुंक्ते
अदत्वा विषभोजनं। आत्मार्थं पचनं यस्य रत्यर्थं यस्य मैथुनं। वृत्यर्थं यस्य चाधीतं निःफलं तस्य जीवितं॥ ८॥ अथ भोजनवि
धिः। तत्रादौ बलहारीतो आहारं तु रहः कुर्यान्निर्हारं चैव सर्वदा। गुप्ताभ्यां लक्ष्मीपतः स्यात्प्रकाशे हीयते श्रियां मनुः॥ उपस्पृ ८७

दंन्पु

श्य द्विजो नित्यमन्नमद्यात्समाहितः। आपस्तंबः॥ यस्तु भोजनशालायां भोक्तुकाम उपस्पृशेत्। आसनस्थो न चान्यत्र स विप्रः
पंक्तिदूषकः। भोजनशालायां भोक्तुकामः सन् आसनस्थो वाऽन्यत्र वा आसनस्थितो वा न चोपस्पृशेत्। यस्तूपस्पृशेत्स
पंक्तिदूषक इत्यर्थः॥ याज्ञवल्क्यः॥ बालस्ववासिनी वृद्धगर्भिण्यातुरकन्यकाः। संभोज्यातिथिभृत्यांश्च दंपत्योः शेषभो
जनं॥ यमः॥ विप्रः स्वर्गपरो नित्यमर्चयित्वा तु देवताः। गुरून्नतिथिबालांश्च तर्प्पयित्वा तु वीमवत्। आत्मानं तर्प्पयित्वा च
यतो वाग्यतः शुचिः। स्त्रीशूद्रं तर्प्पयित्वा तु एष धर्मः सनातनः। व्यासः॥ पैत्रा द्वीभोजनं कुर्यात्प्राङ्मुखो मौनमास्थितः॥ ह
स्तौ पादौ तथैवास्यमेषां पैर्वाद्रतामता॥ बोधायनः। प्राङ्मुखोऽन्नानि भुंजीत शुचिः पीठमधिष्ठितः। विष्णुः॥ न तु वि आसनो न
रितो यो हि नाभुपविष्टपति। आसानवर्ज्यान्याह प्रचेताः॥ गोशकृन्मृन्मये भिन्ने तथा पालाशपिप्पले। लोहबद्धं सदैवार्कं
वर्जयेदासनं बुधः॥ ब्रह्मपुराणे॥ उपलिप्ते समे स्थाने शुचौ शुद्धासनान्विता। मंडलं गामयेन स्यादथवा गोरमृत्स्नया॥ अत्र
विशेषमाह वृद्धहारीतः॥ चतुरस्रं त्रिकोणं च द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य तु। मंडलाकृति वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतं। व्यासस्तु शू
द्रस्याप्यर्धचंद्राकृतिं मन्यते स तु रस्वी त्रिकोणं च वर्त्तुलं वार्धचंद्रकं। कर्त्तव्यमानुपूर्व्येण ब्राह्मणादिषु मंडलं। हारीतः॥ न काष्ठ
यसमृन्मये वा पात्रे अश्नीयात्। मनुः॥ न पादौ धावयेत्कांस्ये कदाचिदपि भाजने। न भिन्नभांडे भुंजीत न भावप्रतिदूषिते।

भिन्नतौउनिषधस्याद्यादिव्यतिरिक्तविषयः॥ तथा चापैठीनसिः॥ ताम्ररजतसुवर्णशंखमुक्ताश्मस्फटिकानीति भिन्नमभिन्न
मितिताम्रपात्रेयतिविषयं। गृहस्थस्य निषिद्धत्वात्॥ तथा च वृद्धमनुः॥ ताम्रपात्रे न भुंजीत भिन्नकांस्यमलाविले। पलाश
पद्मपात्रेषु गृहस्थस्तु भुक्त्वैचांद्रायणं चरेत्। पलाशाद्वल्लीपलाशाइति स्मृत्यर्थसारकारः। एकएव तु यो भुंक्ते विमलकांस्यभाज
ने। चत्वारि तस्य वर्द्धंते आयुः प्रज्ञा यशो बलं॥ अत्रिः॥ आसनपादमारोप्य यो भुंक्ते ब्राह्मणः क्वचित्। मुखेन चान्नमश्नाति
तुल्यं गोमांसभक्षणे। मुखेन गवादिवदित्यर्थः। बोधायनः। भोजनं हवनं दानमुपहारप्रतिग्रहः। बहिर्जानु न कार्याणि
तद्वदाचमनं स्मृतं। हारीतः। मार्जनार्चनबलिकर्मभोजनानि चादक्षिणेन कुर्यात्। वृद्धमनुः॥ न पिबेन्न च भुंजीत द्विजः सव्य
न पाणिना। नैकहस्तेन च जलं शूद्रेणावर्जितं पिबेत्। मार्कंडेयः॥ पादप्रसारणं कृत्वा न चावेष्टितमस्तकः। विष्णुः। नाश्नी
याद्भार्यया सार्द्धं नाकाशे न तथोत्थितः। शयानः प्रौढपादश्च न चावेवावसक्थिकः। आकाशयत्वादोषं तत्र विशेषमाह
मार्कंडेयः॥ न्यस्तपात्रस्तु भुंजीत पंचग्रासान्महामुने। शेषमुद्धृत्य भोक्तव्यमिति। उद्धृत्य मैत्र्यादौ पात्रं पार्श्वे निक्षिप्य
र्थः। पित्रर्थभोजने तु भूमौ पात्रस्थापनमावश्यकं। पित्रर्थं तु न स्तु प्यतइत्यत्रिवचनात्। आपस्तंबेनाभिधानात्। पादारो
पितपादः प्रौढपादः॥ ब्रह्मपुराणे॥ पंचग्रासीउभुंजीत चक्रवत्तिद्रमनिसीकांपात्रमुद्धृत्य शेषं तु तस्माच्छीकरांगुयात्। पि

यं२ ञा४

९८

त्यक्तमपि भुंजानान्नूमौ पात्रं न चालयेत्। विष्णुः॥ न भिन्नभाजनान्नाश्नीयात् न तु विनप्राणोत्क्षेपणं ऊर्ध्वरूपरिपात्रं स्था
पयित्वा। वसिष्ठः। सर्वाभिरंगुलीभिरश्नीयात् पाणिं च नावधूनुयात्। मार्कंडेयः॥ यस्तु पाणितले भुंक्ते यश्च फूत्कारसंयुतं। प्रसृतां
गुलिभिर्यश्च तस्य गोमांससाशनवत्स्मृतं। सवायुं सशब्दमित्यर्थः॥ विष्णुः॥ नोच्छिष्टो घृतमादद्यात्। आदित्यपुराणे॥ नोच्छिष्ट
आदायदाज्यीजग्धशिष्टं न सेव्याजतां। मद्रलुक्तावशिष्टं तु नाद्याद्धौउच्छिष्टं च पिं। तथा न संध्यायां न मध्याह्ने नार्द्धरात्रे कदाचन।
नार्द्रवासा नार्द्रशिरा न चायज्ञोपवीतवान्। एवं सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितं। नांतरा भोजनं कुर्यादग्निहोत्रसमो
विधिरिति मनुनाय सायं प्रातरित्यपात्रं तत्तु रात्रिदिनयोर्ग्रहणार्थं न तु संध्याकालनियमार्थं न संध्यायामिति निषेधात्। अ
ग्निहोत्रसाम्यविधानाद्दिवारात्रोर्वा द्विर्भोजनं निषिद्धमिवाएवं पूर्वोक्तप्रकारेण सुखोदङ्मुख उपविष्टउक्तनियम उक्तमंत्रै
र्वा व्याहृतिनिर्गायित्र्या वान्नमभिमंत्र्यास्पृश्य परिषिच्य धर्मराजादिबलिं दत्वा आपोशानक्रियां च पंचग्रासान्हृद्यात्राज
नानीतरमनग्नीकरणादिके विधायाचमनं कुर्यात्। तथा चाश्वलायनः। अथातः प्राणाहुतिकल्पो व्याहृतिभिर्गायित्र्या वानिम
नो२ त्र्यान्नं तेचासत्येनपरिषिंचामीति सायं सत्यं च त्वर्तेन परिषिंचामीति प्रातः। अंतश्चरसि भूतेषु गुहायां विश्वतोमुखः। त्वं यज्ञ
स्त्वं वषट्कारस्त्वं ब्रह्मा त्वं प्रजापतिः॥ आपो ज्योती रसोमृतं ब्रह्म भूर्भुवः सुवरो ममृतोपस्तरणमसीत्यपः पीत्वा दशहोतारं म

डाक्टर भाऊदाजीइत्यस्य पुस्तकम्
DR. BHAU DAJI MEMORIAL

डाक्टर भाऊदाजीइत्यस्य पुस्तकम्
DR. BHAU DAJI MEMORIAL

नसानुस्मृत्याचरन्नेवग्रासान्गृह्णीयात्। प्राणायस्वाहेतिगार्हपत्यमेवतेनजुहोत्यपानायस्वाहेत्यन्वाहार्यपचनम
वतेनजुहोतिव्यानायस्वाहेत्याहवनीयमेवतेनजुहोत्युदानायस्वाहेतिसभ्यमेवतेनजुहोतिसमानायस्वाहेत्याव
सथ्यमेवतेनजुहोतीतिशौनकस्तुविशेषमाह॥ स्वाहान्ताःप्रणवाद्याश्चनाम्नामंत्रास्तुवायवः। जिह्वयाचग्रसेदन्नंदशना
न्नसंस्पृशेत्। तर्जनीमध्यमांगुष्ठलग्नाप्राणाहुतिर्भवेत्। मध्यमानामिकांगुष्ठैरपानंजुहुयाद्बुधः। कनिष्ठानामि
कांगुष्ठैर्व्यानंतुजुहुयाद्धविः॥ तर्जनींतुबहिःकृत्वाउदानंजुहुयाद्बुधः॥ समानंसर्वहस्तेनसमुदायाहुतिर्भवेत्। नविष्णु
पुराणे। भोजनात्किंचिदन्नाग्रंधर्मराजायवैबलिं। चित्रायचित्रगुप्तायप्रेतेभ्यश्चसमुद्धरेत्। ब्रह्मपुराणे। हस्तेनैवघृतप
न्नान्नेसोदकनकदाचन। दंतादृष्टेचघायदन्नंतेनान्नेनिहतंभवेत्॥ विष्णुपुराणे। अश्नीयात्तन्मनाभूत्वापूर्वंतुमधुरंरसं।
लवणाम्लौतथामध्येकटुतिक्तादिकांस्ततः॥ प्राग्द्रवंपुरुषोश्नीयान्मध्येतुकठिनाशनं। अंतेपुनर्द्रवाशीतुबलारोग्ये
नमुंचति। जठरंपूरयेदर्धमन्नैर्भागंजलस्यच। वायोःसंचारणार्थायचतुर्थमवशेषयेत्। आदिपुराणे॥ एकपंक्तिर
नुष्ठायमध्येविदाचामत्यसः। तदाशेषंविहायैवविप्रःसम्यगुपस्पृशेत्। एकपंक्त्युपविष्टानांसर्वेषांभोजनेपरिस ८९
माप्तेरच्यर्थः। पंक्तिभेदमाहबृहस्पतिः॥ अग्निनाभस्मनाचैवस्तंभेनसलिलेनवा। द्वारेणैवचमार्गेणपंक्तिभेदोबुधैःस्मृ

तः। यासनियममाहापस्तंबः। अष्टौग्रासामुनेर्भक्ष्याःषोडशारण्यवासिनः। द्वात्रिंशत्तुगृहस्थस्यअमितंब्रह्मचारिणः। आहि
ताग्निरनड्वांश्चब्रह्मचारीचतेत्रयः। अश्नन्तएवसिध्यंतिनैषांसिद्धिरनश्नतां। यदागृहस्थस्योपवासःप्राप्तस्तदाबोधायना
क्तंद्रष्टव्यं। प्राणाग्निहोत्रमंत्रांस्तुनिरुद्धेभोजनेजपेत्। त्रेताग्निहोत्रमंत्रांस्तुद्रव्यालाभेजपेदिति। निरुद्धेभोजनइति
उपवासनभोजनरहितइत्यर्थः। पुलस्त्यः। भोजनेतुनिःशेषंकुर्यात्प्राज्ञःकथंचन। अन्यत्रदधिसक्त्वाज्यपललक्षीरम
धुपः। भोजनानंतरंदेवलः। उच्छिष्टंसमादायसर्वस्मात्किंचिदावमन्। उच्छिष्टभागधेयेभ्यःसोदकंनिर्वपेद्भुवि। अत्रमंत्रः॥
रौरवेपुण्यनिलयेपद्मार्बुदनिवासिनां। अर्थिनामुदकंनित्यमक्षय्यमुपतिष्ठत्विति॥ गर्ग्यव्यासः॥ ततस्तृप्तःसन्नमृतापि
धानमसीत्यपःप्राश्यतस्मादाचामेत्। नागपाशिश्चविधिवदाचामेत्। अपोशानभ्योकव्यासः। हस्तंप्रक्षाल्यगंडूषंयःपिबेत्पा
पामादितः। सदैवंवैवपित्र्यैश्चआत्मानंविवसादयेत्। अर्धंपीत्वातुगंडूषमर्धंत्याज्यंमहीतले। रसातलगतान्नागांस्तेन
प्रीणातिनियशः। देवलः। आचम्यचततःकार्यंदंतकाष्ठस्यभक्षणं। भोजनदन्तलग्नानिनिर्हृत्याचमनंचरेत्। दंतलग्नम
संकार्यंलेपंमन्येतदंतवत्। नतत्रबहुशःकुर्याद्यत्नमुद्धरणंप्रति। दंतलग्नमसंहार्यंस्नेहानाप्यतंयत्रत्याज्जेवस्तुचिर्ना
चामेत्। तथाच। याज्ञवल्क्यः। स्पृष्टवास्यगतंदंतसक्तंत्यक्त्वांतंशुचिः। मनुर्निगिरन्नपिशुचिरित्याह। दंतवद्दंतलग्नेषुजि

ह्वास्यशिष्टिरिष्यते।परित्यक्तेषुचस्थानान्निगिरान्नवतछुतिःपरित्यागनिगिरणयोर्विकल्पः॥स्थानचलनात्।प्राक्
जिह्वाघदानपिष्ठुविरित्याहगौतमः॥दंतश्लिष्टेषुदंतवदन्यत्रजिह्वानिमर्शनात्प्राक्च्युतारकइति।प्राक्च्युते
र्जिह्वानिघट्टनाद्दोषानास्तीत्यर्थः॥एवंदंतधावनानंतरंदवलः॥आचीताहृदयादशमभिमृशतिप्राणानेयथिर
सिरुद्गामाविशान्त्वेकस्तेनान्ननाद्यायस्वेति।पुनराचम्यदक्षिणपदांगुष्ठेपाणिंनिश्रावयति।अंगुष्ठमात्रःपुरुषोंऽ
गुष्ठश्चसमाश्रितः॥ईशःसर्वस्यजगतःप्रभुःप्रीणातुविश्वभुक्।ततःकरादिकमस्पृशन्जानुनीसंस्पृशेत्।तथा
चवामः॥माकारणकरस्याद्वीमर्जिंघेमाचचक्षुषी।ऊरूसंस्पृशाकालयत्नर्त्तव्यफोमहाजनः।ऊरूजानुनी॥जानुनोस्पृश
रोर्जंघेकर्त्तव्याबहवायद्वीतितन्निवाभिधानात्।मार्कंडेयः॥भूयोप्याचम्यकर्त्तव्यंततस्तौबलमद्दणी।स्ववणीवर्तिहासस्य
ततःकुर्यात्समाहितः।याज्ञवल्क्योपि।अह्नःशेषंमहासीतशिष्टैरिष्टैश्चबंधुभिरिति॥इतिभोजनविधिः॥ ॥अथभोज्याभो
ज्यद्रव्याणि।तत्रयाज्ञवल्क्यः।अनर्चितंवृथामांसंकेशकीटसमन्वितं।शुक्तंपर्युषितोच्छिष्टंश्वस्पृष्टंपतितेक्षितं।उदक्यास्पृ
ष्टंसंघुष्टंपर्यायान्नानिवर्जयेत्।गोघ्रातंशकुनोच्छिष्टंपदास्पृष्टंचकामतः॥अनर्चितंअवज्ञापूर्वकंदत्तं।वृथामांसंअनि
षिद्धंघ्नपिमांसेष्ठविहितकालसंपादितं।शुक्तंकालनाम्लीभूतंपर्युषितंरात्र्यंतरितं।एतच्चदध्यादिव्यतिरिक्तंनपर्युषित ए
१००

ये५

मन्यरागषडेवचुक्रदधिगुडगोधूमयमपिष्टविकारस्याइतिशीरसस्मरणात्।यदुद्घुष्यदीयतेतत्संघुष्टान्नं।अत्रप्र
तिपशाकः।अन्नंपर्युषितंभोज्यंस्नेहाक्तंचिरसंस्थितं॥अस्नेहाअपिगोधूमयवगोरसविक्रियाः॥क्षीरखः।अत्रपाः
सक्तवोधानास्तक्रंदधिघृतंमधु।एतत्पण्यंभुक्तान्नंवाच्यंतोउलपोनाचङ्गावत्।जद्दाणि।जद्दपाःपंचनखाःसेधागोधाक
छपसल्यकाः।शशश्चमत्स्येष्वपिसिंहतुंडकरोहिताः।जक्षणकालमाह।प्राणात्ययेतथाश्राद्धेप्रोक्षितंद्विजकाम्यया।
देवान्पितॄन्समभ्यर्च्यखादन्मांसंनदोषभाक्।प्रोक्षितंयागप्रोक्षणाख्यसंस्कारणसंस्कृतंद्विजकाम्ययाब्राह्मण
ये भोजनार्थंयस्मिन्पाचितमतिथिप्रभृतिनादौतदुच्यते।यत्तुनिगमवचनंअक्षतागोपशुश्चैवश्राद्धेमांसंतथामधु।देव
राघसुतोत्पत्तिः।कलौपंचविवर्जयेदितिनिषेधःकलियुगब्राह्मणकर्तृकश्राद्धविषयस्तुत्पत्रेब्राह्मणस्योक्तंमांसेद्र
ज्ञेयाविरूपायाः।मधुप्रधानंश्राद्धस्येतिश्राद्धप्रकरणेमुख्यत्वेनविशेषाभिधानाच्च।द्विजदेवतापितॄन्द्रोनतस्ययः
शेषस्तस्याचवरूपत्वपनतानाप्तिनदोषभागित्युपादानादन्यत्रतृणेप्रत्यवायोनास्तीतियात्लागम्यते।उक्तप्रकारव्य
तिरेकेणदोषमाह।वसेत्सनरकेघोरदिनानिपशुरोमभिः॥संमितानिदुराचारोयोहत्याविधिवत्पशून्।परित्यक्त
मांसस्यफलमाह।सर्वान्कामानवाप्नोतिहयमेधफलंतथा।गृहेपिनिवसन्विप्रोमुनिर्मांसविवर्जनादिति॥इतिभोज्या

भोज्यद्वीन्नः ॥७॥ अथ भोज्याभोज्यद्रव्यप्रसंगाद्भोज्यान्नान्यभोज्याअपि प्रदर्शयितानन्वगोतमः ॥ प्रसक्तानीष्वकर्म
सु द्विजातीनी ब्राह्मणस्तुंजीतेति। प्रशस्तानामित्यपि पाठः॥ स्वकर्मसु प्रशस्तानां निष्ठातानीत्य कर्मनिरतानामिति
यावत्। याज्ञवल्क्योऽपि। परपाकरुचिर्न स्यादनिंद्यामंत्रणादृते इति। जमदग्निरपि वीनसी। ब्राह्मस्य सदाश्नीयात् क्षत्रिय
स्य पर्वसु। प्रशस्तेषु चादेशस्य स्य शूद्रस्य न कदाचन। अत्रापि ब्राह्मणादयः स्वकर्मनिष्ठा एव पर्वसु दर्शमादिषु प्र
शस्तेषु प्रक्रमविशेषेषु श्राद्धभोगमांगलादिषु ॥ तथा॥ अमृतं ब्राह्मणस्यान्नं क्षत्रियस्य पयः स्मृतं विशपस्य त्वन्नपेया
न्नं शूद्रस्य रुधिरं स्मृतं। अभोज्यान्ना याज्ञवल्क्येन दर्शिता॥ अग्निहीनस्य विप्रस्य नान्नमद्यादनापदि। कदर्यबद्धचोर
णोक्लीवरंगावतारिणां वेणाविशस्त्रवार्धुष्यगणिकागणदीक्षिणां। एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथेति। अग्निही
नः श्रौतस्मार्ताग्निरहितः शूद्रादिः स च यद्यधिकारग्निहीनो ब्राह्मणादिश्च कदर्यो लुब्धः बद्धो निगडादिना। वेणा वीणावादनजी
वीवार्धुष्यो निषिद्धवृद्ध्युपजीवनो। आत्मस्तुति परनिंदाकरणी वा तथाव विद्ध्युः॥ यत्तु निंदत्यरंजीवंश्चद्रीसख्यात्मनापुगणानु
सविवादुषिकानाम ब्रह्मीवादिषु गर्हितेति। गणदीक्षा नद्भुयाजकः। शूद्रस्य न कदाचनेत्यग्निहीनस्य नान्यमद्यादना
पदीत्यादिनिषिद्धस्य भोज्ये प्राप्ते प्रतिप्रसवमाह याज्ञवल्क्यः॥ शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः। भोज्यान्ना १५१

नापितश्चैव यश्चात्मानं निवेदयेत्। दासा गर्भदासादयः। गोपालो गोप्रतिपालनजीवी। कुलमित्रं वंशपरंपरायातः।
अर्द्धसीरी सस्यसमुद्भागिता सह कर्षकः। अथवा सीरी फलहेतुकृषिफलार्द्धग्राही। नापितो गृहे व्यापारकारयिता
क्षौरकर्ता। विप्रस्य शूद्रा कीलए एव वाब्राह्मणः कायकर्मनि रात्मानं द्विजाय निवेदयति तवाहमिति ददाति स चात्मनिवे त
दयिता। एतदासादयो यदीयास्तस्यैवैते भोज्यान्नाः। यथाह हारीतः॥ कुलमित्रकुलपुत्रोऽलिंदकः शिल्पकः सुहृत्तामव
ये५ त्वेद्यस्य सुखे ला त्वान वेंनाता वाया यावत्। कुलपुत्रः कुलमित्रपुत्रः आवद्य स्यय स्य संबंधी न वेद्य थीः। अत्र च श
ब्दः सर्वत्रैवेति एतदासादयोऽपि स्वविहितनित्यकर्मनिरता एव भोज्यान्नाः। तथा च मनुः। नाद्याच्छूद्रस्य पक्वान्नं विद्वान
श्राद्धिनो द्विजः। आददीताममेतस्मादवृत्तावेकरात्रिकं। अश्राद्धी नित्यश्राद्धरहितः एतच्च नित्यकर्मप्रदर्शनार्थं एकरा
त्रिकाम काद्यः पर्याप्तिः पक्वान्नाद्यपि विशेषतः। सुमन्तुर्गिरसो। गोरसं चैव शक्तुं च तिलं पिण्याकमेव च। अस्यात्रह्यये
शूद्राद्य शान्न्यत्ययसंमतं। हारीतः। कंदु पक्वं स्नेहपक्वं पायसं दधिसक्तवः। एतान्यशूद्रान्नभुजो भोज्यानि मनुरब्र
वीत्। एवं च यानि शूद्रान्ननिषेधकानि वचनानि तानि परिगणितशूद्रपरिगणितेन पक्वान्नव्यतिरिक्तविषयाणि। यानि
च दोषादिलक्षणानि पराशरस्मृतावभिहितानि तानि वचनान शूद्राणि प्रायेण। तथासति परस्परविरोधात् लक्षणानि च

शूद्रकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः। संस्कारेषु न वेदोक्तः स तु संस्कार्य नापितः॥ क्षत्रियाच्छूद्रकन्यायां समुत्पन्नस्तु ना
मतः। गोपालस्तु स विज्ञेयो भोज्यो विप्रैर्न संशयः। वैश्यकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः। कुलमित्रानि पिर्ज्ञेयो भो
ज्यो विप्रैर्न संशयः। शूद्रकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः। तदर्द्धिकस्तु विज्ञेयो भोज्यो विप्रैर्न संशयः। गोपालस्य क्ष
त्रियो जनकः। अन्येषां तु ब्राह्मणः। अत्र यद्यपि दासनापितगोपालानां मातृद्वारा शूद्रत्वमुपपन्नं तथापि कुलमित्रार्द्धसीरिणो
र्मातृद्वारापि। तत्र यद्यपि मातृद्वारा शूद्रत्वं कल्प्यन्ति एतच्छूद्रेषु भोज्यान्नत्वान्न विरोधः स्यात्। किं च शूद्रविशिष्ट
जातीतः पातित्यादातेषां न शूद्रत्वं तथा चैतेषां शूद्रत्वमूर्द्धावसिक्तादिजातिप्रतिपादकवचनैः सह विरोधः स्यात्॥ लक्षणाव
कल्पनीयमभिप्रायः शूद्रस्वरूपवासादीनां भोज्यान्नत्वकथनप्रसंगात्। दृष्टदृष्टिं सहास्त्रराणीवदासादिसंज्ञा अपि
संज्ञातिप्रदर्शनार्थामिति। अत एव सुतो जातस्तु नामतः। गोपालस्तु स विज्ञेय इत्यत्र नामत इति ग्रहणीतं। किं चात्रा
ऽन्निर्वदकस्य कुलकारादेश्च केवलं शूद्रत्वात्तन्यायाननत्वादेषामपि शूद्रत्वमवश्यम्भावी इति भोज्याभोज्यान्ननिर्णयः
॥ ॥छ॥ ॥ अथ शयनविधिः॥ तत्रादौ शिरः। तत्र याज्ञवल्क्योपि॥ उपास्य पश्चिमां संध्यां हुत्वाग्नींस्तानुपास्य चान्नं चैः प
रिवृतो भुक्त्वा नातितृप्त्याथ संविशेत्। स्वकाले विश्वदेवादि सम्प्रयार्थः॥ एतद्यपाकेन तरणं न दिवा वसिष्ठेन। तथा सवि

ष्णुपुराणे पुनः पाकस्तु पाद्यायसायमध्यवनीपात। वैश्वदेवनिमित्तं वै पत्न्या सार्द्धं बलिं हरेत्॥ व्यासः। सुप्तो दशोवि
विलिखितागामयानापालपिता। प्रागुदक्पश्चिमाण विवसे विशन्तु सदा बुधः। तथा॥ मंगल्यं पूर्णकुंभं च शिरःस्थाने निधा
य तु। वैदिकैर्गारुडैर्मन्त्रैः रक्षां कृत्वा स्वपेत्ततः। विष्णुपुराणे। गच्छेच्छय्यामस्फुटितामपि दारुमयीं नृप। अस्पृश्य प्रक्षालित
चरणः सर्वथा रक्षां कृत्वा सुप्ताः मालमिति प्रवन्दशय्यामधिष्ठाय रात्रिसूक्तं जप्त्वा विष्णुं नमस्कृत्य सर्पापसर्पणेन्द्रं तस्य तत
वि.मा.५ तु श्लोकद्वयं जप्त्वेष्टदेवतास्मरणं कुर्यात्। सर्वास मांस्था यो यौ च वेदिकान्नीयान्सा वित्रीं जप्त्वा मंगलसूक्तिनी स्वस्त्वात् एवं दक्षिणाशि
राः स्वपेदिति दक्षिणशिरा इति प्रदर्शनार्थं अत एव पुराणे॥ प्राच्यां दिशि शिरः शस्तं याम्यायामथवा नृप। सदैव स्वपतः पुं
सो विपरीतं तु रोगदमिति। मार्कण्डेयः॥ शून्यालये श्मशाने च एकवृक्षे चतुःपथे। महादेवगृहे वापि मातृवेश्मनि न स्व
पेत्। प्रचेताः॥ न संध्यायां शयीत न देवसमीपे न विद्वत्समाप्तौ नाशुचिर्न नग्नो न विश्रामाय योगनरूपदयाय तने
षु न श्मशाने वल्मीके महावृक्षच्छायासु चेति। विष्णुः॥ नार्द्रपादः स्वपेत् न पलाशशयने न पञ्चदारुजाते न गजभग्नजा त
न विद्युद्दग्धजे नाग्निप्लुष्टे न पर्णसिक्तद्रुमजेन बालमध्ये नारिमध्ये न धान्यगोगुरुदेवताशास्त्राणामुपरि नाप्यद्य प्रोन दि
विति। तथा निद्रासमये मासाद्यतीव वदनाच्छादयेत्। पर्यंके स्वमदोलीनालुपूर्वाणि मस्तकान्त। गद प्रमादयद्दा

द्विजपदाः सर्वदा शम्॥ छ॥ इह मदनपारिजाते मदनक्षितिपालदानजलरूढे स्तबके तृतीयश्चासीदामोदायाहृष्टपंडित
भ्रमरः। मतिर्यथा शास्त्रप्रकृतिरमणीयाच्च वहति पराशीलं श्लाघ्यं जगति सजवस्तोकतिपाय। विरचितां तत्र तर्षीमुक्तकृ
तलक्षूतस्थितिमियादिये यासारण्यप्रवरमुनिशिष्यस्पर्शणितिः॥ छ॥ ॥ इति पंडितपारिजातकद्रुमहद्दे विश्वेश्वरा
जीविराजमानस्य श्रीमदनपालस्य निबंधे तृतीयस्तबकः॥ ॥छ॥ अथ शयनानंतरप्राप्तगर्भाधानादिसंस्काराः तत्र ग
र्भाधाने प्रयुक्त वन प्रथमं ऋतुकालो निरूप्यते॥ याज्ञवल्क्यः॥ षोडशर्तुनिशाः स्त्रीणां तस्मिन्युग्मासु संविशेत्। ब्रह्मचा
र्येव पर्वाण्याद्याश्चतस्रश्च वर्जयेत्॥ स्त्रीणां षोडशनिशाः ऋतुः गर्भाधानयोग्यकालः। तत्रोक्तविधिना गच्छन् ब्रह्मचार्येव चतुर्द
श्यष्टमी चैवममावास्या च पूर्णिमा। पर्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च॥ मनुः॥ अमावास्यामष्टमीं च पौर्णमासीं च
तुर्दशीं। ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः॥ तथा॥ तासामाद्याश्चतस्रस्तु निंदितैकादशी च या। त्रयोदशी च शेषास्तु
प्रशस्ता दश रात्रयः॥ एकादशीत्रयोदश्यावृतावर्णि पर्वस्य हारीतस्तु चतुर्थरात्रावपि गर्भाधानमिच्छति॥ चतुर्थेह्नि स्नाता
यां युग्मासु च गर्भाधाने तदुत्पत्ते ब्रह्मगर्भं संदधातीति॥ तथा॥ शुद्धा भर्तुश्चतुर्थेह्नि स्नानेन स्त्री रजस्वला दैवे कर्मणि पि १०३
त्र्ये च पंचमेह्नि शुध्यतीति। ततश्च चतुर्थ्यां स्त्रीगमनस्य विहितप्रतिषिद्धत्वात् विकल्पः। स च यथा स्थितः। रजोनिवृत्तौ चतुर्थ्यां विधिः।

पृ ४

तदनुवृत्तौ प्रतिषेधः। अनानिवानिप्रायेण मनुः। रजस्युपरते साध्वी स्नाते न स्त्री रजस्वलेति साध्वी गर्भाधानादिविहित
कर्मयोग्येत्यर्थः। याज्ञवल्क्यः। एवं गच्छन् स्त्रियं क्षामां मघां मूलं च वर्जयेत्। सुस्थ इंदौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान्॥ सकृ
त् एकस्यां रात्रावेकवारमेव गच्छेदित्यर्थः। पुमानुक्तनियमयुक्तः अप्रतिहतवीर्यो वा। ज्योतिःशास्त्रे पित्र्यं पौष्णं नैर्ऋतं
चापि धिष्ण्यं त्यजेदिति। पित्र्यं मघा पौष्णं रेवती नैर्ऋतं मूलं ऋतुगमने स्नानमाद्यापर्वसं कृतो वेगर्भो किंवा तु स्नानं मैथुनिनः
स्मृतं। अमृतौ तु सदा कार्यं शौचं मूत्रपुरीषवत्। ऋतावत्र तु नावस्थ्याः स्यात्तां दंपती शयनं गतौ। शयनादुत्थिता नारी शुचिः स्याद
शुचिः पुमान्॥ प्रसंगात् रजस्वलाव्रतानि। तत्र वसिष्ठः। त्रिरात्रं रजस्वलाऽशुचिर्भवति सा नांज्यान्नाभ्यंज्यान्नाप्सु स्नायादधः श
यीत न दिवा स्वप्यान्नाग्निं स्पृशेन्न रज्जुं सृजेन्न मांसमश्नीयान्न ग्रहान्निरीक्षेत न हसेन्न किंचिदाचरेत् खर्वेण पात्रेण पिबेदंजलिना
वा पात्रेण लोहितायसेन वेति। खर्वे वा मदंस्त्रं अयैव वा मदंस्तस्य निषेधः। केवलस्य वा अथवा खर्वं पात्रं मृन्मयपा
त्रं लोहितायसं ताम्रं स्नानानंतरं तु नरपिराजादिनिविशेषमाद्धारीतः। रजस्वला यदि स्नाता पुनरेव रजस्वला। अष्टादश
दिनादर्वाग्शुचित्वं न विद्यते। एकोनविंशातरवीगेकादशस्याः तोत्राद्धं विंशात्प्रभृत्युत्तरेषु त्रिरात्रमशुचित्वमिति। अष्टा
दशादिनादर्वाक् सप्तदशादिनान्यंतरं इत्यर्थः। एवमुत्तरत्रापि। इयं च गणना राजोदर्शनदिनादारभ्य यत्र तु कां चतुर्द

शादिना द्वितीयस्य विवं न विद्यते इति तत्तु स्नानप्रभृतीति न विरोधः। प्रौढयौवनायास्तु अष्टादशादिनान्यृतौ तारं रजोदर्शनात्
त्रिरात्रमशुचित्वं। इति ऋतुकालनिर्णयः॥ढ॥ अथ गर्भाधानं। तत्र विष्णुपुराणे ऋतावुपगमः शस्तः स्वपत्न्यां मंत्रतो द्विज इति
मंत्रत इति द्विजातिविषयं। तत्र मंत्रा गर्गास्तिलनोक्ताः ऊर्ध्वं त्रिरात्रसंभव इत्यनेकेयदर्भमतीज वस्तु परतः शाणितात दासीभव कालस्य
त्मपक्रम्य दक्षिणेन पाणिना उपस्थमभिमृशेत् विष्णुर्योनिं कल्पयत्विति त्रयमनेन शांतिर्भवति दिविरवालीतिवसमासीतो मंजवतः।
स्त्रीणां बहुत्वे ऋतुयोगपद्ये गमनक्रममाह देवलः। यो मपद्येत तीर्थानि विप्रादिक्रममैव गो व्रजेत्। रक्षणार्थमपुत्राणां ग्रहणक्रम
शापि वेति। तीर्थं ऋतुः विप्रादिक्रमावर्णक्रमः। ग्रहणक्रमो विवाहक्रमः। ननु वर्णक्रमेणैव विवाहापीति पुनरपि ग्रहणक्र
मोपादानमनर्थकमिति चेत्। मैवं। प्रथमतः स्ववर्णादिक्रमेणोढदारस्यादेवान्यतरवर्णदारांतरितस्य पुनः स्ववर्णकन्यकां परिणीत
स्य सवर्णाद्वित्ववातादारेषु ऋतुकालयोगपद्ये विवाहक्रमेण गमनं नियम्यत इति ग्रहणक्रमोपादानस्य सार्थकित्वा
त्। पराशरः। ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति। घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः। असंनिधौ तु न दोषः संनि
धानेपि स्वस्थाप्येवायं नियमः। यः स्वदारान्मृतुस्नातां स्वस्थः सन्नोपगच्छतीति स्मरणात्। अयं च ऋतुगमननियमः अजातपुत्रस्यैव
मनुनाप्यप्रशस्य शास्त्रानुविधानादितरेषां कामजत्वनिर्देशाच्च। ज्यायानजातमात्रेण पुत्री भवति मानव इति यस्मिन्नृणं संनय १४

ना १

३३ निचरत्नां क्रोशेद द्वीनाति द्दौ स्थूलं श्रवणं पुनर्वसुं मृगशिरस्तथा पुष्यं पुंनक्षत्रे क्राये चिता निपुरा ४३३

तीर्यनवानंत्यमश्नुते। स एव धर्मजः पुत्रः कामजानितरान् विदुरिति। इति गर्भाधानं।ढ। अथ पुंसवनं। तत्र याज्ञवल्क्यः। गर्भाधि
न मृतौ पुंसः सवनं स्पंदनात्पुरेति। पुंसवनमित्यनुवृत्तौ पारस्करः। मासे द्वितीये तृतीये वा यदहः पुंसा नक्षत्रेण पुंनक्षत्रेण
तानि धिष्ण्यानीति॥ बृहस्पतिः पुंजातगर्भस्पंदने पुंसवनमाह। सवत्संस्पंदिते त्रिमासाविति। अत्र यथाशाखं व्यवस्था। इति पुंसवनं
॥ढ॥ अथ सीमंतोन्नयनं। तत्र याज्ञवल्क्यः। षष्ठेष्टमे वा सीमंत इति। शंखः। गर्भस्पंदने सीमंतोन्नयनं यावद्वा प्रसव इति। सां
ख्यायनगृह्ये सप्तमे मासि प्रथमगर्भे सीमंतोन्नयनमिति। आपस्तंबः। सीमंतोन्नयनं प्रथमगर्भे चतुर्थे मासीति। बैजवापः।
अथ सीमंतोन्नयनं मासि चतुर्थे षष्ठे पंचमे वा तिलो गाद्विः तृतीये गर्भमासे सीमंतकारायदिति। अत्र विशेषमाह शौन
कः। आपूर्यमाणपक्षे यदा पुंसा नक्षत्रेण चंद्रमा युक्तः स्यादिति। पुंसवनसीमंतोन्नयनं स्त्रीसंस्कारो अत एव सकृत्कर्तव्यावि
ति वचना पारस्करः। पुंसवनवत्सीमंतोन्नयनं प्रथमगर्भे इति। तथा च देवलोपि। सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता इति
हारीतः। सकृत्संस्कृतसंस्काराः सीमंतेन द्विजस्त्रियः। यं यं गर्भं प्रसूयंते स सर्वः संस्कृतो भवेदिति। विष्णुः। सीमंतोन्नयनं कर्मनि
स्त्रीसंस्कार इष्यते। केचिद्गर्भस्य संस्कारात् गर्भे गर्भे प्रयुंजत इति। अत्रापि स्वस्वगृह्यानुसारेण व्यवस्था। अकृतसीमंता यादि प्र
वेसत्यव्रतात्को विशेषः। स्त्रीयदाऽकृतसीमंता प्रसवेत्कथंचन। गृहीतपुत्रा विधिवत्पुनः संस्कारमर्हतीति। इति सीमंतोन्नयनं।ढ।

नै १

अथ जातकर्म। तत्र विष्णुः। जातकर्म ततः कुर्यात् पुत्रे जाते यथोदितं। स्वगृह्योक्तविधिना तत्र थः। तत्र स्नानानन्तरं जाते पुत्रे पितुः स्नानं स
चैलं तु विधीयत इति संवर्त्तस्मरणात्। एतच्च स्नानं रात्रावपि भवति। यदाह व्यासः। रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः। नैमित्तिके
तु कुर्वीत स्नानं दानं च रात्रिष्विति। नैमित्तिकदानान्यपि स एवाह। ग्रहणोद्वाहसंक्रांतियात्रार्त्तिप्रसवेषु च। दानं नैमित्तिकं ज्ञेयं रात्राव
पि न दुष्यतीति। जातकर्म च नाभिनालच्छेदनात् पूर्वमेव। तथा च मनुः। प्राङ्नाभिवर्द्धनात् पुंसो जातकर्म विधीयत इति। जैमिनिः। याव
न्न छिद्यते नालं तावन्नाप्नोति सूतकं। छिन्ने नाले ततः पश्चात् सूतकं तु विधीयते। यच्च विष्णुधर्मोत्तरे अछिन्ननाल्यां कर्त्तव्यं श्राद्धं वै पुत्र
जन्मनि। आशौचोत्तरकार्यमथवा नियतात्मभिरिति। तत्तु कर्त्रद्यभावे वेदितव्यं। तथा च विजवापः। जन्मनानन्तरं कार्यं
जातकर्म यथाविधि। दैवादतीतकालं चेदतीते सूतके भवेदिति। तच्च श्राद्धमामेन। अत एव प्रचेताः। सूतिस्य हेमं स्वपत्यस्य च जातकर्म
णि वा यथा। आमश्राद्धं सदा कुर्याद्विधिना पार्वणेन त्विति। आमान्नाभावे हेम्ना तथा च व्यासः। हेम्नाऽभावे द्विजानां वा ... पुत्र
जन्मनि। हेमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वला। दृष्ट्वा चामश्राद्धं लालि यस्य भार्यश्च यमेश्राद्धस्तवके याख्यास्ये
प्रतिग्रहश्च नाभिवर्द्धनात् पूर्वं वा तदहर्वा। यथाह शंखः। कुमारप्रसवे नाड्यामच्छिन्नायां गुडतिलहिरण्यवस्त्रगावाक्षन्यप्रतिग्रहश्च
दोषरहित इत्येके कुर्वत इति। तथा। सर्वेषां म कुल्यानां द्विपदश्चतुष्पदश्च धान्यानि हिरण्यानि दद्यादिति। आशौचमध्येऽप्येतत्कार्यमि १०५
दो॰

त्याह प्रजापतिः। आशौचे विधुसमुत्पन्ने पुत्रजन्म यदा भवेत्। कर्त्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यतीति। ज्योतिःशास्त्रे मृहद्ध
वचरहितं प्रलापं घषासुदाय पिवाः। गुरो शुक्रे च वाकोऽर्द्धं जातकर्मच नामचानि। एतद्वैवा जातकर्मनामकरणे आगीवदित
चौ अनुकार्षत्तु नायं नियमः। निमित्तानन्तरस्वा विद्यान्नैमित्तिकस्य इति जातकर्म॥ अथ नामकरणं। तत्र मनुः। नामधेयं
दशम्यां तु द्वादश्यां वास्य कारयेत्। पुण्ये तिथौ मुहूर्त्ते वा नक्षत्रे वा गुणान्विते। याज्ञवल्क्यः। अन्ये काहृशेना मनिः। भविष्यत्पुरा
णे। नामधेयं दशम्यां तु के चिदिच्छंति पार्थिव। द्वादश्यामपरे रात्र्यां मासे पूर्णे तथापरे। अष्टादशेऽहनि तथा वदंत्यन्ये म
नीषिणः। गृह्यपरिशिष्टे। जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे वेति। शंखः। आशौचे तु व्यतिक्रांते नामकर्म विधीयत इ
ति। न चायं नियमः। तथा च नामधेयं दशम्यामित्यादिवचनाविरोधात्। तत्र शंखहान्यकाहशेना मेत्यादीनां विवाहितार्थं च
मवातनाशौचमध्येऽपि कार्यं स्वगृह्यानुसारेण। तेषद्या व्यवस्थिता विज्ञेया। शंखलिखितौ। दशम्यामुत्थाप्य पिंडवर्द्धनं
पितृणी तत्र सान्निध्यमिति। अत्र। ततः ब्रह्मणोत्थाप्य हुतिः। पूर्वे पित्रनूमान्य नदह रवनामकरणी। कुर्यादिवर्मं तानक्षत्राणि सिंबंधं पिता
वा कुर्यादन्यो वा कुलवृद्ध स्वक्षरं वा घोषवदाद्यंतरंतस्थं पुंसामिकारान्तं स्त्रीणाम् समं चतेत्रा। नाम्निस्तु चितकुलं भवतीति। आ
यमर्थः। दशामहनि सूतिकोत्सर्वन्त्या तउत्थाप्य पिंडवर्द्धनमिति। कर्मनामतः कुर्यात्। तत्र चायं क्रमः। ब्रह्मणेभ्यः पूर्वमाहुति

५

त्र्यापि हि ननु मान्योऽभ्युदयश्राद्धेन पूजयित्वा पितातदभावे वृद्धसातिथ्यादिना अन्यो नाम कुर्यात्। तत्र नियमः। स्वरस्वर
मिथ्यादि वर्णद्वितीयचतुर्थानि यानि ह्रस्वराणि ककारयुतान्यादौ चान्त्य रलयौ। अंतस्थौ स्मान्मध्ये कुर्यादिति। विज्ञानपः।
पितानामकारात्पकाशरं वाशरं वा अक्षरं वा चतुरक्षरमपरिमितं वा इति। अन्यसमसंख्या तु सः। शंखः। अयुग्माक्षरमाकारांतं
स्त्रियै तद्धितमिति। शंखः ईकारांतं स्त्रीणामिति स्वकुलसंबद्धं वा नाम कुर्यात्। तथा च शंखः कुलदेवतासंबद्धं पिता ना
म कुर्यादिति कुलसंबद्धं देवतासंबद्धं वा च्यवः। मनुः। मंगल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितं। वैश्यस्य धनसंयुक्तं शूद्रस्य तु
जुगुप्सितं। मंगल्यबलधननिंदाप्रतिपादकानि क्रमेण नामानि च कर्तव्यानीत्यर्थः। यथा। नरेंद्रो महीपालो धनपुष्टो हीनदास इ
ति। यमस्तूत्तरपदनियममाह। शर्मा देवश्च विप्रस्य वर्मा त्राता च भूभुजः। भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत्। न्ना
त्रांतिरहकशब्दप्रदर्शनार्थः। अतः शर्मपालयित्वादिशब्दा भवंति। इति नामकरणं॥६॥ अथ निष्क्रमणं। तत्र भविष्यपु
राणे। उत्तरार्धं मनुरपि। द्वादशेऽहनि राजेंद्र शिशोर्निष्क्रमणं गृहात्। चतुर्थे मासि कर्तव्यं शिशोश्चंद्रस्य दर्शनं। लौगाक्षिः।
तृतीये मासि आदित्यस्य दर्शनमिति। अत्रापि स्ववृद्धव्यवस्था। सुरेश्वरः। जीवभार्गवसौम्यानां शिशुनिष्क्रमणक्रिया क्षि १०६
दिवसे शस्यते मित्यमधुवेंद्विधनप्रजाः। अश्विनी रेवती हस्त धनिष्ठा रोहिणी तथा श्रवणं पुष्यसंयुक्तं मृगोत्तराफाल्गुनी। अनुराधोत्तरा

चतुर्थे मासि कर्तव्यं यथान्येषां मतं विभो अत्राविशेषमाह यमः। ततः तृतीये
कर्तव्यं मासि सूर्यस्य दर्शनं चतुर्थे मासि कर्तव्यं शि ३

षाढा तथा चित्रपुनर्वसू। इमानि भानि शस्तानि शिशुनिष्क्रमणे बुधैः। इति निष्क्रमणं॥७॥ अथ कर्णवेधः। ज्योतिःशास्त्रे का
र्त्तिके पौषमासे वा चैत्रे वा फाल्गुनेपि वा। कर्णवेधं प्रशंसंति शुक्लपक्षे शुभे दिने। शुभनक्षत्रे शुभे चंद्रे सुस्थे खेचरोद
यशुभे दिने विद्रव्यतीपातविष्टिवैधृतवर्जिते। शिशोरजातदंतस्य मातुरुत्संगसर्पिणः। सौचिको वेधयेत्कर्णौ सूच्या द्वि
गुणसूत्रया। हस्ताश्विनीस्वातिपुनर्वसूत्तराधनिष्ठा चित्रा हरि रेवतीषु। चंद्रानुकूले गुरुशुक्रवारे कार्यस्त्रिवेधो यमरेज्यल
ग्ने। अयं च कर्णवेधः कुलक्रमागतकाले कर्तव्यः। इति कर्णवेधः॥८॥ अथान्नप्राशनं। तत्र मनुः। षष्ठेऽन्नप्राशनं मासि
६ यद्वेष्टं मंगलं कुले। लौगाक्षिः। षष्ठमासेऽन्नप्राशनं जातेषु दंतेषु वा। इति यमः। ततोऽन्नप्राशनं मासि षष्ठे कार्यं यथाविधि
अष्टमे वाथ कर्तव्यमिति। शंखः। संवत्सरेऽन्नप्राशनमिति। व्यवस्था पूर्ववत्। अत्र विशेषो मार्कंडेयपुराणे। देवतापुर
तस्तस्य धात्र्युत्संगगतस्य वा। अलंकृतस्य दातव्यमन्नं पात्रेथ कांचने। मध्वाज्यकनकोपेतं प्राशयेत्पायसं तु तं। तदनं
तरं शिशोराजीविकापरीक्षाप्रकारमाह स एव। देवतायाः पुरतश्चाथ विन्यस्य शिल्पभांडानि सर्वशः। शास्त्राणि चैव शस्त्रा
णि ततः पश्येत्तु लक्षणं। प्रथमं यत् स्पृशेद्बालस्तानि भांडानि स्वयं तदाजीविका तस्य बालस्य तेनैव तु भविष्यतीति। इत्यन्नप्रा
शनं॥९॥ अथ चूडाकर्मेति। तत्र मनुः। चूडाकर्म द्विजं कर्म विधीयत इति प्रथमे वा तृतीये वा कर्तव्यं श्रुतिनादरात्। शंखलि
९ जातीनां सर्वेषामेव धर्मतः प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात्। यमः। तथा संवत्सरे सर्वे चूडाकर्म वि
धीयते।

तो॥ तृतीये वर्षे चूडाकर्म्मापि च मिवा॥ लौगाक्षिः॥ तृतीयस्य वर्षस्य भूयिष्ठे गते चूडाः कारयेत् दक्षिणतः कम्बुजा वसिष्ठा
नामुभयतो त्रिकपर्दा आत्रेयाः मुंडा भृगवः पंचचूडा आंगिरसो वाजिमेक मंगलार्थं शिखिनो न्ये यथाकुलधर्मं वा॥ वृद्धप स
शिस्य पुण्याह्नपर्वणि वेति॥ कर्म्मुजा चूडा॥ वाजिः केशपंक्तिः॥ मंगलार्थमिति॥ अन्ये तु मंगलार्थं शिखामात्रे यत्र क्रियते नक्ष
त्रैति॥ अत्रापि यथा गृह्यं व्यवस्था॥ ज्योतिः॥ अश्विनी श्रवण स्वाति चित्रा पुष्य पुनर्वसु धनिष्ठा रेवती ज्येष्ठा मृग हस्त श्रवका
रायेतु॥ ल्लोरमिति॥ शाखः॥ तथा॥ नक्षत्रे तु न कुर्वीत यस्मिन् जातो जातवल्लरं न शोष्य उदयो कार्यं निवामयेच नारतादा
थि ५ दासणि क्षत्रसार्वद्विदुष्टतारोच वर्जयेत्॥ अन्यति ग्रंथा रादि विशेष उपनयनप्रकरणोक्तो द्रष्टव्यः॥ इति चूडाकर्म्म॥ ७॥
अथ स्त्रीसंस्काराः॥ तत्र मनुः॥ अमंत्रिका तु कार्येयं स्त्रीणामावृदशेषतः॥ संस्कारार्थं शरीरस्य यथाकालं यथाक्रि
क्रमं॥ आवृत् जातकर्म्मादिक्रिया॥ यथाक्रममित्यनतिक्रमणे तत्तत्कालं कर्त्तव्य इत्यर्थः॥ अतएव कालातिक्रमे
कार्याया न प्रायश्चित्तमजितं दिनं॥ देवतानां विपर्यासे जुहोतिषु कथं भवेत्॥ सर्वप्रायश्चित्तं हुत्वा क्रमशो जुहुया
त्पुनः॥ संस्काराश्रितिसुज्वर स्वकाला बु कथं चनो हुत्वेतादवकर्त्तव्या॥ यत्तूपनयनादधः सर्वप्रायश्चित्तमपि स एवादस्सर्वप्राय
श्चित्तं पंचविंशत्युत्तरं चं वोनो अग्नइति द्वाभ्यां मयाग्नेत्ये तिशानमुदुत्तममभितिवेति॥ उपनयनकालातिपत्तो उव्रात्यस्तो १०७

क्ष प्र स्तो

६४

मायाद्याचारताश्चत्किकल्पापेपादत्तब्रात्यलोपर्वईक्षूः॥ स्त्रीसंस्कारा गार्गिलो विशेषमाह॥ तूष्णीमेताः क्रियाः स्त्रीणां मंत्रे
ण तु होमइति॥ ८॥ अथ विद्यारंभः॥ तत्र मार्कंडेयः॥ प्राप्तेथ पंचमे वर्षे अप्रसुप्ते जनार्दने॥ षष्ठीं प्रतिपदं चैव वर्जयित्वा तथाष्टमीं
रिक्तां पंचदशीं चैव सौरभौमदिनं तथा॥ एवं सुनिश्चिते काले विद्यारंभं तु कारयेत्॥ पूजयित्वा हरिं लक्ष्मीं देवीं चैव सरस्वतीं॥ स्व
विद्यासूत्रकारांश्च स्वां विद्यां च विशेषतः॥ एतेषामेव देवानां नाम्ना तु जुहुयाद्घृतं॥ दक्षिणाभिर्द्विजेंद्राणां कर्त्तव्यं चात्र पूजनं॥ प्रा
ङ्मुखो गुरुरासीनो वारुणाशामुखं शिशुं॥ अध्यापयेत्प्रथमं द्विजाशीर्भिः सुपूजितं॥ ततः प्रभृत्यनध्याया वर्जनीया न्विवर्जि
यदिति॥ अस्य च निग्रहाः कामचारवादभक्षाः॥ यथा गौतमः॥ प्रागुपनयनात्कामचारवादभक्षाइति॥ कामचारोथ पतनी
यकर्मस्वेव॥ तत्र पापदो बालस्य दातव्य इत्यादि प्रायश्चित्तस्मरणात्॥ इति गर्भाधानादि संस्काराः॥ ७॥ ब्रह्मचार्याश्रमो गृह
स्थाश्रम इति द्वावाश्रमौ सधर्मौ विस्तरेण प्रतिपादितौ॥ अथ तृतीयाश्रमः प्रस्तूयते॥ तत्र मनुः॥ गृहस्थस्तु यदा पश्येद्वली
पलितमात्मनः॥ अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्॥ पुत्रेषु दारान्निक्षिप्य तया वानुगतो वनं॥ अग्नीनुपचरन्नित्यं
वन्यमाहारमाहरेत्॥ यदाहारो भवेत्तेन पूजयेत्पितृदेवताः॥ तानेव पूजयेद्विद्वानतिथिं समुपागतं॥ ग्रामादाहृत्य वाश्
नीयादष्टौ ग्रासान्समाहितः॥ स्वाध्यायं च तथा कुर्याज्जटाश्च बिभृयात्तथा॥ तपसा शोषयेन्नित्यं स्वकं चैव कलेवरं॥ अ

श्री द्विवासा मुद्दमंते ग्रीष्मपंचतथा म्नथा॥ प्राप्तेष्ठा कामा आर्यावन क्वाचीव सदा जावकू। चतुर्थकालिको वा स्यात् षष्ठका
लिक एव वा। त्रयाळ्वीपिताय कालं ब्रह्मचर्यं विपाजायता। एवं नीत्वा वने कालं द्विजो ब्रह्माश्रमी भवेदिति।६। अथ चतुर्थाश्रम
। तत्र प्रथमं तावत् त्रैवर्णिकस्य काषायाधिक्रिया न इति विचार्यते। तत्र छांदोग्यसूत्रकारः। त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्र
श्रमा इति। तथा पराशरः॥ कृतत्रय मैपान्तय निर्ममो निरहंकृतिः। ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद्गृहादिति
इति। अपि ब्राह्मणः क्षत्रियो वैश्यः स्नातागाळ्कंसती। सन्यासद्वाथवाष्ट्राणां तः सर्वभूतदयापर इति त्रैवर्णिकस्याधिकारा
तानियमानि विदधति। अतः स्त्रैवर्णिनामपि चतुर्थाश्रमस्याधिकारः स्यात्। जाबालश्रुतिः। ब्राह्मणाः प्रव्रजंतीति तिस्रः य
गतिः ब्राह्मणग्रहणं प्रदर्शनार्थं। अतः क्षत्रियवैश्यावथ पलक्षयतीति न विरोध इति। अथवा ब्रह्मवदस्त्वन्निष्टक्तेद्धर्थ
न वा ब्राह्मण इति व्युत्पत्त्या ब्राह्मणशब्दस्त्रैवर्णिकपरः। तन आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहादित्यादिमन्वादि
वचनान्यपि व्याख्यातानि। यत्तु दत्तात्रेयवचनं मुखजानामयं धर्मो यद्विष्णोर्लिंगधारणं बाहुजातोरुजातानामयं धर्मो
न विद्यते इति। तथा। गतिस्तु चतुर्थाश्रमे नास्ति बाहुजातोरुजयोः क्वचित् चतुर्थाश्रमगतिः प्रोक्ता मुखजानां स्वयंभुवेत्यादि
दपि वचनं वचनद्वयं वस्तुतो न विरुध्यते मुखजा ब्राह्मणाः बाहुजाः क्षत्रियाः ऊरुजा वैश्याः एतेषामयं धर्मो लिंगधारणा १०८

त्मको न विद्यते। लिंगलक्षणं चिह्नं त्रिदंडैकदंडरूपं। तथा च दक्षः। मेखलाजिनदंडेन ब्रह्मचारीति लक्ष्यते। गृहस्थो यधि
वेदाद्यैर्नखरोमभिर्वनाश्रितः। त्रिदंडेन यतिश्चैव लक्षणानि पृथक् पृथगिति। त्रिदंडग्रहणमेकदंडस्यापि प्रदर्शनार्थं। एवं चेति
लिंगं क्षत्रियवैश्ययोर्नेति दंडधारणनिषेध एव नाश्रमनिषेधः। तथा गतिस्तु चतुर्थाश्रमे नास्तीत्यस्यायमर्थः। गतिज्ञानं स्व
गत्यपरिज्ञानार्थं इति स्मरणात्। ज्ञानं च ज्ञापकनिष्पाद्यं अत एव ज्ञापकं कार्यं तत्। तेन ज्ञानरूपेण कार्येण कारणं ज्ञापकं दंडधा
रणं लक्ष्यते। तथा च तदुक्तं भवति क्षत्रियवैश्ययोरपि दंडधारणं नास्तीति लिंगनिषेध एव न चाश्रमनिषेधः दंडधारणं ब
हिरंगं विषयविराग एवांतरंगः। विरागाभावे अधिकाराभावात्। यत्तु धर्मविवृतावेववचनांतरं। संन्यासं ब्राह्मणः सम्यक्
स्थो वनपो वानप्रस्थो भवेद्द्विज एवं वर्णक्रमः स्मृत इति। अत्रापि ब्राह्मणः सम्यक् संन्यासेदिति सम्यक्त्वात् पादोनात ब्राह्म
णस्य बहिरंगभूतदंडधारणात्। एतदेव सन्यासोऽमनुतद्भेदित इतिगम्यते। तथा च क्षत्रियवैश्ययोः स्वदर्शित आश्रमो भवती
त्यर्थः। एतदुक्तं भवति। अन्यथा छांदोग्यसूत्रकारादिवचनविरोधापत्तेः। अयं च तात्पर्यार्थः। अबाधाना पपत्त्वा बाधत्वे-या
प्य इति। अन्यायेन श्रुतिस्मृतिवाक्यविरोधपरिहाराय विधिवाक्यानामाश्रमस्वरूपविधायकता त्वयं निषेधवाक्यानां तु दंडग्र
हणमात्रनिषेधतात्पर्यं तस्मात् क्षत्रियवैश्ययोर्दंडग्रहणमात्रनिषेधो न त्वाश्रमनिषेध इति। एवं प्राप्ते निधीयते। श्रुति

MEMORIAL
MEMORIAL

स्मृति विरोधेत्तु श्रुति रेव बलीयसी॥ अतः श्रुत्यनुसारेण व्यवस्था त्र विधीयते। ब्राह्मणाः प्रव्रजंतीति। अत्र ब्राह्मणशब्द
स्य ब्राह्मणत्वं जाति रर्थो थः। ब्राह्मणोद्देशेना नव प्रव्रज्या विधीयत उद्देश्य विशेषणमविवक्षितं। इति रूप यद्यवतानुद्दे
श्य मविवक्षितं तस्मा दिह ब्राह्मणोद्देशानसंन्यासविधाना दुद्देश्यस्य ब्राह्मणत्वस्य द्वि विवक्षितत्वात्तात्स्य वप्रव्रज्याधि
कारा नान्यस्य नन्तु यदि तावत् ब्राह्मणशब्दस्य ब्राह्मणत्वं जाति वाच्यार्थः तर्हि तस्याद्देश्यत्वन विवक्षितत्वाक्षत्रियवैश्य
योः प्रव्रज्यायां नाम मास्तु दधिकारः न च तथा ब्राह्मणत्व जाति रर्थः अपितु ब्रह्मा वेदः तन्निष्ठा स्तदध्ययनवंतो ब्राह्मणा इति वे
दाध्ययनवत्त्वामकोनुगतो धर्मः सच ब्राह्मणशब्दस्यार्थः तथा च वेदाध्ययनवत्त्वरूपाणेकेनोपाधिना ब्राह्मणक्षत्रियवैश्या
स्त्रयो पि क्रोडी कृता भवंतुः एवं च ब्राह्मणोद्देशान प्रव्रज्याविधानात्त्रैयाणामपिवसीनां तत्राधिकारास्तीति। यत्तामवं
यणात्क्षत्रियशब्दस्य क्षत्रियत्वं वैश्यशब्दस्य वैश्यत्वं गोशब्दस्य गोत्वमर्थः तथा ब्राह्मणशब्दस्यापि ब्राह्मणत्वमेवा
र्थ इति। शाबरजैमिनि बादरायणादिभिरंगीकृतं तद्यारन्यतात्यो क्त्यार्थेन नयाद्ब्राह्मणशब्दस्य ब्राह्मणत्वं वेदाध्य
यनवंतो नयमपिवाच्यत्वन परिकल्प्यत तदा हैन्याय स्थाने कार्थत्वमिति। त्रीनां त्रिकेरनेकार्थत्वमेक शब्दस्य निषिद्धं तन
न्यायेन सद्दवि रोधः प्रसज्यत अत एवं ब्रूष अन्यायस्थान कार्यत्वमिति न्याय जाग्रत्यपि गवादि शब्दानां यथानेकार्थ १०९

त्र ५

त्वं एवं ब्राह्मणशब्दस्यापि स्थान कार्थत्वमस्त्विति। नत्वेतदुचितं। अगतिकाहीयं गति र्यदानेक शक्ति परिकल्पनया थानकार्थ
त्वस्वीकरणं। शब्दार्थज्ञानं हि वृद्धव्यवहारेभ्य माणं वृद्धाश्च गवादि शब्दानामनेक शक्ति कल्पनया थानकार्थत्वमंगीकुर्वीत न
ब्राह्मणशब्दस्य अत एवाभिधानकारैरपि गवादि शब्दा अनेकार्थवर्गेपि परिगणिताः। तेषामपि व्यवहारः शब्दस्वेषादि
ष्वव नत्ताशास्त्रार्थनिर्णयशास्त्रार्थपरिज्ञानं तु प्रसिद्धार्थस्यैव ग्रहणं। नेतरस्य इतरस्यापि ग्रहणे गाप स्त्वविधायकवाक्यपि
३५ सा स्नाद्य पतगोपि स्यतिरिक्तस्यापि ग्रहणे स्यात् नत्व गृह्यतातस्माच्छास्त्रार्थनिर्णये प्रसिद्धार्थस्यैव ग्रहणं। युक्ते विपरी
तार्थद्योतक वाक्या भावाद्यावश्रुतानेक शक्तिकल्पना दोष नयात् ब्राह्मणशब्दस्य ब्राह्मणत्वं जाति रेवार्थः ननु त्र ६
त्र. ५ जायमाना वे ब्राह्मणस्त्रिभिर्ऋणवा जन्मा यत इत्यत्र ब्राह्मणशब्दो यथा क्षत्रियपरएवमत्रा प्यस्त्विति। यत्तामेवं दृष्टांत दा
र्ष्टांतिकयावैषम्यात्। तथाहि ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजयापितृभ्य इति वाक्यशेषब्रह्मचर्यादि विशि
ष्याद्दिरुणत्रयापाकरण प्रतीतं ब्रह्मचर्यादि द्वयं त्रैवर्णिकाऽरात् फलत्वमस्त्वं न्मुखवान्नारेण जायमाना वे ब्राह्मणाद
यत्रापि त्रैवर्णिकानुप्रवेशा द्युज्यातत्र त्रैवर्णिकपरत्वं प्रत्तावत्तु वाक्यशेषाद्युना वान्तत्रैवार्णिकपरत्वं किंतु यावे
त्तो कालेन अवयवव्युत्पत्त्या लक्षणया वा क्षत्रियवैश्यादायां ब्राह्मणशब्दे न प्रत्यायेंत तावत्तः पूर्वीमव लब्धात्मिकाया रूढ

प्राबल्यात्अनुपपन्नत्वाच्चरूढ्याब्राह्मणस्यैवप्रत्याय्यते।अतश्चप्रथमप्रतीतब्राह्मणोद्देशेनप्रव्रज्या[illegible]स्यश्रुति
र्थवान्तरमप्रतीतयौगिकार्थीकरणमुचितं।ततश्चौदुंबरीस्पृष्ट्वोद्गायेदितिश्रुत्याविरुद्धमौदुंबरीसर्वावेष्टयित
व्येतिस्मृतिवचनं।यथाविरोधाधिकरणेअप्रमाणमित्युक्तं।एवंब्राह्मणाःप्रव्रजंतीतिजाबालिश्रुतिविरुद्धंत्रयाणांवर्ण
नांवेदमधीत्यचत्वारआश्रमाइत्यादिकंस्मार्तवचनजातमप्रमाणमेव।यद्वाश्रुतिविरुद्धस्यापिस्मार्तवचननिचय
स्यसर्वथाऽप्रामाण्यपरिजिहीर्षयाश्रुत्यनुकूलएवार्थःपरिकल्पनीयः।तत्रत्रयाणांवर्णानांवेदमधीत्यचत्वारआश्रमा
इतिछांदोगसूत्रस्यायमर्थः।त्रयाणांवर्णानांयथोचितंचत्वारआश्रमाइति।उचितंचश्रुत्यविरोधायब्राह्मणस्यैवतुर्या
श्रमाधिकारविधानेनान्यथा।त्रैवर्णिकानांसंन्यासोविद्यतेनात्रसंशयः।शिखायज्ञोपवीतानांत्यागपूर्वकंदंडयुगिति
ब्रह्मांडपुराणवचनमपिछांदोगसूत्रेणसमानार्थीयब्रह्मविवक्षवचनं।वैराग्योत्पत्तिमपानवसेत्या।सपरियुज्यते।रागवा
न्तुविप्रोपिवेदवेदांगवित्तमइति।वेदवेदांगवित्तमोपिविप्रोरागवांश्चेत्संन्यासेनतुपरियुज्यतइत्यन्वयः।एवंचविप्रस्यवि
रक्तस्यैवाधिकारोनिर्दिष्टोभवेत्।नक्षत्रियादेः।यतःस्मृत्यंतरं।ऋणत्रयमपाकृत्यनिर्ममोनिरहंकृतिः।ब्राह्मणःक्षत्रियोवा
ऽथवैश्योवाप्रव्रजेद्गृहादिति।अस्यायमभिप्रायः।गृहात्प्रव्रजेत्वानप्रस्थाश्रमंगाहेत्।प्रव्रज्याशब्दाद्यायद्यपिसंन्यासारूढस्त ११०

त्रि८

प्यापिश्रुतिविरोधपरिहारार्थमत्रतृतीयाश्रमपरः।अस्यापिवैराग्यादुक्तत्वात्।यद्वायदाब्राह्मणःस्ववृत्त्याऽजीवन्क्षत्रिय
वृत्तिमाश्रितः।तत्राथजीवन्वैश्यवृत्तिंततश्चतामापदिनिश्चीयापिनवसंतिरवृत्तिंपरित्यजतिकिंतुतत्रैववृत्त्यावस्थितः।तदानक्ष
त्रियादिवृत्तिजीवन्नसएवब्राह्मणःक्षत्रियइतिवैश्यइतिचव्यपदिश्यते।तत्रापन्मुक्त्यनुशानकालेपिक्षत्रादिवृत्तिनिरतत्वात्तस्य
पिप्रव्राजगृहादितिप्रव्रज्याधिकारंदर्शयति।अतएवब्राह्मणःक्षत्रियोवाथवैश्योवाप्रव्रजेद्गृहादित्यत्रशास्त्रउपात्तः।ब्राह्मणए
वअथशब्दानंतरंक्षत्रियवृत्त्याश्रयणात्क्षत्रियः।अथवैश्यइत्यनेनतथैवेतिपादनादयमर्थोगम्यतइत्यन्यथा।एतेनब्राह्मणःक्षत्रि
यावैश्यस्त्रीलागार्हस्थ्यनंतरं।संन्यासस्त्वथवाशांतइत्येतदपिव्याख्यातं।एवंचमनुदत्तात्रेयादिवचनान्यप्यनुकूलानिभवंतु।
श्रु तस्माच्छ्रुतिविरोधपरिहारायाङ्गीकार्यः।अन्यान्यपिविरुद्धवचनानि।यत्तुजडभरतंप्रत्युपादेशः।पिंगिरहासस्या।यदिमृतोऽप्परं
शांतमनामयंत्राश्रुतंपदमितोरसिततत्परमदेसोत्तवाद्धत्।अत्रदृश्यते।किंजडभरतेप्रत्यवापदेशाउततल्लक्षणयावत्क्षत्रियमा
त्रंप्रति।आद्येजडभरतस्योवतिनातरक्षत्रियप्राप्तिः।किंजडभरतस्यापिप्राप्ताश्वारणात्पूर्वकिमाश्रमंगृहीतवानितिनज्ञापि
यते।अतोब्राह्मणःप्रव्रजेतीत्यतद्धनुरोधात्परमहंसोभवेदित्यस्यायमर्थः।परमहंसनिर्ममोभवति।नापिद्वितीयः।तत्रैव
लक्षणमात्रमयुक्तानविधिलक्षणमिति।न्युक्तस्मृतिविधिलक्षणानिषिध्यंते।विधिरितिवदत्याद्यदीप्रष्टव्यः।किंविशिष्टविधिः

द्दग

उत प्राप्तक कर्म्मणि पधिकारिकारकविधिरिति। पक्षद्वयेपि लक्षणाप्रसक्तिर्दुर्वारा। नन्वेदं रूपे लक्षणा न विरुद्धा। आतानदो
ष इति चेत् न द्विलक्षणादृष्टोपि न युक्तेति ब्रूमः। तथाहि मंत्रे बंधनुपपत्तिन्यां द्विलक्षणा न वा त्रानुपपत्तिः। अर्वाक्छरीत्या वाक्य
स्याथन्निरपेरत्वनाथ उपपत्तेः। यच्च जाबालश्रुति जनकयाज्ञवल्क्यसंवाद तत्र परमहंसा नाम संवर्त्तकारुणिश्वेतकेतुदुर्वासम्
रिभुनिदाघजडभरतदत्तात्रेयारैवतकप्रभृतय इति। अत्रापि विधायकप्रत्ययाभावात्। परमहंससमद्वन्द्वा धर्मविंत इति अहंकार
ममतयो रत्ना वात्यरमहंसा इति व्यपदिश्यं ततस्मान्निर्द्वन्द्व ब्राह्मणस्यैवाधिकार इति। अथ यति धर्म्माः। तत्र याज्ञवल्क्यः। सर्वभूता
हितः शांतस्त्रिदंडी सकमंडलुः। एकारामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत्। त्रिदंडीत्यनानेकदंडोपि गृह्यते। आननेवाभिप्रायेण क दं६
मनुः। वाग्दंडोथ मनोदंडः कर्मदंडस्तथैव च। यस्यैते नियता दंडाः स त्रिदंडीति कथ्यते। बोधायनः। एकदंडी त्रिदंडी वा भवति। वृद्धवि
शातिमाता। एकदंडी त्रिदंडी वस्त्रवर्सीगविवर्जितः। तथदंडावेणवाः। तथा धर्मेयीता। प्राजापत्यं ष्ठानंतरं सूत्रेणवा दंडान् मूर्द्धप्रमाण
द्विषेनपाणिना क्षपथ्ये साथ नासादकं कमंडलुमिति। वसिष्ठः। मुंडोऽगमोपरिग्रह इति। मनुरिखात्क रात्न्निरुच्य विसृज्य य
ज्ञोपवीतमिति काठकश्रुतिः। तथा परिशिष्टेपि। अथ यज्ञोपवीतमप्सु जुहोति भूः स्वाहेत्यथ दंडमादत्ते सखे मां गोपायेति। दे
वलः। कषायी मुंडस्त्रिदंडी कमंडलुपवित्रपादुकासनकंथामात्र इति। कण्वाएकरात्रं वसेद्ग्राममनगारपे वरात्रकौ वर्षाभ्यात्य २१

त्र वर्षास्तु मासां सु चतुरो नवेत्। मत्स्यपुराणे। अष्टौ मासान् विहारः स्यात् यतीनां संयतात्मनां। एकत्र चतुरो मासान् वार्षिकान्नि
वसेत्तु नः। अविमुक्तप्रविष्टानां विहारस्तु न विद्यते। न दोषो भविता तत्र इत्युपदेशात् पुराणत इति। मनुः। विधूमे सन्नमुशले व्यं
गारे भुक्तवज्जने। वृत्ते शरावसंपाते नित्यं भिक्षां यतिश्चरेत्। तथा एककालं चरेद्भिक्षां प्रसज्जेन्न तु विस्तरे। भैक्षे प्रसक्तो हि यति
र्विषयेष्वपि सज्जति। अत्र शातातप वसिष्ठः। ब्राह्मणकुलं वा यल्लभेत तद्भुंजीत सायंप्रातर्मधुमांसवर्जमिति। तथा। सप्तागा
रान्प्रसंकल्पितानि चरेत्। संवर्त्तः। अष्टौ भिक्षा समादाय स मुनिः पंच सप्त वा। अद्भिः प्रक्षाल्य ताः सर्वास्ततोऽश्नीयाच्च वाग्यतः। मनु
ः यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः। आत्मज्ञाने समे च स्यात् वेदाभ्यासे च यत्नवान्। अत्र वेदः प्रणवः। अत एव स्मृत्यंतरा
कारं परं ब्रह्म प्राणायामः परं तपः। जपवा मात्परं भिक्षां दद्यादानाद्विशिष्यत इति। तथा। नाभिनंदेत मरणं नाभिनंदेत जीवि
तं। कालमेव प्रतीक्षेत निर्वेशं भृतको यथा। अभिवादोऽभिनिंदितस्तु नावमन्येत कंचन। न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित्। या
ज्ञवल्क्यः। यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च। सलिलेन शुद्धिरेतेषां गोवालैश्चावघर्षणं। इयं च शुद्धिर्भिक्षाचरणादिकं क
र्म कियमाणस्य द्रष्टव्या। तत्र कामपि युज्यादादिपात्राणि गोवालैश्चावघृष्य प्रक्षाल्य तेन कर्मक्रियादिति। मनुरपि। अतैजसानि
पात्राणि तस्य स्युर्निर्व्रणानि च। तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे। नो जनमपि पात्रांतरेणावेत त्रैव कार्यं तथा च देवलः।
णा दिग्धयोगांग कृतान्न पुनरेवं मे ध्याघुपहत विषया। अमेध्याद्युपहतौ तु द्रव्यशुद्धिप्रकरणे व दर्पमाही अनुसं
चेयं। अतस्यैत दुग्धं भवति। यत्र [illegible] नि का वर ३ शो ध:

तद्दत्तं गृह्णीयाद्विकाल्लं तत न पात्रेणान्येन वा स्वकीये भुंजीतेति। एवं कुर्वतः फलमाह याज्ञवल्क्यः। शान्ति रुद्धेन्द्रियग्रामं रागद्वे-
षो प्रहाय च। न यं हुत्वा च भूतानाम मृतीभवति द्विजः इति॥ ॥ इह मदनपारिजाते मदनक्षितिपालदानजलरूढे स्तबकश्च-
तुर्थः। श्रीमीदामोदरात्मजपंडितविश्वेश्वरः मतिर्यषां भ्रागाम्र स्तत्तिरमणीयाथ्यवद्धति। पराष्ट्रीलंभ्राध्यं जगति कुजवासंमकेतिपाय।
विरंचिनि। तषांस्तु कुरुतलभूते स्थिति मियादियं वा मारणप्रवरस्तु निर्विष्यस्य तणितिः। इति पंडितपारिजकदारमदनेत्यादिविरुद
राजीविराजमानस्य श्रीमदनपालस्य निबंधमदनपारिजाते निधिवन्तु र्थस्तबकः॥ ॥ अथाशौचनिर्णयः। अथ मधमशिश्रुनात द्वमसंके
चनिमित्तं त्रीणि च कालानि रूप्यते। तत्र चतुर्थं गर्भस्रावादिकालः। मासचतुष्टयान्यं तरे स्रावः। पंचमषष्ठयोः पातः। सप्तमादिषु प्रस-
वः। तथा च स्मृतौ तरीः। स्रावं चतुर्थाद्धिवस्त्रावः। पातः पंचमषष्ठयोः। अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेदिति। तत्र मासत्रयादर्वा
क्स्रावे त्रिरात्रमाशौचं। सौसानगर्भस्य त्वर्द्वं तिगौतमस्मरणात्। मरीचिरपि। गर्भस्रावे यथामासमचिरे तूत्तरे त्रयः। राजन्ये
तु चतूरात्रं वैश्ये पंचाहमेव। स्त्र्यष्टाहे तु शूद्रस्य शुद्धिरेषा प्रकीर्तिता इति। अचिरमासत्रयाभ्यंतरे गर्भस्रावे उत्तमे ब्राह्मणे त्र
त्रिराजन्ये चतूरात्रमित्याद्य विवक्षितार्थं स्रावे मातुस्त्रिरात्रं स्यात्सपिंडानां च वर्जनं पाते मातुर्यथा मासं पित्रादीनां दिनत्रयमि
ति। तान्निवानिधनात्। यद्यचिरस्रावे राजन्यादिषु चतूरात्रादिषु चतूरात्रादिः। तर्हि पाते मातुर्यथा मासमित्ययुक्तं स्यात्। विभ्यस्य 112

चिर मातु

त्यारचिरस्रावपंचाहाष्टाहौ पंचममासपाते उपेवाहमावतिविप्रतिषिद्धं। न उपातेर्यथामासमिति द्वितीयमरीचिवचने।
ब्राह्मणव्यतिरिक्तविषयमस्तु एवं च त्रियादिषु विधिकाशौचं परिकल्प्यते। ततश्च न मरीचिवचनायाः परस्परविरोधः। अत एव कृष्णश्रृंगो
पियत्र त्रिरात्रं विप्राणामाशौचं सैप्रदृश्यते। तत्र शूद्रे द्वादशाहं तु सर्वासां त्रैवर्णायो रितिकल्पनाप्रकारमुपदिशति निःसमंजसे। मरीचिव
चनत्याग वविरोधं तरस्फुटमपरिहरचात। तथा हि गर्भस्रावे यथामासमचिरे तूत्तमे त्रयः। इति स्रावे मातुस्त्रिरात्रं स्यादिति वाक्यद्वयी
तत्र स्रावे मातुरित्यत्र वि रोधपरिहाराय अचिरस्त्रावे त्रयः त्वेतद्विषय एवोपसंहरणीयो। तथा च चतुर्थे मासि स्रावे त्रिरात्राण्यहया
धिकीसार्द्धत्रिरात्रमाशौचं कल्पनीयो। अचिरस्रावचनानांनु पाते मातुर्यथामासमिति पंचमषष्ठयोर्यथामासाशौचाभिधानाद्। ततश्च ग
र्भस्रावे यथामासमिति। चतुर्थमासपि द्विनचतुष्टयाशौचाभिधानं विरुध्येत। तथा च स्रावे दुःपातपरः॥ तर्हि पाते मातुरित्यनेनैणोनरुक्तं
स्यात्। अतः स्ववचनविरोधपरिहाराय रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुद्ध्यतीत्यादिवचनानुसारेण राजन्ये तु चतूरात्रमित्यादिवच
नानां स्रावविवक्षितार्थत्वमनिच्छतापि मरीचिनीगीकार्यो। अतश्च सर्वविरोधाभावेन मासत्रयादर्वाग्गर्भस्रावे त्रिरात्राशौचं। अथवा अ
पदि त्रूनमल्यानुसारेण मतापदिवस्रात्रादिकमिति व्यवस्था विज्ञेया। स्रावे तु सपिंडानामाशौचं नास्ति पितुः स्नानमेव। सपिंडाशौचवर्जनमि
ति मरीचिस्मरणात्। स्नानमात्रमेव तु रुषस्येति वृद्धवसिष्ठस्मरणाद्व। चतुर्थमासप्रभृतिसप्तमपर्यंतं यावीतोनेगर्भक्षरणमासास्तावी

8215

तिदिनाच्छुद्धिर्हेतुः। तथाच याज्ञवल्क्यः। गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणं। अत्र स्रवतिर्द्रवावस्थायां पतनं वर्त्तते। अत्र च
पातरूपे पंचमषष्ठमासस्रावे पित्रादीनां दिनत्रयमाशौचं। पाते मातुर्यथामासं पित्रादीनां दिनत्रयमिति। मरीचिस्मरणात्। य
दुक्तं यामने। अजातदन्ते तनये मृते गर्भच्युते तथा। सपिंडानां तु सर्वेषामेकरात्रमशौचकमिति। एतच्च गर्भपात
एकाहविधानं गुणवत्पित्रादिविषयं तत्र क्रमादिस्मरणे। सद्यःशौचं सपिंडानां गर्भस्य पतने सति। इति तु द्रवरूप
गर्भस्य मासचतुष्टयात्प्रागेव पतने। एवमन्यान्यपि वचनान्यनुसंधेयानि। इति गर्भस्रावाशौचं॥ ७॥ सप्तमासप्रभृति
प्रसवरूपत्वात् स्पर्शाशौचमेव भवति। तत्र मृतजाते जातमृते वा सपिंडानां जन्मनिमित्तं संपूर्णाशौचमुक्तं यथा
हारीतः। जातमृते मृतजाते वा सपिंडानां दशाहमाशौचमिति। दशाहमिति तत्र संपूर्णाशौचोपलक्षणं। यच्च जाते मृते मृतजा
ते कुलस्य सद्यःशौचमिति बृहद्विष्णुवचनं। तत्तु शिशुमरणनिमित्ताशौचाभावप्रतिपादनपरं न प्रतिपादनपरं न प्रस
वा। हेतुकस्य मरणनिमित्ताशौचमपि स्नानादपीति सपिंडानां नखरूपाताभावात्। सद्यःशौचमिति वचनस्य शुद्धातिक्र
नात्। नाभिच्छेदात्प्राग्मरणे मातुः संपूर्णसूतकं पित्रादीनां तु जन्मनिमित्ताशौचं त्रिरात्रं। तथाच बृहन्मनुः। जीवन् जातो यदि ततो मृतः सूत
क एव तु। सूतकं सकलं मातुः पित्रादीनां त्रिरात्रकं। ततः तदनंतरमेव नाभिवेधेदनादर्वागित्यर्थः। अत्राप्यग्निहोत्रार्थं सद्यःशौचमस्त्येव। अग्निहोत्रार्थं स्नानोपस्पर्शात् ११३
×नास सद्यःशौचमिति शंखस्मरणात्।

नाभिवर्द्धनात्परकालं त्रिशूर्परामपि पित्रादीनां जननाशौचं संपूर्णमेव। तथाच जैमिनिः। यावन्न च्छिद्यते नालं तावन्ना
प्नोति सूतकं। छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते इति जनननिमित्तमस्पृश्यत्वं मातुर्दशाहादिकं पितुस्तु सचैलस्नाना
दस्पृश्यत्वमपगच्छति। तथाच संवर्तः। जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते। माता शुद्ध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः। अत्र तु
त्रवृत्त्यपत्यपरं। अनपत्येऽपि समुत्पन्ने पितुः स्नानं भवति। यथा गर्गः। क्षिप्रं कार्यं ऋतुकालगमने स्नानमिवं जननान
पि। समानं। पितुरपि स्नानं दस्पृश्यत्वनिवृत्त्यभिधानात् सपिंडानामस्पृश्यत्वं नास्त्येव अत एव तेषां स्नानमपि। तथाच अंगि
रः। सूतिके सूतिकावर्जं संस्पर्शो न निषिध्यते इति। अदृष्टार्थकार्येष्वपि पंचमे निविशेषमाह। सूतिकां पुत्रवतीं विंशतिरा
त्रेण सर्वकर्माणि कारयेन्मासेन स्त्रीजननीमिति। प्रथमषष्ठदशमदिवसेषु दानप्रतिग्रहाधिकारमाह व्यासः। सूतिकावा
सनिलया जन्मदा नाम देवताः। तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिता। प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा। त्रि
ष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनि। वृद्धयाज्ञवल्क्योपि। तत्र सर्वप्रतिग्राह्यं नान्नं तु नम्न्हायते। जन्मदियिवात् ताल्मोहा न्मो २
द्विजन्मानां हाय एवीरतामार्ध्यादयस्त्वनीया। तथा षष्ठीनिरात्रे तत्र विशेषतः रात्रौ जागरणं कार्यं जन्मदानां तथा बलिः
पुरुषाः शस्त्रहस्ताश्च नृत्यगीतैश्च योषितः। रात्रौ जागरणं कुर्युर्दशम्यां चैव सूतके इति। इति जननाशौचं॥ ७॥ ॥

स॰ कृत सद्यः शौचमवा। यदा दंतजन्मनः। प्राङ्नामकरणात्सद्यःशुद्धिरिति। नामकरणा। १

अथाशुपनीतानामाशौचं। तत्र नामकरणानंतरमप्युदककैदानं वैकल्पितं। तथा च मनुः। नात्रिवर्षस्य कर्तव्या बांधवैरु
दकक्रिया। जातदंतस्य वा कुर्युर्नाम्नि वापि कृते सति। उदकक्रियत्येतत्सादहनादिग्निदानमप्युपलक्षयति। तत्र च नामकर
णादूर्ध्वं दंतजननादर्वागग्निसंस्कारकृतेपि मातापित्रोस्त्रिरात्रं। बालानामदंतजातानां त्रिरात्रेण शुद्धिरिति कश्यपस्मर
णात्। तथा विजिकादनिसंबंधमदंतकर्षमदद्यंत्र्यहमित्यत्राबेजिकादिति विशेषोपादानात्। एवमुपनयनपर्यंतं माता
पित्रोस्त्रिरात्रमितरेषां सपिंडानामग्निसंस्कारकृत एकाह आशौचं। अदंतजाते तनये नैवाशौचं गर्भचक्रे तथा। सपिं
डानां तु सर्वेषामेकरात्रमशौचकमिति यमस्मरणात्। असंस्कारमृत्तौ मिवात्क्षामवोदकं कुर्यात्क्षि संस्कारमेवावति।
लौगाक्षिस्मरणात्। जातारणिश्चेद्वतिदातन्मथिताग्निना। तद्जा वैवनिषिद्धं लौकिकाग्निना दाहः। अग्निसंस्काराभा
वे सद्यः शौचं। अदंतजन्मनः सद्य इति याज्ञवल्क्यस्मरणात्। अग्निसंस्काररहितस्यानद्विवर्षस्य निखननमेव तथा च याज्ञवल्क्यः
ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः। आश्मशानादनुव्रज्य इतरो ज्ञातिभिर्मृतः। इतरः पूर्णद्विवर्षश्च तद्विशेषमाह। ऊन
द्विवार्षिकं प्रेतं निदध्युर्बांधवा बहिः। अलंकृत्य शुचौ भूमावस्थिसंचयनादृत इति। बहिर्ग्रामाद्बहिः। अस्थिसंचनादृते।
अस्थिसंचयनरहितायां कुर्वीत्यर्थः। आन्पावेवं वर्षेयं ति अस्य शिशोर्दाहास्थिसंचयनं न कार्यमिति। एतदनुपपन्नं ११४

स्थिसंचयनप्राप्त्याभावात् उपपादितं चैतत्सपांवनात्स्मान्निर्मितान्चराटीकायां सुबोधिन्यां। यमः। ऊनद्विवार्षिकं प्रेतं घृ घृ
ताक्तं निखनेद्भुवि। यमगाथा गायमानो यमसूक्तमनुस्मरन्निति। जातदंतस्य प्रथमवर्षे कृतचूडस्य वर्षत्रयान्तार
मृतस्याग्निसंस्कारसत्त्वासत्त्वाप्यकाद्धः। दंतजातप्यकृतचूडस्य द्वारात्रेण शुद्धिरिति विष्णुस्मरणात्। प्रथमवर्षे चूडाकरणे
त्वग्निसंस्कारस्य चूडाकरणानंतरं नियतत्वात् त्रिरात्रमेव। अत एव वसिष्ठः। ऊनद्विवर्षे प्रेते गर्भपतने वा सपिंडानां त्रिरात्रमेव त ४
ति। वर्षत्रयादूर्ध्वं चूडाभावेपि अग्निसंस्कारो नियतस्तथाच दशमाशौचं। नात्रिवर्षस्य कर्तव्या बांधवैरुदकक्रियेति मनुना त्रिव
र्षन्यूनस्य संस्कारनिषेधनात् त्रिवर्षस्याभ्यनुज्ञानात्। आंगिरसा च न्यून त्रिवर्ष रूपकाला पेक्षया नैशौका निषेधनादत ऊर्ध्वं त्र्य
हाभिधानात्। अविप्रेन्यून त्रिवर्षे त्वेकाहात् शुद्धिः स्मृत्ये निशकीति। यद्यप्यकृतचूडो वै जातदंतस्तु संस्थितः। दाहयित्वा तथाप्येनमा
शौचं त्र्यहमाचरेदिति वा। स्त्रीणामकृतचूडायां तु कन्यायां सद्यः शौचमित्यापस्तंबस्मरणात्। कृतचूडानामपि वाग्दानादर्वाक्
वे २ तामेकाहः। यदाह याज्ञवल्क्यः। अहस्त्वदत्तकन्यासु बालेषु च विशोधनमिति। अदत्ता वाग्दानरहिता। कन्यकानां मापिंज्यं पुरु
षत्रयपर्यंतमेव। तथा च वसिष्ठः। अप्रत्तानां तु स्त्रीणां त्रिपुरुषी विज्ञायत इति। त्रिपुरुषानंतरे समानोदकं शौचं वैकल्प्यं। एत
च्चाशौचविषयामवविवादत्वन्यथा। तथैव पूर्वं प्रतिपादितत्वात्। वाग्दानादूर्ध्वं विवाहसंस्कारात्प्राक् पतिकुले पितृकुले च त्रिरा

त्तां पश्चाद्दत्ताविः। वारिपूर्वं प्रदत्ता तु या नैव प्रतिपादिता। असंस्कृता तु सा ज्ञेया त्रिरात्रमुभयोः स्मृतमिति। या तु प्रतिपादिता
वाग्दत्ता वारिपूर्वं नैव प्रतिपादिता तस्यां वयः। उभयोः पतिपितृपक्षयोः। विवाहानंतरं तु विष्णुः। संस्कृतासु स्त्रीषु नाशौचं पितृ
पक्षे तत्प्रसवमरणे चेत् पितृगृहे स्यातां तदैकरात्रं त्रिरात्रं वेति प्रसवे एकरात्रं मरणे त्रिरात्रमिति विवेकः। एतच्च वयोविशे
षकृतमाशौचं सर्ववर्णसाधारणं तथाचांगिराः। अविशेषेण वर्णानामर्वाक् संस्कारकर्मणः। त्रिरात्रं तु भवेच्छुद्धिः कन्यासु
ह्याविधीयत इति। ऋष्यशृंगोऽपि। अविशेषेण सर्वेषां वर्णानामृतुपूर्वजाः। त्रिरात्रं तु भवेच्छुद्धिरिति। व्याघ्रपादोऽपि। तुल्यं व
यसि सर्वेषामिति। यच्चांगिरसा निर्दिष्टं। विप्रे न्यूने त्रिभिर्वर्षैर्मृते शुद्धिस्तु नैशिकी। अह्ना क्षत्रिये शुद्धिस्त्रिभिर्वैश्ये मृ
ते तथा। तथान्यदपि। नैव निरुक्तचूडके विप्रे त्रिरात्राच्छुद्धिरिष्यते। निवृत्तचूडे क्षत्रिये षड्भिर्वैश्ये पंचभिरुच्यते। शूद्रे त्रिवर्ष
न्यूने तु मृते शुद्धिस्तु पंचभिः। अतऊर्ध्वं मृते शूद्रे द्वादशाहो विधीयते। षड्वर्षांतमतीतो यः शूद्रः संम्रियते यदि। मासिकं तु भ
वेच्छौचमित्यंगिरसा भाषितमिति। षड्वर्षान्तमतीतो य इत्यादि नव हारीतवचनं विरुध्यते। वचनं तु। आ मौंजीबंधनाद्विप्रः क्षत्रि
यश्च धनुर्ग्रहात्। आ प्रतोदग्रहाद्वैश्यः शूद्रो वस्त्रद्वयग्रहादिति। मौंजीबंधनाद्यनंतरं मृतः पोष्याशौचं निमित्तं भवतीत्यर्थः।
शूद्रो वस्त्रद्वयग्रहणयोग्यो द्वादशादिवर्षीदशीय एव न षड्वर्षीदशीय इति। शूद्रस्य षड्वर्षानंतरं मासिकाशौचाभि ११५

१२

वि ३

धानमांगिरसं हारीतं न विरुध्यते। तस्माद्बहूनामनुग्रहान्न्याय्य इति मन्वाद्यनेकस्मृतिपर्यालोचनया विश्वरूपधारे
श्वरामधातिथिविज्ञानेश्वरप्रभृतिभिराचार्यैर्वयोवस्थाशौचं सर्ववर्णसाधारणमिति व्याख्यातं। अथवांगिरसत्र
ष्यशृंगवचनानुसंधिकाशौचप्रतिपादकान्यनापद्विषयतया व्यवस्थापनीयानि। ७। अथ जननमरणाशौचे वर्णनिय
मेन कालनियमः। तत्र मनुः। दशाहं शावमाशौचं सपिंडेषु विधीयते। जननेऽप्येवमेव स्यान्निपुणां शुद्धिमिच्छतामिति
महागुरोश्चाश्वलायनोक्तो विशेषः। द्वादशरात्रं वा महागुरुषु दानाध्ययने वर्जयेरन्निति। गुरुस्तु यो ह्युपसंस्कृत्य वेदा
र्थं ग्राहयित्वा वृत्तिं चाप्यादिदधाति स महागुरुः। एतच्च विप्रविषयं क्षत्रियादिविषये तु याज्ञवल्क्यः। क्षत्रस्य द्वादशाहानि
विशः पंचदशैव तु। त्रिंशद्दिनानि शूद्रस्य तदर्धं न्यायवर्तिन इति। पाकयज्ञादिजः शुश्रूषादिरतः शूद्रो न्यायवर्ती तस्य तदर्धं
मासार्धं। पराशरांगिरसौ। ज्ञानातपविशिष्टः क्षत्रियस्य दशाहेन पंचदशरात्रेण वा। वैश्यस्य द्वादशाहेन विंशद्दशाहेन तिस्र
णां शूद्रस्य विंशतिरात्रेण सर्वेषां च वर्णानां दशाहेन वशीत केशुद्धिरित्यभिहितं तच्छाकसमाचारात्तावादनादरणी
यमिति। वचनमन्यत्। अथवा दशाहाचारातावस्था विज्ञेया। उत्तमगुणवद्गुणवद्विषया यथाक्रमं न्यूनाधिककल्प्या
श्रयणेन निर्वाहः। किं वा आपदनापद्विदेनाव्यवस्था। एतच्च जननमरणाशौचं ज्ञातानामवाप्युविच्चापादकं दशाहादिकालनि

यमसूत्यत्यादिप्रभृत्यवविगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशं । यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेदिति
मनुस्मरणात् । अत्र शृणुयादित्युपादानात् श्रवणमेव निमित्तमिति गम्यते यच्छेषं दशरात्रस्येत्यनेनाचा
त्यादिप्रभृत्यवकालनियमावगम्यते । तथा निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म चेत्यत्रापि श्रवणस्यैवोपादाना
च्च नृपादिहतानां शास्त्रविहितमार्गेणात्मघातिनां पाषंड्यादिप्रेतानां च संबंधिनो ये सपिंडास्तेषां सद्यः शौचं तथा
च याज्ञवल्क्यः । हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनां । अन्वक्षं सद्यः शौचमित्यर्थः । नृपेण प्रमादकृते दशाहादि
कमेव क्रोधाद्दस्युवृत्ते सद्यः शौचं युद्धहते न कालांतरहतस्यैकाहः । अत्र च गौतमः । गोब्राह्मणहतानामन्वक्षं राज
क्रो ५ क्रोधाच्च युद्धहति । क्रोधश्च दर्शनप्रमादश्चापादितनिरासार्थं तथा ब्राह्मणार्थं विपन्नानां त्यात्यषितां । गा य ... पिवा आहवे
पिहतानां च एकरात्रमशौचकं । क्षत्रधर्मेण संग्रामांगणमृतस्य सद्यः शौचं । तदाह मनुः । उद्यतैराहवे शस्त्रैः क्षत्र
धर्महतस्य च । सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिः । यज्ञः पिंडदानादिरूपः संतिष्ठते समाप्तो भवतीत्यर्थः । द
क्षेण दशपक्षाः सूतके मृतके सूतकत्राष्टशौचास्ते पलक्षणार्थं अत्र सद्यः शौचादिषु षडुक्तपयंतिपक्षयोर्वैवरादीनां
यद्धिनायत्तानि वर्द्धितिता दर्शप्रतिग्रहाग्निहोत्रादिविषयास्तत्र स्नात्तौ विषयत्वेनापि वचनस्य चरितार्थत्वात् ११६
यौपन्यस्ता सद्यः शौचमथैकाहस्त्र्यहश्चतुरहस्तथा षड्दशाहादशाहपक्षो मासस्तथैव च मरणांतं तथान्य
दृशापक्षास्तु सूतके २ त्रे १
१३

र्थं वा तादशाहादिकपक्षास्तु ब्राह्मणादिविषयाः । मरणांतिकविषयस्तु दक्षेणैव दर्शितः । अस्नात्वा वाप्यहुत्वा च अदत्वा अंतस्त्वा
यो द्विजः । एवंविधस्य विप्रस्य सर्वदा सूतकं भवेत् । व्याधितस्य कदर्यस्य ऋणग्रस्तस्य सर्वदा । क्रियाहीनस्य मूर्खस्य स्त्रीजितस्य वि
शेषतः । व्यसनासक्तचित्तस्य पराधीनस्य नित्यशः । श्राद्धत्यागविहीनस्य भस्मांतं सूतकं भवेत् । श्राद्धत्यागः श्राद्धाकरणं । एत
च्च जननं मरणं रजोदर्शनं वा यदि दिवा तदा तत्काल एव निष्पन्नं । तद्दिनप्रभृत्येव दशाहादिकालनिर्णयः । यदा च दिने प्रदर्शादि
कं अतिक्रांते रजन्यां वा जननादिकं द्विरात्रात्प्राग्भवति तदा द्वितीयदिनैकदेशव्यापि व्यपि आत्रोच्चस्य तद्दिनप्रभृत्यवगणनेत्येकः
कल्पः । रात्रिं त्रिधा विभज्य प्रथमभागद्वये चेत्पूर्वदिनप्रभृत्यवगणना । पराप्राग्दुदयात् पूर्वदिनप्रभृत्यैवेति तृतीयः । यदाह कश्यपः । उदि
ते त्वथ यदा सूर्ये नारीणां दृश्यते रजः । जननं चापि विपत्तिर्वा यस्याहस्तस्य शर्वरी । अर्द्धरात्रावधिः कालः सूतकादौ विधीयते । रात्रिं कु
र्यात्त्रिभागां तु द्वौ भागौ पूर्व एव तु । उत्तमांशः प्रभाते न युज्यते मृतसूतके । रात्रावेव समुत्पन्ने मृते रजसि सूतके । पूर्वमेव
दिनं ग्राह्यं यावन्नाभ्युदितो रविरिति । अत्राद्यावारः प्रमाणं । अत्र जनने पूर्वमेव कर्तव्यता त्रिहितामांप्रतमितरत्राभिधी
यते । तत्र मनुः । न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण हारयेत् । अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्पर्शदूषिता । स्वेषु तिष्ठत्स्विति वि
वक्षितार्थं अस्वर्ग्यत्वादिदोषकथनात् । तथा । दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् । पश्चिमोत्तरपूर्वैस्तु यथायोगं द्विज

तयः। अथायागमितिवेदपादिप्रतिलामन्त्र। मेण। अतएवस्थाग्निप्रायप्रकल्पनार्थं प्रथमतः। शूद्र एवोपात्तो वचनात्। हारीतः
नयामाग्निमुखं समर्तं निर्हरेयुः। याज्ञवल्क्यः। सदग्धव्य उपेतश्चेदाहिताग्न्यावृतार्थवत्। उपेत उपनीतः। शूद्रस्तु वर्षद्वयग्रहण
योग्यकालीनउपनीतसदृशाः। वर्षद्वयग्रहणं च द्वादशादिषोडशवर्षमाध्य। आहिताग्निदाहप्रक्रियया दाहादिकं कार्यमित्यत्रा
र्यविशेषः। उपनीतस्य लौकिकाग्निना। अनाहिताग्नेः स्वगृह्योग्निना। आहिताग्नेश्च वैतानाग्निभिरिति। लौकिकाग्निश्च चा
म डालपत्यादिव्यतिरिक्तः। तथा च देवलः। चंडालाग्निरमेध्याग्निः सूतिकाग्निश्च कर्हिचित्। पतिताग्निश्चिताग्निश्च न शिष्टग्रहणोचि
ता इति। स्वगृह्योक्तविधिना। अस्मात्त्वमधिजातोसि त्वमयं जायतां पुनः। असौ स्वर्गाय लोकाय स्वाहेति हुत्वा दग्धव्यः। प्रचेताः। स्नानं प्रेतस्य पुत्राद्यैर्विमाल्यैः पूजनं ततः। न
ग्रामादहं दाहान्ते च किंचिद्वस्त्रं परित्यजेत्। किंचिद्वस्त्रैकदेशं ग्रामसमीपे नवास्य यत्नेदीयं परित्याज्यमित्यर्थः। निगमः। संध्यायां वा तथा
रात्रौ दाहः पाथ्यय कर्म चानवस्थायां दृष्टं तेनानुक्रियते निष्फलतां व्रजेत्। दाहदानं तत्प्रचेताः। प्रेतस्य बान्धवा यथावृद्धमुदकमवतीर्य
नाद्वर्षीय युरुदकांते प्रसिंचयुरपसव्ययाज्ञोपवीतवासः सोदक्षिणाभिमुखो ब्राह्मणस्यात् उदङ्मुखाः प्राङ्मुखा वा राजन्यवैश्य
योरिति। याज्ञवल्क्यः। सप्तमादशमाद्वापि ज्ञातयोऽभ्युपयंत्यपः। अपनः शोशुचदघमनेनपितृदिङ्मुखः। सप्तमदिवसादवगिदृश
मदिवसाद्वार्वा ज्ञातय एकगोत्राः सपिंडाः समानोदकाश्च। एतद्विषमदिनस्य कार्यं तथाचगोतमः। प्रथमतृतीयपंचम ११७

सप्तमनवमेषूदकक्रियेति। वसिष्ठः साध्यान्तरालाभ्यां पाणिभ्यामुदकक्रियां कुर्वीरन्निति। उदकदाने संख्यानियममाह या
ज्ञवल्क्यः। सकृत्प्रसिंचेदुदकं नामगोत्रेण वाग्यता। नामगोत्राभ्यामुपलक्षितमुदकं नामगोत्रमुच्चार्योदकं सिंचेयुरित्य
र्थः। प्रचेताः। त्रिः प्रसेकं कुर्युः प्रतस्पृष्पविनितथा। दिने दिनेंजलीन्पूर्णान्प्रदद्यात् प्रेतकारणात्। तावद्वृद्धकस्य कर्तव्या याव
त्पिंडः समाप्यते। यावद्दशमः पिंडः समाप्यत इत्यर्थः। यमस्तु विशेषांतरमाह। सप्तवत्सु ततः स्नात्वा शुचिः प्रयतमान
सः पाषाणं तत आदाय विप्रदद्याद्दशांजलीन्। द्वादश क्षत्रियो दद्याद्वैश्यः पंचदश स्मृताः। त्रिंशच्छूद्राय दातव्यास्ततः सं
प्रविशेद्गृहं। एतच्चोदकदानं मृते मातामहे आचार्ये वा द्विजः नियमेन कार्यं। सख्यादिषु सत्यामिच्छायां कार्यमित्यभ्यनु
यथाह याज्ञवल्क्यः। एवं मातामहाचार्यप्रेतानामुदकक्रिया। एवं पूर्वोक्तप्रकारेण नित्यतयेत्यर्थः। कामोदकं सखिप्र
त्ता स्वस्रीयश्वशुरर्त्विजां। कामोदकमित्युपपादनादिच्छा [illegible] वकरणे दोषो नास्तीति गम्यते। पिंडदानप्रकारमाह याज्ञव
ल्क्यः। पिंडयज्ञावृता देयं प्रेतायान्नं दिनत्रयं। जलमेकाहमाकाशे स्थाप्यं क्षीरं च मृन्मये। पिंडयज्ञावृता पिंडयज्ञप्रक्रिय
या प्राचीनावीतत्वतिलदर्भादिरूपया। आकाशे शिक्यादौ। प्रचेताः। प्रेतं स्नाप्य दीर्घोदकं स्थाप्यं पि बवेदमि
ति। पिंडदानं वा संस्कृत्य [illegible]। असंस्कृतानां ग्रामे पिंडं दद्यात् संस्कृतानां कुशेष्विति प्रचेताः। स्मरणात् पाषाणे

पिपिंडोदयः। तथा चशंखः। भूमौ माल्यं पिंडं पानीयमुपलेखा दद्यादिति। याज्ञवल्क्योपि पिंडत्रयमेवाभिहितं। विष्णुसुर
वत्सरातेत्रोच दिनानि तावत्पिंडदानमाद्यायावदाशौचं तावत्प्रेतस्योदकं पिंडं वदद्यादिति। पारस्करः। प्रेतव्यः सर्वेव सत्यः पिंड
दद्युर्दशैवतु। एवं पिंडोदकदानं गुरुलघुकल्पाबाध्या। तोतुत्रयद्यथन्यतरपक्षानुष्ठाने पित्राम्नाथसिद्धिः। तथापि पूर्व
ल्पप्रतोपकारातिशयः कल्प्यः। अन्यथा गुरुतरपक्षानुष्ठानानुपपत्तेः। एवं दत्तस्य पिंडस्य प्रतिपत्तिकर्माह वृद्धवशिष्ठः
वाग्यताः प्रयताश्चैव तिष्ठेयुः पिंडसंनिधौ। ततो बाधे निवृत्ते स्युनद्यां तु प्रक्षिपेद्बुतानिति। नद्यभावे प्रशस्तोदका...
प्रक्षिपेत्। यत्तु वायोपस्पृश्य सस्नात्वापि दशापिंडादातव्याः। अत्रोपस्पृश्य सपिपिंडाद्दद्याद्दद्यौव वितिशातानत्परम
रणात्। तथा। त्रिरात्रानौ तु पारस्करः। प्रथमे दिवसे दद्यात्स्वयः पिंडाः समाहिताः। द्वितीये चतुरो दद्यादस्थिसंचय
नात्तथा। पिंडे दद्यादिनियममाहस्तबनः। पुत्रः। फलमूलैश्च पयसा शाकेन गुडेनवा। तिलमिश्रं तुदातव्यं पिंडं दक्षिणामुख
रे। ताहारादाप्रदानं तथोदवताय तानपुष्पं दीपासकं पुष्पं च धूपं दीपं तथैव वा। शालिनाशक्तुनिर्वापित्राकेवपियथा
वीप्त। प्रथामहनियद्द्रव्यं तद्वस्यादशाहिकमिति। कर्तृनियमो गृह्यपरिशिष्टे। असगोत्रसगोत्रो वा यदि स्त्री यदि वा
मानो प्रथमेहनि यो दद्यात्स दशाहं समापयेत्। दशाहं यावदेतामवायंनियमः। अत एतन्माध्य दशांतरसिंचितमभिहितम् ११८

डाक्टर भाऊदाजी इत्याख्यस्य स्मारकम्
MEMORIAL

क

पिंडपुत्राद्यागमात्पिप्रथमदिवसापक्रांतानेवकार्यं पुत्राद्यजावप्रथमक्रांतानेवासपिंडीकरणेपुविशेषः। सत्वश्राद्ध
स्त्ववाकवच्यातो उदकदानंतु समावेः सपिंडादिभिः कार्यं पिंडादिभिः कार्यं पुंदानं त्वकनिवपुत्रादिना। पुत्र बहुत्वे वितरानु
त्याज्यष्ठनेवपातिव्यादिदाषरहितनत्रानानेवाभिप्रायेण मरीचिः। सर्वैस्तुमतं लब्धा ज्येष्ठेनैव तु यत्कृतं। द्रव्येण चा
विभक्तेन सर्वैरेव कृतं भवेदिति। अविभक्तानां तु द्रव्यमविभक्तमेव। विभक्तेषु स्वस्वशक्त्यापक्रयास्वाद्दनाक्षिविदोधीदि
द्विकोपयुक्तमुद्धृत्य तत्कनिष्ठाय तिविदायतातदावतद्द्रव्यमविभक्तमिवजवतीति द्रष्टव्यं। वा विभक्तेनेत्यस्य निवर्हः विभक्ते
षुद्रव्यसमीकरणे नैकस्य कर्तृत्वं। षाडशोश्राद्धादाववनसांवत्सरिकादौ पिंडदानादिषुधिकारिक्रममाहशंखः। पित्र
पुत्रेणकर्तव्या पिंडदानोदकक्रिया। पुत्राभावे तु पत्नीस्यात्तदभावे तु सोदरः। गोतमः। पुत्राभावे सपिंडामातृसपिंडाःशि
ष्याश्चदद्युः तदभावेऋत्विगाचार्यौ। अत्रशंखवचनात्पुत्राभावे पत्नीतदभावे सपिंडा इतिक्रमः। पुत्रोऽश्वदोद्धा
विधन्तु रस्मादयः। अत एवौरसादिपुत्रपरिगणनानंतरं याज्ञवल्क्यः। पिंडदोंशहरश्चैषां पूर्वाभावे परः परः इति। तत्रापि दुरसा
भावा पौत्रः तदभावा पौत्रस्तदभावे पुत्रिकादिक्रमः। अत एव स्मृतिसंग्रहे। पुत्रः पौत्रश्च तत्पुत्रः पुत्रिकासुत एव च। तिरूप
स्वैगः। पुत्रेषु वर्तमानेषु नान्यं वै कारयेत्स्वधां। आनुकल्प्यादपुत्रस्य श्राद्धं कुर्याद्विनाभिकः। बोधायनः। अपुत्रस्यपि

याकार्यंपिंडश्राद्धंतथोदकं।क्रियालोपोनकर्तव्यः।व्रतस्यागतिकोक्षितिः।यदात्वनुपनीतःपुत्रःसंस्कर्तापित्रोर्वातदाग्निदानमे
वसमंत्रकंकार्यंतथाचकात्यायनः।असंस्कृतनपन्यात्सदाग्निदानंसमंत्रिकं।कर्तव्यमितरत्सर्वंकारयेदन्यमेवहीति।अ
त्रविशेषमाहसुमंतुः।अनुपेतोपिकुर्वीतमंत्रवत्पैतृमेधिकं।यद्यसौज्येष्ठतनयःयदिस्याद्व्रतबंधनः।वर्षत्रयानंतरंचू
डानावपिसर्वमौर्ध्वदैहिकंमंत्रवत्कुर्यात्।वर्षत्रयादर्वाक्कृतचूडोपिशक्तश्चेत्।सर्वंमंत्रवत्कुर्यात्।यद्यशक्तः।अथकृ
तचूडोवातदग्निदानमेवमंत्रवत्कुर्यादितिव्यवस्था।शंखः।जायापिंडंपतिर्दद्यादपुत्रायाति।थेक्ते।श्वश्रूवादस्तुस्नुषाक
यनिदनायदुत्सोदरः।जायापिंडमित्यादिस्तुत्रापत्नाववि षयांबीजिक्षेत्रिणोर्विषयेमरीचिः।स्वगोत्रवान्यगोत्रोवायोन
वेद्विधयासुतः।पिंडश्राद्धविधानंचाक्षेत्रिणेप्राग्निनिर्वपेत्।बीजिनस्तुततःपश्चात्क्षेत्रीजातिकत्कवित्।बीजिनदद्याद्दा
ममृतपश्चात्प्रदीयते।उक्तोयदिमृतास्यातांबीजिक्षेत्रिणौतदाददत्स्वात्विप्पादोनदत्त्वस्याद्बीजिनानापतिष्टाते।क्षेत्रि
णोप्रदत्वाबीजिनेदत्तेतद्बीजिनानापतिष्ठतइत्यर्थः।एवंविधवानियोगविधिनायत्रानियोगस्तद्विषयं।अनियोगस्त्वेत
त्तुनारदोक्तंद्रष्टव्यंजातायत्वनियुक्तायामेकेनबहुभिस्तथा।अरिक्थभाजस्तेसर्वेबीजिनामेवतेसुताः।दद्युस्तेबीजिन
पिंडंमाताचेच्छुल्कतोहृता।आशुल्कोपनतायांतुपिंडदावोढुरेवतइति।पिंडदाबीजिसापिंड्यमात्रामेवतेषांनपिंडदाना ११९

+कथ२

२५

न२

धिकारः।तेसुतावोढुरेवाक्षेत्रिणएवेत्यर्थः।पिंडदावोढुरेवतइत्यपिपाठः।सपिंडसत्यपिब्रह्मचार्यादिभिःपिंडोदक
दानादिकंनकर्तव्यं।तथाचयाज्ञवल्क्यः।नब्रह्मचारिणःकुर्युरुदकंपतितास्तथाउदकमितिपिंडदानस्याप्युपलक्षणंब्रह्म
चारिणउदकदानादिनिषेधश्चमातापित्रादिव्यतिरिक्तविषयः।तथाचसएव।आचार्यपित्रुपाध्यायान्निर्हृत्यापिव्रतीव्रती स
कटान्नंचनाश्नीयान्नचतैःसहसंविशेत्।व्रतीब्रह्मचारीव्रत्येवनास्यब्रह्मचर्यव्रतभ्रंशइत्यर्थः।सब्रह्मचारीकटान्नं
माशौचान्नंनाश्नीयात्निर्हरणादन्यत्रदाहाद्यौर्ध्वदैहिकंसकलमपिलभ्यते।मात्रादिव्यतिरिक्तविषयेमनुः।आदि
ष्टीनोदकंकुर्यादाव्रतस्यसमापनात्।समाप्तेतूदकंकृत्वात्रिरात्रमशुचिर्भवेत्।आदिष्टीब्रह्मचारीव्रतनप्राक्रांत
प्रायश्चित्तश्चादिष्टीतिमन्वातत्रतत्समाप्तेतूदकंदत्वादिनत्रयमशुचिःस्यादित्यर्थः।वृद्धमनुः।स्त्रीणांचैवोदकंकुर्युस्तेना
न्या४ व्रात्येर्विधर्मिणः।गर्भभर्तृद्रुहश्चैवसुराप्यश्चैवयाःस्त्रियः।पूर्वोक्तब्रह्मचर्यादिव्यतिरिक्तैरपिसपिंडैःमृतपाषंड्याद्युद
कानोदकादिकंनकार्यं।तथाचयाज्ञवल्क्यः।पाषंड्यनाश्रितास्तेनाभर्तृघ्न्यःकामगादिकाः।सुराप्यआत्मत्यागिन्योनाशौ
चोदकभाजनाः।वेदबाह्यलिंगधारिणःपाषंडाःअनाश्रिताःआश्रमविशेषरहिताः।स्तेनाब्राह्मणस्वर्णव्य
तिरिक्तद्रव्यहारिणः।पाषंड्यादिमरणस्याशौचादिनिमित्तत्वाभावात्तन्मरणेसतिसपिंडैरुदकादिनकर्तव्य

मित्यर्थः। स्तुराथइत्यादिषु लिंगमविवक्षितमुद्देश्यगतत्वात्। आत्मत्यागिष्वविशेषमाह गौतमः। प्रायोनाशकशस्त्राग्नि
विषोदकोद्बंधनप्रपतनैश्चेच्छतामिति। प्रायो महाप्रस्थानं। अनाशकमननं। प्रपतनं भृगुलशिखरादावपातः। इत्यादिनि
र्निमित्तैः स्वाम्युपाग्निहितमार्गेणेच्छापूर्वकं मृतानामाशौचोदकादिकं न कर्त्तव्यमित्यर्थः। अंगिराः। चंडालादुदकात्सर्पाद्ब्राह्मणा नर३
द्वैद्युतादपि। दंष्ट्रिभ्यश्च पशुभ्यश्च मरणे पापकर्म्मिणां। उदकं पिंडदानं च श्राद्धं यत्तु प्रतीयते नापतिष्ठति तत्सर्वमंतरि
क्षे विनश्यति। मनुः। वृथासंकरजातानां प्रव्रज्यासु च तिष्ठतां। आत्मनस्त्यागिनां चैव निवर्त्तेतोदकक्रिया। वृथा संकरजा
तानामिति वृथाजाताः पंचमहायज्ञादिरहिताः। संकरजाताः प्रतिलोमजाः। प्रमादात्पूर्वोक्तनिमित्तैर्मरणे विद्यत एव आशौचा
दिकं। अतएवांगिराः। अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः। तस्याशौचं विधातव्यं कर्त्तव्या चोदकक्रिया। चंडालादिमृतादि वै४
ताम्भरण्यादीनां प्रतिपत्तिकर्म्म स्मृत्यंतरे निहितं। वेतानं प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे। पात्राणि तु दहेदग्नौ यजमाने
वृथामृते। वृथामृतः अविहितमार्गेण मृतः। तथा आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया। तेषामपि तथा गंगातोय
संस्थापनं मतं। गंगाग्रहणं पुण्यनद्युपलक्षणं। एवं पूर्वोक्तनिंदितमरणमृतानां स्नेहादिनाशौचाद्यौर्ध्वदेहिकं मरणे स्मृत्यंतरे प्रायश्चि
त्तमाम्नातं। स्नात्वाग्निमुदकं स्नानं स्पर्शनं वहनं कथा। रज्जुच्छेदाश्रुपातं तप्तप्रेतं यवदेतदाहृतकः। कृतोदकक्रियां कृत्वा कृच्छ्रं सांत 120
× स्तनश्रेणशुध्यतीति एतच्च बुद्धिपूर्वं अत्यकात्म्यादिकरणे अबुद्धिपूर्वकि तु संवर्त्तः। एषा मन्यतमं। कर२

१७

यनं चरेत्। यच्च सुमंत्वादिभिर्मौसलेनैव हारस्त्रिषवणं वा। तथा एकरात्रात्याजनादिकं चाभिहितं तदशक्तविषये देश
कालाद्यनुसारेण योजनीयं यत्तु वृद्धादित्रिभिश्चिकीर्षक्रियस्तस्यात्मदहनमथ उक्तं तमादि पुराणादिषु वृद्धः शौचस्मृ
तिभ्रष्टः प्रत्याख्यातभिषक्क्रियः। आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनांबुभिः। तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः। तृ
तीये तूदकं दत्वा चतुर्थे श्राद्धमाचरेत्। तथा। गच्छेन्महापथं वापि तुषारगिरिमादरात्। प्रयागवटशाखायां देहत्यागं क
रोति वा। स्वयं देहविनाशस्य काले प्राप्ते महामतिः। उत्तमान्प्राप्नुयाल्लोकान्नात्मघाती भवेत्क्वचित्। एतेषामधि
कारस्तु सर्वेषां सर्वजंतुषु। नराणामथ नारीणां सर्ववर्णेषु सर्वदा। अत्र शौचस्यात्यदं तेषां वह्न्यनलहालक्षुब्धः वाराण ज्रा६
स्यां प्रियाद्य सुप्रत्याख्यातभिषक्क्रियः। प्राणाद्वै तारकं ब्रूते नान्यथा कस्यचित्क्वचित्। विवस्वान्। सर्वेन्द्रियविशुक्तस्य स्व
ल्पापाराद्धमस्य चा प्रायश्चित्तमनुक्तानमग्निपातो महोपपथः। धर्मार्जिना समर्थस्य कष्टपापं किंतस्य च। ब्राह्मणस्या
प्यनुज्ञातं तीर्थस्नानविधानक्षणं। धर्मार्जिने समर्थस्य ह्यादशवार्षिकादिरूपप्रायश्चित्तानां समर्थस्य। एवं शास्त्रविहित
मार्गेण मृतानां चंडालादिमृतानां च संवत्सरादूर्ध्वं मोक्षदीक्षिकं कार्यमिति षट्त्रिंशन्मते। गोब्राह्मणहतानां च पतिता
नां तथैव च। ऊर्ध्वं संवत्सरात्कुर्यात्सर्वमेवौर्ध्वदेहिकं। अत्र परे विशेषमाह पराशरः। चंडालश्वपाकनगोभिर्विप्रो द

तायदि। आहिताग्निर्मृतो विप्रो विमृताषणात्मघातकः। दाहतब्राह्मणी विप्रो लोकाग्नौ मैत्रवर्जितं। दग्धस्त्रीनिधुनर्गृह्याद
रणद्धालयेन्नतः स्वेताग्निनाथमंत्रेण पृथगेतत्पुनर्दहेत्। संवत्सरादर्वागपि तत्पापात्तु सा। रणद्विगुणादिकं प्रायश्चित्तं
विधाय नारायणबलिं कृत्वा अर्द्धदिह्निकं कार्यं आयुषः आनित्यावन संवत्सरांतरामोर्ध्वादहिकादिलोपप्रसंगात्। तन्ना
रायणबलिं कृत्वा। तथा चह याज्ञवल्क्यछागलायो। नारायणबलिः कार्यो लोकगर्हाभिया नरैः। तथा तेषां त्वव्छो
चैनान्यथेत्यब्रवीद्यमः। नारायणबलौ कृते अर्द्धदिह्निककरणे शुद्धिर्भवतीत्यर्थः। सर्पहते तु विशेषः। संवत्सरं यावत्तं
चर्पा नागपूजां विधाय तदनंतरं नारायणबलिं कृत्वा। सौवर्णनागं त्यत्कां गां च यथा सोद्दंन ब्राह्मणाय दत्वा अर्द्धदे
हिकं कुर्यात्। नारायणबलिस्वरूपं च विष्णुना भिहितं। एकादशीं समासाद्य शुक्लपक्षस्य वै तिथिं। विष्णुं समर्च्य यद्वंयमं
विवस्वतं तथा दश पिंडान्घृताभ्यक्तान्दर्भेषु मधुसंयुतान्। तिलमिश्रान्प्रदद्याद्धि संयतो दक्षिणामुखः। विष्णुं बुद्धौ समासा
द्य नद्यं वाम्भि ततः क्षिपेत्। नाम गोत्र गृहीतं तत्र पुष्पैरभ्यर्च्य नितं तथा। धूपदीपप्रदानं च नैवेद्यं तथापरं। निमंत्रयेत विप्रान्वै वै
पंच सप्त नवापि वा। विद्यातपः समृद्धांश्च कुलोत्पन्नान्समाहितान्। अपरेहनि संप्राप्ते मध्याह्ने समुपोषितः। विष्णोरभ्य
र्चनं कृत्वा विप्रांस्तानुपवेशयेत्। उदङ्मुखान्यथाज्येष्ठं पितृरूपमनुस्मरन्। मनो निवेश्य विष्णौ वै सम्यक्कुर्यादितं द्वितः। आ १२१

वा २

१८

वाहनादि यथाशक्त्या। देवपूर्वं तदाचरेत्। हृष्टान्नु ज्ञात्वा ततो विप्रान्तृप्तिं दृष्ट्वा यथाविधि। हविष्यं च यं जानानेव तिलादिसंहि
तेन वा। पंच पिंडान्प्रदद्याद्वै देवरूपमनुस्मरन्। प्रथमं विष्णवे दद्याद्ब्रह्मणे च शिवाय च यमाय सानुचराय चतुर्थं पिंडमु
त्सृजेत्। मृतं संकीर्त्य मनसा गोत्रपूर्वमतः परं। विष्णोर्नाम गृहीत्वैव पंचमं पूर्ववत्क्षिपेत्। विप्रानाचम्य विधिवद्दक्षिणाभिः स्म
मर्चयेत्। एकमन्यतमं विप्रं दक्षिणाभिः समर्चयेत्। गवा वस्त्रेण भूम्या वा प्रेतं तं मनसा स्मरन्। ततस्तिलांस्तु विप्रस्तु दत्त्वा दर्भे तु मि
मन्त्रितैः। क्षिपेयुर्द्विजैः पूर्वं तु नामबुद्ध्या निवेश्य वो हविर्गंधं तिलांबु तत्स्मे दद्युः समाहिताः। मित्रभृत्याज्ञातिभिः सार्द्धं पश्चाद्भुंजीत
वाग्यतः। भविष्यत्पुराणे। सुवर्णतारनिष्पन्नं नागं कृत्वा तथैव गां। श्रोत्रियाय दत्वा विधिवत्पितुरानृण्यमाप्नुयादिति। उदकादिदा
नानंतरकर्तव्यमाह याज्ञवल्क्यः। स्नातोदकान्समुत्तीर्णान्मृदुशाद्वलसंस्थितान्। स्नातानपवदेयुस्तानितिहासैः पुरातनैः।
अपवदेयुः इतिहासस्वरूपं च। मानुष्ये कदलीस्तंभनिःसारे सारमार्गणं। करोति यः स संमूढो जलबुद्बुदसंनिभे इति। तथा न
रोदितव्यमपीत्याह स एव। श्लेष्माश्रु बांधवैर्मुक्तं प्रेतो भुंक्ते यतोऽवशः। अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः इति
इतिहासस्य श्रवणानंतरं किं कर्तव्यमित्यत्राह स एव। इति संश्रुत्य गच्छेयुर्गृहं बालपुरःसराः। विदश्य निंबपत्राणि नियता द्वारि
वेश्मनः। आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान्। प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैः। धर्मार्थं प्रेतनिर्हरणादि

कं कुर्वतामपि स्नानानंतरं प्राणानायम्य निंबपत्रदशनप्रभृति गृहद्वारदेशांतकं मकिरणेन स्पृश्य शुचिः॥ यतः स एवाद्यप्र
वेशनादिकं कर्म प्रेतसंस्पर्शिनामपि॥ इच्छतां तत्क्षणशुद्धिं परेषां स्नानसंयमात्॥ परात्रा राः अनाथं ब्राह्मणं प्रेतं ये व
हंति द्विजातयः॥ पदे पदे यज्ञफलमानुपूर्व्याल्लभंति ते॥ न तेषामशुभं किंचित्पापं वा शुभकर्मणां॥ जलावगाहनात्तेषां
सद्यः शौचं विधीयते॥ यस्तु स्नेहादिवशान्निर्हृत्य तदन्नमश्नाति तद्गृहे वा निवसति तस्य दशाहाच्छुद्धिः॥ यस्तु पूर्ववदेव निर्हृ
त्य तद्गृहे वसति तदन्नमश्नाति स त्रिरात्राच्छुद्ध्यति॥ यस्तु निर्हरणादिकमेव करोति न तद्गृहे वासं न च तदंतान्नाजनं स एक
हात्॥ तथा च मनुः॥ असपिंडं द्विजं प्रेतं विप्रो निर्हृत्य बंधुवत्॥ विशुद्ध्यति त्रिरात्रेण मातुराप्तांश्च बांधवान्॥ यद्यन्नमत्ति
षां तु दशाहेनैव शुद्ध्यति॥ अनदन्नन्नमह्नैव न चेत्तस्मिन् गृहे वसेत्॥ एतत्सजातीयविषयं॥ विजातीयविषये तु गौतमो वि
शेषः॥ अवरश्चेद्वर्णः पूर्ववर्णमुपस्पृशेत् पूर्वो वा वरं तत्र शवोक्तमाशौचमिति॥ उपस्पृशनमिह निर्हरणं॥ तेन वैश्यो ब्राह्मणं नि
र्हरति॥ उत्कृष्टश्चेन्नीचं तत्र निर्हरणीयाशौचवद्विनाशः शुद्धिः॥ ब्राह्मणस्य तु शूद्रं निर्हृत्य तदा मासेन शुद्धिः॥ शूद्रस्य ब्राह्म
णं तदा दशाहेनेति दिनेति स्यानन प्रकारेणानुसंधेयं॥ ब्रह्मपुराणे॥ ब्राह्मणेन मनुष्यवस्तिं न कारयेति कदाचन॥ का मान्ना
द्युवच्छ्रोतोक्तवातज्जातिनां व्रजेत्तांश्च ताः कुर्वति विप्राय शूद्रविट्क्षत्रियो न [illegible] सता दृष्टान्यः पुत्रान्यो न करोति कदाचन॥ १२२

१८

न२

राजे मृते सपिंडे तु निरपत्ये पुरोहितः॥ मंत्री वा तदशौचं तु वीक्ष्य पश्चात्करोति सः॥ अनपत्ये अविद्यमानसपिंडे च राजनि मृते स
पुरोहितस्तस्य राजश्राद्धं कुर्यात्॥ तत्प्रयुक्ताशौचं चरेदित्यर्थः॥ शवस्पर्शनिमित्तं चाशौचं स्मरविल एवं तद्यायदीनां त
दृथार्णां तथा योगिनः॥ आगुप्त्वेयस्य संस्थ यदि पतेत् कृदामधिनः॥ क्रियास्नानस्पर्शनसुर्थांत गृह्णीणां च न तद्भवेत्॥ क्रियावतानेषा
मनाहाः गृहणीणां गृहे न वा नो॥ अतिक्रांताशौचविषये वामवक्त्रतिक्रांते तदाशौचाद्दूर्ध्वं पश्चाज्जानाति वृद्धे॥ त्रिरात्रं सूतकं तस्य
न तद्वदस्यापकल्पितेदितिस्मरणात्॥ त्रिरात्रमिति मातापितृव्यतिरिक्तविषयं॥ आशौचविनां नियमं विशेषो याज्ञवल्क्ये
न दर्शितः॥ क्रीतलब्धाशना भूमौ स्वप्युः पृथक् पृथक्॥ क्रीताशनाश्रयाचितलब्धाशना वा भवेयुरिति नियमादर्थादे
तदनावच्छिन्नशानं मिहंदिनं च सपर्यंतमयं नियमः॥ तथा च वसिष्ठः॥ गृहाद्विज्ञाय आद्यप्रस्तरस्य मनश्नंत आसीरन् क्री
तान्यन्नेन वा वर्तेरन्निति॥ आशौचविनाशयनाद्यर्थं स्मृत्यमयः प्रस्तर आद्यः प्रस्तर इत्युच्यते॥ मनुः॥ अक्षारलवणान्नाः स्युर्निमज्जेयु
श्च ते त्र्यहं॥ मांसाशनं च नाश्नीयुरिति॥ गौतमः॥ अधः शय्यासनिनो ब्रह्मचारिणः सर्वे इति॥ तथा वपनं दुःखानुभाविभिः
सर्वैः सपिंडैः पुत्रैरेव वा स्वशूद्रसानुसारेण प्रथमदिनप्रभृति विषमदिनेषु अथवा समदिनेष्वपि आद्यदशदिनान्तः पूर्वं कर्त
व्यं यदाहापस्तंबः॥ अनुभाविनां च परिवापनमिति॥ अनुभाविनो नाल्पवयसः सपिंडाः पुत्रा इत्यर्थः॥ द्वितीयदिनकर्तव्यं तु

रकम्मप्रियन्नतः।तृतीयपंचामवापिमासमवाप्रदानतः।तथा।गंगायांभास्करक्षेत्रे मातापित्रोर्गुरोर्मृते।आधानका
लेस्नानामवपनंसप्तसुस्मृतमिति।देवलः।दशाहमध्येसंप्राप्ते स्नानंयामाहुरित्तीरवा।तत्रज्याज्यानिवामासिके
श्राद्धमश्रुनखानिचेति।प्रथमादिदिनक्षुप्तताद्धोरस्यापिसुध्यर्थंदशाहदिनेपिवपनंकर्तव्यं।दशाहदिनमिति
मृतकांतोपलक्षणं।अंतेववासमस्तांत्यांगइतिस्मरणात्।मृतकांतकर्तव्यंवासस्त्यागमासेचयाज्ञिचाश्रमश्राद्धादित
गोपिमृतकेमृतकांतेपिकर्तव्यः।अस्थिसंचयनदिनमपिविकल्पितं।तत्रसंवर्तः।प्रथमेह्निद्वितीयेवासप्तमेनवमेतथा
अस्थिसंचयनंकार्यंदिनतद्गोत्रजैःसह।विष्णुः।चतुर्थेदिवसेअस्थिसंचयनंकुर्यात्तेषांचगंगांभसिप्रक्षेपः।तथाद्वि
तीयेवास्थिसंचयइतिवा।अत्रचस्वगृह्योक्तमार्गेणव्यवस्था।अस्थिसंचयनदिवसेचस्नानवान्तिदेवतोद्देशेनकुंभ
कर्तव्यः।अस्य उपलक्षणं।शौचनिवृत्तिकालनियममाहदेवलः।दशाहादिष्टेनाशौचेननलेसंचयनेक्रमात्तांस्तंगे
स्पर्शनमिच्छंतिवर्णानांतत्त्वदर्शिनः।त्रिचतुःपंचदशभिःस्पृश्यावर्णाःक्रमेणतु।अस्थिसंचयनेसर्वेतएवस्याशौच
त्रिरागाच्छुद्धिानवस्थिसंचयनात्प्रागितितात्पर्यंतथाचस्मर्यते।अस्थिसंचयादूर्ध्वमंगस्पर्शोनिदुष्यतीति।एतदुप
नीतविषयं।अनुपनीतचस्थिसंचयनमंतरेणस्याशौचत्रिरागास्पृश्यत्वं।तदाहदेवलः।स्याशौचमालाह्निरेयं 123

त्रि४

२०

ज्वनिंचत्रिरागतः।शूद्रविट्क्षत्रविप्राणांयथाशास्त्रप्रचोदितमिति।कर्मनिष्ठिकारलक्षणंचाशौचंस्वस्ववर्णशौचका
लानंतरंस्नानादिनिरपगच्छति।एतच्चशौचमाहिताग्नेःसंस्कारदिनप्रभृति।अनाहिताग्नेस्तुमरणदिनप्रभृतिअस्थिसंचयनं
त्वनयोरपिसंस्कारदिनप्रभृतीतिविश्वरूपः।तथाचांगिराः।अनग्निमतउक्रांतःस्याग्नेःसंस्कारकर्मणइति।पैठीनसिरपि।अ
नग्निमतउत्क्रांतराशौचादिद्विजातिषुदाहादग्निमतविद्याद्विदशास्थमृततथेति।साग्निकस्यदाहदेवप्रभृत्यवाशौचादी
नितन्निश्चादीनामासंस्कारात्संध्यादिकर्मलोपानास्तिआशौचवनिर्यानिमित्तकयोर्निर्दिष्टंपारस्करेणदर्शितानित्या
निविनिवर्तेरन्वैतानवर्जंशालाग्नौचैकेअन्यएतानिकुर्युरिति।अत्रनित्यानुष्ठानावश्यकानिमित्तिकानामथापसंग्रहः।
अतोवितानानांस्मार्तानांचकर्मणांप्रतिप्रसवःपिनैमित्तिकस्यापिप्रतिप्रसवः।काम्यानांतुसर्वत्रसर्वथानिवृत्तिःवित
नोग्नीनांविस्तारःश्रौताग्निःतत्रक्रियमाणानिनित्याग्निहोत्रादीनिवैतानितानिवर्जयित्वानित्यानिविनिवर्तेरन्नित्यर्थःनिषे
धेनित्याग्निहोत्रादिषुनप्रवर्ततइत्यर्थःअतःस्वयमवकुर्यात्।शालाग्निःगृह्याग्निःतत्रसंबंधिनांसायंप्रातर्होमःस्था ×
लीपाकादीनांपाक्षिकीकर्तव्यताकरणमकरणंवाइत्यर्थइत्यर्थःयदावाकरणपक्षस्वीकारःतदाअन्येअसपिंडा
एतानिकुर्युःअन्येनासपिंडेनेत्यानिकारयेदित्यर्थःतत्रापिस्वद्रव्यत्यागात्मकंप्रधानंस्वयमवकुर्यात्स्यानन्यानिधाद्यं

नत्पन्ने सूतके वा पित्र्यकृत्या छेदयो द्विजः। पुइर्ष्टिराहिताग्नि दर्शपूर्णमासादिकाधनुरनाहिताग्नि स्थालीपाकादि
रूपं ना तु कार्यं

तु कुलस्याः। संध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत्। सूतके तु समुत्पन्ने स्मार्तं कर्म कथं त्यजेत्। पिंडयज्ञं चरुं होमम
सगोत्रेण कारयेत्। पिंडयज्ञः पिंडपितृयज्ञः चरुः श्रवणाकर्माश्वयुज्यादिकः स्थालीपाकश्च। असगोत्रः असपिंडः। सपिंड नि
षेधस्याशौचनिमित्तत्वात्। अशौचरहितेन ब्रह्मचारिणा सपिंडेन दातव्यमिति। गम्यते। बृहस्पतिः। सूतके मृतके चैव
अशक्तौ श्राद्धभोजने। प्रवासादिनिमित्तेषु दापयेन्न तु हापयेत्। अग्निसाध्येष्वपि वैश्वदेवस्य निवृत्तिः। यथा पंचय
ज्ञादीनामपि तथा संवर्तः। विप्रो दशाहमासीत वैश्वदेवविवर्जितः। पंचयज्ञविधानं तु न कुर्यान्मृतजन्मनोरिति। एवं
त्वाक्र नित्यनैमित्तिक। व्यतिरेकेण तादृशां नित्यनैमित्तिकानामपि निवृत्तिः। यत्तु नंदिनी प्रतिग्रहो होमः स्वाध्यायश्च
निवर्तते भूति तत्कामावेहोमानिशायां वैश्वदेवा निशायां वा संध्याविषये विष्णुपुराणे सर्वकालमुपासीत संध्ययोः पार्थिवे
ष्यते। अन्यत्र सूतकान्मोह्य विभ्रमातुरभीतितः। सूतके आशौचव संध्ययानस्वरूपतः परित्यागः। अपितु मंत्रोच्चारणस
र्जिकायाः। ख्रलस्त्रोनप्राणायामरहितमानसिकसंध्यान्यनुष्ठानात्। सूतके मृतके चैव संध्याकर्मसमाचरेत्। मनसोच्चारये रयो ३
न्मंत्रान् प्राणायामम् ऋते द्विज इति। अंजलिसंक्षेपस्तु सावित्रीं तु जप्त्वा कार्यां। तथा च पैठीनसिः। सूतके सावित्र्या चांजलिं प्रक्षिप्य प्र
दक्षिणं कृत्वा सूर्यं ध्यायन्नमस्कुर्यादिति। सूतकादौ ग्रहणे जाते स्नानदानश्राद्धादौ न दोषः। तथा च वृद्धवसिष्ठः। चंद्रसूर्यग्रहे १२४

स्नायात् मृतके सूतके पि च। अस्नायी मृत्युमाप्नोति स्नायी मृत्युं न विंदति। तथा। मृतकसूतके चैव न दोषो राहुदर्शने। ताव
देव जवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यत इति। सूतके मृतके वा सपिंडैः समानोदकैश्चाशौचवान्नेन भोक्तव्यं। यदाह यमः। उभय
त्र दशाहानि कुलस्यान्नं न भुज्यते। अन्यत्र सूतके मृतके वा सकुल्यानां तु न दोषः। सूतके तु कुलस्यान्नमदोषं मनुरब्रवी
दिति। तन्निवृत्त्वा व्रतं। अत्र विशेषः षट्त्रिंशन्मते। अज्ञात्वा मपरिज्ञातो सूतकं नैव दोषकृत्। एकेनापि परिज्ञाते भोक्तुर्दो
षमुपावहेत्। उशना। ज्ञातां दातुस्तो कुर्यात् यद्यपि दाता सूतकाद्यभिज्ञाने दातुः सूतकं नास्ति ज्ञातास्येव जननादिनिमित्ते वाता तथा
पि दातृपरिज्ञानमंतरेण केवलाज्ञाकृज्ञानपि वव भोक्त्रा जनदोषात्। भोक्तुरयत्नप्रतिश्चादातुः जनिसूतिकादिशौ निमि
त्तज्ञातौ शुद्धिनं जननिवृत्तेनिमित्तै सूतकादिस्वरूपनिष्पत्तिरकोशः। तत्ज्ञाने वा परस्येतदुभयविशिष्टं निमित्तं एवं
च निमित्तैकदेशस्य परस्परं वादित्वक्रियात तत्रादेकादेशाविज्ञाविल न्याय नान्यस्यापि संज्ञा वक्ष्यमाण न्यायाक्क बलतो नु ज्ञानि पिभो
जननिवृत्तिः। यदा तु दाता ज्ञातं तन्नोक्तान दापि भोक्तुरयत्नेनादोषः। न दातुर्जनिनिमित्तो दोषः। अपितु सूतकान्नभोजयितृ
त्वदोषात्स्यात् वा। अयं चान्नजयितृनिमित्तो दोषः सूतके मृतके च विहितः प्रथमादिदिनेनैव श्राद्धदिने च्युतिरिक्तकालविष
यः। तत्कालो विहितत्वात्। ब्रह्मपुराणे। अपि दातृपदीत्रास्य सूतके मृतके तथा। अविज्ञातेन दोषः स्याद्ब्राह्मणादिशुक दाचना।

विज्ञातेनोत्कुर्वंस्याद्यायश्चित्तादिकं क्रमात् ॥ बृहस्पतिः ॥ विवाहोत्सवयज्ञेषु त्वंतरा मृतसूतके । परैरन्नं प्रदातव्यं भोक्त
व्यं च द्विजोत्तमैः ॥ भुंजानेषु तु विप्रेषु त्वंतरा सूतमृतके । अन्यगेहोदकाचांताः सर्वे ते शुचयः स्मृताः ॥ मरीचिः ॥ लवणे मधु
मांसे च पुष्पमूलफलेषु च । शाककाष्ठतृणेष्वप्सु दधिसर्पिःपयस्सु च ॥ तिलौषधाजिने चैव पक्वापक्वे स्वयंग्रहः । पण्येषु चै
व सर्वेषु नाशौचं मृतसूतके ॥ स्वयंग्रहः स्वामिनानुज्ञातो गृहीतो यादित्यर्थः ॥ पक्वापक्वमिति पक्वान्नत्वजातमपक्वं तंडुलादिकं वा
न ५ लमन्नं प्रवृत्तादरग्राह्यं तान्यस्मात् ॥ तथा चांगिराः ॥ अन्नसत्रप्रवृत्तानामामान्नं तु ह्यगर्हितं । भुक्त्वा पक्वान्नमेतेषां त्रिरात्रं तु प
यः पिबेत् ॥ अत्र जन्मच्युतिरिक्तौ दानादिविषये पक्वाद्यष्टः ॥ इतरथा मरीचिवचने नविरोधः ॥ व्रतादिष्वारब्धेष्वस्सु पश्चात्सूतका
दिकं न भवति तदा तावन्मात्रे सूतकाभावः ॥ व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे । प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकमिति
विष्णुस्मरणात् ॥ सूतकमिति मृतकस्याप्युपलक्षणं ॥ प्रारंभश्च तत्रैवं ॥ प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः ॥ नांदीमुखं विवाहादौ
श्राद्धे पाकपरिक्रिया ॥ प्रारंभाभावेऽपि कन्यायाः ॥ अधर्म्यविसन्निहितलग्नांतराभावे विष्णुनिवास्त्वनुज्ञा दत्तौ ॥ अनारब्धविशु
ध्यर्थं कूष्मांडैर्जुहुयाद्घृतं । गां दद्यात्पंचगव्याशी ततः शुध्यति सूतकी ॥ कूष्मांडैः कूष्मांडमंत्रैः ॥ अथानुलोमजविजातीयसपि
डाशौचं ॥ तत्र बोधायनः ॥ क्षत्रविट्शूद्रजातीया ये स्युर्विप्रस्य बांधवाः ॥ तेषामाशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते ॥ तेषामाशौचे १२५

द्वि २

क्षत्रादिजननादिनिमित्ताशौचे ॥ हारीतः ॥ दशाहाच्छुध्यते विप्रो जन्महानौ स्वयोनिषु । षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्र
योनिषु ॥ विष्णुः ॥ क्षत्रियस्य विट्शूद्रेषु सपिंडेषु षड्रात्रत्रिरात्राभ्यां ॥ वैश्यस्य शूद्रे सपिंडे षड्रात्रेण शुद्धिः ॥ हीनवर्णानां
तूत्कृष्टेषु सपिंडेषु जातेषु मृतेषु वा तदाशौचव्यपगमे शुद्धिः ॥ बोधायनोक्तमनापद्विषयं हारीतोक्तमापद्विषयमि
ति व्यवस्था ॥ एतेषां तु सापिंड्यं त्रिपुरुषमेव ॥ पिंडश्चावर्तते त्रिष्विति सापिंड्यप्रकरणे निहितत्वात् ॥ अपरार्के त्वाशौचमा
पस्तंबेनोक्तः ॥ क्षत्रविट्शूद्रजातीनां यच्च स्यान्मृतकसूतके । तेषां तु पैतृकं शौचं विजातीनां तु मातृजं ॥ पितृगृहावस्थिता
नां तद्विजातीनां पितृजातीयमाशौचं विजातीनां तु मातृजात्युक्तमित्यर्थः ॥ प्रतिलोमानां तु सूतकादिकं नास्त्ये
व प्रतिलोमा धर्महीना इति स्मरणात् ॥ मूत्रपुरीषासृग्विन्मलापकर्षणार्थं शौचं कुर्युः ॥ठा॥ अथ समानोदकाशौचं ॥ त
त्र मनुः ॥ दशाहं शावमाशौचं सपिंडेषु विधीयते । जननेऽप्येवमेव स्यान्निपुणां शुद्धिमिच्छतां ॥ जन्मन्येकोदकानां तु त्रिरात्रा
च्छुद्धिरिष्यते ॥ एकोदकाः समानोदकाः ॥ तत्र सप्तमपुरुषोर्ध्वं त्रिभिः समानोदकत्वा … तु वृत्तिर्यावज्ज
न्मनाम्नोर्विज्ञानं ॥ तथा च मनुः ॥ सपिंडता तु पुरुषे सप्तमे विनिवर्तते । समानोदकभावस्तु जन्मनाम्नोरवेदने ॥ निव
र्तते इत्यन्वयः ॥ठा॥ अथ प्रोषितमरणजननयोराशौचं ॥ तत्र निर्दशज्ञातिमरणे श्रवणेऽपि त्रिरात्रं सचैलस्नानाच्छुद्धिः ॥ यदाह मनुः

निर्दशत्वं याति मरणं श्रुत्वा पुत्रस्य जन्म च । सवासा जलमाप्लुत्य शुद्धो भवति मानवः ॥ पुत्र इति संबंधसूचकत्वाद् दृष्टान्ताति-
क्रान्तरवस्थानं सपिण्डानां तु दशाहादिकं श्रुतमिति सूतकं नास्त्येव । अत एवाह देवलः । नाशुद्धिः प्रसवाशौचे व्यतीतेषु दि-
नेष्वपि ॥ प्रोषितमरणे तु याज्ञवल्क्यः । प्रोषितकालशेषात्स्यादिति । देशान्तरस्थसपिण्डमरणे दशरात्राद्याशौ-
चकालेऽनतिक्रान्ते दशरात्रादिशेषं यावदाशौचं भवति । न श्रवणप्रभृति पुनर्दशाहादिकमित्यर्थः । दशाहादू-
र्ध्वं तु मासत्रयपर्यन्तं त्रिरात्रं ततः षण्मासपर्यन्तं पक्षिणी ततो नवमादर्वागेकाहः ततः संवत्सरपर्यन्तं स्नानोदकदाना-
भ्यामेव शुद्धिः संवत्सरानन्तरं स्नानानन्तरमिति विशेषः । यदाह वृद्धवसिष्ठः । मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी तथा ।
अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुध्यति ॥ स्नानं सवसनं तत्र उदकदानमर्थात्सिद्ध्यति । मनुः । संवत्सरे व्यतीते तु स्पृष्ट्वैवापो
विशुध्यति । स्पृष्ट्वा स्नात्वेत्यर्थः । अन्यानि यानि विरुद्धवचनानि तानि पूर्वोक्तविषये व्याख्यानि । एतन्मातापितृव्यति-
रिक्तविषयं । अत एवाह पैठीनसिः । पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः । श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भव-
ते । दशाहमिति दशाहाद्युपलक्षणं । सूतकी भवेदित्यनेन प्रेतकार्यकर्तृत्वं दर्शयति । सापत्न्यमातरि तु वि-
शेषमाह दाक्षिणात्यः । पितृपत्न्यामपेतायां मातृवर्जं द्विजोत्तमः । संवत्सरे व्यतीते तु त्रिरात्रमशुचिर्भवेत् ॥ एतच्च वक्ष्य- १२६

२३

माणदेशान्तरलक्षणे रहिते देशान्तरस्थे मृते । देशान्तरमृते तु सपिण्डमात्रस्य यावदवगिपि स द्युः त्र्यहो च देशान्तरमृते
श्रुत्वा क्लीबविरवानां त्वाल्यानां । मृते स्नानेन शुध्यतीति गर्भस्रावे च गात्रिण इति स्मरणात् । देशान्तरलक्षणमाह वृद्धम-
नुः । महानद्यन्तरं यत्र गिरिर्वा व्यवधायकः । वाचो यत्र विभिद्यन्ते तद्देशान्तरमुच्यते ॥ बृहस्पतिः । देशान्तरं वदन्त्येके ष-
ष्टियोजनमायतं । चत्वारिंशद्वदन्त्यन्ये त्रिंशदन्ये तथैव च ॥ अत्र च देशान्तरावस्थाभेदेन व्यवस्था द्रष्टव्या । अनुत्र अन्यथा न
दोषः । स्त्रीपुरुषयोः परस्परं त्वेवं सवासःस्नानं सपत्नीषु त्वेवं एवमिच्यानन्तमाता पितृवत्सा त्रिरात्रं च भवति । ग्रंथकारः परा-
मृष्टवान् । देशान्तरकालान्तरत्वहीनत्वसाम्यान् सापत्न्यामरणे तु त्रस्य त्रिरात्रं दीनवत्सर्पिपत्नीषु चैवं संवत्सरातीत-
सपत्न्या परस्परं चैवमिति । अनतिक्रान्ते त्वनुपनीताः परमेव । तत्र वयोऽवस्था नाशौचव्यवस्थाविभागमरणे । तथा च था-
ग्रपादः । तुल्यं वयसि सर्वेषामतिक्रान्ते तथैव च । उपनीते तु विषमं तस्मिन्नेवाति कालजं ॥ अयमर्थः । जन्मप्रभृत्युप-
नयनादर्वाचीनवयस्त्रियदाशौचं तस्य सर्वेषां ब्राह्मणादीनां तुल्यं । यच्च दशाहादिकं अतिक्रान्ते तदपि तुल्यं उपनीतो-
परमं दशाहं द्वादशाहाद्याद्विरूपेण विषमं तस्मिन्नेवानुपनीता परमेव भवति कालजमतिक्रान्ताशौचं न भवति
न पुनर्वयोवस्थाशौचव्यतिक्रम इति ॥ ७ ॥ अथ प्रोषितमृतदाहविधिः स्मृत्यन्तरे प्राप्तेषु प्रोषितादिमृतशरीरालाभे

दस्थिभिः प्रतिकृतिं कृत्वा अस्थ्नामथ लाभे स्वस्य गृह्योक्तप्रकारेण पर्णशरैः प्रतिकृतिं कृत्वा दाहः कार्यः। तत्राहिताग्नेर्वि
देशप्रोषितमृतस्य दाहाद्दशाहं दशाहादिकमाशौचं भवति। तथा च वसिष्ठः। आहिताग्निश्चेत्प्रवसन्म्रियेत पुनः संस्का
४ रं कृत्वा शववच्छौचमिति। अनाहिताग्नेस्त्रिरात्रं। सुपिष्टैर्जलसंमिश्रैर्दग्ध्वा यश्च तथाग्निना। त्रो हव्ययिलो काय स्वादे
न्युद्धा मस्त्रबांधवैः। एवं पर्णशरैर्दग्ध्वा त्रिरात्रमशुचिर्भवेदिति स्मरणात्। ७। आचार्योपाध्याययोः परमे तत्र सन्निधाने अदृश्य
त्रो ५ नुवृत्तिर्याज्ञवल्क्यः। गुर्वंतेवास्यनूचानमातुलश्रोत्रियेषु च। गुरुः उपाध्यायः। एकग्रामनिवासिनः संनिहितश्रोत्रियस्यैतदा
शौचं। तथा चाश्वलायनः। एकाहं सब्रह्मचारिणि समानग्रामीणे च श्रोत्रिय इति। सब्रह्मचारी एकाचार्योपनीतः। आचार्यवि
षयमनुः। त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति। तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः। सन्निहितगुणवच्छ्रो
त्रियसन्निहितमातुलाद्युपरामं मनुरवादीत्। श्रोत्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेत्। मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बांधवे
षु च। उपसंपन्नो मैत्र्यादियुक्तो गुणयुक्तो वा। बृहस्पतिः। त्रिरात्रं मातामहे आचार्ये श्रोत्रिये च शुचिर्भवेत्। वृद्धप्रवताः। संस्थिते
पक्षिणीं रात्रिं दौहित्रे भगिनीसुते संस्कृते तु त्रिरात्रं स्यादिति धर्मो व्यवस्थितः। पित्रोरुपरामे स्त्रीणामूढानां तु कथं भवेत्। त्रिरा
त्रेणैव शुद्धिः स्यादित्याह भगवान्मनुः। स्वसृस्वस्रोश्च भगिन्यां च मातुलानां च मातुलानी पितृव्यस्य सरित इत्यपक्षिणी क्षिपये १२७

णां। तथा मातुले श्वशुरे मित्रे गुरौ गुर्वंगनासु च आशौचं पक्षिणीं रात्रिं मृता मातामही यदि। विदग्धास्तु भगिन्यादिषु स्ना
नाच्छुद्धिः। तथा च वृद्धविष्णुः। भगिन्यां संस्कृतायां तु भ्रातर्यपि च संस्कृते। मित्रे जामातरि प्रेते दौहित्रे भगिनीसुते। श्या
लिके तत्सुते चैव सद्यः स्नानेन शुध्यति। अत्र भ्रातृपदं त्वया भगिन्याः। तदपत्यस्य च भ्रातुः स्नानाच्छुद्धिर्न तु त्रिदिनं तदप
त्यस्य। तस्य तु पूर्वोक्तरीत्या निर्दग्धादिमरणादि द्रष्टव्यं। तथा सन्निधाने ग्रामस्थे राजकुलपतौ श्रोत्रिये च तपस्विनि शिष्ये प
उपसंपन्ने शुचिर्भवेद्दर्शनात्। अत्र शिष्यश्रोत्रियौ निर्गुणौ। दिवा चेदा मोचमापतति तदा नक्षत्रदर्शनाच्छुद्धिः।
रात्रौ चेत्समानन्यायत्वात्सूर्यदर्शनाच्छुद्धिः। विष्णुः। असपिंडे स्ववेश्मनि मृते एकरात्रं। वृद्धविष्णुः। ग्राममध्यगतो या
वच्छवस्तिष्ठति कस्य चित्। ग्रामस्य तावदाशौचं निर्गते तु शुचितामियात्। आनाते न्यायेन नगरादिष्वपि वीथ्यां यावच्छव
स्तिष्ठति तावदाशौचं मि[illegible]तिरुपेया। अनेन प्रकारेणान्यपि गुरुलघ्वाशौचकल्प्याः संनिहितविद्वान्स्थाप
नीया गुणवद्गुणापेक्षया वान्यवस्थापनीयाः। ७। क्षेत्रजादिषु याज्ञवल्क्यः। अनौरसेषु पुत्रेषु भार्यास्वन्यगता
सु च। अहोरात्रमित्यनुवर्तते। अनौरसेषु क्षेत्रजदत्तकादिषु जातेषु मृतेषु च प्रतिलोमव्यतिरिक्तमन्यमाश्रि
ता अन्यागताः प्रतिलोमाश्रितासु चाशौचाभाव एवाप्येतच्चासंनिधाने। संनिधाने तु विष्णुः। अनौरसेषु पुत्रेषु जातेषु मृतेषु आ

परपूर्वासु भार्यासु प्रसूतासु मृतासु च। अत्र त्रिरात्रमित्यनुवर्त्तते। परः पूर्वपतिर्यासां भार्याणां ताः परपूर्वाः एवं विधासु
रिणयाद्यायमाश्रितास्तस्यापि त्रिरात्रमित्यर्थः। भार्यास्वित्यत्र द्वयोः संबंधित्वात् यस्य तद्भार्यायास्य च पुत्रस्तस्य
वाशौचं सपिंडानां त्वसद्यः शौचं तथा च प्रजापतिः। अन्याश्रितेषु दारेषु परपत्नीसुतेषु च। गोत्रिणः स्नानशुद्धा
स्तु त्रिरात्रेणैव तत्पिता। एतच्च संनिधाने तु पूर्वोक्तैकाहः। गोत्रिणः स्नानशुद्धाः स्युरिति। यत्र पितुस्त्रिरात्रान्न्यूनाशौचं
तत्र सपिंडानां स्नानात् शुद्धिः यत्र तु पितुस्त्रिरात्रं तत्र सपिंडानामेकाहः। अत एव मरीचिः। सूतके मृतके चैव त्रिरात्रं परपूर्वयोः
एकाहस्तु सपिंडानां त्रिरात्रं यत्र वै पितुः। स्वदेशराजनि मृते सज्योतिः। तत्र राजनि सज्योतिर्यस्य स्याद्विषये स्थितः। ज्योतिषा
सह वर्त्तत इति सज्योतिः। आदित्यदर्शनपर्यंतं रात्रौ चेद्दर्शनपर्यंतमित्यर्थः। राज्ञां विषयविनाशे आशौचाभाव
माह। महीपतीनां नाशौचं हतानां विद्युता तथा। गोब्राह्मणार्थं संग्रामे यस्य चेच्छति भूमिपः। महीपतीनामाशौ
चाभावः प्रजापरिपालनशांतिकपौष्टिकादौ नित्यनैमित्तिकादिषु तु पूर्वोक्तैव व्यवस्था। यस्य च मंत्रिपु
रोहितादेरनन्यसाध्यमंत्रादिवासादिविषये राजा इच्छति तस्य तद्विषये आशौचं न कार्यं सूपकारादीनामप्यनन्य
साध्यकर्माणि सद्यः शौचं। यदाह प्रचेताः। कारवः शिल्पिनो वैद्या दासीदासास्तथैव च। राजानो राजभृत्याश्च सद्य

घ

२५

शौचाः प्रकीर्त्तिताः। कारवः सूपकारादयः शिल्पिनश्चैलनिर्णेजकचित्रकारादयः। तेषां च स्वीयस्वीयसाधारणकर्मसु
व सद्यः शौचं नान्यत्र। तथा च विष्णुः। न राज्ञां राजकर्मणि न व्रतिनां व्रते न सत्रिणां सत्रे न कारूणां कारुकर्मणि। शा
तातपः। भृत्यकर्मकराः शूद्रादासीदासास्तथैव च। स्नाने शरीरसंस्कारे गृहकर्मण्यदूषिताः। एतदापद्विषयं। तथा
सद्यः स्पृश्यो गर्भदासो भक्तदासस्त्र्यहाच्छुचिः। चिकित्सको यत्कुरुते तदन्येन न शक्यते। तस्माच्चिकित्सकः स्पर्शे शुद्धो भ
वति नित्यशः। इति। अथानुगमनाशौचं तत्र याज्ञवल्क्यः। ब्राह्मणेनानुगंतव्यो न शूद्रो न द्विजः क्वचित्। अनुगम्याम्भ
सि स्नात्वा स्पृष्ट्वाग्निं घृतभुक् शुचिः। इयं च स्नानादिजन्या शुद्धिः समानासमानजातीयानुगमनेन। ब्राह्मणेन क्षत्रियानुग
मने तु वसिष्ठोक्तो। मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमाशौचमस्निग्धे त्वहोरात्रं शवानुगमने चैवमिति। एवमित्यने
नाहोरात्रमतिदिशति। वैश्यानुगमने पक्षिणी परिकल्पनीया। क्षत्रियापेक्षया न्यूनत्वात्। शूद्रापेक्षयाधिकत्वात्। ब्रा
ह्मणस्य शूद्रानुगमने पराशरः। प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः। अनुगच्छेन्नीयमानं त्रिरात्रेण शुध्यति
त्रिरात्रे तु ततश्चीर्णे नदीं गत्वा समुद्रगां। प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति। अनेनैव न्यायेन क्षत्रियस्य
वैश्यस्य शूद्रानुगमने क्रमेणैकाहः पक्षिणी च। वैश्यस्य शूद्रानुगमने एकाह इत्यनुबोधयं शंखः। त्र्यहं पादा

निक्षन ता दशा विशेषनिवा सिनिश्चावगंतव्यानि। एवमादीन्यन्यान्यपि विहितानि स्मृत्यंतरात् अवगंतव्यानि। अ
थवर्ज्यानि। नत्वर्णं खः। नूनं सुरसे शिपालका मधुकं तथा। कृष्मांडालाबु रवरुका विदारी श्च वर्जयत्। पिप्प
लीमरिचं चित्त तथा व पिंडमूलकं। स्त तं च लवणं सर्वं शाकं च विवर्जयेत्। कोविदार पिप्पली मरिच वंशांकुराणां विहि
तप्रतिषिद्धत्वाद्विकल्पः। एवं हिंगुबीजप्रशादीनामपि विज्ञेयं। अथवा पिप्पली मरिचयोः शाकादिष्वनिक्षिप्तयोः
प्रत्यक्षयोर्निषेधः हिंगुनिषेधः शाकवनफलव्यंजनेष्वांतथा च वर्ज्यप्रकरणे व्यासः। हिंगुद्रव्ये वृशाकषिति शाकरि
त्राषुणं अन्यथा द्रव्य धियानं लेवमिश्र शाकपदेय थं स्याशु। ब्रह्मांडपुराणे। आसनारूढमन्नाद्यं यादापदनमव चा
अमथौ जंगमेः स्पृष्टं शुष्कं पर्युषितं तु यत्। द्विःस्विन्नं परिदग्धं च तथैवाग्रावलेहितं। अक्षरीकीटपाषाणैः काशैर्यच्चापि पुष्टं
तां पिण्याकं मथितं चैव तथा तिलवर्णं तु यत्। सिद्धाल्लता आयजलाः प्रत्यक्षलवणी क्लनाः। वाजावडुष्टास्तथा दुष्टा सृ
ष्टतामस्तथा। वाससा चावधूता नि वर्ज्यानि श्राद्धकर्मणि। राजमाषास्तथा से च वर्ज्याः सिद्धिः भय तत्र अविके माशी मास

ष्टं तु सर्वमेकशफं तथा। माहिषं चाविकं चैव पयो वर्ज्यं विजानता॥ द्विःस्विन्नं तु शाकादि संस्कारार्थं जीरकादि भल्ल
पणाय तु तत्पक्वं। अत एव पाकादावेव संस्काराः कर्तव्याः। यच्चार्थं जनार्दने रात्र्यपगमे सर्वत्र पुनरुक्ततापाद्यंतास्तापि द्विरा
यःपाकः स च वर्जनीयः। अग्रा बल्लदिति तं उपयुक्तायनावे सिद्धाः कृताः संत इति। यत्र सिद्धस्योत्तरकालं प्रत्यक्षलवण
मद्रूपः कृतस्तेनादृशाः। अथ ब्राह्मणपरीक्षा। तत्र मनुः। दूरादेव परीक्षेत ब्राह्मणं वेदपारगं। तीर्थं तद्धव्यकव्या
नां प्रदाने सोतिथिः स्मृतः। सहस्राणि सहस्राणामनृचां यत्र भुंजते। एकस्तान्मंत्रवित्प्रीतः सर्वानर्हति धर्मतः
ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च। न हि हस्तावसृग्दिग्धौ रुधिरेणैव शुध्यतः। इत्यपरीक्षा पितृपितामहाद्य
भिजनाचारादिपरीक्षा प्रदानेतरस्मिन्नपि प्रदाने अतिथिवत्पूज्य इत्यर्थः। न ब्राह्मणं परीक्षेत दैवकर्मणि धर्मवित्।
पित्र्यकर्मणि संप्राप्ते परीक्षेत प्रयत्नतः। श्रुतवृत्तादिभिः परीक्षेतेत्यर्थः। अथ पंक्तिपावनाः। तत्र मनुः। अग्र्याः सर्वेषु वेदेषु षडं
गवित्। ब्रह्मवेदेषु सर्वप्रवचनेषु वा। श्रोत्रियान्वयजाश्चैव विज्ञेयाः पंक्तिपावनाः। त्रिणाचिकेतः पंचाग्निस्त्रिसुपर्णः षडंगवित्। ब्र
ह्मदेयानुसंतानो ब्रह्मवित् ज्येष्ठसामगः। वेदार्थवित्प्रवक्ता च ब्रह्मचारी सहस्रदः। शतायुश्चैव विज्ञेया ब्राह्मणाः पंक्तिपा
वनाः सर्वविदाद्यकस्मिन्वा अग्र्याः अध्ययनकर्तॄणां मध्ये मुख्याः एवं सर्वप्रवचनेषु वेदार्थनिर्वचनेषु श्रोत्रियान्वयजा वेदाध्य

डाक्टर भाऊदाजी इत्याख्यस्मारकम्
MEMORIAL

नजाः। त्रिणाचिकेतः अध्वर्युवेदभागस्तद्व्रतं तदध्ययनं योधीते स। अध्वर्युकरोति सोपि तद्योगात् त्रिणाचिकेतः। पंचाग्निः गार्हपत्यद
क्षिणाग्न्याहवनीयसभ्यावसथ्याग्निमान्। त्रिसुपर्णः अध्वर्युवेदभागस्तदर्थी तादृग्व्रतश्चाध्येता षडंगवित्। शिक्षाकल्पा
दीनामर्थाताध्येता च। ब्रह्मदेयानुसंतानः। ब्राह्मे विवाहे दत्ता ब्राह्मी तत्संततिस्तदनुसंतानः। ब्रह्मदेया
यत्परं परायां न्ताय निरुक्तं तिरितिज्ञापनार्थमनुपदं। सा ज्ञः स ततगातान्। ज्येष्ठसामगः। अथवा ज्येष्ठसाम छंदोगानां व्रतं सा
मानि च। तद्योगात् ज्येष्ठसामगः। प्रवक्ता वेदार्थव्याख्याता। सहस्रदो गोसहस्रदः। शतायुः अशीतिवर्षः। शतायुः
मत्स्यपुराणे। यश्च व्याकुरुते वाचं यश्च मीमांसते ध्वरं। सामस्वरविधिज्ञश्च विज्ञेयाः पंक्तिपावनाः। वायुपुराणे। यतिः
सर्वविप्राणां सर्वेषामग्रभुक् स एव तु। गृहस्थानां सदाम्नाणवानप्रस्थश्रोतेन च ब्रह्मचारि सदाम्नाण एकोग्यागी विशिष्यते।
॥०॥ अथानुकल्पः। तत्र मनुः। एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः। अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः। माता
महं मातुलं च स्वस्रीयं श्वशुरं गुरुं। दौहित्रं विट्पतिं बंधुमृत्विजाज्यौ च भोजयेत्। विट्पतिर्जामाता। बंधुर्बांधवः नारीरबंधवः
स्तद्बंधवश्च गृह्यंते। वसिष्ठः। शिष्यानपि गुणवतो भोजयेत्। ॥०॥ अथ वर्ज्याः। तत्र मनुः। न श्राद्धे भोजयेन्मित्रं धनैः
कार्योस्य संग्रहः। नारिं न मित्रं यं विद्यात्तं श्राद्धे भोजयेद्द्विजं। याज्ञवल्क्यः। रोगी हीनातिरिक्तांगः काणः पौनर्भवस्तथा

डाक्टर भाऊदाजी इत्याख्यस्मारकम्
MEMORIAL

अवकीर्णी॥ कुंडगोलौ कानरवी। अपावदंतकः। भृतकाध्यापकः क्लीवः। कन्यादूष्यभिशस्तकः। मित्रध्रुक् पिशुनः। सोमवि-
क्रयी परिविंदकः। मातापित्रोर्गुरोस्त्यागी। कुंडाशी वृषलात्मजः। परपूर्वापतिः स्तेनः कर्मदुष्टाश्च निंदिताः॥ रोगी
दीर्घरोगी पापरोगी वा किंचन नृष्विन्। अवकीर्णी ब्रह्मचार्येव स्खलितब्रह्मचर्यः। कुंडगोलको परपुरुषाज्जातौ। जीवद्भ-
र्तरि कुंडः मृते भर्तरि गोलकः इति मनुः। अपावदंतः श्यावदंतः। भृतकाध्यापकः। मूल्यं गृहीत्वाध्यापकः। मूल्यदाने-
नाध्यतापि निषिद्ध एव। महिरस्त्रिवादोषः कन्यादूषकः कन्यादूषी॥ सोमविक्रयी सोमलताविक्रयी। परिविं-
दकः। दाराग्निहोत्रसंयोगं कुरुते योग्रजे स्थिते। परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वज इति मनूक्तः। कुंडाशी
कुंडगोलकसंबंधि अन्नभोजी। कुंडगोलकानिष्ठयोर्यस्तयोरन्नमश्नाति स कुंडाश्युच्यते द्विज इति मनूक्तः। कुंडाशी
कुंडगोलकसंबंधि अन्नभोजी। कुंडगोलकाशिधायो यस्तयोरन्नमश्नाति स कुंडाश्युच्यते द्विज इति मनुस्मरणात्। अ-
स्तांडश्च पुराणे। यथा। वस्तुः षष्टिपलैः स्थूलैः कुंडं प्रस्थचतुष्टयं। लवणघृततिलानि गिरस्तः कुंडाशी पतत्यधः। वृषलात्मजः। वृषलो
धर्महीनः स्तदात्मजः। अथवा वृषलस्य शूद्रस्य आत्मजो यस्य स तादृशः। परपूर्वापतिः। परपूर्वा द्विस्तु भूः। कर्मदुष्टाः शास्त्रविरुद्धकारि-
णः। चकाराद्धर्मविद्वेषजननादयः। मनुः। चिकित्सकान्देवलकान्मांसविक्रयिणस्तथा। विपणेन च जीवंतो वर्ज्याः स्युर्हव्यकव्ययोः॥ १५७

यत्नीव पशुपालश्च परिवेत्ता निराकृतिः। ब्रह्मद्विट् परिवित्तिश्च गणाभ्यंतर एव च। पशुपालो वृत्त्यर्थं निराकृतिर्नास्तिकः।
गणाभ्यंतरो मठब्राह्मणादिः। कुनखी श्यावकीर्णीश्च वृषलीपतिरेव च। पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे। कुनखी लवो नख-
अकारणपरित्यागी मातापित्रोर्गुरोस्तथा। ब्राह्मैर्यौनैश्च संबंधैः संयोगं पतितैर्गतः॥ ७॥ अथ ब्राह्मणनिमंत्रणविधिः नि-
यमाः। तत्र वराहपुराणे। वस्त्रयोग्यादि कर्तव्यं श्वः कर्तास्मीति जानता। स्थानोपलेपमंत्रं मि त्वा विप्रान्निमंत्रयेत्। दंतकाष्ठं
च विसृजेत् ब्रह्मचारी शुचिर्भवेत्। वस्त्रयोग्यादिकमत्रितत्राकृत्रिमः परिशुद्धास्तां दक्षिणाप्रवणादिशुणापतां त्वा रात्रौ
विप्रान्निमंत्रयेत्। ततश्च ब्राह्मणो दंतकाष्ठं विसृजेदिति मंत्रणात् आह त्रियमा द्यापेत नक्तिः। श्वः श्राद्धं करिष्यामीति संकल्प्य
ब्राह्मणान् श्राद्धीयान् संख्याकान्निमंत्रयीतेति। द्वौ वैश्वदेवार्थं त्रयः पित्रर्थमिति पंच। चत्वारो वैश्वदेवार्थं त्रयः पित्रर्थमि-
ति सप्त नवाद्यो विश्वेदेवस्थाने पंच पितृस्थाने इति संख्या सप्तेति नोगी क्रियत इति। तावतामेवं द्वौ देवे युग्मान्यथाशक्ति पित्र्य
एकैकस्येति कात्यायनेन शक्तिमेव एकादिक्रमेण पित्र्यऽयुग्मब्राह्मणं द्विरभिहितान तत्र समं स्याद्युतत्वादिति न्याय्य
न पित्रादित्रयोद्देशकं प्रत्येकमेकैकं वा त्रीन्वा निमंत्रयातेति नियतं। तथा च पित्र्यमंत्राणां निमंत्रणे पितृपितामहप्रपितामह
द्वयोनसमविभागानप्रसज्येतेति। पूर्वोक्तैरेव विभागः। अथवा सप्त पंच वेति पित्र्यब्राह्मणसंख्येयं तु मनुनोक्ता।

द्वादावपि द्वन्द्वात्पत्रीतिकेचन्मुन्नयन्त्रवा। नो जयेत्तु समृद्धोपि न प्रसज्येत विस्तर इति। तत्तु देशकालबलाद्यभावे विस्तरे
क्रियमाणे कर्म्मविगुण्यं भवत्येतया द्विस्तारनिषेधपरं। याज्ञवल्क्यः मातामहानामप्येवं तंत्रं वा वैश्वदेविकं। वासिष्ठः। अपि वा
भोजयेदेकं ब्राह्मणं वेदपारगं। यद्येकं भोजयेत् श्राद्धे दैवं तत्र कथं भवेत्। अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य तु। देव
तायतने दत्वा यथाविधि समाचरेत् स्पृहन्नं तथाग्नौ तु दद्याद्वा ब्रह्मचारिणे। इत्यनेनास्य कर्तास्मीति निश्चिये यदा ता विप्रान्निमं
त्रयतु निरामिषं स्मृत्वा भुक्त्वा सर्वेतु क्षजनगृहं याय मः। जातिक्रियाविरोधमपि गुणिप्रयुक्तानात्तु पात्रा प्रार्थयीत प्रदोषांते भुक्त्वा
ननु श्रयिता न द्विजाद्वा विदार्थादिरवगतिरवाबाधः। अतः स्त्रायतनक्रिया श्राद्धायिताः प्रार्थनाश्च कारमाद प्रवृत्ताः। भुक्तापसयुः
पूर्वेद्युः पितृन् पूर्वं निमंत्रयेत्। भवद्भिः पितृकार्येषु सपाद्यं च प्रसीदत। सव्येन वैश्वदेवार्थं प्रणिपत्य निमंत्रयेत्। अत्र पूर्वं
वा ध्यान्पनगोरवणेतियावत्। ननु प्रथममित्यानिमायः। वैश्वदेविकब्राह्मणनिमंत्रणस्य प्राथम्यात् सापन
सव्यां सम्भितयाज्ञोपवीतान्वितेन। तत्रैवं प्रयोगः। आत्मनः पितृकार्ये भवता भवितव्यमिति वा तत्र विश्वेदेवस्थाने
पितृस्थाने अनुवनीयाः प्रथमेव द्विः क्षणः स्वीकर्तव्यः प्रसीदत इति। प्रणिपत्य निमंत्रणं शूद्रकर्तृश्राद्धे। दक्षिणं स्वर
णं विप्रः सव्यं विद्धन्नियमस्तथा। पादौ वा दायविज्ञपाद्यो शूद्रः प्रणतिपूर्वकं। निमंत्रयीत इत्यधिकारिति स्मरणात्। श्राम १२७

६४

स्पर्शनात् चरणाग्रहणे विशेषः। दक्षिणं जानु मालभ्य त्वं मयात्र निमंत्रितः। एवं निमंत्र्य नियमान् श्रावयेत्पि
तृकान् बुधः। आक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः। भवितव्यं भवद्भिश्च मया च श्राद्धकर्मणि। पूर्वेद्युर्निमंत्रण
मसंभवे तु देवलः। असंभवे परेद्युर्वा ब्राह्मणांस्तान्निमंत्रयेत्। निमंत्रणं तु भोजनीयब्राह्मणगृहं गत्वा कर्त्तव्यं। तथाच
त्रिः प्रथममङ्गि निवासस्थानं। श्राद्धियादीन्निमंत्रयेत्। निमंत्रणं शिष्यादिभिरपि कार्यं। तथा देवलः। स्वयं शिष्योथ
वा सुतः। प्रवताः सकलं प्रेषयेदा प्रेषं द्विजानामुपमंत्रणं एतच्च स्वः पूर्वः। श्रयान्याय मः। अभोज्यं ब्राह्मणस्यान्नं वृषले
न निमंत्रितं। तथैव वृषलस्यान्नं ब्राह्मणेन निमंत्रितं। ब्राह्मणस्य श्राद्धे वा निषिद्धं तु क्षत्रियादिवत् प्रकर्तृके श्राद्धे
ब्राह्मणेन निमंत्रितेपि न दोषः। अत एव प्रचेता वचनं सवर्णप्रेषाय्यदिति संभवान्निमायां। अत्रिस्तु निमंत्रितेपि विप्रक
र्षिता मा हा। ततं तपत्यपि विघ्ननगामयं रजनीयदि। यथाश्रुतं प्रतीक्षन् श्राद्धकालमतं द्विजः। तन्निमंत्रितानां
न्निमंत्रणकर्त्तारं यदीयं रात्रिरविघ्ननगता तर्हि तिथान्ते भुक्त्वा श्राद्धकालं प्रतीक्षरन्नित्यर्थः। कात्यायनः। अनि
ये नामंत्रितानापक्रामेत। विधिवत्कृतनंप्रतिरश्र ह्याश्राद्धं मन्लाक्रामेत। केननमामंत्रणं। राकडत्तु पादा
नादंगीकृत्यापि नो भुक्त्वा मेथीसद्यतिक्रमनदोषस्तु भवति। मनुयमौ। कथितं तु यथान्यायं ब्राह्मणो हव्यकव्ययोः।

कथंचिद्यद्यतिक्रामेत्पापः शूकरतां व्रजेत्॥ निमंत्रितब्राह्मणपरित्यागे यमनारायणौ॥ केतनं कारयित्वा उय
तिपातयते द्विजः॥ निवारयति दुर्मतिरिति नारायणपाठः॥ ब्रह्महत्यामवाप्नोति शूद्रयोनौ च जायते॥ नारायणः॥
आमंत्रितस्तु यः श्राद्धे कुर्यादन्यस्य तत्क्षणं॥ संवत्सरं कृतं पुण्यं तस्य नश्यति दुर्मतेः॥ अन्यत्र निमंत्रितः सन्नन्यत्र यः
प्रतिगृह्णाति तं प्रति देवलः पूर्वं निमंत्रितान्येन कुर्यादन्यप्रतिग्रहं॥ भुक्त्वा दारिद्र्यमाप्नोति [illegible] तस्य नश्यति॥ आमं
त्रितश्राद्धकृतः स्मृतश्राद्धकालातिपातं न कुर्यात्॥ तथा च ब्रह्मपुराणे॥ आमंत्रितश्चिरं नैव कुर्याद्विप्रः कदाचन॥ देवता
नां पितॄणां च दातुरन्नस्य चैव हि॥ अथ श्राद्धदिनपूर्वकृत्यं तत्र प्रचेताः॥ श्राद्धकृत्प्रातरुत्थाय प्रकुर्याद्दंतधावनं॥ श्रा
द्धकृन्न कुर्वीत दंतधावनं बुधः॥ तथैवयंत्रितो दाता प्रातः स्नात्वा सहाम्बरैः॥ आरभेत नवैः पात्रैरन्वारंभं च बांधवैः॥ तथैव वृद्धव
क्ष्यकारणयंत्रितो नियतो दाता श्राद्धकृत् त्रिनारंभः पाकारंभः पाकसंभृत्यनंतरं कर्तव्यमाह हारीतः पूर्वेद्युः ब्राह्मण
नामंत्रयेदित्यधिकारात् श्राद्धभूते दक्षिणां दिशं गत्वा दक्षिणाप्रवणोन्नमूलान् दर्भानाहरेदपरिच्छिन्नाग्रान् आपः॥ उज्ज्ञानांगो
मयोदके भूमिभाजनं नांडाद्वा चैव कुर्यात्॥ देवलः॥ तिलानवकिरेत्तत्र सर्वतो बंधयेदजान्॥ असुरोपहतं सर्वं तिलैः ७२
शुध्यत्यजेन वा॥ [illegible] संस्कारेन किंचिज्जनन्दवत्॥ [illegible] समृद्धं चयथा ज्ञात्वा पकल्प १८

५५

वृत्ता ततो निवृत्ते मध्याह्ने तत्र रामनखानाद्विजानां अतिगम्य यथामार्ग्यं प्रयच्छेद्दंतधावनं॥ तैलमभ्यंजनं
स्नानं स्नानीयं च पृथग्विधं। पात्रैरौदुंबरैर्दद्याद्वैश्वदेवत्यपूर्वकं॥ मध्याह्ने अनिवृत्ते मध्याह्नात्पूर्वं चैव चंद्रिकाद्व
त्यर्थः॥ यथामार्ग्यं उक्तविधिना दंतधावनं प्रयच्छेत् एतच्च सायं विद्धरात्रौ दंतकाष्ठादानावदितव्यं अभ्यंजनं तै
लमेककर्षद्रव्यं स्नानं स्नानोदकं स्नानीयं सुगंधिं त्रिफलादि तत्र नाद्यपयोगि औदुंबरं ताम्रं॥ अथ श्राद्धदिनापरा
ह्णकृत्यं॥ तत्र यमः॥ ततः स्नात्वा निवृत्तेभ्यः प्रत्युत्थाय कृतांजलिः॥ पाद्यमाचमनीयं च संप्रयच्छेद्यथाक्रमं॥ मार्ग्यं
संक्रमणेऽजनितातापहृतिस्त्वध्यर्थं पाद्यं पादप्रक्षालनोदकं॥ आचमनीयमाचमनोदकं च पृथक् पृथगासनक्र
मेण एकसमयागमाननिमंत्रणक्रमेण इत्यर्थः॥ याज्ञवल्क्यः॥ अपराह्णे समभ्यर्च्य स्वागतेनागतांस्तु तान्॥ स्वाग
तमिति प्रश्नरूपस्वागतप्रश्नं ब्राह्मणेभ्यः तिथ्या एवमन्यत्रापि ततो विश्वादेविकं यज्ञोपवीतिना पित्र्यं प्राचीनावी
तिना कार्यं [illegible] देवानां पितॄणां दक्षिणामुखः प्रदद्यात् पार्वणश्राद्धे दैवपूर्वविधि॥
कात्यायनः॥ दक्षिणं पातयेज्जानु देवान्परिचरन्सदा॥ पातयेदितरं जानु पितॄन्परिचरन्सदा॥ बौधा
यनः॥ प्रदक्षिणं तु देवानां पितॄणामप्रदक्षिणं॥ देवानामृजवो दर्भाः पितॄणां द्विगुणास्तथा॥ द्विगुणानमभ्यंज

नक्षिगुणीकृताः। संकल्पानंतरं मत्स्यपुराणोक्तवचनस्यायतात्तु विगोमायनानुलिप्तायां गोमूत्रेणाष्टमंड
लकर्त्तव्य इत्यर्थः। गोमूत्रमुदकस्यापि उपलक्षणार्थमित्र। गोमयसहितां ग्रंथुः। उदकेनवस्तुदीर्घं तद्दक्षिणदाक्षि
णाग्रवां उत्तरेदत्तसंयुक्तान् पूर्वायान्विन्यासनकुशान्। दक्षिणे दक्षिणाग्रांस्तु सतिलान् विन्यसेत्कुशान्।ति
लेषु विशेषः आपस्तंबोनाकः। अष्टयां यस्तु त्पन्ना अकृष्टफलिता च या। तावेत्राद्दपविन्नास्तु तिला स्युनति
ला भिन्नाः। ग्राम्यतिलान तिलकायकिराइत्यर्थः। अतआरण्यतिलेषु सत्सु न ग्राम्या ग्राह्याः। ब्राह्मणनिर्णिक्तपादौ
त्वेवनाथवार्ध्योदकआदाय जायंत आन्नादवीतिमंत्रेणपवित्राणुरूपवार्ध्यं वः स्वंशकाचित्यदेवाइदंवःपाद्य
मितिदद्यात्। एवं पित्रर्थब्राह्मणपादयोरपिशान्नादवीतिमंत्रांतेपितरमुकगोत्रामुकशर्मस्वधास्तुरूप इदं
तपाद्यमितिदद्यात्। एतच्चरणप्रक्षालनं स्वयमेव कुर्यात्। तथा च यमः। पादप्रक्षालनं कुर्यात्स्वयमेव विनी
तवदिति। पादप्रक्षालनानंतरं मंडलादन्यत्राग्निवाचांतेषु ब्राह्मणेषु सत्सु कतुरादेः दर्भपाणिर्द्दिराचम्य लघु
वासाजितांद्वियः। आसनेषु सदर्भेषु विविक्तेषूपवेशयेत्। लघुवाससः स्युद्ववासाः। यमः। आसनं कुतपं दद्यादि 193
वरद्वापवित्रकं। तथा आसनं स्मृतवान् सव्येन पाणिनाब्राह्मणमुपसंगृह्य समाध्वमितिवोक्त्वोपवेशयेदिति ब्रा १६९

ह्मणमुपसंगृह्य दक्षिणहस्तेनाङ्गलस्य स्पृष्ट्वेत्यर्थः। तथा। आस्यतामिति तान्ब्रूयादासनं संस्पृशन्नपि। उपवे
शनमंत्रमाह धर्मः। समस्ताजित्यांनतीजिरासान उपवेशयेत्। दिग्नियममाह याज्ञवल्क्यः। द्वौ दैवे प्राक्त्रयः पित्र्ये
उदगेकैकमेव वा। दैवे प्राङ्मुखावुपवेशनीयौ पित्र्ये उदङ्मुखा इत्यर्थः। यत्तु मैत्रायणीयपरिशिष्टे दक्षि
णाग्रेषु दर्भेषु प्राङ्मुखान्याजयेदुदङ्मुखानितिसूत्रलः। इति प्राङ्मुखोपवेशनं मैत्रायणीयानामेव व्यवस्थि
तं। ब्रह्मपुराणे पृथक् पृथगासनेषु तिलातलेन दीपिकः। अविच्छिन्नास्तथादयाश्च तत्र स्युस्तु व द्विजैः। आसनेषु
आसनस्पर्शितो यमः। भिक्षुकोब्रह्मचारी वा भोजनार्थमुपस्थितः। उपविष्टेष्वनुप्राप्तः कामंतमपि भोजयेत्। भिक्षु
कायतिः। उपविष्टेष्वनुप्राप्त इति वदतातिथ्यर्थं सर्वान्नवब्राह्मणसंपादनं कर्त्तव्यमित्यर्थादुक्तं भवति। उपविष्ट
ब्राह्मणानुज्ञयानमतिथीन्भोजयेत्। ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेदिति मनुस्मरणात्। शक्तित इत्युपाद
नात्बहुष्वतिथिषु प्राप्तेषु एकं द्वौ वा सुशक्त्यनुसारेण भोजयित्वा तरान्नमस्कारादिभिः प्रीणयित्वा प्रस्थापयेदि
तिसूक्तं भवति। यत्तु बृहद्यागातातपवचनं। आतिथ्यरहितेश्राद्धे भुंजते ये द्विजाः। तथा ते नान्नपाकेन काकायो
निं प्रयांति ते। इति तद्यथा कालअतिथिलक्षणापन्नभिक्षुकादिप्राप्तेषु अतिथिपूजारहितविषयमवगंत

वं। स्वमासनोपविष्टेषु ब्राह्मणेषु ब्रह्मांडपुराणे। श्राद्धं करिष्य इत्येवं पृष्ट्वा द्विजान्समाहितः। उक्तश्च
तिष्ठात्मरूक्षो ह्यद्यात्कृतांजलिस्ततः। कुर्यादित्यनुमंतस्ततः इत्यपि पाठः। कात्यायनः। सर्वब्राह्मणपंक्तिमूर्द्धन्यं पृच्छति
सर्वो वित्यतितदनंतरं निगमः। अपहता इति तिलान्विकिरेत्तथा प्राक्ष्य इति। तिलविकिरणानंतरं ततः पूर्ववत्
नीवीबंधं कुर्यात्। कटिप्रदेशाद्दर्भान्निक्षिप्य इत्यर्थः। तत्र दक्षिणवामाभ्यां यथासंप्रदायं व्यवस्था। याज्ञवल्क्यः।
पाणिप्रक्षालनं दत्वा विष्टरार्थं कुशानपि। आवाहयेदनुज्ञातो विश्वेदेवास इत्यृचा। आसनार्थदर्भदाने विशेषः।
स्मृत्यंतरे पितृकर्मणि वामावा देवकर्मणि दक्षिणा। विश्वेदेवस्थानं यवाभ्यां ज्ञाः। देवानां यवा इति कावके निबंध
नात्। अत्र यवाक्षतयोर्विकल्पः। अक्षतानामपि स्मृत्यंतरे निबंधनात्। कर्मविशेषविशेषविशेषनियममाह लौ
कसंग्रहकारः। अग्रस्थापनतायाः षष्ठी द्वितीया वा देनस्मृता। अन्नदाने चतुर्थी स्यात् शेषाः संबुद्धयः स्मृताः। इति दर्भा
सनदानानंतरं गृह्यसंग्रहकारः। ततस्तु नारपाद्यानि मंत्रयेत्। देवक्षणः क्रियतामिति। तत्र तथेति विप्रा ब्रूया
त्प्राप्नवानिति कर्ता त्विन ब्रूयात्प्राप्नवानानि विप्रः पुनर्ब्रूयादिति निमंत्रणं चांगुष्ठव्यतिरिक्तं ब्राह्मणदक्षिणं गृ
हीत्वा कर्तव्यं निरंगुष्ठं गृहीत्वा तु विश्वान्देवान्समाह्वयेदिति ब्रह्मांडपुराणस्मरणात्। निरंगुष्ठं गृहीत्वा निमंत्र १७

विश्वान्देवान्समाह्वयेदित्यर्थः। यमः। यवहस्तस्ततो देवान्विज्ञाप्यावाहनं प्रति। आवाहयेदनुज्ञातो विश्वे
देवास इत्यृचा। विश्वेदेवाः शृणुतेमं मंत्रं जप्त्वा ततोऽक्षतान्। ओषधय इति मंत्रेण विकिरेच्च प्रदक्षिणं। विश्वेदेवास
आगत इत्यृचावाह्य ततो विश्वेदेवाः शृणुतेमं हवं म इति जपित्वा तत ओषधयः समवदंतेति मंत्रेण दक्षिण
पादादि मस्तकांतमक्षतानाकिरेदित्यर्थः। अक्षतग्रहणं यवानामपि प्रदर्शनार्थं तेन ताः पादप्रभृति मूर्द्धांतं
देवानां प्रक्षिपेदिति। कर्मविशेषे विश्वेदेवानां नामानि बृहस्पतिना दर्शितानि। इष्टिश्राद्धे क्रतुर्दक्षौ सत्यौ नां
दीमुखे वसू। नैमित्तिके कालकामौ काम्ये च धुरिलोचनौ। पुरूरवार्द्रवौ चैव पार्वणे समुदाहृतौ। उत्पत्तिनाम
चैतेषां न विदुर्ये द्विजातयः। अयमुच्चारणीयास्तैः श्लोकः श्रद्धासमन्वितैः। आगच्छंतु महाभागा विश्वेदेवा महा
बलाः। ये यत्र विहिताः श्राद्धे सावधाना भवंतु ते इति। इष्टिश्राद्धमाधानादौ क्रियमाणं। नांदीमुखं वृद्धिश्राद्धं। नै
मित्तिकं सपिंडीकरणं। कामनया तु तीर्थगयामहालयादिश्राद्धं काम्यं। पार्वणं दर्शश्राद्धं। सकलश्राद्धप्रकृतिभूतं।
यदा महालयश्राद्धं केवलं नित्यबुद्ध्या करोति तदा पुरूरवार्द्रवावेव। यदा तु केवलं काम्यबुद्ध्या तदा धुरिलोच
नावेव। यदा तु नित्यबुद्ध्या तदापि धुरिलोचनावेव यतः। काम्ये नित्यस्य बाधकं। यदा तु गयादौ महालयं कामः

तिवद्गुणफलाधिकारः स्यात्॥ तदोपकामकामनाना वा नित्यकर्माश्रयेण नयुणफलविधयः प्रकरवा
द्वा वितिविवकल्पः॥ आतं नवान्निप्रायणादिपुराणे विश्वेदेवाक्रतुदक्षः सर्वान्विष्टिषु कीर्तितो। नि
त्यं नान्दीमुखश्राद्धवस्तु मत्स्यो चापरके नवान्नलंनात दिवकालकामा स्यादेव हि। अपि कन्यागते सूर्ये
काम्यस्त्वधुनिरावानो॥ उरोरवाद्धी वास्ववश्राद्धे विश्वेदेवाव पार्वणे इति। अपरके वान्नलंनाना। नवान्नला
नरूपनिमित्तेन पितृनरूपा नूतनान्नेन श्राद्धं क्रियमाणे अथवा नवान्नलजन तं सपिंडीकरणं पितृनिःश्राद्धं
नात्रेवान्नस्य प्रथमतन एव लाजाम्नवान्नलजनं॥ आवाहनानंतरं याज्ञवल्क्यः॥ यावरत्ववकीर्याथ ताजान
सपवित्राके। शन्नोदेव्यापयःक्षिप्ता यवासीति यवोस्तथा विश्वेदेवस्थाने अर्घपात्रमेकं द्वे वा पितृस्थाने एकेकं
णि वा षट् द्वे वा त्ये त्र्यैह्ना कुर्वीत। अर्घपात्राण्याहकात्यायनः सौवर्णराजतोडुंबरखड्गमणिमयानां पात्राणा
मन्यः तामेषु यो नि यो विद्योतपत्रपुटिकादिषु वर्ता अनिषिद्धघ्नतिदक्षः॥ राजतं दावनिषिद्धं मत्स्यपुराणे।
शिवनेत्रोद्भवं यस्मात्तस्मात्पितृवल्लभं। अमंगलं तद्यत्नेन देवकार्येषु वर्जितं चतुर्विंशतिमतौ दक्षिणेनाकेद
वानां पात्रे लवा पयःपिबेत्। शन्नोदेव्यायवोसीति यवानपि ततः क्षिपेत्। पुष्पधूपादिभिः पूजांत चापात्रेषु मानवः॥ पि १७५

६८

तृपात्रविशेषायं तिलोसीति तिलान्स्क्षिपेत्। तिस्त्रः शलाकासु पितृपात्रेषु पार्वणे। एकोद्दिष्टे शलाके
कां निक्षिप्या दकमाहारतु शलाका स्नायः कुशाः॥ याज्ञवल्क्यः॥ पवित्रेस्थ इति मंत्रेणद्वे पवित्रे च कारयेत्॥
अनंतर्गर्भिन तान्य छिन्नप्रादेश संमितानि। पवित्राच्छावसवीवायुवमिनस्पाउतान्विति मंत्रः। यज्ञपार्श्वे उप
धी मंतारत्नो अगुष्ठांगुलिपर्वाणः॥ छिंद्यात्प्रादेशमात्रं तु पवित्रं विष्णुदेवतं। एवमर्घपात्रस्थापनानंतरं याज्ञव
ल्क्यः॥ या दिव्या इति मंत्रेण हस्तेष्वर्घ्यं विनिक्षिपेत्। प्रत्यर्घ्यदानमंत्रावृत्तिः। एवं सुदक प्रक्षेप पि। अत्र विशेषमाह
गार्ग्यः॥ दत्वा हस्तेषु पवित्रेषु स्तवास्तजांतु पादतः। या दिव्या इति मंत्रेण हस्तेष्वर्घ्यं विनिक्षिपेत्। ब्रह्मपुराणे। ततो वाम
न मंत्रेण गृहीत्वा च मस्पानक्रमात्। पितृतीर्थमिदत्ता यंदक्षिणेन च पाणिना। विश्वेदेवस्थाने देवतीर्थेन दद्यात्। पि
तृस्थाने पितृतीर्थेन दद्यादिति विवेकः॥ ततश्च संस्रवांस्तत्पात्रे गृहीत्वा विश्वेभ्यो देवेभ्यः स्थानमसीति पात्रमुत्ता
नं निदधीत्॥ याज्ञवल्क्यः॥ दत्वार्घ्यं संस्रवांस्तेषां पात्रे कृत्वा विधानतः। पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः॥
पितृस्थाने न्युब्जविधानादेवस्थाने उत्तानस्थापनमिति प्रतीतं। संस्रवा ब्राह्मणहस्तगलिता अर्घोदकानि। प्रावनाः
पादप्रभृति मूर्द्धांतं देवानां पुष्पपूजनं। शिरःप्रभृति पादांतं नामाव इति। अपरके पुष्प्य हणं तिलानाम पितृद

र्चनार्थी॥ याज्ञवल्क्यः॥ दत्वोदकं गंधमाल्यं धूपदानं सदीपकं॥ तथाप्युपस्पर्शं दद्यात्सलिलं दद्यात्॥ ब्रह्मपुराणे श्वेतचंदन
कर्पूरकुंकुमानि सुगंधानि चानुलेपनार्थं दद्यात्त्रय श्राद्धप्रणीते वस्त्रं॥ श्वेतचंदनं हरिचंदनं॥ व्यासः॥ सपवित्रकरा
गंधं गंधद्वारेति सृजयेत्॥ धूपं धूरसीत्युक्त्वा दीपो ज्योतिरिदं वा॥ गंधदानं पवित्रसहित एव कुर्यात्॥ विलेपनं तु
विशेषमाह वृद्धशातातपः॥ पवित्रं तु करस्यं वा यः समालभते द्विजान्॥ राक्षसानां च तत्श्राद्धं निराशाः पितरो गता
ताः॥ समालभेत नमस्कृत्य लेपनं॥ देवलः॥ यज्ञोपवीतं विप्राणां स्कंधे नावतारयेत्॥ गंधादिप्रजार्थं दाव
पित्र्ये च कर्मणि॥ ललाटे पुंड्रकं दृष्ट्वा स्कंधे माल्यं तथैव च॥ निराशाः पितरो यांति दृष्ट्वा च वृषलीपतिं॥ पुंड्रं तत्तिल
मिति हेमाद्रिः॥ अपरार्के हेमाद्रिप्रभृतयः॥ माल्ये शिखायां धार्यमित्याह वृद्धमनुः॥ न नियुक्तः शिखावर्जं माल्यं शिरसि वेष्ट
येत्॥ नियुक्तश्चाइउपविष्टः स्युक्ताः सुमनसः श्रेष्ठास्तथा पद्मोत्पलानि च॥ गंधधूपोपपन्नानि यानि चान्यानि
चकैरवाः॥ जपाकुसुमं किंटीकूपिका सकुरंटिका॥ पुष्पाणि वर्जनीयानि श्राद्धकर्मणि नित्यशः॥ आदित्याद्य
कूल्लजघ्रातिरिक्तपुष्पाणि गृहीत कूपिका श्वेतपुष्पं पीतकुरंटिका किंटी उग्रगंधीन्यगंधीनि दुष्टान्यपि विवर्ज
येत्॥ चंदनागुरुणी चाजतायं वारीरपद्मकं तुरष्कं गुग्गुलं चैव घृताक्तं युगपद्दहेत्॥ घृतेनाकवलं दद्यादुष्टं वा १७३

घृतं गुग्गुलं तु रष्कः सिल्हकः गुग्गुलुः सर्जरसः॥ विष्णुः॥ घृतेन दीपो दातव्यस्तिलतैलेन वा पुनः॥ शौनकः॥ एतस्मि
न्काले गंधमाल्यधूपदीपाच्छादनानां प्रदानं एतस्मिन्काले अर्घदानाद्यनंतरं॥ अत्रिः॥ युग्मं वस्त्राणि यानि तद्या
द्वासांसि शक्तितः॥ शातातपः॥ युवा सुवासा इति वस्त्रं दद्यात्तदभावे यज्ञोपवीतं॥ वायुपुराणे॥ लोके श्रेष्ठतरं सर्व
माल्यं नश्यापि यत्प्रियं॥ सर्वं पितॄणां दातव्यं तदेवाक्षय्यमिच्छता॥ वस्त्रादिविकार्ये निविध्यनंतरं याज्ञवल्क्यः॥ अप स
व्यं ततः कृत्वा पितृणामप्रदक्षिणां॥ द्विगुणांस्तु कुशान्दत्वा ह्युशंतस्त्वेत्यृचा पितॄन्॥ आवाह्य तदनुज्ञातो जपेदायंतु नस्त
तः॥ यवार्थास्तु तिलैः कार्याः कुर्यादर्घ्यादि पूर्ववत्॥ दत्वार्घ्यं संस्रवांस्तेषां पात्रे कृत्वा विधानतः॥ पितृभ्यः स्थानमसी
ति न्युब्जं पात्रं करोत्यधः॥ न्युब्जमधोमुखं॥ प्रचेताः॥ प्रथमे पितृपात्रे तु सर्वान्संहृत्य संस्रवान्॥ पितृभ्यः स्थानमि
त्युक्त्वा कुर्यादूर्ध्वमधोमुखं॥ कात्यायनः॥ एकस्मिन्पितृपात्रे संस्रवान्समवनीय उत्तरतोऽधोमुखमनक्षितथा॥ कु
रावत्पात्रमावधोमुखं कुर्यात्ः॥ आसनप्रभृति वस्त्रप्रदानपर्यंतं तु प्रावक्तीरीत्याप्त्वा चाजोज
न जानन स्थापनार्थं मंडलानि कार्याणि॥ तथा च ब्रह्मपुराणे॥ मंडलानि च कार्याणि नीवारस्तु ससिकताः॥ गोम
यनमृदा वापि प्रणीतेन पितृन्मना॥ गौर मृत्तिकया वापि द्वितीयपादपावांतरं॥ पाषाणचूर्णसंकाशमिहतं तत्र वा

जीयतां प्रणीतेन मंडलाद्यभानीतेन॥ ॥अथाग्नौकरणार्थमग्निनिर्णयः। तत्र माधवीये। आहिताग्निस्तु जुहु-
याद् दक्षिणाग्नौ समाहितः। एतच्च सर्वाधानपक्षे वा पार्श्वनाग्नौ वस्मार्तकर्म विवाहाग्नौ कुर्वीत प्रत्यहं गृही। दा-
यकाले हृते वापि श्रौतं वैतानिकाग्निषु इति स्मार्तकर्मणां गृह्याग्नौ भवति यमात्। वा युगु राणाः आहृत्य दक्षिणा-
ग्निं तु होमार्थं वै प्रयत्नतः। अग्न्यर्थं लौकिकं वापि जुहुयात् कर्मसिद्धये। अग्न्यर्थी औपासनाग्नौ होमार्थं लौकिकाग्नौ-
व सौख्या गृह्याग्निरिति कल्प्यते। स्मृतिचंद्रिकाकारादिभिर्लौकिकाग्निः श्रौतस्मार्ताग्निषु इति स्मृतिनिहितः। तच्चाग्नि-
धानं नित्यं। अनाहिताग्निश्चापस्मादग्न्यभावे तथा स्मृतिमाधवीये यानापस्मादगृह्याग्निमरणाद् अग्नुहोनाग्नि धान-
न्मार्ते लौकिकाग्निस्वीकरणं स्मृतिः। मनुरपि। अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेदिति पाणौ होमं विधत्ते। श्रौ-
तगृह्याग्न्यभावश्चात्र प्रागभावः प्रध्वंसाभावो वा तद्वत्यंताभावश्चेति। गृहाश्रमस्वीकरणात्पूर्वं प्रागभावः। आश्रमस्वी-
करणानंतरं भार्यामरणादिनाऽस्मादश्रौत आश्रमत्यागे वा प्रध्वंसाभावः। तत्र च पुनः संधानपुनराश्रमस्वीकरणं तत्स-
हजाम्भृत्यवित्तः। नैष्ठिकस्य विवाहाभावादत्यंताभावः। श्रौतस्मार्ताग्न्योः प्रागभावप्रध्वंसाभावे च श्राद्धसमये १७१
वाग्निसंपादनस्याशक्यत्वात् एषादिष्वाश्रमः। यल्लौकिकाग्निरपि होमाधिकरणं च मंगीक्रियाते तत्र पाणौ लो- १७२

१०

किकाग्नेरसुसंपादनत्वाद्यभाव एव नास्तीति तदभावः पाणिस्वीकरणपक्षस्य तच्चाथवकारा इत्यग्न्य-
भावे तु विप्रस्य पाणावेवोपपादयेदिति मन्वादिवचनानि निरर्थकानि जायेयुः। तस्माद् द्वौ लौकिकाग्निरावस्थ्याद् गृह्या-
ग्निरिति युक्तं। अथवा श्रौतस्मार्ताग्नि इति विकल्प एवात्र लौकिकाग्निः सच विधुरादीन्प्रत्यग्नौकरणहोमार्थं विधीयते। या-
स्तु तत्तिरीयादिशाखासु यान्यमातात्र स्नातुल्याजन्यादिजिमं त्रिरिध्मप्रधनाद्याज्यभाग पूर्वमिग्नौकरणमाम्नातं तत्र
धान्यधनादेः पाणावनुपयुक्तत्वादग्निः प्राप्तः स च नश्रौतात् स्मार्तात् विधुराणामित्यग्न्याकांक्षायां लौकिकाग्निरुप-
तिष्ठते इति तदुद्देशेन लौकिकाग्निविधानं युज्यते। अयमत्र तात्पर्यार्थः। आहिताग्नेः सर्वाधाने दक्षिणाग्नावग्नौ-
करणहोमः। अर्धाधाने औपासने एव। अनाहिताग्नेः स्मार्ताग्नौ विद्यमाने तत्रैव तदभावे पाणौ वाप्सु वा। अप्सु
अग्नौकरणाधिकारः कात्यायनः। तथा च पर्वसमीपस्थाने श्राद्धे यज्ञपात्रविधिरिति। उदकसमीपे श्राद्धकरणे अ-
प्स्वेव तत्र पाणौ। आन्ध्रदयिक श्राद्धे पिंडपितृयज्ञातिदेशाभावाच्छिष्टाचारविरोधाच्चाग्निसद्भावे पि
पाणावेवेति विवेकः। यच्छाकंभरि धामिना पिंडपितृयज्ञो दक्षिणाग्नौ विहितः। आपस्तंबेन पिंडपितृयज्ञाधि-
कारमंत्राणां वाग्नौकरणोपदिष्टात्ताहोमं दक्षिणाग्निं न प्राप्तः। उपादेयातिदेशाभावात्। तस्मात् सर्वा-

क्षत पक्ष आपस्तंबिनामग्नौकरणाभाव एवेत्युच्यते तदपि चिंत्यं। कुरुष्वेत्यभ्यनुज्ञातो हुत्वाग्नौ पितृयज्ञवदि
ति याज्ञवल्क्यादिभिः पिंडपितृयज्ञहोमकर्तव्यतादेशात् सर्वशाखासु च कर्मण एकत्वेनाविरुद्धांगोपसं
हारस्य न्याय्यत्वादापस्तंबशाखीयानामपि तदेशात् सिद्ध इति दक्षिणाग्निरहितेत्यतः प्राप्तत्वादग्नौकरणं स
र्वाधानविषयत एवेत्यलमतिप्रपंचेन। एवमुनयविश्वस्याभावे पाणौ होमः। यत्तु जातूकर्ण्येनोक्तं अग्न्य
भावे तु विप्रस्य पाणौ दद्यात्तु दक्षिणे। अग्न्यभावः स्मृतस्तावद्यावद्भार्यां न विंदतीति। भार्याविंदनाभावो
ऽग्न्यभाव इति तदयमर्थः को भाव इति प्रदर्शनार्थं न च यमेवाभाव इति नियमार्थं स्वीकारीत्या प्रकारांत
रेणाप्यभावोपपत्तेः। किं च तत्त्वेन यस्यापि दायविभागाभावाग्न्याहरणाभावः पात्रस्याभावः पत्नीवाद्याव
द्भार्यां न विंदतीति नियमार्थः। यदपि गृह्यपरिशिष्टे अग्निसद्भावेपि कुत्रचन पाणावेव होमो विहितः। आवष्टक्यं
च पूर्वेद्युर्मासि मास्यथ पार्वणे। काम्यमाभ्युदयेष्टम्यामेकोद्दिष्टमथाष्टमं। चतुर्ष्वाद्येषु साग्नीनां वह्नौ होमो
विधीयते। पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपीति। अस्यार्थः। अष्टकाश्राद्धेषु नवमीश्राद्धमन्वष्टक्यं स
प्तम्यां क्रियमाणं पूर्वेद्युः। मासि मासि कृष्णपक्षे पंचमीप्रभृतिषु क्रियमाणं पार्वणं मासश्राद्धं काम्यं तिथिनक्ष १७८

विशेषेषु विहितफलकामनया क्रियमाणं। अभ्युदयं पुत्रोत्पादनिमित्तेषु विहितं। अष्टम्यां यद्विहितमष्टका
श्राद्धं एकोद्दिष्टं सपिंडीकरणं। अत्रास्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न त्विति न्यायेनाभ्युदयिकसपिंडीकर
णवर्जितेष्वग्नौ होमस्यानभिनंदितत्वात्पाणावेव काम्याष्टम्यां च येषां गृह्यपरिशिष्टं तेषामेव पाणौ होमः
इतरेषां तु मन्वादिवचनानुसारेणाभ्युदयसपिंडीकरणव्यतिरिक्तश्राद्धेष्वग्न्यभाव एव पाणौ होम इति निश्च
यः। यदा पाणिहोमस्तदा पित्र्यब्राह्मणबहुत्वेपि प्रथमब्राह्मणहस्त एव नान्येषु। तथा नैव कात्यायनः। पित्र्ये यः पं
क्तिमूर्धन्यस्तस्य पाणावनग्निकः। हुत्वा मंत्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेत्। हुतशेषमित्यर्थः। पित्र्यब्राह्मणहस्त एवे
ति नियमः। अत एव यमः। देवविप्रकरेनग्निः कृत्वाग्नौकरणं द्विज इति। अत्रापि शेषं देवपात्रेन निक्षिपेत्। तथा च वायु
पुराणे। हुत्वा देवकरे नाग्निः शेषं पित्रे निवेदयेत्। न हि स्मृताः शेषभाजो विश्वेदेवाः पुराणगैः। ह स्वेग्नौकरणं कु
र्यात्। आमावास्याग्निको द्विजः। पाणावेव निरग्निस्तु [illegible] कुर्यात्सदा तथा। स्मृताः शेषभाजो विश्वेदेवाः पुराण
स्मै। अतः पित्र्यादेवकरयोर्विकल्पः। तथा। वैश्वदेवे यदि तस्मिन्न नावयुज्यात् द्विजाः। वादकपाणौ होतव्यं स्या
द्विधिविहितस्तदा एतस्मिन् श्राद्धे विश्वेदेवस्थाने द्वौ चत्वार इत्येवं प्रकारेणेत्यर्थः। वैश्वदेवे यदेकस्मिन् यदा माता

मद्धश्राद्धं नतंत्रेणकिंत्पृथगेव तद्धामातामहश्राद्धपंक्तिमूर्द्धन्यपाणावपि पृथक्होमः। तथा च कात्याय
नः। मातामहस्यापि दर्पिक्रयाग्निवत्साग्निक इति मातामहस्थानीयश्राद्दविकपित्र्यब्राह्मणे नादर्पि
तृपक्षे पितृवत्तत्प्रयुक्तपाणिहोमस्तत्रैव मातामहश्राद्धप्रयुक्तब्राह्मणहस्त एवाग्न्यभाव इत्यर्थः। युक्तं
तत्र अग्निस्थानीयस्य पाणेः पृथक्कातहोमाहस्तस्य होमाधिकरणं पृथगिति हविरुद्धरणमपि पृथगेव पाणि
कृतेन च न पृथग्ग्रोक्तव्योयदाङ्गृह्यकाराः। अन्नं पाणितले दत्तं सर्वं मश्नंत्यबुद्धयः। पितरस्तेन तृप्यंति शेषांश्च
लनंतिताः। यत्र पाणितले दत्तं यच्चान्यदुपकल्पितं। एकीभावेन भोक्तव्यं पृथग्भावो न विद्यते॥ अथाग्नौ
करणविधिः। तत्राश्वलायनः। उद्धृत्य घृताक्तमन्नमनुज्ञापयत्यग्नौ करिष्ये करवै करवाणीति प्रत्यनुज्ञा
क्रियतां कुरुष्व कुर्वित्यथाग्नौ जुहोति यथोक्तं पुरस्तादन्यनुज्ञातः पाणिष्वेव वा अग्निमुखा वै देवाः पाणि
रवाः पितर इति हि ब्राह्मणं यदि पाणिष्वाचांतेष्वन्यदन्नमनुदिशतीति करिष्य इत्यादि प्रश्नत्रयं क्रियतामित्या
द्युत्तरत्रयं च यथासंख्यं प्रयोगनियम इति कल्पतरौ। अयं नियमः सार्वषाणुनतच्छाखिनामेवानतावदाध
कल्पतरावेव याज्ञवल्क्यवचनव्याख्यानसमये अग्नौ करिष्य इति पृष्टवति। घृतलुतमन्नमादायेत्यन्वय अनिहितं॥ अ ७९

अग्नौ करिष्य आदाय पृच्छत्यन्नं घृतलुतं कुरुष्वेत्यभ्यनुज्ञात इति करिष्य इत्यस्य कुरुष्वेति प्रत्युत्तरं शिष्टेनानियमानुप
त्तेः॥ द्वितीयत्वविरोधः। यथोक्तं पुरस्तादिति प्राचीनावीती क्षमुपसमाधायेत्यादिना यदि पाणिष्वित्यादि पा
णौ होमपक्षे होमानंतरमाचांतेष्वन्यदन्नं ददातीत्यर्थः। एवदाचमनं पिंडदानानंतरमेव मवान्नेमित्तिकं। अ
वांतरेपि विबद्धवचनात्पितृस्थानमातामहस्थानस्थितयोर्होमाधिकरणत्वं तायाम्बजिमानस्याचमनप्राप्ति
अन्यथा बद्धवचनानुपपत्तेः। यदा तंत्रेण श्राद्धं तदा द्वयोरेवाचमनं च होमाधिकरणत्वं तस्य तत्रैव। उत्ति
तपितर इत्यादि नियविधाख्यायते तावदासनादुच्छासनस्य निषिद्धत्वात्। यजमानस्य बहिराचमनं। विष्णुः। श्रा
मश्राद्धेष्वकाम्येषु च प्रथमपंचकेनाग्निं द्वितीयपंचकेनाश्राद्धेषु मध्यमपंचकेनामावास्यायामुत्तमपंचकेनाय होमः
पूर्वं हस्तेष्टकासु चकाम्ये षु प्रथमम धमोत्तमपंचाकेरष्टकासु च ततो ब्राह्मणानुज्ञातः पितृनावाहये
दपयंतु असुराश्चेति द्वाभ्यां तिलैर्यविश्चन विवर्जनं स्वधारतद्धः पितरः सर्वं स्थानमासे यन्न एतत्पितर इत्यावा
हनं सर्वाङ्कुरातिलविमिश्रेण गांधदकेन यात्विष्टताहृतावागिति यान्मम ताततिचपार्घं निवेद्य वेवाय मर्घं दत्त्वा
निवेद्य चानुलेपनं च स्रग्धूपालंकारपुष्पाणि तत्क्षान्विप्रान्समभ्यर्च्यादिशां घ्नस्य व इति दीक्षाया अग्नौ करवाणीत्युक्त्वा

डाक्टर भाऊदाजी इत्याख्यस्य स्मारकम्
Dr. BHAU DAJI MEMORIAL

डाक्टर भाऊदाजी इत्याख्यस्य स्मारकम्
Dr. BHAU DAJI MEMORIAL

नुज्ञातश्च विप्रैः प्राग्दक्षावाङ्गुत्तिर्यं कृत्वाय मामकाः पितरः एतद्वः पितरः अयं यज्ञ इति वचा विमंत्रणं त्वत्
यथाप पात्रेषु पात्रेषु विशेषतो रजतमायसेषु नामाविभ्यो दाबध्य इत्यन्नमादो प्राङ्मुख्या यान्निवेदयेत्
त्रपितामहाय प्रपितामहाय नामगोत्राभ्यामुदङ्मुखे क्षितिश्रामश्राद्धं लोगाक्षिस्मृत्यानुसारेण ज्योतिष्टोमा
घारांतनांदीमुखं श्राद्धं यन्मांस रहितं क्रियाततः प्रथमपंचाकानद्यादिकामकातत्तिरीयकचे यामवमेतिपंचद
शावेनुवाकः पद्यातत्स्पप्रथमद्वितीयतृतीयपंचाके रुकस्थूलेषु हामः पस्मश्राद्धे समासेष्टे पस्थश्राद्धं विधिवत्क्र
तिपादायदितिहारीतनयक्तपिंडीकरणश्राद्धं विहितं तदुच्यते आदित्यावसवइति मंत्रेण ब्राह्मणान्वीक्ष्य
अनुज्ञातश्च विप्रैरिति बहुवचनाच्चावैरनुज्ञादातव्या तथा अग्नौ कुर्यादनुज्ञातो ब्राह्मणो ब्राह्मणैः सह इति शं
खलिखितौ धूपगंधमाल्यैरलंकृत्य ब्राह्मणान्स घृतमन्नमनुज्ञाय दर्भे दक्षिणाग्रे परिस्तीर्य जुहुयादग्नये
कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहेति बोधायनः। आपस्तंबस्त्वमिश्रान्नमपः प्रतिग्राह्य गंधमील्या
नचालंकृत्याग्नौ करिष्यामीत्यनुज्ञाताभिस्थपसमाधयस्य संपतिस्त्रीयतिघ्नश्चाज्याहुती जुहोति सोमाय पितृ १८०
मते स्वधा नमः स्वाहा यमायांगिरस्वते पितृमते स्वधा नमः स्वाहा अग्नये कव्यवाहनाय स्विष्टकृते स्वधा नमः स्वाहे

ति ताच्छेषेणान्नमभिघार्य निस्पेता एवतिस्राऽनुद्धृत्य यावद्यस्मात् पिंडान्नद्याद्यस्मांहिपितरः प्रतिमयाचरंती
ति विज्ञायते अथेतरान्नं ब्राह्मणेभ्यो निवेद्य ब्राह्मणस्पांगुष्ठेनानारवनानुदिशति पृथिवी समस्य तइत्यादिवि
कपविद्याबोधायन एवाह अथाप्युदाहरंति अग्नौकरणशेषेण यदन्नमभिघारयेतातस्मिंस्तु प्राशितेदद्यादन्नं
यत्रान्नतं नावदिति ताच्छेषेणाकृताज्यशेषेणव यसंपिंडान्नद्यादित्यादि अग्नौकरणानंतरं पिंडदानं विध
यतात्पिंडान्नपक्षिभ्यः काकेभ्यो दद्यादिति वयस्मां प्रतिमयानद्रापणेति पितारायतश्च रंती त्यर्थः स्त्रियं च समाचार
श्राद्धविज्ञाप बौधायनीयानामावति कल्पतारो यत्राग्नौकरणानंतरामव पिंडदानंतच्च अथेतरान्नं ब्राह्मणे
भ्यो निवेद्येति वचनादग्नौकरणशेषं पितृपात्रे न दद्यात्ततयदा पिंडदानं नावस्तत्राग्नौकरणशेषानिवारित
हविः शेषं ब्राह्मणेभ्योऽहस्तद्यात्तदन्नं चातत्तदयित्वा चेमनं कुर्युः प्राशनविक्षनाद्रस्तदानमर्थसिद्धं ततश्च प्र
त्तनमन्नं श्राद्धार्थं संपादितमन्नं देवान्नामामः कर्तव्यः अयं च प्रकारा बोधनीयानामवाएव मनं गीकारप्रवी
परवाक्यविरोधः प्रसज्येत ब्रह्मपुराणे ततो घृताक्तमन्नं तं बासाक्षमादाय साधितं तानाग्नौ करिष्य इति प्रयतः श्राध
यद्विजान् अं कुरुष्वेति तैरुक्तो दक्षिणाभिमुखमाश्रयेत् दक्षिणायां च उदिं कु दनमिश्रोर्विवाग्यतः दद्यात्सम

मिधस्त्रिग्रस्तस्मिन्नग्रादेशमात्रिकाः पालाशाः समिदर्थे विनियोज्याः पितृकर्म्मणि। घृताक्तसमिधोक्तत्वाद्दक्षि
णाग्राः समंत्रिका मंत्रेण घृताक्ता जुहुयादाहुतित्रयं वायुपुराणाद्दक्षिणाग्रान्नाय नित्यं सामान्यात्तर
तस्तथा। एतयोरंतरा नित्यं जुहुयाद्द्विविस्तात। पालाशा फल्गुन्यायाधश्च लक्षाश्च विकंकतः। उदुंबरस्तथा
बिल्वश्चंदनाय ज्ञियाश्च याः। सरलो देवदारुश्च शालश्च खदिरस्तथा॥ समिदर्थं प्रशस्ताः स्युरेते वृक्षा विशेष
तः॥ फल्गुः काकोदुंबरिका॥ श्लेष्मातको नक्तमालः कपित्थः शाल्मलिस्तथा॥ नीपो बिभीतकश्चैव श्राद्धकर्म्मणि ग
र्हिताः॥ ग्रा निलसुस्वाहाकारं प्रथममंत्र एवाह॥ मंत्रेणोपघातं जुहुयात्स्वाहा सोमाय पितृमत इति पूर्वं स्वाहाग्न
यकव्यवाहनायेति द्वितीयमंत्र ई प्राचीनावीतीति। अत ऊर्द्धमिति वदतादामंत्र उपवीतित्वमुक्तं॥ मंत्रेणोपघा
तं मंत्रेणैनवादाय जुहुयादित्यर्थः। आश्वलायनसूत्रे पिंडपितृयज्ञप्रकरणे प्राचीनावीतित्वं विकल्पितमाह। प्राची
नावीती धक्षमुपसमाधाय मंत्रेणादायावदानसंपदा जुहुयात्सोमाय पितृमते स्वधा नमः अग्नये कव्यवाहना
य स्वधा नम इति स्वाहाकारेण वाग्निपूर्वं यज्ञोपवीतीति यदा स्वाहाकारान्तामनुक्तदाग्निपूर्वं जुहुयादुपवीती १८१
सन्नित्यर्थः। अयं च विकल्पः शिष्टाचारवशाद्व्यवस्थितः प्राचीनावीतीति स्वपक्ष आश्वलायनानामितरद्वेतरे १७७

७४

षामिति स्वधास्वाहाकारादिविकल्पः। स्वस्वशाखानुसारेण व्यवस्थिताः॥ तथा च कात्यायनः स्वाहा स्वधा नमः
स्तु समपसव्यं तथैव च। आहुतीनां यथासंख्यामावगम्याश्च सूत्रत इति। एवं च अवदानं यथावदानं प्रियंस्या
मर्थः सतु शाखांतरोक्तो गान्यपविष्टान्यतिदिष्टान्यपि चाविरुद्धान्यपि संहृत्य कर्म कारोति। अस्त मर्थाय रूपदे
क मात्रामेवकारोति तावतैव तस्य शास्त्रार्थसिद्धत्वात्। स्वधमन्त्रास्त्वापस्तंबः। उद्ध्रियतामाग्नौ च क्रियतामि
त्यामंत्रयते कामं उद्ध्रियतां काममग्नौ क्रियतामिति प्रतिसृष्ट उद्धरेत् जुहुयाच्चेति। अतिसृष्ट अनुज्ञातः स्वच
तगृह्यसूत्रे तु तान्निवानूद्दितमंत्रविधिमुखेनार्थादाहुतीनां चायादेशसंख्या दर्शिता। तथा पिंडपितृयज्ञा
धिकारस्तत्रैवाध्वर्युरुपवीती दक्षिणं जान्वाच्य मेक्षणेनोपस्तीर्य तेनाचदायाभिघार्य सोमाय पितृमते स्व
धा नम इति दक्षिणेग्नौ जुहोति यमाय अंगिरस्वते स्वधा नम इति द्वितीयामग्नये कव्यवाहनाय स्वधा नम इति तृ
तीयां यामक्षणं तं दुत्ताग्नावनुप्रहृत्य प्रहरति। मेक्षणमादधाति नयमा अंगिरस्वतीत्यक इति न चात मंत्रा आपस्तंबे
नाग्नौकरणहोमनिषिद्धौ अन्ये ह्यापाचाः। याज्ञवल्क्यादिभिश्च पिंडपितृयज्ञातिदेशः स्वतः कृत्वाग्नौ पितृ
यज्ञवदित्यादिभिर्वाक्यैरतास्तु गुणोपसंहारन्यायेन च गृह्योक्ताग्नौकरणमंत्राः तथा पिंडपितृयज्ञप्रकरणोक्ता

अमंत्रोऽग्नौकरणेत्याह्याश्वलायनीयेः॥ तत्रातिदेशप्राप्ते पितृयज्ञहोमेऽपवीतिसंबंधस्मीः॥ उपदिष्टमंत्रहोमे
तु प्राचीनावीतिसंबंधर्मः पितृदेवताकत्वात्॥ अतएव स्वगृह्यप्रक्रमेऽपि अपसव्यं वा॥ अपरपदेऽपि प्राचीनावी
तिनापसव्यं दक्षिणातापवर्ग इति॥ अत्रायं स्याद्विशेषः होमार्थे मंत्र इकारेणोक्तः॥ आघारादावग्निमुखा
ज्यभाग प्रदक्षिणानुव्रजनेष्वुत हुत॥ आघारयोः स्विष्टकृत्प्रदिष्टं यज्ञोपवीतं हि कपर्दिनाम्यादिति॥ उक्त
रीत्या प्रश्नपूर्वकमग्नौ हुत्वाग्निरूपे समिंधनाज्यभागांतं स्वाहा होमः कार्यः॥ चरुमवदानधर्मेणावदायद
र्योनि धर्मैयान्म मातामत्वलोनचरतेयास्त्रिष्टंती तिद्वाभ्यामस्या मे स्वाहेत्येताभ्यामाहुतिद्वयं जुहुयात्॥ अ
मुष्मा इत्यत्र चतुर्थ्यंतेन पितृनाम निर्देशः॥ प्रपसुन्त्रत्रापि पितामहाय प्रपितामहायेति निर्देशः॥ एवं यन्मे पि
तामही प्रलुलोभ चरति अन्नं तदृधस्तु निरिति द्वाभ्यामस्मा अमुष्मा स्वाहेत्येताभ्यामाहुतिद्वयं जुहुयात्॥ एवं यन्मे मा
ताप्रलुलोभेति सर्वेक्किमंत्रद्वय नद्वय नवयथाक्रमं मातामहाय मातुःपितामहाय मातुः प्रपिताम
हाय वाहुतिद्वयं द्वयं जुहुयात्॥ तत्रामुष्मा इत्यत्र मातामहायेत्यादि ऊहः कर्तव्यः॥ प्रथममंत्रे यन्मे माता १८२
मही प्रलुलोभ चरति अमा तामातुः पितामही वृंक्तामिति द्वितीये अन्नं तत्रत्यं मातुः पितामहाद्ध्व इति पंचमे यन्मे मातुः अ १५८

पितामही प्रलुलोभ चरतन्म रतो मातुः प्रपितामहीवृक्तामिति षष्ठे अन्नं तरत्यं मातुः प्रपितामहाद्द्ब इत्यूहः॥ तथा
च गृह्यान्नाद्यर्थमेव इकारः॥ अन्नहोमे तथास्पात्रिक जलपिंडादिदानाकार्यान्न मातामहीत्यादि तत्रोदाहर
णेन वदिति॥ उदाहरणं गृह्य स्पाट्ट एषा ततत मधुमानित्यादिमंत्रे ब्राह्मणभोजनार्थमंत्रस्प इतीतत याचद्द
पितर इत्सृचा एकामाहुतिं जुहोति रचमन्नहोमानंतरं षडाज्याहुतीर्जुहुयात्॥ तत्र स्वाहा पित्रे इति मंत्रेण प्रथ
माहुतिः पित्रे स्वाहेति षष्ठी द्वितीयेत्ताभ्यामेवतृतीया चतुर्थी च स्वधा स्वाहेति पंचमी॥ अग्नये कव्यवाहनाय
स्वधा स्वाहेति षष्ठी तातातिदेशप्राप्त पिंडपितृयज्ञमंत्रहोम ततः स्विष्टकृतं हुत्वा सर्वस्मादन्नाद्वेदादा
या दीर्घीनमुष्ष्णमंगारस्मदितं तस्मा पापाश्चत्रुत्लीजुहोति॥ ततउत्तरतंत्रमा प्ण्व यस्थालीपाकवत्कुर्यात्॥ तथा
चजाघ्नसंयहकारः॥ अग्नीधनादिप्रतिपद्यकर्मत्त्वाज्यभागांतं सथावदाय जान्मतिमंत्रैः प्रतिमंत्रमेवाग्नौ कार्यः प्रथ
मप्रत्निरन्नाद्धोमः॥ स्वाहादिमंत्रैः पितृपिषास्तु हेमोम्नतः स्विष्टकृतं जुहुयात् स्मायुपोह्याहविरन्नहोमान्नं
हितमंत्राभिप्राय ४ शिष्य बुद्धिपरीक्षार्थं गृह्येतमंत्रसंख्या निधानं॥ तथातिदेशप्राप्तपिंडपितृयज्ञमंत्रहोमा
ननिधानं वा॥ एतज्ञाग्नौकरणं तैत्तिरीयाणामन्वाहार्यकिश्राद्धे नदर्शश्राद्धमात्रे अन्वाहार्यकिश्राद्धेच प्रमीतमाता

पितृकस्य तथा च कल्पतरौ परिशिष्टपरिशेषात् अग्निमाताद्यमावास्यायां पिंडपितृयज्ञः पिंडान्वाहार्यकं च
कर्तव्यं। तत्र प्रमीतमातापितृकस्य सपत्नीकपित्रादिदैवत्यमिति। तस्मादन्वाहार्यकश्राद्धे त्वावश्यकमग्नौकर
णं दर्शश्राद्धमात्रे च तिदर्शश्राद्धे सोमाय पितृमते स्वधा नम इत्यादिमंत्रैरेवाग्नौकरणं नापदिष्टानि दिष्ट
त्वकमिति सिद्धं॥ अथ परिवेषणादिविधिः तत्र भर्यादानंतरं दर्भोदकं दत्त्वा पात्रप्रक्षालनं कुर्यात्। तथा परिस्त
रणादिकमपि दद्यात्। तदनंतरं याज्ञवल्क्यः हुतशेषं प्रदद्यात्तु भाजनेषु समाहितः। यथालाभोपपन्नेषु रौ
प्येषु च विशेषतः॥ तेनैव निषिद्धायसादिव्यतिरिक्तैर्विहितैः सुवर्णरजतादिपात्रैः स्वयं जायान्यावा सुधीः परि
वेषणं कुर्यात्। पक्वान्नं तु हस्तेनैव पक्वान्नाधिकारेण तु दर्व्यादिना इति निषिद्धत्वात्। वायुपुराणे नापवि
त्रेण हस्तेन नैकेन च विना कुशं। नायायसेन नायसेन पात्रेण च परिवेषयेत्। आयसे पात्रे आयसेन दर्व्या
दिना न दद्यादित्यर्थः। तथा तथस्मादंतरितां दर्व्यं पर्णेनाथ स्वेन वा परिवेषणानंतरं याज्ञवल्क्यः दत्त्वान्नं
पृथिवीपात्रमिति पात्राभिमंत्रणं इदं विष्णुरित्यंगुष्ठं निवेशयेत्। इदं विष्णुरिति मंत्रानंतरं शेषि १८३
जांगुष्ठमन्नं निवेश्य विष्णुर्देवस्थाने हुतकुशोदकैरन्नत्यागं स्वधा पितृस्थाने तिलोदककुशैः पृथक् पृथग १७९

न्नत्यागं विधिना कुर्यात्। तदनंतरं याज्ञवल्क्यः सव्याहृतिकां गायत्रीं मधुवाता इति त्र्यृचं जप्त्वा यथासुखं वाच्यं
भुंजीरंस्तेपि वाग्यताः। गायत्रीं त्रिः सकृद्वा जप्त्वा मधुवाता इति त्र्यृचं जप्त्वा मधु मधु मध्विति रूपाय यथासुखं जुष
ध्वमिति वचनानंतरं तद्ब्राह्मणा मौनेन भुंजीरन्नित्यर्थः। वसिष्ठः उच्छिष्टाः शास्वाया भुक्तं पितृभ्यो न्नं नि
वेदितं। तदंतरं प्रतीक्षेत ह्यासुरा उच्छिष्टावनस्य तस्माद दक्षिणं कुर्यादन्नमुपागतं जातं वास्त मालप्यतिष्ठ
दा लक्षणाद्द्विजः उच्छिष्टायाः शाखायाः उच्छिष्टाया मीधपरकेन दक्षत यदि भुक्तं पितृभ्यो दत्तमन्नं तद्देवांत
रमवकाशो रक्षसां तस्माद् अश्नन्तं कुर्यादित्यर्थः। भारद्वाजः पितृणामन्नमादाय बलिं यस्तु प्रयच्छति। स्वयं न
ब्राह्मणः स्वयं नः स सर्वस्तेन लङ्घ्यते। पितृणामन्नं विशिष्टं देवार्थं पित्र्यं चान्नं याज्ञवल्क्यः अन्नमिष्टं हविष्यं च दद्या
दक्रोधनोत्वरः आतृप्तेस्तु पवित्राणि जप्त्वा पूर्वजपं तथा। पवित्राणि पवमानप्रभृतीनि। अयं च जप उपवीति
ना कार्यः। तथा पसव्यं कुर्वीत भुक्त्वाय जपमिति निगमस्मरणात्। जमदग्निरपि। अपसव्येन कर्तव्यं सर्वश्रा
द्धं यथाविधि। स्मृत्वा पात्रं जपं भुक्त्वा विप्राणां च विसर्जनमिति। तत्रश्च सव्याहृतिकगायत्री मधुवातेत्यादि जपः कार्यः।
तथा। अन्नमादाय तृप्ताः स्थ शेषं चैवानुमन्य च तदन्नं प्रकिरेद्भूमौ दद्याच्चापः सकृत् सकृत्। अन्नमीकरणार्थं

गंधार्थं च। सर्वमन्नमुपादाय सतिलं दक्षिणामुखः। उच्छिष्टसंनिधौ पिंडान् दद्याद्वै पितृयज्ञवत्॥ माता
महानामप्येवं दद्यादाचमनं ततः॥ स्वस्ति वाच्यं ततः कुर्यादक्षय्योदकमेव च। दत्वा तु दक्षिणां शक्त्या स्वधाका
रमुदाहरेत्। दक्षिणादानमुपवीतिना कार्यं तथा च जमदग्निः। सर्वकर्मापसव्येन दक्षिणादानवर्जितं। या
ज्ञवल्क्यः। वाच्यतामित्यनुज्ञातः प्रस्तात्स्वधोच्यतां। ब्रूयुरस्तु स्वधेत्युक्ते भूमौ सिंचेत्ततो जलं। विश्वेदे
वाश्च प्रीयंतां विप्रैश्चोक्त इदं जपेत्। दातारो नोभिवर्द्धंतां वेदाः संततिरेव च। श्रद्धा च नो माव्यगमद्बहुदे
यं च नोस्त्विति। इत्युक्त्वा तु प्रिया वाचः प्रणिपत्य विसर्जयेत्। वाजे वाजे इति प्रीतः पितृपूर्वं विसर्जनं। यस्मिंस्ते संश्रवाः
पूर्वमर्घपात्रे निपातिताः। पितृपात्रं तदुत्तानं कृत्वा विप्रान् विसर्जयेत्। मनुः। पिंडनिर्वपणं केचित्पुरस्तादेव कुर्वते। ब्रा
ह्मणभोजनात्प्रागर्वाक् नानैतरमग्नौकरणानंतरं वा केचित्पिंडदानं कुर्वत इत्यर्थः। आश्वलायनः। उक्तं वसुनां तत्र तिपि
डिनिदध्युदाचीतावक इति। अत्र यथा गृह्यमस्त्रं जात्कर्ण्यः। यामसात्रं समुत्सृज्य पिंडान्प्रत्रप्रदापयेत्। यास्मा ×
अरत्निमात्रमुत्सृज्य पिंडान्मत्रप्रदापयेत्। यत्रोपस्पृश्य नाद्यापि प्राप्नुवंति न बिंदवः। वायुपुराणे। सदेवास्रदर्ज नि पिं
डार्थं दक्षिणामुखः प्राग्दक्षिणाग्रानियाता दद्यात्पिंडाननंतरं। मरीचिः। आर्द्रामलकमात्रांस्तु पिंडान्कुर्वीत पार्वणे ए १५८

द्दिष्टे बिल्वमात्रं पिंडमेकं तु निर्वपेत्। नवश्राद्धे स्थूलतरं तस्मादपि तु निर्वपेत्। तस्मादपि स्थूलतरमाद्यमासप्रति
वासरे। विष्णुः। उच्छिष्टसंनिधौ दक्षिणाग्रेषु पृथिवी दर्विरक्षिता तन्मध्ये पिंडं पित्रे निदध्यात् तदनंतरं दर्विरक्षितेति द्विती
यं पितामहाय यत्रोर्विरक्षितेति तृतीयं प्रपितामहाय अत्र पितरः मातु इति वा। सावदयं वीरा नः पितरो दत्त इत्यन्तम
त्र पितरो मादयध्वमिति दर्भमूलकरावघर्षणं ऊर्ध्वं विर्हेत रिपान नमोदकेनाम दक्षिणं पिंडानां विकिरणं। कृत्वाद्युविष्य
भूपात्रं वा लपनान्नाद्यन्नाद्यासाज्यानि निवेदयेदिति मनुः। अपसव्यमग्नौ कृत्वा सर्वमावृत्य विक्रमं। अपसव्येन हस्तेन नि
र्वपेदुदकं भुवि। त्रींस्तु तस्माद्धविः शेषात्पिंडान् कृत्वा समाहितः। औदकेनैव विधिना निर्वपेद्दक्षिणामुखः। न्युप्य पिंडांस्त
तस्तांस्तु प्रयतो विधिपूर्वकं। तेषु दर्भेषु तं हस्तं निमृज्याल्लेपभागिनां। आचम्योदक् परावृत्य त्रिरायम्य शनैरसून्। षड्
ऋतून्नमस्कुर्यात्पितॄनेव च मंत्रवत्। ऊर्जं नमस्कारान् नमो वः पितर इत्यादिभिः। तथा च ब्रह्मपुराणे। नीवीं विसृज्य च जाप्य
नमो वः पितर इति मनुः। उदकं निनयेच्छेषं शनैः पिंडांतिके पुनः। अवजिघ्रेच्च तान् पिंडान् यथान्युप्तान् समाहितः। पिंडे
भ्यः स्वल्पिकां मात्रां समादायानुपूर्वशः। तानेव विप्रानासीनान् विधिना पूर्वमाशयेत्। तानेव विप्रानित्यर्थं पश्चाद्ब्रा
ह्मणभोजनात्पूर्वमेव पिंडदानाभिप्रायेण कात्यायनः। एत इत्यनि सूत्राणि पतिं पिंडं वयस्तु न्नारयजमान

स्थालीमानिवर्तितत्र्यंरवः। दर्भान् विवर्जयित्वा तो यद्यथ दत्तवस्तु जलं। अत्र सर्वत्रैय यथात्रागस्त्वं व्यवस्था उत्तरार्थिनो मध्य
म पिंडप्रतिपत्तिः। स्थलायनेनोक्तापिंडानां मध्यमं पत्नी प्राश्नीयदिति। अत्र मंत्रः। आधत्त पितरो गर्भं कुमारं पु
ष्करस्रजं। यथेह पुरुषोऽसदिति देवलः। ततः कर्मनिवृत्तिं तान्पिंडान्सदनंतरं ब्राह्मणाग्निरजो गोर्वाप्सु निक्षिपे ×
दप्सु वा क्षिपेत्। एवं स्वस्वगृह्योक्तविधिना ब्राह्मणविसर्जनांतं कृत्वा पितृभ्यो वंशबंधुभिः सह भुंजीत। आवश्यकार्कैएवाम
श्रोत्रपितृसमवितमाघ्रायोपवासेत्। तथा च स्मृतिः। अघ्रूयमवतान्नं वशाशितं न वा प्राशितमिति। श्रावणांतानपः श्राद्धकृ
त्वा परस्य श्राद्धं तु जातये तु भोक्तिः पतेति पितरस्तेषां तु श पिंडोदकक्रियां। भुक्त्वा जिन मध्यमं तेषां राध्ययनामैथुनं दानं
प्रतिग्रहो होमः श्राद्धभुक् अष्ट वर्जयेत्। यमः दशाकृत्वः पिबेदापो गायत्र्या श्राद्धभुक् द्विजः। ततः सांध्यमुपासीत तज
पेज्जुहुयादपि। एवं प्रतिमासं दर्शे पार्वणश्राद्धं कर्तव्यं एवं प्रतिमासं सांवत्सरिकादीन्यपि पार्वणश्राद्धान्यपि कर्तव्यानि।
तत्र मातापितृविषययः पार्वणोद्दिष्टविकल्पः स्वस्वकुलानुसारेण व्यवस्थितो विज्ञेय इति विज्ञानेश्वरमतं। एत
च्चोपपादितमस्माभिर्मिताक्षराटीकायां सुबोधिन्यामाचाराध्याये। यदा मातापितृभ्रात्राद्यः सपिंडा उपसर्जनतरमना
वनसांवत्सरिकं कुर्यात्तियस्तु नष्टगुणोक्तो एककाले गतासूनां बहूनामथवा द्वयोः। तंत्रेण श्रपणं कुर्यात्सन्निपाते १८५

यं क्रमशः इति। पूर्वकिस्य मुख्यस्य द्वितीयस्य मुख्या पश्चया जघन्या तृतीयस्य जघन्यतरा स्यादथ॥ अत्र संक्रमः। पितृब्रा
ह्मणनिमंत्रणानंतरं मातृब्राह्मणनिमंत्रणं ततोऽन्यनिमंत्रणं एवं पादप्रक्षालनादि विसर्जनांतं कुर्यात्। एतच्चापो
वपायणिानकश्राद्धकरणे कृतपादिश्राद्धकालानतिपातप्रसक्तो द्रष्टव्यं। श्राद्धकालानतिपाते तु पृथक्पाक्षेन
यथोक्तक्रमेणाकर्मपृथक्पृथक्कर्तव्यं यत्तु प्रचेतसोक्तं। नैकश्राद्धद्वयं कुर्यात्समानदिने क्वचिदिति तदेकस्मिन्ने
व निमित्ते पुनः श्राद्धं न कर्तव्यमित्येवं परं। न तु निमित्तभेदेपि। यदा तु भर्त्तुर्मरणतिथावेव सहगमनं पत्नी करोति
तत्सांवत्सरिकालोकाक्षिणा विशेषो दर्शितः। मृताहनि समासेन पिंडनिर्वपणं पृथक्। नवश्राद्धं तु दंपत्यो
रन्वारोहण एव तु। अस्यार्थः। दंपत्योरन्वारोहणे न सहगमनेनानिमित्तेन मृततिथावेकत्र पिंडनिर्वपणं श्राद्धे समा
सेन संक्षेपेण यथा द्विपितृकश्राद्ध एकस्मिन्पिंडद्वयोरुद्देशाः एवमत्रापि द्वावुद्दिश्यायुग्मब्राह्मणान्भोजयित्वाथ
पिंडनिर्वपणमपि द्वावुद्दिश्य एवामकारे एव श्राद्धकरणं समासतः। अत्रावेश्वादेविकम पितोत्र्वाणे व पार्वणश्राद्धप
द्धमृताहनीति विशेषापादानान्मृततिथ्यावदिवनसमासेन श्राद्धं किंतु पृथगेव। मृताहनि समासेन पिं
डनिर्वपणं कुर्यादिति विधिबलाद्वारोहासेनेकतिथिमृतयोर्दंपत्योः सांवत्सरिकव्यतिरिक्तनवश्राद्धषाड

त्रार्द्ध सपिंडीकरण गया चष्टक्यादिश्राद्धेषु यद्विचनां तरवशाच्च पृथक्कर्तव्यतायां प्राप्तायां नवश्राद्धं पृथगिति
केवल नवश्राद्धस्यैव पार्थक्यविधिः परिसंख्यया इतरश्राद्धं पृथक्त्वनिषेधनात्सांवत्सरिकवदेव षोडशश्राद्धादि
ष्वपि समानतंत्रेणानुष्ठानं अमावास्यादिषु पृथक् श्राद्धप्राप्त्यभावादेव न पृथक्करणं किंतु सादेवा अयं तु विशेषः
षोडशश्राद्धादिषु मातापित्रोः पृथक् पृथक्दैवतात्वं अमावास्यादिषु तु पितृपिंडेनैव सपत्नीकत्वाद्दृष्टावारणे
न मातुरपि तृप्तिरिति दंपत्योरविप्रदेपादानात् एकचित्याराहणाधिकारित्वं सर्वस्मात् पत्नमात्रा सहत्यां मातृभि
वन्वारोहणे कृते पति पत्न्योर्मृततिथ्यैकत्वे इदं विसमासं नवश्राद्धं यतिरिक्तं सर्वं गावतां एकस्मिन्नाहवनी
यस्थानीय ब्राह्मणे द्विन्नाधकृत्त्रास्त्राद्ध थिकस्मिन्नेव पिंडपियथा त्रिपितृकस्य अस्यां यजेयत् पुत्रः समेधुत्रा
जविष्यतीति समये विक्षयया विवादितानत अनपत्याया एवतस्या जन्मप्रिणे नियोगनदेवरादिभ्यः पुत्रोत्पाद
न समये उत्पाद्यमानो उक्त श्राद्धपौरपीत्यपि स्तां कातता त्रोत्पन्नः पुत्र स्त्रिपितृकः एको माता महस्तृपरः स्वत्राधि
पतिः अन्यश्च बीजीति त्रयः पितरः तस्या मावास्यादि श्राद्धेषु यथा त्रयो दत्रानिकएव पिंडस्तथा द्विभ्याधत्रोनाथे
कएव पिंडादय इत्यर्थः यदि जनेन्यन्वारोहणएवायं नियमस्त्रदा पित्रारिति ब्रूयान्न दंपत्यारिति तस्मात्पूर्वोक्तिरेव १७५

=।युगपत्तु समापयेदिति। तद्दूई मृताहेनि पि घातिरिक्ताच्यतिणान्वारोहणमृतविषयं नवश्राद्धे।२५

निर्णयः। यत्र स्मृत्यंतरा मकवित्यां समारूढौ दंपती निधनं गतौ। पृथक् श्राद्धं तयोः कुर्यादोदनं च पृथक् पृथ
गिति। तन्नवश्राद्धविषयं। नवश्राद्धं मा पिंडदानं तु तेषां पश्चात् नित्यं तेषां पिंडार्थोदिनो पि पृथगित्यर्थः। अपवान
वश्राद्धं जोक्त सज्जा वपश्चान्न नयदा क्रियात तदोदनमपि पृथक् पृथगेव नतं त्रेणेत्यर्थः। नवश्राद्धस्य पश्चान्मे
नकरणे मेगिरा व चनेन इयोतितं। नवश्राद्धेषु यच्छिष्टं यद्गृहपर्युषितं च यत्। दंपत्योस्तु क्तशिष्टं तु तन्नं भुंजीत
द्विजः। विनायस्तु नरश्रीगुणो क्रयास्मारोहणे कुर्यद्विप्रश्चित्यां पतिव्रता। तां मृतादनिसं प्राप्तं पृथक् पिंडे नियोज
येत्। प्रत्यष्टं तु नवश्राद्धं युगपदिप्यस्यायमर्थः। प्रथमं पितृनवश्राद्धोपविष्टस्य ब्राह्मणस्य पादप्रक्षालनं प
श्चात् मातृनवश्राद्धोपविष्टस्य त्यक्रमेण विसर्जनांतं कृत्वा युगपत् श्राद्धद्वयं समापयेदिति। यदा त्वेकस्यामेव
तिथौ पूर्वदिनप्राग्जन्मरणं उत्तरदिनप्रागपत्न्या अन्वारोहणे न मरणं तदपि समानेनैव पिंडादि विक्षे
यकवाक्यबलात् मृततिथि एकत्वाङ्गेश्च प्राधान्यादर्थः। तदहीत्रारीस्तु ता या ता यया अपि तादृव मृतप्रायश्चा
तवर्द्धनामस्तु मनुयद्दोन्यायथ इति भिन्न दिनमरणे रूपैकनिमित्ताघपक्षे यापूर्वोक्तानेकनिमित्ताश्रुतराधस्य
न्यायत्वात् जन्ममरणप्रवृत्त्यवदिनपरिगणनां कृत्वा तिलोदका पिंडदानगोत्रो वेकदशाहादिकं कर्तव्यं। एवं चयानि

वाक्यानि नूतनरणानंतरं चिरकालस्थवधनेनावारादणमृताया अपि नायया पत्नीकरणप्रतिपादकान्यर्थवाद
रूपाणि वाक्यानि चिंतामणिरत्नावल्यादिषु प्रदर्शितानि तानि सर्वोक्तविषयाण्याज्यानि न तु मृताहनि समासनपिंडनिर्वप
णमित्यत्र नद्वचनबलान्मृताहादिश्राद्धाहवनीयार्थोपविष्ट एकस्मिन्ब्राह्मण एकस्मिन्पिंडद्वयारूढेति न समासः सोह्रप
इति वक्तव्यं॥ सोह्रपश्च ब्राह्मणप्रादपिंडात्तदापि घटतां न द्वयाण एकश्राद्धनियुक्तब्राह्मणचरणक्षालनानंतरमितरश्राद्ध
निमुक्तचरणप्रक्षालनामवासनादिकं दाचतरत्रासनादिकमित्यासमाप्तेरेवंक्रियमाणे पि सोह्रपोपपत्तेरितिवत्तमेवं। स
मासनपिंडनिर्वपणमिति पिंडनिर्वपणे पि सोह्रपादर्शितः सर्वपद्धोक्रस्याक्रियमाणे पिंडस्यनिन्नचात्रत्र समासो न घट
तानि रापच्छञ्च समासशब्द उपात्तः सच सर्वात्मना सोह्रपायाश्च सकालतिकर्तव्यतासोह्रपं प्रतिपादयति बाधकाभावात्तस्मा
त्सर्वेतिकर्तव्यतानुसूत्रता सोह्रपएवांगीकर्तव्यः॥ तथा च द्विपितृकश्राद्धवादवसोह्रपरतिसिद्धं॥ अथ द्विपितृकश्राद्धं तत्र हारी
तः॥ नाद्दितं बीजं रादृति। उभय दर्शनाद्वायाएव पत्यमित्यपरषामुत्पादयितुः प्रथमः प्रवाराभवति। द्वौ द्वौ पिंडौ प्रनिर्वपद
ष्कारकपिंडवाद्यावनुकीर्त्तीयपुत्रस्तृतीयपोत्रा लपिनश्चत्रीनन्चावद्धाणः। आ सप्तमादित्यकरति तषां बीजि ह्रत्र पितॄणां
मध्यउत्पादयितुः बीजिनः प्रवरमार्षेयं प्रवर्रांनिर्दिशात्॥ ततः ह्रत्रिणइति द्विप्रवरतएतं कृत्वै गार्षेयप्रवारापनिर्वापपिंट १८२

याद्यानामुष्यायणः पितृपितामहप्रतिपितामहपिंडेषु द्वौ द्वावनुकीर्त्तीयताद्वितीयाद्वितीयपिंडपितामहपिंडेषु त्राद्या
मुष्यायणस्य द्वावनुकीर्त्तीयता नपितृपिंडद्वितीय इति प्रपितामहपिंडस्या सुपलक्षणं। आ तो ह्यामुष्यायणपुत्रः प्रपितामहपि
डपि द्वावनुकीर्त्तीयत। यदि ह्यामुष्यायणपोत्रः श्राद्धकर्त्तातदा कथमित्याकांक्षायामिति पोत्राद्यामुष्यायणस्य तृतीयप्रपि
तामहपिंडे द्वावनुकीर्त्तीयन्न पितृपिंडेनापि पितामहपिंडेत्रीन द्वावद्धाणः पित्रादिपिंडाननुवदन्नलपिनश्च द्वौ द्वावनुकी
यता। अत एवासप्तमपर्यंतमित्यन्यमतं। ह्रत्रिणः सर्वमुद्दशाः पश्चाद्बीजिन इतिक्रमः। एतद्वाशोत्र प्रकरणेजिहितो। पुत्रि
कापुत्राद्विविधः मातामहसंबद्धो मात्रामाहनपित्रा च संबद्धश्चेति। तत्र मातामहानेव संबद्धस्य श्राद्धक्रममाह मनुः। मातुः प्र
थमतः पिंडं निर्वपेत्पुत्रिकासुतः। द्वितीयं तु पितुस्तस्यास्तृतीयं तु पितुः पितुरिति। उभयसंबद्धो वर्द्धयस्यापि कुर्यादित्याहो
शानामातामहीतु मात्रादिपितृकं पितृ पूर्वकं मातुः पितृतायस्मादधिकारोस्ति धर्मतः॥ अत्र विशेषमाहर्षिशृंगः। यः स्या
दुभयसंबद्धः पुत्रिकायाः सुतो ह्यसौ। पूर्वं मातामहश्राद्धं पश्चात्पितृकमाचरेत्॥ ॥ अथ सकल्यश्राद्धं॥ तत्र व्यासः॥ त्यक्ता
ग्नेः पार्वणे नेवनोकाद्दिष्टं सपिंडनं॥ अत्यक्ताग्नेस्तु पिंडाक्षिस्तस्मात्सकल्पात्तो जायते। अस्यार्थः॥ त्यक्ताग्ने नास्ति क्यादिना
त्यक्ताग्नेः पार्वणेकोद्दिष्टसपिंडीकरणश्राद्धकर्म्मणि नेवाधिकारः। अत्यक्ताग्नेः पिंडाक्षिः पिंडसहितः श्राद्धकर्त्तव्यतास्तिः श्राद्ध

धिकारस्यार्थः। तस्मात्कारणात्र्यक्षाग्निः संकल्प्याजयेत्। संकल्पश्राद्धं कुर्यादिति संकल्पश्राद्धविधिमाह स एव संक
ल्पं यदा कुर्यात्तत्र कुर्यात्पात्रप्रपूरणीनावाहनाग्नौकरणे पिंडांश्चैव न दापयेत्। पात्रपूरणमर्घ्यदाने विकिरदानमपि निषि
द्धं स्मृत्यन्तरे। संकल्पं तु यदा श्राद्धं कुर्यात्पात्रप्रपूरणं विकिरं च न दातव्यमिति। अथैवानुकल्पो मुख्यश्राद्धकरणाशक्तावापद्य
पि विहितव्यः॥ तथा च स्मरंति। श्राद्धानुकल्पीयः कुर्याज्जात्यवस्थाद्यापद्यां श्राद्धीयो गोऽथवा न्नोति मुख्यश्राद्धफलं नर इति॥
अथैकोद्दिष्टश्राद्धं। याज्ञवल्क्यः। एकोद्दिष्टं देवहीनमेकार्घैकपवित्रकं। आवाहनाग्नौकरणरहितं ह्यपसव्यवत्। उपतिष्ठता
मित्यत्र क्षय्यस्थाने अक्षय्यमस्त्विति मंत्रस्थाने विप्रविसर्जनामिति मंत्रसर्जने। अभिरम्यतामिति वदेत् ब्रूयुस्तेऽभिरताः स्म। देव
हीने विश्वेदेवरहितमपसव्यवता यस्माद्वीणा यज्ञोपवीतवक्रमेतदपि प्राचीनावीतिना कर्तव्यमित्यर्थः। अक्षय्यस्थाने अक्ष
य्यमस्त्विति मंत्रस्थाने उपतिष्ठतामिति मंत्रः विप्रविसर्जने वाजे वाज इति मंत्रस्थाने विभुः॥ अथाशौचापगमे सुस्नातः शुक्लप्रक्षा
लितपाणिपादः स्वाचांतः स्वे स्वे विधाने च ब्राह्मणान्यथाशक्त्या दद्यात् स्वादु गंधमाल्यवस्त्रालंकारादिभिः पूजितायोजयादकवन्म
त्रानुत्पादितकादित्युच्छिष्टसंनिधाववकामवनन्नामगोत्राभ्यां पिंडमेकं निर्वपेत्। तुक्रमस्तु ब्राह्मणेष्वदक्षिणायाभिप्रजितेषु प्रेतना १८६
मगोत्राभ्यां दत्ताक्षय्योदकेषु चतुरंगुलपृथ्वीस्तावदंतरास्तावदधः खातास्तिस्रो वितस्त्यायताः स्रजः कर्षूः कुर्यात् कर्षूसमीपेष्वग्नि

त्रयमुपसमाधाय परिस्तीर्य तत्रैकैकस्मिन्नाहुतित्रयं जुहुयात् सोमाय पितृमते स्वधा नमः अग्नये कव्यवाहनाय स्वधा
नमः यमायांगिरसे स्वधा नमः स्थानत्रये च प्राग्वत् पिंडनिर्वपणं कुर्यात्॥ ततो दधिमधुघृततिलैः कर्षूत्रयं पूरयित्वैतत्ते इ
ति जपेत्। एवं मृताहे प्रतिमासं कुर्यादिति। द्वादशाद्याद्यादेकोद्दिष्टानि। आद्याद्यादिकानि द्वादशातत्सक्षिति विज्ञक्षि विपरिणामे
नानयः। वराहपुराणे। श्वः करिष्य इति ज्ञात्वा ब्राह्मणामंत्रणक्रिया। गतासिदिवालाक स्वंकृतोनविद्दिनात्यर्थः। मनसा वा
युक्तं तेन विप्रेश्वाहं नियोजयामि प्रजयिष्यामि तेन एवं चाहं निमंत्रयः। द्वितीयदिने आसनं च मन्त्रपूतो नोवाक्यः। अत्रास
नादवराजाम्यनुज्ञातो विश्रम्य तौ द्विजवर्यानुग्रहात्। प्रसादायच्चासनैर्दृष्टस्तत्ज्ञानाग्निश्राद्धनकारणेति विप्रेण। वृद्धस्मृ
तिः। वस्त्रालंकारशय्याद्यं पितुर्यद्वाहनायुधं। गंधमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रे तदर्पयेत्॥ याज्ञवल्क्यः॥ मृतेऽहनि तु कर्तव्यं प्रतिमा
सं तु वत्सरं। प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि॥ एकादशेऽहनीत्याशौचापगमानंतरदिवसोप
लक्षणपरं॥ अथाशौचापगम इति विष्णुस्मरणादिति कल्पतरौ। तदतद्विचारासहं॥ तथाहि आद्यमेकादशाहनीत्याननाशौ
च द्वादशाहे नैकादशाहकालो विधीयते॥ एवं चैकादशाहश्राद्धस्याशौचानंतरकालोपलक्षणविधौ परः शब्दार्थ इति न्यायेन
विरुध्येत अथ कालस्यानुपादेयत्वेन कालाद्वादशानकर्मविधानेन तु कामीद्वादशानकार्यविधाने आशौचानविधौ परः शब्दार्थ इ

तिन्यायेनाविरोधइतिचेत्सत्यमेव। वस्तुतउद्देश्यमाद्यश्राद्धमेव तस्य वचनांतरेणप्राप्तंचोत्। एकादशाहरूपकालस्याप्राप्तत्वा
न सकालोविधेयः। कालस्यानुपादेयत्वेनाविधेयइतिचेत्स्यादुद्देश्यमपिकालमुद्देश्यमेवाविधेयमथाद्यश्राद्धंविधेयमि
वचनचावाक्यवृत्तिःपरिसमाप्यता। नतस्यकालएववस्तुतोविधिपर्यवसानमितितत्रलक्षणास्वीकारसिद्धेनविधौपरःशब्दा
र्थइतिन्यायविरोधः। तस्मादाशौचापगमानंतरदिवसोपलक्षणपरत्वेनसुष्ठु। अथाशौचापगमइतिविष्णुवचनंब्राह्मणविषयं
चावतिष्ठतइतिनतेनापिसहविरोधः। अतःक्षत्रादीनामप्याद्यश्राद्धमेकादशाह्निकर्तव्यं। तथाचवृद्धवसिष्ठः। एकादशाह्नियत्नश्रा
द्धंतस्मान्मासमुदाहृतं। तउक्तमिपिबन्तीनीसूतकैत्रपृथक्। शशीखलोगावत्तिरपि। आद्यश्राद्धमशुद्धोपिकुर्यादेकादशेहनि। क
र्तुस्तात्कालिकीशुद्धिरशुद्धःपुनरेवसइति। यत्तुमत्स्यपुराणे। एकादशाहेनितथाविप्रानेकादशैवतुक्षत्रादिःसूतकांतेतुभो
जयेद्युजोद्विजानिति। तत्रैतत्स्पष्टंसूतकांतएकादशब्राह्मणभोजनापनेक्षुद्रगणेहोकमेतिकर्मतिवं नतुषोडशश्राद्धेतं
तंतथासतिएकादशश्राद्धान्येतानिषोडशापराणीतिसंख्याधिक्यात्षोडशश्राद्धविधिविरोधः। तस्मादाद्यमेकादशाहनीति
सर्वविषमाधारणमितिवक्तरश्च। आहिताग्नेरेकादशाहश्राद्धविशेषमाहकात्यायनः। श्राद्धमग्निमतःकार्यंदाहादेकादशे
हनि। ध्रुवाणितुप्रकुर्वीतप्रमीताहनिसर्वदा। ध्रुवाणित्रिपक्षिकादूर्ध्वानि। जातूकर्ण्यः। ऊर्ध्वंत्रिपक्षाद्यच्छ्राद्धंमृताहान्यव

१८

मावर्जयितव्यतीतदशाहादिकश्राद्धविशात्पित्रानुज्ञातनपितामहश्राद्धपोत्रेणप्रक्रांतपित्राशौचेवदन्नवपक्वकाले
पितामहश्राद्धंकुर्यात्। प्रक्रांतचाकर्तुस्तात्कालिकीशुद्धिरितिवचनाद्वायतिविषयाविशेषःशातातपोनोक्तः। एकोद्दिष्टं
जलंपिंडमाशौचंप्रेतसत्क्रियां। नकुर्यात्पार्वणादन्यद्ब्रह्मीभूतोयतिःसदा। ब्रह्मीभूतोयतिः। उशनाः। एकोद्दिष्टंनकुर्वीत
यतीनांचैवसर्वदा। अहन्येकादशेप्राप्तेपार्वणंतुविधीयते। सपिंडीकरणंतेषांनकर्तव्यंसुतादिभिः। त्रिदंडग्र
हणादेवप्रेतत्वंनैवजायते। एतत्सपिंडीकरणमाहिताग्निनाकर्तुर्द्वादशाहेकर्तव्यं। तथाचलघुहारीतः। यजमानोग्नि
मान्राजन्प्रताश्चदग्निमान्नविनान्राद्वादशाहेनावकार्यंसपिंडीकरणंसुतैः। तच्चश्राद्धानिषोडशादत्वानतुकुर्यात्सपिंडना
मितिवचनात्षोडशश्राद्धान्यपकृष्यसपिंडीकरणंकुर्यात्। यत्तुवचनं। यस्यसंवत्सरादर्वाक्सपिंडीकरणंभवेत्। मा
सिकंचोदकुंभंचदेयंतस्यापिवत्सरमिति। तत्कल्पसूत्रकाराक्तपुनरनुष्ठानविषयत्वेनाप्यजि। अथैवमाद्वादशाहपाकाद्ब्रा
ह्मणस्यैवतस्यतावताशौचनिवृत्तेः। नन्वाद्यश्राद्धस्यैकादशाह्निआशौचमध्येक्रियातेतद्वत्क्षत्रियादिःसाग्निकोद्वादशा
हेसपिंडीकरणंकरोतुकोविरोधइतिचेन्न। आद्यस्यैकादशाहेनियतत्वात्सर्ववर्णेषु तत्रकरणे सपिंडीकरणस्यचकाली
तरंमध्यस्थातिद्वादशाहब्राह्मणविषयएवावतिष्ठते। तथापिहिताग्निनाब्राह्मणेनकर्त्रीद्वचनेएकादशाह्निवासपिंडी

DR. BHAU DAJI MEMORIAL

करणीकार्यं।तदाह हारीतः॥यावत्सर्वममावास्यामृताहाद्दशमाद्भवेत्।सपिंडीकरणंतस्याःकुर्यादेवसुताग्निमान्।मृता
हाद्दशमहःतस्मात्परायामावास्यैकादशाहस्तत्रयथाश्राहिताग्निनाहिताग्निनावाविशेषेनवाकर्तव्याशौचानंतरंदर्शेस
पिंडीकरणंकर्तव्यं।यदाहजाबालिः।सपिंडीकरणंकुर्यात्पूर्वंदर्शेग्निमान्सुतः।परतोदशरात्रस्यप्रत्येदिदुनथापरः।
अस्यार्थः।सपिंडीकरणंकुर्यात्पूर्वंदर्शस्यानंतरदशमदिनादर्वाक्यथाकदाचिदपिप्राप्तस्यदर्शस्यसपिंडीकरणकाल
त्वप्राप्तसकालउत्कृष्टोदशरात्रात्परतरइति।परत्वंवदशरात्रसन्निहितानंतरकालआशौचानंतरकालत्वविरुद्धमिति
जातश्चिन्त्यायनाशौचानंतरकालीनदर्शेकिंत्वेतथावदशरात्रशब्दयाशौचानंतरकालोपलक्षकः।ब्राह्मणादीनांसा
पिंडामाहिताग्नीनामाशौचांतप्रथमदर्शयोर्मध्येयःकालःसोपिसपिंडीकरणकालः॥तथाचकात्यायनः॥एकादशादिनि
र्वर्त्यसर्वंदर्शेधयथाविधिः॥प्रकुर्वीताग्निमान्विप्रोमातापित्रोःसपिंडतां॥आशौचानंतरंयादर्शस्तन्मध्येएकस्मिन्दिनेसपिं
डीकरणंकुर्यादिति।प्रकुर्वीताग्निमान्विप्रोमातापित्रोःसपिंडतां।आशौचानंतरंयोदर्शःतन्मध्येएकस्मिन्दिनेसपिंडीक
रणंकुर्यादिति॥आहिताग्नेःपिंडपितृयज्ञाधिकारिणोदर्शेपिंडपितृयज्ञार्थमियमुद्दिष्टाः।अतएवप्रजापतिः।नासपिंड्याग्निमा
न्पुत्रःपितृयज्ञंसमाचरेत्।सपार्वणेनाप्पदर्थंकुर्वन्नलभतेफलं।एवंचप्रत्यवायकरोयाद्वादशाहकालोदर्शात्मककालआशौचांतप्रथम १०७

तद्भावेतावत्पक्षसुकारात्पद्वादशदिनाग्निर्द्विजन्मनः।विहितप्रकारेणसुहृदादिहितानांसद्यःशौचयथाग्रामकादशेह्नित्वादशी
स्वःसद्यःशौचपिदानव्यैप्रेतस्यैकादशाहनिसएवदिवसस्यश्राद्धशय्यासनादिषु।षोडशश्राद्धान्याह॥जातूकर्ण्यःद्वा
दशप्रतिमास्यानित्राद्यषाण्मासिकेतथा।त्रैपक्षिकाब्दिकावितिश्राद्धान्येतानिषोडशेति।आद्यषाण्मासिकाब्दिकशब्दात्क्रमा
मासिकानषाण्मासिकानाब्दिकपराः॥व्यासोपि।द्वादशाहत्रिपक्षेचषण्मासमासिकाब्दिके।श्राद्धानिषोडशैतानिसंस्मृता
निमनीषिभिः।द्वादशाहक्रियमाणमूनमासिकं॥यदाहगालवः।मरणाद्वादशाहस्यान्मासमूनेवानमासिकं।ब्रह्मपुराणे
षोडशश्राद्धकालाः।कवनान्यथोपदिष्टाःदृणोतुच्यक्ताद्दहानोश्राद्धाःषोडशसर्वदाचतुर्थेपंचमेचैवनवमैकादशेतथा।ततो
द्वादशभिर्मासैःश्राद्धाद्वादशसंख्यया।कर्तव्याःश्रुतितःप्रेषोतत्रविप्रांस्तुतर्पयेत्॥इति॥अत्रचतुर्थादिश्राद्धोतरत्नावानेका
दशाहादिश्राद्धानाषोडशसंख्याविहितानत्वूनमासिकाद्येतज्जीवनतिक्कविकालान्यथानावः॥अतःषोडशश्राद्धेषुविकल्पः।
अयंचविकल्पःशाखाचारादेवनतदन्वायपादशयथाकुलेव्यवस्थितोविज्ञेयः।मासेतीतइत्यस्मिन्नर्थेतद्धितात्मासोमासि
कशब्दनिष्पत्तिर्मार्गोत्ततप्रथममासेतिवृत्तेद्वितीयमासेमृतदिवसेआद्यमासिकंएवंद्वितीयेतीतेतृतीयमासेमृतदिवसे
द्वितीयमासिकमित्येवंक्रमेणद्वादशमासिकानिएकादशाहश्राद्धंतुप्रत्यागत्यैतिकचनमन्यीत।तदनुपपन्नं।द्वादशप्रतिमा

स्यातीसुपक्षमध्यश्राद्धान्येतानिषोडशेतिजातूकर्ण्योक्तषोडशसंख्याविरोधात् ।मृतेर्दिनेतु कर्त्तव्यं प्रतिमासमित्यनेन
चाद्यादिमासिकानामाद्यादिमास एव कालो विहितस्तेनापि विरोधः प्रसज्येत । नतु । त्रिपक्षिकं त्वावद्द्वत्रिपक्षात्तदनंतर
मितियथात्रिपक्षिकस्य त्रिपक्षानंतरं कालस्तथाद्यादिमासिकानामाद्यादिमासानंतरमेव कालो व्यवस्थितो भवतामेवं त्रिप
क्षिकं त्वावद्द्वादश्यस्यायमर्थः । इति प्रवृत्तिनतु इत्यरति ॥ अत एव कार्ष्णाजिनिः । त्रिपक्षिके त्रिपक्षस्यान्मृताहस्थितराशि
तु । अतो मासिकश्राद्धस्यात्र न वरद्यस्मिन्नर्थे मासान्यतानादि प्रत्ययाय विहितास्तदंतस्त्रापि वक्तुं कादशाहे तेमासि
कमिति रूपं निष्पन्नं । आद्यमासिकं द्विजमाहवनीयस्थाने तत्राकुर्यात्तदानावश्याग्नौ जुहुयात् पक्षद्वाय पुनराद्यं कुर्यात् ।
यदाहगार्ग्यः । आह्वाणेनाजायदाद्य होतव्यमनानथवा पुनस्त्वात्ता जायद्विप्रंद्विराहृत्तिर्न वेदिति । ऊनमासिकादिषु काल
नियममाहगौतमः ॥ एकद्वित्रिदिने हूनेस्त्रिभागेनान एव ना । श्राद्धान्यूनाब्दिकानि दीकुर्यादित्याहगौतमः । कार्ष्णाजिनिः । ऊना
न्यूनेषु मासेषु विषमाहस्सामपि वा । अत्र विशेषमाह गार्ग्यः । नंदायां भार्गवदिनेवतुर्दश्यां त्रिपुष्करा । ऊनश्राद्धं न कुर्वीत ग्र
हीषु त्रधनक्षयात् । मरीचिः । द्विपुष्कर च नंदासु सिनीवाल्यां च गार्हिने । चतुर्दश्यां तु नानानि त्रिकासु त्रिपुष्करेसंवत्सरादर्वाक् १८०
सपिंडीकरणेषोडशश्राद्धान्यपकृष्यतत्स्यात ततः सपिंडीकरणविधाय पुनस्तानि मासिकानि स्वस्वकालप्राप्तानि कुर्यात् ॥ यदह

णाजिनिः । श्राद्धानिषोडशादत्त्वा नैवकुर्यात्सपिंडतां ॥ लौगाक्षिः । श्राद्धानिषोडशापाद्य विदधीत सपिंडतां । अंगिराः । यस्य
संवत्सरादर्वाक् सपिंडीकरणे कृते मासिकं चाब्दकं चैवादद्यन्तस्यापि वत्सरां । अत्र विशेषमाहापेठीनसिः । सपिंडीकरणा
दर्वाक्कुर्यात् श्राद्धानि षोडश । एकोद्दिष्टविधानेन कुर्यात्सर्वाणितानितु । सपिंडीकरणाद्धूर्ध्वं । यदाकुर्यात्तदा पुनः । प्रत्यब्दं यो
यथा कुर्यात्तथाकुर्यात्स तान्यपि । कात्यायनः ॥ सपिंडीकरणाद्धूर्ध्वं न दद्यात्प्रतिमासिकं ॥ एकोद्दिष्टविधानेन दद्यादित्याह शौ
नकः । यदावृद्धिप्राप्तायां षोडशश्राद्धान्यपकृष्य तत्त्वा सपिंडीकरणं कृत्वा पुनर्मासिकानि क्रियेत तान्यपि हाद्यं स्वस्वा
दवापकृष्यकर्त्तव्यानि तु नास्य स्वेकाले ॥ तथाचशाद्यायनिः ॥ सपिंडीकरणादर्वागपकृष्य कृतान्यपि । पुनरप्यपकृष्येत वृद्ध्यु
त्तरनिषेधनात् । निषेधश्च कात्यायनेनोक्तः ॥ निवर्त्य वृद्धितंत्रं तु मासिकानि न तंत्रं तु मासिकानि न तंत्रयेत् । अयातथामे मरणे
न त्वेव हि पुनरस्य तु । वृद्धिनिमित्तं कर्मस्तत्र मासिकानि न कुर्यात् । तथा सत्य यातयामेन वैमरणे पुनरावत्त्वावदित्यर्थः । यदि
कुर्यात्तदा नूतनमरणे तावदिति तात्पर्यं । आशौचादिना मासिकविघ्ने तदनंतरं कर्त्तव्यं न्यायसिद्धत्वात् । तत्र पृथ्वीचंद्रोदये परि
तनमासिक दिनकार्यांतदाह ऋष्यशृंगः । एकोद्दिष्टेतु संप्राप्ते यदि विघ्नः प्रजायते । मासव्यास्मिंस्तिथौ तस्याः कुर्यादितरितैव
तत्तांतरितं विघ्नेना तद्वत् तच्छेदेनान्यमासस्वकाले प्राप्तेषु च पातेएकादशाहादिकं तु ज्यष्ठेनिवकर्त्तव्यो । तथा च प्रचेताः ॥ एका

दशाघाःक्रमशाज्यष्टस्यविधिवत्क्रियाः॥ऊर्ध्वनैमित्तिकाःश्राद्धमाह्निकंतुपृथक्पृथक्॥आह्निकंतुपृथक्पृथगितिविज्ञ
विषये॥अथनवश्राद्धानि।तत्राङ्गिराः।प्रथमेह्नितृतीयेह्निपंचमेसप्तमेतथा।नवमैकादशेचैवनवश्राद्धंप्रकीर्ति
तं॥बोधायनः।मरणाद्विषमदिनेष्वेकैकंनवश्राद्धंकुर्यात्।आनवमाद्यत्रनवमेविच्छायानेकादशाह्निकंतत्कुर्यादित्यानवमा
दित्यादिश्राद्धत्रितिविधौनवममतिक्रम्यनवश्राद्धंकुर्यात्॥नवमदिनकर्तव्यंनवश्राद्धंयदानरितंतर्हितदेकादशाह्निकंकुर्या
ताएवपंविवास्यमातनननवश्राद्धानि।नविष्णुपुराणे।नवसप्तविशीर्णाहीनवश्राद्धान्यष्टक्रमात्।आद्यैनायावर्षीयास्तुषड्ढित्या
हुर्महर्षयः॥शिवःस्वामी॥नवश्राद्धानिपंचाहुराश्वलायनशाखिनः॥आपस्तंबाःषडित्याहुर्विज्ञानात्तित्रिरपिणोकण्वः। 992
नवश्राद्धंमासिकेचयघदंतरितेचाचरेत्॥तत्रहुतरसातेश्राद्धुष्टेयप्रवह्लात।सातत्रौ।समानतेत्रचे।उत्तरनवश्राद्धदिनरतिया
वत्॥ अथसपिंडीकरणं॥तत्रशौनकः॥अथसपिंडीकरणंचतुर्दिपात्राण्येकःप्रेतस्यत्रीणीतरेषांप्रथमंपात्रंत्रिषुपात्रेषु
नियाजयेत्॥समानीवआकूतिरित्यनयामवप्रथमपिंडंत्रिषुपिंडेषुनियाजयेत्।मधुमतीत्तिःसंगच्छध्वमितिद्वाभ्यामेवंवत्तु
थेनुद्वापितोन्वतीतिप्रेतानविस्मृतः।विष्णुः।संवत्सरांतेप्रेतायतत्पितेतत्पितामहायतत्प्रपितामहायचब्राह्मणान्नाजायद १८१
ग्नौकरणमावाहनपात्रंकुर्यात्।संसृजेत्तत्राद्पृथिवीसमानीवनिप्रेतपाद्यंपात्रत्रयेयान्नाजायदुच्छिष्टसंनिधौपिंडचतुष्टयंकुर्या

द्ब्राह्मणांश्चस्वाचांतानदत्तदक्षिणांश्चानुव्रज्यविसर्जयेत्ततः।प्रेतपिंडंपाद्यपात्रोदकवत्पिंडत्रयेनिदध्यात्।कर्षत्रयसंनिकर्षे
ष्येवमेवसपिंडीकरणंमासिकार्थवद्वादशाहेत्वचात्रयोदशाह्निवाकुर्यान्नीत्रवर्जश्रद्राणांद्वादशोह्निसंवत्सरान्तेतारयघधि
मासिकत्वावत्तदामासिकार्थेदिनामकंवर्द्धयेदितिकर्षत्रयसंनिकर्षेथिवमिति।प्रेताकाद्विष्टसंबधिकर्षत्रयसंनिहितानपि
पिंडान्पित्रादिपिंडेषुयोजयेत्।मासिकार्थवदिति।मासिनवानिश्राद्धानिमासिकानि।तदर्थप्रेताश्चायनादिःतद्युक्तानिश्राद्धा
निमासिकार्थविनिनान्याशौचापगमद्वादशाहेद्वादशाब्दःसुत्वचान्नाद्वादशाह्निसपिंडीकरणंकुर्यादित्यर्थः॥आत्रानमासिका
दीनिप्रथमतृतीयषष्ठद्वादशादिनेषुकर्तव्यानि॥एवंचाषोडशश्राद्धानिएवंचवृध्यादिनिमित्तापकर्षोबाद्धव्यः।अतएवद्वाद
शाहंश्राद्धंत्वाचतिप्रदर्शनार्थंततश्चापकर्षकालात्पूर्वकृतव्यतिरिक्तानियावंतिनदंतितत्संख्याकदिनेषुनावंतित्वाचान्तेरक
रणेसपिंडीकर्तव्यो॥याज्ञवल्क्यः॥गंधोदकतिलैर्युक्तंकुर्यात्पात्रचतुष्टयं॥अर्घार्थंपितृपात्रेषुप्रेतपात्रंप्रसेचयेत्।यसमा
नाइतिद्वाभ्यांशेषंपूर्ववदाचरेत्।एतत्सपिंडीकरणमेकोद्दिष्टंस्त्रियाअपि।शाषब्राह्मणनिमंत्रणादिपूर्ववत्पार्वणवत्।एको
द्दिष्टंसपिंडीकरणेव्युत्क्रममृतेतुविशेषाब्रह्मपुराणे।मृतपितरियस्याश्चविद्यतेचपितामहः।तेनदेयास्त्रयःपिंडाःप्रपितामह
पूर्वकाः॥तेभ्यश्चपैतृकःपिंडोनियोक्तव्यश्चपूर्ववत्।मातर्यग्निमृतायांतुविद्यतेचपितामही।प्रपितामहपूर्वंतुकार्यस्तत्राप्ययंवि

धिः॥ सुमंतुः। त्रयाणामपि पिंडानामेकेनापि सपिंडने। पितृत्वमश्नुते प्रेतस्तदा निधर्मो व्यवस्थितः॥ त्रयाणां पित्रादिपिंडानां मध्ये ए-
केन पितृपिंडेन प्रपितामहपिंडेन वा प्रपितामहादिजीवति सपिंडने कृते प्रेतः पितृत्वं प्राप्नोतीत्यर्थः। यत्तु वचनं व्युत्क्रमाच्च प्रमीतानां नैव
कार्या सपिंडतेति तन्मातापितृभर्तृव्यतिरिक्तविषयं। तथा च स्कंदपुराणे॥ अक्रमेण मृतानां न सपिंडीकृतिरिष्यते। यदि मा-
ता यदि पिता भर्ता नैष विधिः स्मृतः। एष विधिः व्युत्क्रममृतानां सपिंडीकृतिरिष्यत इत्ययं विधिः। ब्रह्मपुराणवचने तु मृते पितरी-
त्यादि पूर्वमेव दर्शितं। पतिरपुत्रायाः पत्न्याः स्वमातृपितामह्यादिभिः सापिंड्यं करोति न तथा च पैठीनसिः। अपुत्रायां मृतायां तु प- १५३
तिः कुर्यात्सपिंडतां। श्वश्र्वादिभिः सहैवास्याः सपिंडीकरणं भवेत्। मात्राग्निप्रवेशान्तत पित्रादिभिरेव सह सापिंड्यं कुर्यात्। यदा-
दयमः। पत्न्या चैकेन कर्त्तव्यं सपिंडीकरणं स्त्रियाः॥ सा मृतापि हि तेनैक्यं गता मंत्राहुतिव्रतैः। पत्न्या चैकेन पतिसुखे जनौ तत्त्वि-
त्रात त्विता मातृतावच्छ्यर्थः॥ आत्मनाश्चैक नैव सापिंड्यं किंतु। त्रिभिः शातातपः॥ मृतायां तु गतानां यत्सा तेन सह पिंडनं वृद्धनीति
ब्राह्मादि चार्षप्राजापत्यविवाहोढायाः सुतः पितामह्यादिभिर्मातुः सापिंड्यं कुर्यात्। यदाह शौनकः। मातुः सपिंडीकरणं कथं कार्यं भवे-
सुतैः। पितामह्यादिभिः सार्द्धं सपिंडीकरणं स्मृतं। यमः। जीवत्पिता पितामह्या मातुः कुर्यात्सपिंडतां। प्रमीतपितृकः पित्रा पितामह्या पि-
वा सुतः। मातुरग्निप्रवेशाभावे पित्रा पितामह्या वेति विकल्पः। पितामह्या पितामह्यादिभिरित्यर्थः। एवं पित्र मादिषु द्रष्टव्यं। आसु- १८७ १५२

रगांधर्वराक्षसपैशाचविवाहे रूढासुता मातामह्यादिभिस्तस्या मपिंडीकं मातुः पितामह्यादिभिस्तस्या जीवत्यां मातुः
प्रपितामह्यादिभिर्मातामहेन वा सपिंडीकुर्यात्। यदाह शातातपः। तन्मात्रा तत्पितामह्या तच्छ्वश्र्वा वा सपिंडनं। आसुरादि
विवाहेषु विन्नानां त्याषितौ स्मृतौ नहस्रमातुः प्रपितामह्यां सुमंतुः। पितापितामहात्यादूर्ध्वः सपिंडसहसा सुतैः। माता मातामः
हेनद्वाद्येवाहजगवान्नशिवः। पुत्रिकासुतापि मातामहमातामह्यादिभिः कुर्यात्। तथा च कात्यायनः। मातुः सपिंडीकरणे पि-
तामह्या सहादितः। यथोक्तेनैव कालेन पुत्रिकायां न चेत्सुतः॥ पुत्रिकापुत्रस्तन्मातामहादिभिः कुर्यादित्यर्थः। बौधायनः।
आदिशत्प्रथमं पिंडं मातरं पुत्रिकासुतः। द्वितीयं पितरं तस्याः तृतीयं च पितामहं। एवं येन केनापि मातुः सपिंड्यं वृद्धपृकादि
श्राद्धेषु पितामह्यादिभिरेव नर्तती कर्त्तव्या। आसुरादिविवाहेषु पुत्रिकाकरणे च मातामहगोत्रमेव पितृगोत्रं समुक्त्स्यानकु-
र्यादिति मातृतः। ऊर्ध्वनीववि पात्रो च नारीणां पैत्रिकं कुलमिति स्मरणात्। ब्राह्मादिविवाहेषु भर्तृगोत्रमेव स्वगोत्राद्भ्रश्यते
नारी विवाहात्सप्तमे पदे। स्वामिगोत्रेण कर्त्तव्या पितृपिंडोदकक्रियेति स्मरणात्। एतच्च सपिंडीकरणकालाद्यपि पुत्रसद्भा-
वे पुत्रेणैव कार्यं तदुक्तं वायुपुराणे॥ श्राद्धानि षोडशादत्त्वा कुर्यान्नैव सपिंडनं। प्रोषितावसितपुत्रः कालादपि विरापैदपि।
एतद्व्याख्यातमपरार्के प्रोषितावसितप्रवासावसानश्रुत्वा चिरादपि कालात्सपिंडनं कुर्यात्॥ तत्त्वो उशश्राद्धान्यदत्त्वा न

न्नं कुर्यादिति किंतु दानस्यार्थः। यदि तानि कनिष्ठस्याग्न्यादिना दग्धानि तदा सपिंडनाम न कुर्यादिति कात्यायनः। पितामहः पितुः पश्चात्
नचेद्यदि गच्छति। पौत्राणां कादशाहादिकर्तव्यं श्राद्धषोडशी। नित्यपौत्रेण कर्तव्यं श्रुत्वा वंशे त्वेव पितामहः॥ मातुः सपिंडनं कृत्वा
कुर्यान्मातुर्मासिकं। असंस्कृतो न संस्कार्यो पूर्वौ पौत्रप्रपौत्रकैः। पितरं न तु संस्कुर्यादिति कात्यायनोक्तेः तु पापिष्ठमपि
शुद्धेन शुद्धं पापकृता पिता। पितामहेन पितरं संस्कुर्यादिति निश्चयः। असंस्कृतो दाहादि सपिंडीकरणान्तैः कर्मभिः स्वैः पिता
महश्च पितामहो। पापिष्ठं संस्कारराहित्यान्न पातित्यनिबंधनादि हननेन वा पापकर्मिणो न संसृजेरन् स्त्रियश्चातिचारिणी
रितिगोतमस्मरणात्॥ न संसृजेरन्न सपिंडीकुर्युः। असंस्कृतो न संस्कार्यो विच्छेदात्प्रयासान्न सपिंडीकरणकर्तुरिति पौत्रा ११४
दिनानं कर्तव्यमित्येतत्परं। असति तु कुर्यादेवेत्यपरार्कः। तत्रापि पितुः सपिंडीकरणानंतरं पितामहादेः कर्तव्यः। पितुः प्राथ
म्याकरणकर्तुरिति पौत्रादिना न कर्तव्यमित्येतत्परमसति तु कुर्यात्। संनिहितत्वात् पापिष्ठमपि शुद्धेन शुद्धं पापकृता पि
ता॥ पितामहेन पितरं संस्कुर्यादिति वचनाद्यत्र च पितामहे प्रमीते पिता तदौर्द्ध्वदेहिकं कुर्वन्मध्ये मृतस्तत्रापि पौत्रेण स्व
पितुः सापिंड्यं कृत्वा पश्चात्पितामहस्य कुर्यात्। प्रवेशक्रिन्यायस्य तुल्यत्वात् इत्यर्थे विज्ञानेश्वरः। पितामहदशाहादिमध्य एव पितुर्म १९
रणे प्रथमाहनि यावद्घाससदशाहं समाप्य दिति वचनाद्दशाहकृत्यं विघ्ने पात्रो ऊर्द्ध्वदेहिकानंतरं ततः संस्कारं कृत्वा सर्व

दशीयामर्म्ध्यकाल इतित्रयः कालाः साग्निककर्तुः। आनानेवात्रिप्रायणपरार्केऽपि वं च साग्निकस्य कर्तुः। अथ सपिंडीकरणका
लाउक्तात्रवंति द्वादशाहस्यार्थः त्रयोदशेत प्रथमद्वादशीयाम्म्ध्येकिमथाह॥ तथा आग्रोथानैतरं प्रथमाद्दशीति। आनानेवा
त्रिप्रायणकल्पतरावपि। द्वादशाहाद्दशाहान्यतरकालीनायाः अमावास्यायाः पूर्वं किमथाह। दशाहान्यतमावास्या वति
यदा कर्त्राहिताग्निः प्रेतश्चाहिताग्निस्तदा स्मृतेरुत्तरा। प्रेतश्चेदाहिताग्निस्यात्कर्ता नाग्निर्यदा तदा। सपिंडीकरणं तस्य
कुर्यात्पापसुतीयकं। यदा कर्ता प्रेतश्चाहिताग्नी तदा पितृपक्ष एवान्तस्मादाहाद्वादशाहादिकस्य कर्तव्यत्वात् साग्निकस्य
पूर्वोक्तकालालापकयमित्याकाङ्क्षायां गानिलः। द्वादशाहादिकाल तु प्रमादादननुष्ठितं सपिंडीकरणं कुर्यात्कालतस्तरया
वित्तज्ञ। अनाहिताग्नेस्तु द्वादशाहादयः सप्तपक्षाज्ञवंति। तथा च विष्णुपुराणे। सपिंडीकरणं कुर्याद्यजमानस्त्वनग्निमान्। अना
हिताग्नेः प्रेतस्य प्रोषिते त्वन्तरतर्षजा। द्वादशाहनि षष्ठेऽत्र त्रिपक्षे वा त्रिमासिके। एकादशे पिवामासि मंगलस्याद्युपस्थिते। षष्ठे
वा मासीयन्त्वयं। यदा मंगले वृध्यादुपस्थितेस्मात्ततः पूर्वमपि कालइत्यर्थः। व्याघ्रः। आनैत्याकुलधर्माणां तु साविवा हि षः स्त्रयात्
अस्थितस्तु शरीरस्य द्वादशाहः प्रशस्यात्। शूद्रविषयसपिंडीकरणे कर्तव्यमित्युक्तो विष्णुः। मंत्रवर्जं हि शूद्राणां द्वाद
शाहनि कीर्तितमिति। अमावास्याश्राद्धकारि शूद्रविषया मतद परार्ककल्पतरोर। वसन लादाशौचमथाएव कर्तव्यो। अथा

न्यदयिकश्राद्धं॥ तत्र मत्स्यपुराणे। उग्रवानदसैतानयज्ञाद्यद्यादिमेंगाल। मातरः प्रथमं पूज्याः पितरस्तदनंतरं। ततो माता
मह्यानीच विश्वेदेवाःसदैव वा॥ अत्र कालनियममाह गार्ग्यः। मातृश्राद्धंतु सर्वेषां कर्मादौ निरपेक्षकं। मातामहीं त्वान्नारंभ
वृद्धिश्राद्धत्रयं स्मृतं॥ दिनत्रयकरणासंभवे वृद्धशातातपः। पृथग्दिनेष्वशक्तश्चेदेकस्मिन्पूर्ववासरे श्राद्धत्रयं प्रकु
र्वीत वैश्वदेवं तु तांत्रिकं। पाकादिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकं प्रातरिति सति संभवे। अन्यथा रात्रावपि। तत्र जन्मनि
जातकर्मांगभूतं नांदीमुखश्राद्धं तु प्रपास्यतां॥ आश्वलायनगृह्यपरिशिष्टे। आभ्युदयिके युग्मा ब्राह्मणाः मूलदर्भाः प्राङ्मुखे
ष्वउदङ्मुखो दद्यादुदङ्मुखेष्वा प्राङ्मुखो वा द्विदर्भी पवित्रं इति कात्यायनः। आभ्युदयिके प्रदक्षिणमुपचारः। पित्र्यमंत्रवर्ज्जं
पञ्जावादनीयविस्त्विलार्थं संपन्नमिति संपन्न प्रश्ने दधिबदराक्षतमिश्राः पिंडा नांदीमुखान्पितृनावाहयिष्य इति पृच्छति
नांदीमुखाः प्रीयंतामित्यक्षय्यस्थाने नांदीमुखान्पितृनावाहयिष्य इति पृच्छति नांदीमुखाः पितरः पितामहाः प्रपितामहाश्च प्रीयंता
मिति नस्वधां प्रयुंजीत युग्मान्नाशयेदिति॥ अत्र नांदीमुखाः पितर इति मातृणां मातामहानामपि त्रिदर्शनार्थं। यत्तु ब्रह्मपुरा
णे। चतुर्थ्यादिलपजाज्ञो नांदीमुखस्तु मुख्यः पिता पितामहश्चैव तथैव प्रपितामहः। त्रयो ह्यश्रुमुखाह्येते पितरः परिकीर्ति १९५
ताः। तेभ्यः पूर्वतरा ये च प्रजावंतः सुखैधिताः॥ ते तु नांदीमुखा नांदीसमृद्धिरिति कथ्यते इति तज्जीवपित्रादित्रितयस्य श्राद्धकर्तुर्वृ

द्धिश्राद्धदेवताः सिद्ध्यर्थं मत्स्यपुराणादिवचनेषु पित्रादीनां नांदीमुखदेवतात्वमभिहितं। ब्रह्मपुराणवचनेन तु
प्रजावाममभिहितं। अतः परस्परविरोधः परिहरणीयः। परिहारश्चार्वाक्प्रकृतविषयत्वादनघटितनान्यथा। युक्तं चैतत् पित्रा
दीनां त्रयाणामपि विद्यमानत्वात्तु चतुर्थादयः प्रजावंतः। चतुर्थादिस्तं निर्दिष्टत्वान पित्र्यादित्रयाणां तद्विषय दुःखजात्वेन सं
निहितमरणधर्मकत्वात् श्रुमुखत्वमिति तत्तश्च विद्यमानपित्रादित्रयस्यापि वृद्धौ नांदीश्राद्धमावश्यमिति गम्यते न पार्वणा
दिश्राद्धं पितरि पितामहे च जीवति नैव कुर्यादिति विष्णुना निषेधात्। एवं मात्रादिषु त्रिषु मातामह्यादिषु च विद्यमानस्वाव
दितव्यं न्यायसाम्यात्। एवं च यत्क्वचिदुक्तं पित्रादिषु त्रिषु विद्यमानेषु न पितृवर्गे नांदीमुखश्राद्धं एवं मातृश्राद्धादिष्वपीति त
द्ब्रह्मपुराणवचनापरिज्ञाननिबंधनमित्युपेक्षणीयं॥ आश्वलायनः। विश्वेदेवा इदं वो अर्घ्यं नांदीमुखाः पितर इदं वो अर्घ्य
मिति यथालिंगमर्घ्यदानं प्राणोऽहामाप्र्यायकव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहेति मधुवाताऋतायत इति इत्यस्थ
ाने उपास्मै गायतेति पंचमधुमतीः श्रावयेदन्नं मीमदंतेति च षष्ठीमाश्रावितेषु तृप्ताः स्थ इत्युक्ते शेषमन्नं प्रदाय तेषु प्राची
नाग्रान्दर्भान्संस्तीर्य तेषु पृषदाज्यमिश्रेषु तृप्ताः स्थ इति प्रत्येकं द्वौ द्वौ पिंडौ दद्यादिति तृप्ताः स्थ इत्युक्ते प्रादेशमात्रं
शालाया बहिर्वा दद्यात्। वृद्धशातातपः। प्रदद्यात्प्राङ्मुखः पिंडान्वृद्धौ नाम्ना स बाह्यतः। बाह्यतः शालाया बहिः। आश्वला

यानन प्रतिवर्षं द्वौ द्वौ पिंडौ दर्शितौ ब्रह्मपुराणे तु मिश्रीकृत्य चत्वारि पिंडान् श्रीफलसन्निभान् निवापकुंसीख्यासाय इति
पिंडोपलक्षणार्थौ चतुर्विंशन्मात्ता एकैनाम्ना पत्न्यभीदद्यात् पिंडान् पृथक् पृथक् इति कास्मिन् पृथक् पृथक् द्वौ द्वौ पिंडौ दद्या
दित्येनामाचारणपूर्वकमपरं तु दर्भमित्यर्थः। अर्घ्यदानविशेषः कात्यायनतालाकः। गोत्रनामभिरामंत्र्य पितॄनर्घ्यं निव
दायेत्। तान्यत्रापसव्यकरणेन पित्र्यतीर्थमित्यात्। पात्राणि पूरणादीनि दैवानेव दक्षिणायतः ज्येष्ठोत्तरकरान् युग्मान्करा
ग्राग्रपवित्रकानृत्वार्घ्यं संप्रदातव्यानि कस्मात्प्रदीयते। ज्येष्ठोत्तरानिति द्वयोर्द्वयोर्ब्राह्मणयोर्हस्तौ मेलयित्वा तत्रापि ज्ये
ष्ठस्य प्रथमं पावशिनस्य दक्षमुपरि कृत्वार्घ्यदानं कर्तव्यमित्यर्थः॥ कात्यायनः॥ यः पितृभ्यः पिता दद्यात् सुतसंस्कारकर्मसु। पि
डानोद्वहनात्तेषां तस्याभावे तु तत्क्रमात्। पितुरभावाव्यवहितत्वात् आदिकर्तृक्रमेणेत्यर्थः। आउद्वहनाद्विवाहपर्यंतं जीवति पि
तरि पुत्रः स्वीयद्वितीयविवाहस्य संस्कारकर्मचानावाथिउप्रवरूपकचान्वावनताद्गविवाहस्य पुत्रजातकर्मादिषु वा नां
दीमुखश्राद्धं कुर्वीत स्वपितृपितृमातृभ्यः पितृपितृभ्यः पितृमातामहेभ्य एव दद्यात्। पित्र्य एव पिता दद्यात्तत्स्याद्दद्यात्तु पुत्रक
इति नियमात्॥ किंचानेनैव वर्त्स्यतीति। यत्र एव पितृदद्यादित्यस्यायमपि प्रायः पितास्यपित्रादिभ्यः स्वमातामहादिभ्यश्च यथा १८५
ददातीत्येवमसावपि स्वयं बंधिनामेव दद्यादिति एतदनुपपन्नं। अत्र यत्र छंदनिर्देशोनयत्र द्विनिर्देशः। येभ्य एव तस्यादिनापितृप्रति

यागिका एव गृहीतेन स्वप्रतियागिकाः॥ तत्र नांदीमुखा नांदीसमृद्धिरिति कथ्यते इत्यस्मिन्न करणे पूर्वदर्शितब्रह्म
पुराणवचनाद्वा। वृद्धिश्राद्धे पिंडदानं विकल्पितं। तथा च विष्णुपुराणे पिंडनिर्वपणं कुर्यान्न वा कुर्यान्नराधिप। वृद्धि
श्राद्धे महाबाहो कुलधर्मानवेक्ष्य तु। पिंडनिर्वपणमित्युपलक्षणं। आत्मीयकुलयावतीतिकर्तव्यता वृद्धिश्राद्धे तावत्य व
कर्तव्या नाधिक इत्यर्थः॥ कात्यायनः॥ कर्मादिषु तु सर्वेषु मातरः सगणाधिपाः। पूजनीयाः प्रयत्नेन पूजिताः पूजयंति ताः।
कर्मादिषु नांदीमुखादिषु। तथा प्रतिमासु च शुद्धासु लिखिता वा पटादिषु। अपि वाक्षतपुंजेषु नैवेद्यैश्च पृथग्विधैः। कु
ड्यलग्नां वसोर्धारां सप्तधारां घृतेन तु। कारयेत्पंच धारां वा नातिनीचां न चोच्छ्रितां। आयुष्याणि च शांत्यर्थं जप्त्वा तत्र समाहि
तः॥ आयुष्याणि आयुर्वृद्धिकराणि। आनो भद्राः क्रतवो यंत्वित्यादिसूक्तानि। तथा। गौरी पद्मा शची मेधा सावित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातरः॥ धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह। आत्म्या घंगीधपुष्पैश्च धूपदीपनिवे
दायत। चतुर्विंशतिमाताभ्या छुआत्प्रदयेप्राद्यादेवतास्थापनं स्मृतं। जातिधर्मकुलश्रेणीलोकानां वृद्धिकारणी। विस्रः पू
ज्याः पितुः पत्न्यः तिस्रो मातामहस्तथा। स्वयं तामातरः प्रोक्ताः पितृमातृस्वसाष्टमी। ब्राह्मण्याद्यास्तथा सप्त दुर्गा क्षेत्र गण
धिपान् पूजयेदिति शेषः। पितृपत्न्यः पितृव्यार्यास्तिस्रो मातामह्याः पितृमातृस्वसाष्टमीति। पितृष्वसा सिप्रमी मातृष्वसा

ष्टमीयर्थः॥ एता मन्तुष्य मातरः। ब्रह्माणी वैष्णवी माहेश्वरी ऐन्द्री वाराही कौमारी चामुण्डा इति सप्तादेव मातरः। कात्याय
नचतुर्विंशतिमनाद्यार्विकल्पः॥ कात्यायनः॥ गणशः क्रियमाणेषु मातृभ्यः पूजनं सदा। सकृदेव तु तावत्तु आद्यमादौ
न पृथक् पृथगादिषु। अयमर्थः। यदा संस्कारातिक्रमे एकदा उपनयनकाले जातकर्मादीनि क्रियंते। पतितस्य कृतप्रायश्चि
त्तस्य वा पुनरुपनयनकाले क्रियंते। एवमन्यत्रापि यानि संसृष्टया निकर्माणि मंगल्यानि क्रियंते तस कर्माणां तत्र सकृ
त्तंत्रेण कुर्यात्। पृथगादिषु स्वस्वकाल पृथक् क्रियमाणेषु न तंत्रेण किंचात्र स्मृतिः॥ अथ जीवत् श्राद्धं॥ तत्र ब्रह्मपुराणे। द
शाकालधनश्रद्धाव्यवसायसमुच्छ्रिता। जीवितमतिजीवायद्धात् श्राद्धं सत्तु नरः समुच्छ्रितयुक्तं विहितं पुत्रपौत्रदशादिषु स
मुश्राद्धाद्यागादिमाधजीवत् श्राद्धं कुर्यादित्यर्थः। स्नातोपवीतः सुस्नातमन्नाद्यदर्पी समाहितः। त्र्यादर्पी स्वत्रायादर्पा।
कर्त्रीरमथानाकारं विष्णुं सार्वधिरं यजेत्। प्रजायेत्। स्थालजलेंबारमूर्त्तैः किल। प्राणुष्कारखेः। पुष्करकमले। चंद्राग्निगुरुणा
विप्रमाता पितृषु सर्वगै। सदक्षिणाय सतिला स्त्रिसुजलाय नवः। निवेदयात्पितृभ्यस्तु नदग्रे तु समाहितः। सोमायचापि १८७
तृमातृस्वधान मः इति स्मरन्। अग्नये कव्यवाहनाय स्वधानम इति स्मरन्। दक्षिणेन उदघातु तृतीयां दक्षिणासु तीयमायौ गि १८३
रसवाथ स्वधानम इति स्मरन्॥ तयामध्ये तु निक्षिप्य विप्रान्पावापवेशयेत्। प्रथमासुत्तरतः द्वितीयां दक्षिणतः। तृतीयाम

ध्ये निक्षिप्यत्यर्थः॥ आवाहनादिना पूर्वं विश्वेदेवान् प्रपूज्य वा अदेवसुत्यस्था विप्रकुद्रेभ्यस्त्वामहं ततः। स्वायन्त्रिस्त्वा
महं विप्रान् जयानीतितान् वदेत् आवाहनादिकं प्राग्वत् कुर्यात्पित्र्यं कर्मेति। सोम्मी धेनुना तादृघाकस वाय द्विजायत्।
आग्नेयी वाथ रोहा यया मैथी सूर्यं द्विजायत्। विश्वेभ्यश्चैवादाव न्यत्रिलपात्रं निवेदयेत्। चामस्वाय वस्त्राद्य त्रातापाव
त्रितायी। एवमुत्तरत्रापि। स्वरूपं कमथाक्षय्यौ जलं दद्यात्ततः द्विजान्। विसर्जयेत् स्मरन् विष्णुं देवम ष्टा ह रविष्णुं। त
तः काम काल स्नानं निशिनारायणं स्मरेत्। चतुर्दर्भी तातागच्छेत् यथा प्राचीसरिद्धरी। सरिङ्गमनं प्रतिवर्णं विश्वापस्य
मार्ग विशाषमादा। पूर्वेणि विप्रः। सोम्यनराजा विश्वेपा पारणाय। सोम्यनोत्तरणे। अपारणपश्चिमेन। दक्षिणेन तथा अ
द्रा मार्गेण विकिरेयवान्। वस्त्राणि लोदय ज्ञा निजितं न इति सीस्मरन्। दक्षिणा निक्षिप्य बहिं ज्वालयेत् तत्र त रुचयो। पंचाशना
कारो ब्राह्मीं ऋचा प्रतिहृतिं दद्देत्। ब्रह्मलोकसंबोधिनी ब्राह्मीं ऋचा श्मशानिके होमं प्रत्यक्षपंतामवद्धि। निरग्निमपवान्ूमिंय
मीरुद्दं च संस्मरन्। कुर्यात्प्राधानिकस्थानप श्चाद्दोहापयेच्च तौ। श्मशानादिकं होमं मंत्रत्यहृशावदाहकालक्रियमाणे। स्यादा प्रा
धानिकस्थानप्रधानहोमस्थाननिरसिग्निं हृत्सु दाहशेनतथायमापधतृ शानदद्याच तीप्रकृति मत्ये द्वी हापयेत्। दाहये
त्। अपायश्चापरं बाह्मो सुद्रुमिश्रं चरुं ततः। तिलमुंडुदुलमिश्रं च द्वितीयं सप विप्रकौ। हरयेत्कर्तुका स्यात्र मधुक्षीरघृतादिकैः॥

तदुपात्तनालामुकुंडपात्राणि त्रीणि पूरयित्वा तु पृथिव्येनमस्तु न्यमितिविकं निवेदयेत्। तु यमायनमः श्वेति द्वितीयं तदनंतरं
ॐनमस्यायरुद्राय श्मशानपतये तथा। ततो दीप्तिं समिद्वा वह्निं न्यासोप्रवृत्ति दादकं। निर्वापयेदित्यध्याहारः। निर्वापण प्र
कारमाह। ॐकृव्यादवह्निं तमायेन्द्राम्येनमः इति स्मरन्। क्षीरान्नं जलं कुशैः विकिरेत प्रशीतायां नानि मात्रं ततस्तोयं प्र
क्षिपय मदिग्मुखः। स प्राप्यायमसी दत्त्वा दद्यात् सजलीजलीन्। तु यमाय धर्मराजाय चादि प्रपि। सस जलीजलीन्स
प्रधेत्तु पकामोपसंहारवशान्नाकवलस्वधादिशब्दोच्चारणेन पुनरंजलिदानमपि तु प्राचीकरोत्येव। ॐनमस्यायरुद्राय
श्मशानपतये नमः। श्मशाननैवेद्य यक्ष इयेतदाह॥ लाजादकान्यां प्रमंडितकं सैव विकिरेद्विधिं तन्त्रयाम्या दस्युखेषु दर्भे
षु प्रदद्याद्वानजने। स्वधेतिशुकवाहायरुद्रान्नमः इति स्मरन्। अमुकामुकगोत्रेन तुभ्यमस्तु तिलोदकं। अवानजने तिलो
दकं तद्दान प्रकारमवदर्शयिता। स्वधेत्यादिनाशुकवाहाय रुद्राय स्वधानमः इति रुद्रं संस्मरन्नमुकगोत्रेतत्तिलोदकं तुभ्य
मस्त्विति दद्यादित्यर्थः॥ प्रदद्याद्दश पिंडांस्तु च घृतिप्य समाचितान्। धूपादीपावलिर्गंधः सार्वेषामस्तु वाहयः। धूपादिदाना
नीतरैः सार्वेषामहायास्त्विति ब्रूयादित्यर्थः। दशपिंडान्स्नातादन्यो विष्णोः सौम्यमुखं स्मरन्। निकृष्याणवतीस्तोयं नाभि १९८
मात्रं प्रविश्य तु। प्रक्षिपेन्मृन्मयंकृतजलमध्ये पृथक् पृथक्॥ मृन्मयं कृतं एकैकं पिंडं निक्षिप्य जलमध्ये प्रक्षिपेदित्यर्थः॥ प्र

दद्यात्तैव पंचाशत्तु कृत्वा तथजलीजलीन्। हाराय पीतगृहे वा पक्षीरानायैव निक्षिपेत्। जीवात्रस्नाहि दुग्धं च पिबेदनात्य
नुस्मरन्। जीवात्रस्नाहीत्यादिमंत्रद्वयं पठन्नित्यर्थः। यान्यो नु सुखे सुदाने ते स्यापत्याद्दुदद्यु सुखः। अमावास्यायां कुर्याद्य
जीवत् श्राद्धमतः परं। घृतान्नमीसदधितिः प्राय कुर्यमात्रयी। कुर्याद्विमासिकं मासि सपिंडीकरणं ततः। आशौचांततस्तः सर्वी
मात्मानावा परस्य तु कुर्यादस्थिर तीक्ष्णाद्याशक्याराध्य धनायुषी। अमावास्यायां कुर्यादित्यतिधाय पुनरपाशौचांतरित्य
भिधानादमावास्यायां व्यतीतायामतः परमाशौचांतपर्यंतंवाशौचवत्त्रिरात्रांतं श्राद्धादिकं कुर्यादित्यवगम्यते। एतद
ध्याहारसापेक्षत्वात् तत्राशौचांतरित्यादिकस्यापसंहाररूपाचनानुवादाचापपत्तेः। शुक्लपाक्षश्राद्धस्याप्रशस्त्वाच्छ
क्लपाक्षव प्रशस्तत्वात्तत्राथमावस्यायां प्रशस्ततरत्वे नामावास्यापूर्वदिनएवाशौचमित्यमावास्यावाशौचांतः ततस्त
त्रिव श्राद्धं कुर्यात्॥ इदं मदनपारिजातमदनक्षितिपालदानजलरूढा। शाखकः सप्तम आसीदामोदामोदाकृष्टप
ण्डितचक्रमरः॥१ मतिर्येषां शास्त्रे प्रकृतिरमलीयाव्यवहृतिः पराशीलेस्ता घ्यं जगतिकृतवास्ते कतिपये। विरचितं तेषामुक
रतलन्यस्तक्षितिमिपादियैव्यासारण्यप्रवरमुनिशिष्यस्य समितिः॥ इति पण्डितपारिजातकदारमाल्लत्यादिविरुद
राजीविराजमानस्य श्रीमदनपालस्य निबंधे मदनपारिजाते निधेसप्तमः स्तबकः॥ ॥७॥ ॥ विज्ञानामवष्टपकुर

श्राद्धाधिकारात् आह्निकानन्तरं दायविभागो निरूप्यते। तत्र नारदः। विभागोऽर्थस्य पैत्रस्य पुत्रैर्यत्र प्रकल्प्यते। दा
यभाग इति प्रोक्तं तद्विवादपदं बुधैः। पित्र्यस्येति पितामहादेरप्युपलक्षणं। तदिति विधेयविशेषणं। चत्वारः काला विभा
गस्य जीवत्येव पितरि पितुर्यदा विभागेच्छा स तावदेकः कालः। निवृत्तरजस्कायां मातरि स्त्रीसुखान्निवृत्ते। पितरि द्रव्यनि
स्पृहे च पितरि पित्रनिच्छायामपि यदा पुत्रेच्छा सान्यः। सरजस्कायामपि मातरि अनिच्छत्यपि पितरि तस्मिन्नूद्यूताद्य
धर्मवर्तिनि निःस्पृहे चिकित्स्यारोगग्रस्ते स्वतियदि पुत्रेच्छा सान्यतरः। पितृमरणानन्तरमपर इति तत्र प्रथमपक्षमाह। याज्ञवल्क्यः।
विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतान्। ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः। श्रेष्ठादिभागश्च मनुना दर्शितः।
ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरं। ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः। अस्यार्थः विभाज्यद्रव्याद्विंशतितमो भा
गः यच्च विभाज्ये श्रेष्ठं तज्ज्येष्ठाय दातव्यं। तथा चत्वारिंशत्तमो भागो मध्यमद्रव्यं च मध्यमाय। अशीतितमो भागो हीन
च द्रव्यं कनिष्ठाय दातव्यं। ततावशिष्टं द्रव्यं समं विभज्य गृह्णीयादिति। एवमन्यान्यपि विषमविभागप्रतिपादकानि गौतमा
दिवचनानि बहूनि संति तानि ग्रंथविस्तरभयान्नेह प्रदर्शितानि। एवं विषमविभागस्य शास्त्रसिद्धत्वेऽपि लोकविरुद्धत्वादस्व
र्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न चेति वचनान्नायं विभागशास्त्रमनुष्ठेयः स्मर्यते यथा नियोगधर्मो न्याय्यो नानूबंध्यानायो

पिता। तथोद्धारविभागोऽपि नैव संप्रति वर्तते। यदि दैवात्पिता करोति विषमं विभागं तदा न निवर्तनीयः स्यात्। याज्ञवल्क्यः।
न्यूनाधिकविभक्तानां धर्म्यः पितृकृतः स्मृतः। धर्म्यो यदि धर्मादनपेतस्तर्हि निवर्तनीय इत्यर्थः। अधर्म्यश्चेन्निवर्तक इत्यु
क्तं भवति। तथा च नारदः। अन्यथाशास्त्रकारी च न विभागे पिता प्रभुरिति। यत्र च विषमविभागो लोकविद्विष्टो वर्ज्य
त्र विषमविभागो न वाच्यः। यदाह नारदः। स्वयं शोघ्रति पद्येत विभजन्नात्मनः पितेति। एतच्च स्वयमुपार्जितपरं। यदाह व
सिष्ठः। येन चैषां स्वयमुपार्जितं स्यात्स द्व्यंशमेव लभेतेति। एषा द्वायादि पितृत्वात्। द्वितीयपक्षमाह विभजेरन् सुता इति
सममित्यनुवृत्तौ नारदः। मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च। निवृत्ते वापि रमणे पितर्युपरतस्पृहे। प्रत्तासु विवाहितासु र
मणे स्त्रीसंभोगः। तदिच्छानिवृत्तौ सत्यामित्यर्थः। स्पृहा द्रव्यविषया। तृतीयपक्षमाह शंखः। अकामे पितरि रिक्थविभागो
वृद्धे विपरीतचेतसि रोगिणि चेति। अकाम इति विपरीतचेतसि अधर्मवर्तिनि। चतुर्थपक्षमाह याज्ञवल्क्यः। विभजेर
न्सुताः पित्रोरूर्ध्वं रिक्थमृणं समं। पित्रोर्मातापित्रोरूर्ध्वं रिक्थं तदीयं द्रव्यं तदीयमृणं च समं विभजेरन्नित्यर्थः। पितृमरणा
नन्तरं पातित्यादिदोषदुष्टे वा पितरि जीवति यदा पुत्रा एव विभागकर्तारस्तदा विशेषमाह स एव। असंस्कृतास्तु संस्का
र्या भ्रातृभिः पूर्वसंस्कृतैः। भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकं। असंस्कृतानां विवाहान्तसंस्कारैरसंस्कृतानां भ्रातॄणां भगि

डाक्टर भाऊ दाजी स्मारक
DR. BHAU DAJI MEMORIAL
DR. BHAU DAJI MEMORIAL

नीनां च विवाहोत्तरसंस्कारं कृत्वा पश्चाद्विभागः कर्त्तव्य इत्यर्थः॥ भगिन्यश्चेत्यादेरयं तात्पर्यार्थः। भगिनीनामविवाहितानां विवा
हं कृत्वा तावच्चतुर्थमंशं दद्यात्। कस्मान्निजादंशात्॥ अत्र यज्जातीयपुत्रस्य योंऽशस्तच्चतुर्भागः कन्याभागः स्यादिति वक्ष्यमाण
त्सोदाहृतिर्निजांशः॥ तस्मात्। अयं च विभागक्रमः। ब्राह्मणस्यैका पत्नी तत्पुत्रौ द्वावेक एव। एका च कन्या॥ तत्र पितृद्रव्यं त्रिधा विभ
ज्य तत्रैकमंशं चतुर्द्धा विभज्य तुरीयांशं कन्यायै दद्यात् अवशिष्टं द्वावपि पुत्रावर्द्धमर्द्धं गृह्णीतः। एवं पुत्रबहुत्वे कन्याबहुत्वे चोह
नीयं। यद्येकः पुत्रो द्वे च कन्ये तदा पितृधनं त्रिधा विभज्य तत्रैकं भागं चतुर्द्धा विभज्य एकमेकं चतुर्थांशं द्वाभ्यां कन्याभ्यां दत्त्वा
वशिष्टमखिलं पुत्र एव गृह्णाति एवमेव समानजातीयेषु भ्रातृषु भगिनीषु संख्यावैषम्ये योजनीयं। यदा जातिवैषम्यं संख्या
साम्यं वैषम्यं वा तदेवं द्रष्टव्यं॥ तद्यथा ब्राह्मणस्य ब्राह्मण्यादिचतुर्जायास्तत्र ब्राह्मणीपुत्रः कन्या च तथा क्षत्रियासुतः कन्या च तथा
वैश्यायाः शूद्रायाश्च एवमष्टावपत्यानि तत्र चत्वार्यपत्यानि स्त्रियश्चत्वारः पुमांसः। चतुस्त्रिद्व्येकभागाः स्युरित्युक्तवचनेन ब्राह्म
णपत्याया अष्टावंशाः क्षत्रियापत्यायाः षट्। वैश्यापत्यायाश्चत्वारः॥ शूद्रापत्याया द्वौ एवं विंशतिर्भागान्कृत्वा ब्राह्मणीकन्या
यै स्वजातिपुत्रविहितादंशचतुष्टयरूपान्निजाद्भागाच्चतुर्थमंशं दद्यात् क्षत्रियकन्यकायै स्वजातिपुत्रविहितांशत्रयरूपान्नि
जाद्भागाच्चतुर्थमंशं दद्यात्। वैश्याकन्यकायै स्वजातिविहितांशद्वयरूपान्निजाद्भागाच्चतुर्थमंशं दद्यात्। शूद्राकन्यका 200

यै स्वजातिपुत्रविहितादेकांशरूपादेव निजाद्भागाच्चतुर्थमंशं दद्यात् तत्तद्भागादवशिष्टं द्रव्यमकीत्य ब्राह्मणादिपुत्राः
क्रमाच्चतुस्त्रिद्व्येकभागान्गृह्णीयुः भ्रातॄणां भगिनीनां च वैषम्ये यावत्यो व्यक्तयो भ्रात्रादीनां तावतोंऽशांस्तज्जातीयचतुस्सं
ख्या चतुस्त्रिद्व्येकभागादिक्रमेण कल्पयित्वा कन्यकानां स्वस्वजातिविहिताद्भागाच्चतुर्थमंशं दद्यादवशिष्टं तत्तद्भागद्र
व्यं सवर्णपुत्राश्चतुरादिक्रमेण विभज्य गृह्णीयुरित्येवं योजनीयं। केचनैवमन्यथा तात्पर्यं वीकुर्वते चतुर्थमंशं कन्यका
यै दद्यात् तेन च विवाहः कर्त्तव्य इत्यनेन समुदितद्रव्येण विवाहं कृत्वा पुनरपि चतुर्थांशदानमिति तन्मेधातिथिमिताक्ष
राकारादीनामनभिमतत्वादुपेक्षणीयं। अथवा देशाचारतो व्यवस्था। दायविभागकालस्य त्वसंगतत्वादयं तु नये
निरूपितं सांप्रतं दायग्रहणव्यवस्थां दर्शयितुं मुख्यगौणपुत्रान्प्रदर्शयति। तत्र याज्ञवल्क्यः। औरसो धर्मपत्नीजस्तत्समः पुत्रिका
सुतः। क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा। गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः। कानीनः कन्यकाजातो मातामह
सुतो मतः। अक्षतायां क्षतायां वा जातः पौनर्भवः स्मृतः। दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्। क्रीतश्च ताभ्यां विक्रीतः
कृत्रिमश्च स्वयं कृतः। दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढजः। उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः। पिण्डदोंऽशह
रश्चैषां पूर्वाभावे परः परः। सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः। सवर्णा धर्मविवाहोढा धर्मपत्नी तस्यां जातः पुत्र

औरसः। सर्वमुख्यः। तथा आसुरादिविवाहोढासवर्णास्त्रियामपि तथा अनुलोमितविवाहोढक्षत्रियादिस्त्रीषु ब्राह्मणादुत्प
न्ना मूर्धावसिक्तांबष्ठनिषादादयः परपर्यायिः पारसवश्च वैश्यादिस्त्रियां राजन्यउत्पन्नो माहिष्यो वैश्यः शूद्रायां वैश्याद्युत्पन्नः
करणाख्यायिते औरसा एव पुत्रिकापुत्रः पुत्रिकायाः पुत्रः स्तु नयविधोपि पुत्रिकासुतस्सम औरससमः। तथा ह्यास्तुष्या
याणापि जनकस्यौरससम एव। समानवर्णेन सगोत्रेणेतरेण सपिंडेन अदेवरेण सपिंडेन नियोगधर्मेणोत्पन्नः पुत्रः क्षेत्र
जः। अनिश्चितपुरुषविशेषाज्ञातसवर्णाद्गृहे प्रच्छन्नउत्पन्नो गूढजः। अनिश्चितपुरुषविशेषत्वेन स्त्रियाः सर्वेष्वविज्ञा
तस्त्रीचारात्तयात तत्स्वरूपस्य ज्ञातत्वात् यद्बलाद्गृहे सपुरुषोत्तरसांत्सागम्यापि वर्णविशेषेण जानाति तत्रस गूढजनाममात्र
धारी न प्रातिलोम्यगूढजवत्त्राश्यः सवर्णाच्च कन्यकायामुत्पन्नः कानीनः। स मातामहस्य सुतः। यदि सा अविवाहिता पितृगृहएव
तिष्ठति यदि च वोढ्रे कदाचिद्विवाहिता तदा सपुत्रो वोढुरेव तथा च मनुः पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः। तं कानीनं वदेन्नाम्ना
वोढुः कन्यासमुद्भवम्। अत्र वोढुरित्युपादानात् विवाहितावन्नदा वोढुर्नान्यस्मान्नमदस्येत्यन्यतङ्म्यात। ऊढानूढा चेति
द्विधा पुनर्भूः। तस्यां सवर्णादुत्पन्नः पौनर्भवः। दत्तकोपि सवर्ण एव यदाह मनुः। माता पिता वा दद्यातां यमद्भिः पुत्रमाप १५७
दि। सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः। सदृशं सवर्णं जातिरिति प्रविभात मृतवा आपदि केवलमानुरधिकारादानेत २०१

था मातरि मृतायास्तु मात्रा दाद्याद्विदापद्युक्ता यो वा आपदि केवलपितुरधिकारः। अन्यथोत्रायोरपि सहैव आपदीत्याप
च्छेद्योपादानादनापदि ता दद्यमिति गम्यते। अनापदि दत्तदाउ दीपान प्रतिग्रहीतः। एकः पुत्रो न दातव्यो नापि प्रतिग्रा
ह्यः स्यादेव वसिष्ठः। न त्वेवैकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा इति तथा ज्येष्ठोपि न देयः। पुत्रप्रतिग्रहप्रकारमाह वसिष्ठः पु
त्रं प्रतिग्रहीष्यन् बंधूनाहूय राजनि चावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा दूरबांधवं बंधुसंनिकृष्टमेव प्रतिगृह्णीयादि
ति निवेशनस्य स्वगृहस्य। अयं तादृशानां भाषाविप्रकृष्टस्य प्रतिषेधार्थमदूरबांधवमित्युक्तं। अयमेव विधिः क्रीतस्वयंदत्तकृ
त्रिमेष्वपि यथायोग्यं योज्यः एकपुत्रो ज्येष्ठपुत्रव्यतिरेकेण यदि मातापितृभ्यामन्येन केनचिद्वा यो विक्रीतः स सव
र्णः क्रीतपुत्रः। यत्तु मनुनोक्तं। सक्रीतकः सुतस्तस्य सदृशो ऽसदृशोपि वा इति। तद्गुणैः सदृशोऽसदृशो वान्यथा तत्परं न तु
ब्राह्मणत्वादिवर्णैः। मातापितृरहितः सवर्णो धनादिकप्रदर्शनेन प्रलोभितः सन्पुत्रार्थिना पुत्रीकृतो यः स कृत्रिमः। मातापि
तृभ्यां परित्यक्तो विहीनस्त्यक्तो वा अहं तव पुत्रो भवामीति प्राप्तः स्वयं दत्तो वा अपि सवर्ण एव अपरिणीता गर्भिणी या विवाहिता
यी तस्या घउत्पन्नः सहोढः। यदि वा अज्ञातगर्भा सवर्णजः मातापितृभ्यामुत्सृष्टः परित्यक्तो यः पुत्रत्वेन सोपविद्धः।
अत्र क्रमं दर्शयति पिंडदांशहरश्चेति। एते सवर्णा एव पुत्रा ज्ञेया इति याज्ञवल्क्य सजातीयेष्वयमिति। एतावत्रजादयोयच्चाधिकव

र्णादुत्पन्नास्तदापि तत्तन्नामधेयत्वाज्जातेर्वाच्यत्वं। अपि तु सवर्णादुत्पन्ना एव प्रशस्ततरा न भवंति। सजातीयेष्वयं प्रोक्त इ
ति सजातीयनियमात्। यदि हीनवर्णादुत्पन्नास्तदा प्रतिलोमजत्वेन निंद्या एवेति विवेचनीयं। कानीनगूढोत्पन्नसहो
ढपौनर्भवानां सवर्णत्वं जनकद्वारेण स्वरूपतस्तु तेषां कुंडगोलकत्वेन स्यात् सवर्णजत्वं तत्पितृत्वात्। पुत्रिकाकरणा
नंतरमौरसपुत्रोत्पत्तौ विशेषमाह मनुः। पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते। समस्तत्र विभागः स्याज्ज्येष्ठता ना
स्ति हि स्त्रियः। कात्यायनः। उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः। सवर्णा असवर्णास्तु ग्रासाच्छादनभाजनाः। सवर्णाः क्षेत्र
जदत्तकक्रीतकृत्रिमस्वयंदत्तापविद्धा असवर्णाः कानीनगूढोत्पन्नसहोढपौनर्भवाः। यत्तु वसिष्ठवचनं अप्रशस्तास्तु कानी
नगूढोत्पन्नसहोढजाः। पौनर्भवश्च नैवैते पिंडरिक्थांशभागिन इति। तदौरसे सति चतुर्थांशनिषेधपरं। अस्माद्वचना
त्तु कानीनादीनामपि सकलपितृधनग्रहणमस्त्येव पूर्वाभावे परः परश्चेति वचनादिति विज्ञानेश्वरमतं॥ यथाचायमर्थ
क्रमस्तथास्माभिरुपपादितं विज्ञानेश्वरटीकायां सुबोधिन्यां दायविभागप्रकरणे यस्त्वीशाधिकारी सन्नपि लाभस्वत्वार्जि
तशक्तिसद्भावाद्यं शीनजिघृक्षति तं प्रत्याह याज्ञवल्क्यः॥ शक्तस्यानीहमानस्य किंचिद्दत्वा पृथक्क्रिया॥ किंचिदसारमपि तस्मै १९८
दत्त्वा विभागः कर्तव्यः। एतच्च तत्पुत्रादीनां दायजिघृक्षा मा भूदित्येतदर्थं। द्व्यामुष्यायणस्य विशेषमाहात्र अपुत्रेण परक्षेत्रे नि २०२

योगोत्पादितः सुतः॥ उभयोरप्यसौ रिक्थी पिंडदाता च धर्मतः। यदा बीजी स्वयमपुत्रो बीजदानसमये अत्रोत्पन्नमप
त्यमावयोरिति प्रतिज्ञां करोति तदा तस्य बीजिक्षेत्रिणोरिक्थादि समम्। यदा समयाभावस्तदा क्षेत्रिण एव। विभागानंतरकालो
त्पन्नपुत्रं प्रत्याह मनुः। ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनं। पित्र्यमित्यत्रैकशेषः। अत एव मातापित्रोरिदं पित्र्यं।
तथा पुत्रैः सह विभक्तेन पित्रा यत्स्वयमर्जितं। विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृताः। तथा॥ संसृष्टास्तेन वा ये स्यु
र्विभजेत स तैः सह। ये विभक्ताः सन्तः पुनः पित्रा सह संसृष्टास्तैः संसृष्टैः सह विभक्तजो विभजेदित्यर्थः। पितर्युपरते न रि
वा मृते तत्संसृष्टगर्भे यो भ्रातृपत्न्यां वा संसृष्टमात्रे पुत्रो विभक्तेषु संसृष्टस्तस्मादवगतौ विभागानंतरमुत्पन्नस्य पु
त्रस्य कथं भागकल्पनेत्याकांक्षायां याज्ञवल्क्यः॥ दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात्। तस्य विभागस्य विभागः।
अन्तर्वत्न्यस्वीकृत्या विभागानंतरमुत्पन्नः परामृश्यते। तद्विभागो दृश्याद्दृश्याद्वा वा शब्दोऽवधारणे। कीदृशा
द्विशोधितात्। विभागानंतरं प्रातिस्विकोंशोऽभ्युदयादि क्रियमाणो व्ययो लाभः स आयः। पितृकृतर्णापाकरणस्वकुटुंबपोषणादि
कं यदावश्यकं क्रियते स व्ययः॥ आयमिश्रमध्ये परिगण्य व्ययं वा हृत्य समवशिष्यैरा त्यायस्मादस्मादंशाद्यावद्यावद्ध
वितेनावत्तावद्धिद्वावत्तासममंशं दद्यात्। स्वीकृत्या विभागानंतरमुत्पन्नपुत्रस्य दद्यादित्यर्थः। संसृष्टगर्भे यो मा

तस्मिन्नात्पत्नीवाप्रसवानंतरं विभागः कर्त्तव्यः। यदात्वमिष्टः॥ अत्र चादृगो दायविभागो यावानपत्यास्त्रियस्तावत्तासामा
पुत्रलाभादिति तासीस्पृष्टगर्भिणीष्वाणीआपुत्रलाभादाप्रसवात्प्रसवे च नाद्य दायविभागो भवतीत्यर्थः। विभागानंतरं
माता पिता वा तत्काय पुत्राया स्वीकरणादिकं देयमानविभागानंतरमुत्पन्ने न तु निषेधः कार्यः। तथाच योगीश्वरः पित्र्यौ
यस्य यद्दत्तं तत्तस्यैव धनं स्यात्। विभागात्प्रागपि पित्रा मात्रा वा यस्मै यद्दत्तं तत्तस्यैव समानन्यायत्वात्। अत एव तस्मै देय
मानत्वेन निषेधोऽपि न कार्यः॥ अथ विजातीयपुत्रविभागः॥ तत्र याज्ञवल्क्यः। चतुस्त्रिद्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः।
क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः। वर्णशो वर्णे वर्णे ब्राह्मणक्षत्रियवैश्यशूद्रजातीयासु ब्राह्मणभार्यासूत्पन्ना
ब्राह्मणपुत्राः क्रमेण चतुस्त्रिद्व्येकभागभाजो भवेयुः। शूद्रापुत्रीशापद्धर्याश्चाराभागा ब्राह्मणीपुत्रस्य एतदापद्धर्याव
तुर्थत्रिगुणत्वात्क्षत्रियापुत्रस्य त्रयो भागाः। वैश्यापुत्रस्य द्विगुणत्वाद्विभागौ शूद्रापुत्रस्यैको भागः। क्षत्रजाः क्षत्रियात्क्षत्रिय
वैश्यशूद्रजातीयासु स्वभार्यासूत्पन्नास्त्रिद्व्येकभागभाजः। ब्राह्मणस्य ब्राह्मण्यां स्वभार्यायामुत्पन्नपुत्रायक्षत्रियैकस्यांशस्य
स्य न चाक्षत्रियात्क्षत्रियायामुत्पन्नस्य त्रयो भागाः। वैश्यायामुत्पन्नस्य द्वौ शूद्रायामुत्पन्नस्यैकः। विड्जा विश्याद्वैश्यशूद्रजा
तीयस्वभार्ययोरुत्पन्नाः। अत्र बहुवचनं पुत्रबहुत्वापेक्षया। ब्राह्मणस्य ब्राह्मण्यां स्वभार्यायामुत्पन्नउत्रापज्ञार्थीशाद्वयस्य २०३

न्य न चाद्विरूपा विरूपायामुत्पन्नस्यैकोंऽशः। अनेनैव प्रकारेण पुत्रगतसंख्यासाम्ये विषम्ये चाप्यूहनीयो। ब्राह्मणक्षत्रिया
द्विजातीयासु स्वभार्यासूत्पन्नपुत्राः प्रतिग्रहप्राप्तभूभागं न लभन्ते। न चापि निर्गमेन प्रतिग्रहभूर्दद्यात्क्षत्रियादिसुताय वि
यद्यथेषी पितादद्यान्मृतेऽपि प्राप्नुयात् दारत्वात् प्रतिग्रहग्रहणात्क्षत्रियादिलब्धं लभन्ते। तथा शूद्रो द्विजातिनिर्जीतानन्यमत्तीन
माप्नुयात्। द्विजातिमात्राच्छूद्रायामुत्पन्नः प्रतिग्रहक्षत्रियादिलब्धाया अपि तु वा भागं न लभते इत्यर्थः। यच्च शूद्रापुत्रस्यांश
मात्रनिषेधकवचनमपि तु ब्राह्मणस्य क्षत्रियविट्शूद्रापुत्रो न रिक्थभागी यदेवास्य पिता दद्यात्तदेवास्य धनं भवेदिति
तदपि जीवता पित्रा यदि शूद्रापुत्राय किमपि यदि दत्तं तदा विभागकाले प्राप्तिर्नास्तीत्यंशार्थेतत्परं पित्रा न दत्ते चेदंशभा
क्त्वमस्त्येव शूद्राद्दासामुत्पन्नस्य विशेषमाह याज्ञवल्क्यः। जातोऽपि दास्यां शूद्रेण कामतोंऽशहरो भवेत्। मृते पितरि कुर्यु
स्तं भ्रातरस्त्वर्धभागिकम्। अभ्रातृको हरेत्सर्वं दुहितॄणां सुताद्ऋते॥ कामतः पितुरिच्छया सहारोऽभवत्। यदि पिता दद्यात्तदा
शास्त्रीयार्थः। अर्धभागं विवाहिता पुत्राः स्त्रीशार्धभाजं कुर्युरित्यर्थः। अभ्रातृक विवाहितापुत्ररूपभ्रातृरहितः सर्वमपि
ह धनीय ह्नीयात् यदि परिणीता दुहितरस्तत्पुत्रा वा न सन्ति तत्सद्भावे त्वर्धांशभाग् वदासीपुत्रः। अर्धेणेति विशेषापादाना
त् द्विजातिभ्यो दास्यामुत्पन्नस्य नाकनापि प्रकारेणांशः। अपि तु ग्रासाच्छादनमात्रं भवतीति निर्णयः। अथ पितामहधन

पौत्रविभागः॥ तत्र याज्ञवल्क्यः॥ अनेकपितृकाणां तु पितृतो भागकल्पना॥ अनेका भ्रातृप्रसूता भार्यासूत्पन्ना अनेकपितृकाः
भ्रातृजा इत्यर्थः॥ तेषां स्वस्वपितृद्वारेण पितामहधनस्य भागकल्पना॥ अयमाशयः॥ त्रयाणां भ्रातॄणां त्रिकस्यैकः पुत्रो
परस्य द्वावन्यस्य त्रयः पुत्रा एवं षट् पौत्राः पैतामहधनं षोढा विभज्य न गृह्णीयुः॥ अपि तु पितामहधनं त्रीणि त्रेधा
विभज्य यस्यैकः पुत्रः स स्वपित्र्यंशं लभते यस्य द्वौ तावपि स्वपित्र्यंशमेव लभेते॥ एवमन्यत्रापि नियम्यत्वान्नंतरं केषु
चित् भ्रातृषु मृतेषु केषुचिद्विद्यमानेषु भ्रातॄणां भ्रातृपुत्राणां च पितृभेदेनैव विभागः॥ भ्रातरः स्वांशं भ्रातृपुत्राश्च स्वपित्र्यंशं
लभन्त इत्यर्थः॥ पितामहद्रव्ये पित्रा सह विभागविशेषमाह स एव॥ भूर्या पितामहोपात्ता निबंधो द्रव्यमेव वा॥ तत्र स्यात् सदृशं स्वा
म्यं पितुः पुत्रस्य चैव हि॥ भूः शालिक्षेत्रादिका निबध्यत इति निबंधः॥ एकस्याः पर्णवाटिकायामियन्ति पर्णानि देयानि एकस्याः क्र
मुकवाटिकायामियन्ति क्रमुकफलानि देयानीति तत्कार्यपारकोक्तिः सर्वपर्णजरकादिकं निबध्यत इति निबंधः॥ द्रव्यं प्रति
ग्रहविजयव्यापारकृष्यादिनिरूपार्जितं सुवर्णरजतादि एतादृशि सर्वस्मिन् पैतामहधने पितुः पुत्रस्य स्वाम्यं सममाव्रा
तो जीवति पितरि पितुरिच्छयैव विभागः पितुश्च द्वावंशौ पितृतो भागकल्पनादिनियमान् सतीत्यर्थः॥ अत्र द्वाद्वा स्वसुत्वन्त्र २०५
स्यापौत्रस्यापि वाममवस्वाम्यपरं तु विभागविशेषः॥ स च विशेषोऽनंतरं पुत्रविभागप्रकरणे स्फुटीकृत्य वदितव्यः॥ अनेकपितृका

णां तु पितृतो भागकल्पनेत्यनेन पैतामहधनस्य पितृद्वारा भागः स्थितः स्फुटं तत इत्युक्तं भूर्या पितामहोपात्तेत्यनेन तु पिता
पुत्रयोः पैतामहधने समानमवस्वाम्यमित्युच्यते अतः पूर्वापरविरोध इति चेत्तत्रैवं अनेकपितृकाणामित्येतत् पितरि
मृते पुत्राणां पैतामहधनविभागविषयं॥ एतद्व पितृतो भागकल्पनेत्यनेन धनप्रदानघोषणात्॥ पितृद्वारेण पौत्राणामे
वांशसंबंधो वगम्यते एतत्तु पितरि विद्यमाने न घटते तस्यापि जन्मनैव स्वत्वात्॥ पितरि मृते तु मरणाद्वनस्पस्वत्व
निवृत्तेः पौत्राणामं वंशसंबंधो घटत इति पितृकरणानंतरं पौत्राणां पैतामहधनविभागप्रकारः॥ अनेकपितृकाण
मित्यनेन वचनेन नियम्यते॥ भूर्या पितामहोपात्तेत्यनेन तु पितापुत्रयोर्विद्यमानयोः पौत्रापेक्षया पैतामहधनविषये
एतद्व पितुः पुत्रस्यापि चैव हीत्यनेन नियम्यते॥ मृतस्य स्वाम्यत्वाभावादन्यतरमृतावपि तत्र स्यात् सदृशं स्वाम्यं पितुः पुत्रस्य चैव ही
त्यनुपपन्नं स्यात्॥ यदा त्रयाणां भ्रातरस्त्रिकस्यैकः पुत्रः अन्यस्य द्वौ परस्य त्रयः तथा च सति पिता पुत्रेषु विद्यमानेषु पूर्ववत्
व व्यवस्था॥ यदा चैकत्र पुत्रः स ततः पुत्राः पौत्राश्च जीवति पुत्रो न रसीत तो तु न पुत्राः किंतु पौत्रा एव तदा जीवतः पिता पुत्रा भू
र्या पितामहोपात्तेत्यनेन न्यायेन पैतामहधनं लब्धं॥ यदा तु पुत्रा मृताः पौत्रा एव वर्त्तन्ते तदा पौत्रा एव स्वीशान्ल
नीता अनेकपितृकाणां तु पितृतो भागकल्पनेत्यनेन न्यायेन न तु भूर्या पितामहोपात्तेत्यनेन न्यायेन तेषां प्रमीतपि

त्र कत्वात्॥ अथैवं विभागक्रमः पितामहे मृते एकस्मिन्विद्यमाने पितरि इच्छया तु तदिच्छया वा विभागो भवति न पौत्रेच्छया पित
रि विद्यमाने पितुरिच्छया एव न पुत्रेच्छया वा विभागः इति विभागकालकथनप्रस्तावाभिहितत्वात्॥ अथ मातुरंशकॢप्तिः॥ त
त्र याज्ञवल्क्यः॥ यदि कुर्यात्समानंशान्पत्न्यः कार्याः समांशिकाः॥ न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा॥ समशब्दोत्र न्यूनाधिकत्वा
वरहितोंशपरः॥ अथवा समशब्दोत्र वक्ष्यमाणोद्धारविभागस्तु रिक्थात्तोंशपरः। शास्त्रोक्तसमत्वासमत्वपादशः॥ एवं स्थित
यदा पिता स्वेच्छया पुत्रान्समान्विभजते तदा पत्न्योपि समांशिकाः कार्याः॥ यदि त्वाद्यपक्षेणोद्धृत्य पुत्राणां सदृशा
एवांशाः प्रदातव्याः पत्नीनामपि सदृशा एवा यदा तु मूर्द्धावसिक्तादिपुत्राणां यथाक्रमं त्रिद्व्येकांशाः प्रदातव्याः तदा पत्नीनामपि स्वस्व
पुत्रसमांशाः। एवं प्रागपवादः॥ न दत्तमित्यादि स्त्रीधनमलंकारादि। यदि स्त्रीधनं दत्तं तदा दत्तार्द्धं प्रकीर्तितमित्यर्थविदवन
प्रकरणोक्तप्रकारो विज्ञेयः॥ अत्र प्रकारद्वयं॥ अंशशब्दो शमात्रपरो न तु समविभक्तांशपरः यावता धनेन स्वपुत्रांशस्य
नीभवति स्त्रीधनं तावद्देयं अपर्याप्तांशे पितृत्रीशसमः कश्चिदिति न त्वधिकमिति प्रकारौ न तारतम्यस्त्रीधनमपि विभाज्यमित्युक्तस्या
न्यथा वस्त्रीधनस्याविभाज्यत्वप्रतिपादकवचनविरोध इति चेत्तामेवैयत्रापवादकं वचनमस्ति तत्रापवादकबलात्सामान्ये २०५
न स्त्रीधनस्याविभाज्यत्वप्रतिपादकवचनानां बाधः। यत्रापवादो नास्ति न बाधः अत्र च न दत्तं स्त्रीधनं यासामिति दत्ते चार्द्धं प्रकल्पयेदिति

नायार्थिकैकवाक्यत्वेनापवादफला। यदा तु पिता ज्येष्ठं वा श्रेष्ठभागेन स्वोद्धृतप्रकारेण विषमविभागं करोति तदा पत्नी
नी श्रेष्ठादिभागान सीति किंतु श्रेष्ठादिभागोद्धारस्मात यदवशिष्टं सत्तु दितद्व्यतस्मात्समानांशा स्यन्योल शीता। तथा वा पर्यं
बः॥ पत्नीनां उं वगृहे लेकाराजायीया इति। परान्हापकरणोदृषदुपलमुशलसूर्पादि पत्नीनामुमित्युच्यते। पितरि मृते पुत्रैः
क्रियमाणे विभागेपि मातुः समांश एव। तथा चायोगीश्वरः। पितुरूर्द्ध्वं विभजतां माताप्यंशं समं हरेत् पितुरूर्द्ध्वं पितुर्मरणाने
तरां अत्रापि न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वेति दत्ते त्वर्द्धं प्रकल्पयेदित्यनवकाशयोः याज्ञीसमानन्यायत्वात्
तिषेधीनावाच्य एवमेव विज्ञानेश्वरधारेश्वरादीनामपि मतं। अपवादत्वं च र्द्धप्रकल्पायेत्यस्यार्द्धशब्दः समविभागपरः।
अतश्च स्त्रीधनविद्यमाने पुत्रांशस्यार्द्धदशानिष्करूपपुत्रांशस्यार्द्धं पैत्रनिष्कात्मकं दद्यादित्युक्तं भवति तस्या नायिणीयो
लेकारः सोविभाज्य एव॥ न पाम्रिय एव यदा विभागाधिकारिण्यस्तदापि यस्येयद्विद्भूषणं पूर्वदत्तं न तदथ विभाज्य
मेव। एतच्चाविभाज्यप्रकरणे व्यक्तं भविष्यति। यदा तु पितामहोपार्जितं धनं पितापुत्रो विभजन्ते गृह्णीतः तदा पितामहपत्नी स्तु
चापूर्वोक्तरीत्या समांशं लजनमाता ध्वंशसमं हरेदित्युक्तत्वात् पितामहोपार्जितद्रव्यं वा यदि पितामहपत्न्या पुत्रात द्विरुक्तालंका
रं प्रीतिदत्तं न जातनां तं तथापि पितामहधनविभागमातांशं न लभते किंतु ग्रासाच्छादनादिकमेव यदि कुर्यात्समानंशान्पत्न्यः कार्याः

समांशिकाः॥ तथा। पितुरूर्द्ध्वं विभजतां माताप्यंशं समं हरेदित्यनयोः केवलपितृप्रधनकस्वाम्यापतद्धनविषयत्वा
त् पितृप्रधनकस्वाम्यापतत्वं विवेक्तव्यं। यद्दत्तं पित्रा विभागलब्धं प्रतिग्रहादिनिर्वर्तितस्य तादृक्कमिति पितृधनं अत्र
गामीत्युक्तं मातृधनिको वाधिक्रियत इत्याकांक्षायामाह याज्ञवल्क्यः। मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेन्वयः॥ मातृकृ
तं तस्यापाकरणानंतरं यदवशिष्टं मातृधनं तद्दुहितरो विभज्य गृह्णीयुः तत्रायं विशेषः विवाहिता अविवाहिता एव गृह्णी
युः॥ अविवाहितानामभावे विवाहितदुहितृषु मध्ये या दरिद्रा दुहितरस्ता एव गृह्णीयुरिति तथा गोतमः। स्त्रीधनं दुहि
तॄणामप्रत्तानामप्रतिष्ठितानां चेति। अप्रत्ता अविवाहिताः अप्रतिष्ठिता दरिद्राः ताभ्य ऋते दुहितृभ्यो विनाऽप्यभाव
दुहितृसंतत्यभावे विद्यमाने अन्वयः पुत्रादिर्गृह्णीयात् दुहितृसंतानस्य संततिरित्ययमर्थः उत्तरत्र वक्ष्यते। अथानपत्यस्त्री
धनग्रहणाधिकारिणः। तत्र याज्ञवल्क्यः॥ अतीतायामप्रजसि बांधवास्तदवाप्नुयुः। अप्रजस्त्रीधनं भर्तुर्ब्राह्मणादिषु
तुर्ष्वपि। दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि वै॥ स्त्रीधनमप्रजस्यपत्यरहितायां दुहितृदौहित्रीदौहित्रपुत्रपौ
त्ररूपापत्यरहितायां दुहितृदौहित्रीदौहित्रपुत्रपौत्रीयास्मृतायां बांधवास्तद्यद्यस्याप्नुयुः ब्राह्मदैवार्षप्राजापत्यवि २०६
वाहसंस्कृतायां भार्यायां मृतायां तद्धनं भर्तुरिष्टं भवति तदभावे तत्कुलस्य प्रत्यासन्नास्ते गृह्णीयुस्तदभावे पितृकुलस्य प्रा॥

स्त्रीया

त्यासन्नास्त इति विवेकः॥ शेषेषु आसुरगांधर्वराक्षसपैशाचेषु विवाहेषु भार्यायां अप्रजायां मृतायां धनं पितरो माता पित
रौ गृह्णीतः। प्रथमं माता तदभावे पितृकुलप्रत्यासन्ना बांधवास्तदभावे भर्तृकुलाय प्रत्यासन्नास्ते गृह्णीयुः। सर्वेष्वपि विवा
हेषु यदि सा प्रसूता तदा दुहितॄणां दुहितृदुहितॄणां च दुहितृशब्देन साक्षात् दुहितृनिधानं मातुर्दुहितरः शेषमित्यनेनापौन
रुक्त्यं स्यात्। दौहित्रीष्वप्यूढानूढासमवाये अनूढा प्रतिष्ठिताप्रतिष्ठितसमवाये अप्रतिष्ठितेत्यादि वा दौहित्रीणां भिन्नमातृ
काणां विषमसंख्यानां समवाये मातृद्वारा विभागः। यदाह गोतमः। प्रतिमातृ वा स्ववर्गे भागविशेष इति दुहितॄणां दौहि
त्रीणां च विद्यमानत्वे दौहित्रीणां प्राप्त्याकिमपि यथार्ह तेभ्यो मातामह्या धनात्किंचिद्देयमिति प्रातिपूर्विकी। तासां दुहितॄणां दुहितरः
दौहित्रीणामभावे दौहित्राः। यदाह नारदः॥ मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयामातुर्धनं दुहितरस्ताप्नुयुः तदभावे तद्दु
हितॄणां दौहित्रीणां तदभावे तदन्वायायजाता दौहित्रास्तेषामित्यर्थः। तदन्वय इति प्रथमविभक्त्या पिपावः। तथा विदौहि
त्रा एव गृह्णातन दौहित्रीसंततिः तस्य दौहित्रापत्यया विप्रत्वपुत्रादौहित्राणामभावे मातुर्दुहितरः शेषमृणात्ताभ्यश्च
तेन्वय इत्यत्र च यच्छब्दोपात्ताः पुत्रपौत्रादयः क्रमेण धनभाजः॥ अनेनैवाभिप्रायेण मनुः। जनन्यां संस्थितायां तु समं सर्वे स
होदराः। भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः॥ सनाभयो भगिन्यः सोदर्यास्समातृदुहितरः। तदभावे ता दौहित्रपर्यंतास्तद

त्राव सहोदराः। मृतासाः साक्षात्पुत्रा न सपत्नीपुत्रास्तदभावे पौत्रा इत्यस्य वचनस्य तात्पर्यार्थः। असंसृतसहोदरस्य
न्यत्र सहोदरस्य दत्तोत्तरादर निवृत्त्यर्थः। स्वपुत्राभावे सपत्नीपुत्रादयः। यद्वा तु सापत्न्यदुहिता उत्तमजातीया सापत्नपुत्रश्च
हीनजातीयस्तदा उत्तमजातीया दुहितैव गृह्णाति। तदभावे तस्यास्त्वधिकं दौहित्रो वा। मनुः॥ तथा च॥ स्त्रियास्तु यद्भवेद्वित्तं पि
त्रा दत्तं कथंचन। ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेत्। स्त्रीधने कन्यकाहारदित्युक्तं स्यात्पदत्या स्त्री स्यात्तद्यायेव कन्य
कान्तरस्त्री कन्यकाराद्र्याः प्रतियोगिशब्दश्चानावान्। सापत्नमाता सापत्नदुहिता तिरगण्यात। ब्राह्मणीसुतमजातिश्र
शनार्थः। अतः शूद्रास्त्रीधने ब्राह्मणीक्षत्रियविट्त्रपकन्यका न गृह्णाति। एवं वैश्यास्त्रीधने ब्राह्मणीक्षत्रिया वा क्षत्रियास्त्रीधने ब्रा
ह्मणीति। अत्रोत्तमजातीया एव सापत्न्यकन्यका याधनग्रहणनिधानादिमजातीयपत्नीदुहितृगामुत्तमजातीयसपत्नीपुत्र
सद्भावे धनग्रहणं नास्तीति गम्यते। पुत्रपौत्राभावे तत्सुसुता इत्येवं क्रमागतत्वाद्यद्वा धनभाजः। एतच्च स्त्रीधनेषु लक्ष्यति
रिक्तमेव विज्ञाप्य। शुल्कं तु सोदरा एव गृह्णीयुः॥ तथा च गौतमः॥ भगिनीशुल्कं सोदर्याणामूर्ध्वं मातुरिति दुहित्रादिषु पौत्रप
र्यन्तेष्वविद्यमानेषु पिस्व भगिनीशुल्कं सोदरा एव हरेयुरित्यर्थः। स्त्रीधनप्रसंगाद्दायविषयं किंचिदुच्यते। याज्ञवल्क्यः॥ २०१
दत्वा कन्यां हरन् दण्ड्यो व्ययं दद्याच्च सोदयम्। मृतायां दत्तमादद्यात्परिशोध्योभयव्ययम्॥ वाक्कन्यां दत्वा न। स्मिन्दोषाभावे पिता २०७

अपहरन् ज्ञातिद्रव्यगुणानुसारेण दण्डनीयो राज्ञा॥ वाग्दाननिमित्तं यद्धरणं तत्पित्रादिना वा व्ययीकृतं तत्सकलमपि
सवृद्धिकं वराय दद्यात्। यदि वा दत्ता विवाहात्पूर्वं यदि मृता तदा यत्पूर्वं दत्तं मेयुजीयादिशुल्कं वाप्तत्तद्वरा आददीत। किंचोभ
यव्ययं परिशोध्य उभयोरात्मनः कन्याप्रदातुश्च व्ययं परिशोध्य वाग्दानादिनिमित्तं वरेण यद्व्ययीकृतं धनं तस्माद्गुलीय
कादिरूपकन्याधनाद्गृहीत्वा विशिष्टं वर एवाददीत। यत्तु कन्यायै वाग्दानसमये तदूर्ध्वं प्रीत्या मातामहपित्रादिभिस्तस्या एव
स्वत्वेन त्वा समर्पितं शिरोभूषणादि तद्ग्रहणविशेषमाह बौधायनः। रिक्थं मृतायाः कन्याया गृह्णीयुः सोदरास्तदभावे मा
तुस्तदभावे पितुरिति। प्रशस्तानुप्रशस्ता स्त्रियो जीवन्त्यामपि न किंचिदुच्यते। याज्ञवल्क्यः॥ दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रति
रोधके॥ गृहीतं स्त्रीधनं भर्ता न स्त्रियै दातुमर्हति॥ धर्मकार्ये आवश्यककर्तव्ये संप्रतिरोधके बंदीग्रहणनिग्रहादौ वञ्चद्यो
तदानी तत्र स्त्रीधने गृहीत्वा पुनस्तस्यै तद्धनं दातुमर्हति। अवश्यं दातव्यमिति नियमो नास्तीत्यर्थः। प्रकारान्तरेण ग्रहणे दा
तव्यमवस्तु रिवाकस्खलप्रयुक्तानान्यथा जीवनीनो ज्ञतासीयत हरेयुः स्वबंधवाः। नाबन्नरशिष्यं त्यो रदंडेन धार्मिकः पृथि
वीपतिरितिदेय विधानात्। स्त्रीधनस्वरूपमथाह याज्ञवल्क्यः॥ पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतं। आधिवेदनिकाद्यं
च स्त्रीधनं परिकीर्तितं॥ बंधुदत्तं तथा शुल्कमन्वाधेयकमेव च॥ अध्यग्न्युपागतं विवाहकाले अग्निसमीपे मातुलादिभिर्दत्तं आधिव

दनिकं। अधिविन्नस्त्रियै देयमाधिवेदनिकं समं। न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं प्रकल्पयेत्॥ यस्या उपरि विवाहः क्रियते
साधिविन्ना। तस्यै अधिविन्नस्त्रियै अधिवेदननिमित्तं धनमाधिवेदनिकं तत्समं दद्यात्। यावदधिवेदनार्थं कर
णादि तावत्सर्वं स्त्रियै दद्यादित्यर्थः। अत्र विशेषमाह न दत्तं स्त्रीधनमित्युत्तरार्द्धेन। अस्य चार्थो विवृतो मातुरंशकथनप्रस्ता
वात्। आधिवेदनिकाद्यं च आद्यशब्देन कर्त्तृनिक्रयसंविभागपरिग्रहनिध्यधिगमादिप्राप्तमुच्यते। कात्यायनः। विवाहकाले यत्
स्त्रीभ्यो दीयते ह्यग्निसंनिधौ। तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्त्तितं। यत्पुनर्लभते नारी नीयमाना पितुर्गृहात्। अध्यावहनिकं
चैव स्त्रीधनं तदुदाहृतं। प्रीत्या दत्तं तु यत्किंचित् श्वश्र्वा वा श्वशुरेण वा। पादवंदनिकं चैव प्रीतिदत्तं तदुच्यते। ऊढया कन्यया वा
पि पत्युः पितृगृहेऽपि वा। भ्रातुः सकाशात्पित्रोर्वा लब्धं सौदायिकं स्मृतं। विवाहात्परतो यच्च लब्धं भर्तृकुलात्स्त्रियाः। अन्वाधेयं तु तद्द्रव्यं
लब्धं पितृकुलात्तथेति॥ अथ विभक्तस्य स्वर्यातस्य स्वर्यातस्य पुत्रपौत्ररहितस्य दायग्रहणाधिकारिक्रमः। तत्र याज्ञवल्क्यः। पत्नी दु
हितरश्चैव पितरौ भ्रातरस्तथा। तत्सुता गोत्रजा बंधुशिष्यसब्रह्मचारिणः। एषामभावे पूर्वस्य धनभागुत्तरोत्तरः। स्वर्यातस्य ह्य
पुत्रस्य सर्ववर्णेष्वयं विधिः॥ पत्नी विवाहसंस्कृता एकवचनं तु जात्यपेक्षया। अतश्च यदा बहवः सवर्णा असवर्णा वा ताः सर्वा अपि
स्त्रियो एकत्रगाः स्युरित्याननक्रमेण विभज्य धनं गृह्णंति पत्न्यभावे दुहितरः। तथा च कात्यायनः। पत्नी भर्त्तृधनहरी या स्यादव्यभि २०८

दानादूढानूढानां समवाये अनूढैव गृह्णाति ऊढास्वपि दरिद्रा गृह्णाति तदभावे संपन्ना तु स्त्रीधने तु दुहितॄणामप्रत्ताना
मप्रतिष्ठितानां चेति गौतमवचनात् यथा पितृधनेपि समानन्यायात्। दुहित्रभावे दौहित्रो धनभाक्। यदाह विष्णुः। अपु
त्रः पौत्रसंतानो दौहित्रा धनमाप्नुयुः। पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रका मताः। अयमर्थो याज्ञवल्क्येनापि दुहि
तरश्चैव चशब्दसूचितः। तदभावे दौहित्रस्याप्यभावे पितरौ धनभाजौ। माता च पिता च पितरौ। अत्रैकशेषक्रमात्प्रती
तावपि विग्रहवाक्ये क्रमप्रतीतेर्विग्रहवाक्यक्रमानुसरेणैव दायग्रहणं। पितरश्च प्रथमं माता गृह्णाति तदभावे पि
ता। एतच्च तथा पत्नी दुहितरश्चेत्यस्मिन् समस्तवाक्ये दार्त्तवायाये क्रमो धनभागुत्तरोत्तरवाक्यशेषोनिहितक्रमः सकलम
पितायोवयस्मान्निरूपयादिति मिताक्षराटीकायां सुबोधिन्यां व्यवहाराध्याये विस्तरेण प्रपंचितमिति। पित्रभावे भ्रातरः।
तत्रापि प्रथमं सोदरः सोदराणामभावे असोदरा निकर्षितः सोदराणामभावे भिन्नोदराः। सैनिकर्षा विशेषादे
व धनग्रहणीस्मर्यते। अनंतरः सपिंडाद्यस्तस्य तस्य धनं भवेदिति सपिंडाधीनंतरः सन्निहितः प्रत्यासन्नः शारीरसंबंधेन त
स्य प्रत्यासन्नस्य तस्य धनं सपिंडस्य धनं भवेदित्यर्थः॥ उभयविधभ्रात्रभावे तत्सुताः। भ्रातृपुत्राः। तत्रापि प्रथमं सोदरभ्रा
तृभिन्नोदरभ्रातृपुत्राश्च दायकस्मिन् भ्रातरि मृते तद्धने पत्नीदुहितरस्थानन्यायेन प्राप्तसंबंधिविधिवत् प्राप्ते प्राप्तवत् ध्न

विभागात्पूर्वमेवैको भ्राता मृतस्तत्पुत्रास्संति तदा तत्पुत्राणां पितृतो भागकल्पना स्यादनेन न्यायेन पितृभागग्रहणस्यैव स्व
पितुर्धनग्रहणाधिकारानंतरं मृतभ्रातुः। भ्रातृपुत्राभावे गोत्रजा धनभाजः॥ गोत्रजा इत्यनेन पितामही पिता
महः पितामहपुत्रास्तत्पुत्राश्च तदभावे प्रपितामह्यादयस्तेषामप्यभावे समानोदकाश्च गृह्यंते तत्रायं क्रमः। भ्रातृपु
त्राभावे पितामही तस्या अभावे पितामहः। यथा मातुरनंतरमेव पितुरधिकारस्तथा पितामह्या अनंतरं पितामहस्याधिकारः
पितुरभावे त्वात्मगामि पितामहस्याभावे पितृव्याः। तत्रापि सोदरभिन्नोदरव्यवस्था पूर्ववदेव। तदभावे पितामहीपुत्रा
प्रथमे धनभाजस्तदभावे सापत्नपितामहीपुत्रास्तेषामप्यभावे भ्रातृपुत्रन्यायेन पितृव्यपुत्रास्तेषामभावे प्रपितामही
तस्या अभावे प्रपितामहस्तदभावे प्रपितामहपुत्रो भ्रातृन्यायेनैव तदभावे तत्पुत्रा इत्येवं सप्तमपुरुषपर्यंतं विदित
व्यं। एवं सप्तमपुरुषावधिकसपिंडाभावे समानोदकाः। तत्रापि पूर्वोक्तरीत्या प्रत्यासत्तिविशेषो द्रष्टव्यः। गोत्रजानामभा
वे बांधवा धनग्रहणाधिकारिणः। त्रिविधा हि बांधवाः। आत्मबांधवाः पितृबांधवा मातृबांधवाश्चेति यथोक्तं वृद्धशातातपेन। आत्म
पितुः स्वसुः पुत्रा आत्ममातुः स्वसुः सुताः। मातुर्मातुलपुत्राश्च विज्ञेया आत्मबांधवाः॥ पितुः पितृस्वसुः पुत्राः मातुर्मातृस्वसुः सु
ताः। पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबांधवाः। मातुः पितृस्वसुः पुत्रा मातुर्मातृस्वसुः सुताः। मातुर्मातुलपुत्राश्च विज्ञेया माता २०९

MEMORIAL

बांधवा इति। तत्रापि प्रथममेतेषां पाठक्रमेणात्मबांधवा धनभाजस्तदभावे तथैव पितृबांधवास्तदभावे तथैव मा
तृबांधवा इति क्रमः। बंधूनामप्यभावे आचार्यः शिष्यस्याप्यभावे शिष्यः॥ तथा चापस्तंबः। पुत्राभावे यः प्रत्यासन्नः सपिंडस्त
दभावे आचार्य आचार्याभावे अंतेवासी। शिष्याभावे सब्रह्मचारी सब्रह्मचारी एकाचार्योपनीतो ध्यापितो वा सब्रह्मचारि
णोऽप्यभावे श्रोत्रिया धनभाजः। यदाह गोतमः। श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन्निति एकशाखाध्यायी श्रोत्रियः। त
स्याप्यभावे ब्राह्मणमात्रं समीपस्थितं गृह्णाति। तथा च मनुः। सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः॥ त्रिविद्याः शुचयो
दांतास्तथा धर्मो न हीयत इति। ब्राह्मणद्रव्यं कदाचिदपि राजा न गृह्णीयात्। तथा दाह नारदः। ब्राह्मणार्थस्य तन्नाशे दायादश्चेन्न
कश्चन। ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोऽन्यथा॥ मनुः। इतरेषां तु वर्णानां सर्वाभावे हरेन्नृप इति। उक्तादिक्रमेण
दायग्रहणप्रकारः सर्वत्र प्राप्तस्तदपवादमाह याज्ञवल्क्यः। वानप्रस्थयतिब्रह्मचारिणामृक्थभागिनः। क्रमेणाचा
र्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः। ब्रह्मचारी नैष्ठिको नोपकुर्वाणकः। सच्छिष्यः अध्यात्मशास्त्रश्रवणमननाद्युपेतः। धर्मभ्रा
ता चात्र येनांगीकृतः। एकतीर्थी एकाश्रमी वानप्रस्थ एव स्वाश्रमनिकटवासी धर्मभ्रात्रभावे सा चैकतीर्थी। अत्र क्रमशब्दः प्र
तिलोमक्रमार्थे प्रायः। वानप्रस्थस्य धने। अह्नो मासस्य षण्णां वा तथा संवत्सरस्य वा। अर्थस्य निचयं कुर्यात्कृतमाश्वयुजे

MEMORIAL

।उद्दिश्यानेनप्रकारेणायद्युपार्जितं।तदन्नादिरूपंवस्तुधर्मभ्रात्रेकतीर्थीगृह्णातियात।यदिहृणीवस्त्रकादियच्छिष्योगु
ह्णीयात्।नैष्ठिकब्रह्मचारिणोधनंवस्त्रादिकमाचार्योगृह्णीयात्॥छ॥अथसंसृष्टिविभागः।तत्रयाज्ञवल्क्यः।संसृ
ष्टिनस्तुसंसृष्टीसोदरस्यतुसोदरः।अन्योदर्यस्तुसंसृष्टीनान्योदर्याधनंहरेत्।असंसृष्ट्यपिवादद्यात्संसृष्टोनान्य
मातृजः।एवंविभक्तःपुनरपिमिश्रीकृतेधनेसंसृष्टीसंसृष्टमस्यास्तीतिसंसृष्टीतस्यमृतस्यपुत्रपौत्ररहितस्यपुत्रपौत्र
रहितस्यधनेपत्न्यादिधनानामपिअपरःसंसृष्टीगृह्णीयात्।संसृष्टीत्येकवचनमविवक्षितं।अतःसंसृष्टिसंसृष्टिनार
विभज्यगृह्णीयुः।तत्पत्न्याश्चापाषणीकुर्युः।संसृष्टीचपितृव्यात्राव्यपन्यतमेनैवनान्येन।तदाहबृहस्पतिः।विभक्तोयः
पुनःपित्राभ्रात्राचैकत्रसंस्थितः।पितृव्येणाथवाप्रीत्यासतत्संसृष्टउच्यते।यद्यविज्ञातगर्भायांमृतपत्न्यांसत्यांसत्यांसं
सृष्टिनस्तद्धनंविभज्यगृह्णीयुः।पश्चात्तस्मादवगर्भात्पुत्रउत्पद्यततदामृतसंसृष्टिधनंतत्पुत्रस्यदद्युः८एवमुत्तरत्रचबोध्यं।वा
क्यपिविज्ञेय।सोदरस्यतुसोदरः।संसृष्टिनाधनेसंसृष्टिमात्रंनगृह्णाति।अपितुसोदरस्यैकमातृजन्यस्यधनेसोदरएव
गृह्णातिनभिन्नोदरः।अन्योदर्यस्तुसंसृष्टीनान्योदर्याधनंहरेत्।असंसृष्ट्यपीत्याद्यनेनवाक्येनतदुक्तंभवतिसाप
त्न्यभ्रातुःसंसृष्टित्वामेवधनग्रहणहेतुरिति।असंसृष्ट्यपीत्यतत्पदैकाकादेवदुत्तयाचेति।ततश्चअसंसृष्ट्यपिवादद्या २१[illegible]

त्संसृष्टोनान्यमातृजइत्यादेकवाक्यतरे।असंसृष्ट्यपिविभक्तधनस्यपुनर्मिश्रीकरणरहितोपिसंसृष्टएकोदरसंसृष्टःसोदरसं
सृष्टिनामृतस्यधनमाददीत।अनेनवासंसृष्टस्यापिसोदरस्यधनग्रहणेसोदरत्वंहेतुरित्युक्तंभवति।अत्रयःसंसृष्ट
पदंद्वयविदुत्तारणोपिसंबध्यते।ततश्चासंसृष्टोनान्य – दृजइत्येतदपरंवाक्यं।अस्मिन्वाक्येसंसृष्टशब्देनसंसृष्टिनि
धीयतेनसोदरः।संसृष्टसंसृष्ट्यपिअन्यमातृजोभिन्नोदरएवनधनंगृह्णीयात्।अन्विवकारामनुवचनानुसारेणा
ध्याहृतः।एतदुक्तंभवति।यत्रासंसृष्ट्येकोदरःसंसृष्टीचभिन्नोदरःतत्रसोदरश्चाहृतोविद्यमानश्चासादराधंशंलभते।
संसृष्टिहीनोविद्यमानश्चाद्भिन्नोदरापिलभतइतिमनुरपिविभक्ताःसहजीवंतोविभजेरन्पुनर्यदि।समस्तत्रविभागःस्या
ताज्येष्ठ्यंतत्रनविद्यते।ज्येष्ठस्यविंशउद्धारःसर्वद्रव्याच्चयद्वरमित्यादिनाउक्तंविषमविभागात्मकंकर्मनास्तीत्यर्थः।तथाये
षांज्येष्ठःकनिष्ठोवाहीयतोंशप्रदानतः।म्रियतान्यतरोवापितस्यभागोनलुप्यते।यथासंसृष्टिभ्रातृणांमध्येअन्यतरो
ज्येष्ठःकनिष्ठोमध्यमोवांशप्रदानतोंशप्रदानविभागसमयेदीयतेस्वकीयांशात्भ्रातान्यावत्।अथवाश्रमांतरस्वीकारे
णपातित्यादिनावाउतम्रियेततस्यभागोनलुप्यते।अतएवतद्भागंपृथगुद्धृत्यस्थापयेन्नविभज्यगृह्णीयुरित्यर्थः।उद्
तस्यविनियोगप्रकारमाह।सोदर्याविभाजयुस्तंसमेत्यसहिताःसमं।भ्रातरोयेचसंसृष्टाभगिन्यश्चसनाभयः।वाक्यद

ण्यसोदर्यात्त्वात इति पदद्वयोपादानात्सोदर्यस्य द्वैतेनोक्तो दृश्यः। अत्र शब्देन च भिन्नोदरस्य अभिधीयते॥ अन्यथा वि
यथ्यापात्तेः। अत्रानारायणेन संसृष्टा इत्यत्र संसृष्टपदोपादानात्क्रमप्रतियोगिन्न् तत्सोदर्यो विभक्तः पुनरपि यत्र च संसृष्टः प
दात्तु पादानात्सोदर्यास्संसृष्टा इति गम्यते॥ अतास्य श्लोकस्यायमर्थः॥ तत्र इत मंत्रं सोदर्याः साहोदरा असंसृष्टा अपि
सामन्याद्वितीयतर गत्वा अभागग्य सहिताः सैत् यसमन्न्यूनाधिकानावरहितेय शान्ति तित्थाविभाजयुः तथान्तारा भि
न्नोदराश्च समानजातीया ये संसृष्टास्त्वत्र तथा सन्तानः साहादर्या निर्गिनश्च। एतत्सोदर्यप्रकृतायात्त्रगिन्यताः स
र्विसमे विभज्य गृह्णीयुरित्यर्थः॥ असमानजातीया भिन्नोदरसंसृष्टिनश्च गोणी उत्तरश्लोके नागास्युरित्याननु
क्रमणा विभागाः समग्रा स्वजातीयान्नाना तु व्यतिरिक्त समानजातीयभिन्नोदरस्त्वत्र विषयात्वनापि परिनार्थि
नस्तु श्लोके न भागाः स्युरित्यस्य बाधकाभावात् शंखः॥ भ्रातृणामप्रजाः प्रेयात्कश्चित्प्रव्रजेत वा। विभजेरन्धनं त
स्य शेषास्तु स्त्रीधनं विनानरंतं नास्य कुर्वीरन् स्त्रीणां माजीवनं क्रियात्ता रक्षतिशयं शय्यान्नदुःशेदा छिद्यरितरासु चाद्
नरासु शान्यामरक्षं ताशु। बृहस्पतिः संसृष्टानां तु यः कश्चिद्विद्याशौर्यादिनाधिकं। प्राप्नोति तस्य दातव्या व्यंशः शेषाः समां
शिनः॥ द्वीशदाने ताद्वाधिकधनप्राप्तो वदिन ब्यः। अत्र चायं निष्कृष्टार्थः॥ भिन्नोदरसंसृष्टिना च प्राप्त सोदराणां मध्ये यसं २११

सृष्टी सोदरः स एव सोदरस्य संसृष्टिनोऽपुत्रस्य मृतस्य धनं गृह्णाति। अत्रापि समानजातीयासमानजातीयभिन्नोदरस्त्वा
त्रयस्तु श्लोके नाभागा इत्यनुसंधेयं। यदा सोदराश्चासोदराश्च संसृष्टिनस्तदा ते सर्वे गृह्णीयुः। प्रवृक्तिरीत्या यद्यसंसृ
ष्टाः सोदराः संसृष्टाश्च भिन्नोदरास्तथापि सोदराश्च गृह्णीयुः। यद्यसंसृष्टा भिन्नोदराः संसृष्टाश्च सोदरास्तदा सोदरा ए
वासोदराणां मध्ये केवलसंसृष्टाः। केवलं तदा संसृष्टत्वसोदरत्वरूपहेतुद्वयबलात् संसृष्टिन एव गृह्णीयुरिति। सर्वत्र स्त्री
स्थानेऽप्यरणीनरणीवलत्वात एकमातृजत्वभिन्नमातृजत्वरूपविशेषणत्यागेन श्रूयमाणे व्यवस्था दर्शिता। सासाङ्घात्पित्व्यस्या
प्यपि त्वव्यथयोयाज्ञ। न्यायस्य समानत्वादिति केवलाबदनुपपन्नं। सोदरस्य तु सोदर इति विधायकं वाक्यं। तत्र सोद
रस्यापि विवक्षाकारणेनास्तीति सोदरस्य पदस्यापि द्व्यापलक्षकत्वान्नाद्याकथ्यीत विरूद्धत्वे च वचनविरोधव्या
यस्तत्र न प्रवर्त्तते इति सर्वमनवद्यं॥ अथांशानर्हाः॥ तत्र याज्ञवल्क्यः। क्लीबोऽथ पतितस्तज्जः पंगुरुन्मत्तको जडः। अन्धोऽचि
कित्स्यरोगाद्यास्तथा स्युर्निरंशकाः। तजः पतितादुत्पन्नः प्रायश्चित्तात्पूर्वं उत्पन्नः। पंगुः पादविकलः। उन्मत्तकः वातपित्तश्लेष्म
सन्निपातग्रहावेशाद्यन्यतमेनोन्मादेन प्रतिसमाधेयतया विशिष्टः। ऊढ्वापि विकलचित्तः इष्टानिष्टावधारणाशक्त इत्यर्थः।
अचिकित्स्यरोगाः अप्रतिसमाधेयराजरोगादियुक्ताः। आद्यशब्देन पितृद्विष्ट्यादयो गृह्यन्ते। ~~तथा च नारदेनाप्युक्तं~~
इथ्या:

काद्र्याच्छ्रीता। तथा च नारदः। पितृद्विट् पतितः षण्ढो यश्च स्यादौपपातिकः। औरसा अपि नैतेंऽशं लभेरन् क्षेत्रजाः कु-
तः। वसिष्ठः। अनंशास्त्वाश्रमान्तरगताः। आश्रमी त्वत्र नैष्ठिकवानप्रस्थयतिरूपाश्रमाः। मनुः। अनंशौ क्लीबप-
तितौ जात्यन्धबधिरौ तथा। उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः। व्याध्यादिना निर्गतमिन्द्रियं यस्मात्स निरिन्द्रियः।
एतच्चैषामाजानत्वे ति नरणे तु कर्तव्यमेव तथा च मनुः॥ सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा॥ ग्रासाच्छादनमत्य-
न्तं पतितो ह्यददद्भवेत्। सर्वेषामंशानर्हाणां॥ अत्यन्तं यावज्जीवं। एतेषामनंशत्वं विभागात्पूर्वमिति व्याख्येयं दोषप्राप्तौ
सत्यां न तु विभक्तानां यदि विभागकाले दोषदुष्टा विभागोत्तरकाले मोक्षादिना निर्दुष्टाः प्रायश्चित्तेन वा तदा विभक्ते-
ष्वभावाज्जातः सवर्णायां विभागं नार्हति यान न चायं नियमः प्राप्तिरस्त्येव। पतितादिषु पुंल्लिङ्गमविवक्षितमुद्देश्यगतत्वा-
त्। अतो मातृपत्नीदुहित्रादयोऽपि दुष्टा अनंशाः एवं क्लीबादयः एवानंशा न तत्सुताः। तथा च याज्ञवल्क्यः। औरसाः क्षेत्र-
जास्त्वेषां निर्दोषा भागहारिणः। सुताश्चैषां प्रभर्तव्या यावद्वै भर्तृसात्कृताः। अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्त-
यः। निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च। क्लीबस्याप्यत्र जाएव पुत्रः स्तरषामौरसाः क्षेत्रजाः। क्लीबस्तैरसाद्वा-
जायाद्यहरणादितरेषां त्वाक्षेपो नास्तीति गम्यते। औरससमश्चात्मसुतोऽपि प्राप्नोति। सा पौरस पादनिवापत्तौ दु हि २१२

तरस्तत्र्व्या विवाहपर्यन्तं। यथापि विवाहाकर्तव्याः प्रतिकूलास्त्वेवं च। निर्वास्याः परं प्रतिकूलानां पापरोधकर्तव्यो
व्यभिचाराद्दोषाभावात्॥ अथ विभाज्यायाज्ञवल्क्यः। पितृद्रव्याविरोधेन यदन्यत्स्वयमर्जितं। मैत्रमौद्वाहिकं चैव दा-
यादानां न तद्भवेत्। क्रमादभ्यागतं द्रव्यं हृतमप्युद्धरेत्तु यः। दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च। पितृद्रव्याविरो-
धेन पितृद्रव्याविनाशेन। एतच्च मैत्रादिषु सर्वत्रानुषज्यते। मैत्रं मित्रसकाशाल्लब्धं। औद्वाहिकं विवाहप्राप्तं। पितृक्र-
मायातमन्यैरपहृतं पित्रादिनासामर्थ्यादनुद्धृतं युक्तिं विद्वान् पुत्रादीनां दायादानां मध्ये यस्तदितरेष्वामवसाय
त्ययस्तु तातः स तदुद्धरस्य पहर्तव्यः सदायादेभ्यो न दद्यात् स्वयमेवाद्द्याच्छ्रीयाता अन्यापहृतो दृतांशात्
उविशेषमाहशंखः। पूर्वनष्टां तु यो भूमिमेकश्चेदुद्धरेत्क्रमात्। यथाभागं लभन्तेऽन्ये दत्त्वांशं तु तुरीयकं। चतुर्थभागमु-
द्धर्त्रे दद्याद्वसिष्ठः। तु वपुद्धर्तसहिताः सर्वे विभजेयुरित्यर्थः। अध्यापनाद्वेदार्थव्याख्यानाद्वाऽध्ययनादिलब्धं विद्या-
लब्धं पितृद्रव्याविनाशेन लब्धं मैत्रादिधनस्याविभाज्यत्वकथनात्। पितृद्रव्यविनाशेन लब्धं मैत्रादिधनस्यैव विभाज्यत्वमु-
क्तं भवति। अत्र च वास्तव्यामैत्रादिविधालब्धेन धनानामेव पितृद्रव्याविरोधेनाद्यतद्विशेषणं अतः पितृद्रव्याविरोध-
नापि प्रतिग्रहलब्धं विभज्यतायामेव। तथा च शिष्टाचारादृशपात। नारदः॥ कुटुंबं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः। भ्रा-

गी विद्याधनात्तस्मात्सलाजिताश्चेतोपिसमाः। कात्यायनः॥ परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या। यया लब्धं धनं यत्तु वि
द्याप्राप्तं तदुच्यते। मनुः॥ अनुपघ्नन्पितृद्रव्यं श्रमेण यदुपार्जितं। दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव वा॥ श्रमेण
सेवायुद्धादिना। नयामा॥ वस्त्रं पत्रमलंकारं कृतान्नमुदकं स्त्रियः। योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते॥ वस्त्राणामपि भाज्य
त्वे धृतानामिव पत्रं वाहनमश्वशिबिकादि। तदपि यद्यस्य नियमेनारोहणसाधनं तत्र विभाज्यं। अथवा पत्रशब्दोत्रालेख्या
नि विष्टधनपरः। तथा च बृहस्पतिः॥ ऋणं तु द्याद्यलिखितमिति उद्यदत्ता। अंत्रा विभाज्यमित्यनुवर्तते। कात्यायनः॥ धनं
पत्रनिविष्टमिति। अत्राय मतिप्रायः यावत्पत्रनिविष्टं रूपीनां क्रियते तावद्विभाज्यमिति। अथवा बृहस्पत्युक्तप्रकारा
द्विज्ञेयः। पुस्तकाविभजनीयं। तदन्यथानर्थकं तावत्। विक्रीयवस्त्रान्तरणमृणमुद्धार्यालिखितं। कृतान्नेनापक्वान्नेन परि
वर्त्य विभज्यमिति। अश्वादिबाहुल्ये तद्विक्रयात्प्रजीविनोविभाज्यमेव। यदजाविकादि विषमाद्वा नाविभाज्यं तत्ज्येष्ठस्य।
तथा च मनुः। अथाविकं विकशफं न जातु विषमं भजेत्। न तत्र उरन्हाया दातजमानाः पं तंतिता। अत्र धृतत्वं नाम प्रीतिदा
नादिना प्रातिस्विकस्वाम्यापत्तये। कृतान्नं तण्डुलमोदकादि तद्यथासंभवं सार्वैर्मिलित्वा भोक्तव्यं। उदकं तदाधारः कूपादि एव
तदापि विषमामवनाविभाज्यं किंतु पर्यायेण भोक्तव्यं। स्त्रियः दास्यः अवरुद्धास्तत्र विषमसंख्याकदास्यः पर्यायेण क ~~२०५~~ २१३

र्मकारयितव्याः। समसंख्याका विभाज्याः। अवरुद्धाः समा अपि न विभाज्याः। यदाह गौतमः। स्त्रीषु च संयुक्तास्वविभाग इति
संयुक्तासु अवरुद्धासु। योगक्षेमं। अलब्धलाभो योगः। अलब्धलाभहेतुभूते श्रौतस्मार्ताग्निसाध्यमिष्टं कर्म शिष्टयोगे
नलक्ष्यते। लब्धपरिरक्षणं क्षेमः। लब्धरक्षणकारणभूतं बहिर्वेदिदानं तडागारामनिर्माणादिपूर्त्तं कर्म क्षेमशब्देन ल
क्ष्यते। एतदुभयं पैतृकमपि न विभाज्यं। पितृद्रव्यविरोधोपार्जितमपि न विभाज्यं। क्षेमे पूर्त्तं योगमिष्टमित्याहुस्तत्त्वदर्शिनः॥
अविभाज्यं चात प्रोक्तं शयनासनमेव वा ति। लोगाक्षिस्मरणात्। योगक्षेमादिकारिणो मंत्रिपुरोहितादयो योगक्षे
मशब्देनाभिधीयत इत्यन्ये। शास्त्रेणमरकल्पा प्रापानत्वं नयत्यपरे। प्रचारा गृहारामादिप्रवेशनिर्गममार्गः। अस्मिन् श
करणोविषमत्वेनामी शक्तानां पर्याप्तत्वेन चक्रत्यादिसंख्यादितद्यथा। चत्वारः पुत्राः आपाखाः तथाच॥ ईशरुढउष्ट्या पर्या
प्तत्वादेषम्यं। यच्च वचनान्तरं अविभाज्यं सगोत्राणामासहस्रकुलादपि। याज्यं क्षेत्रं च पत्रं च कृतान्नमुदकं स्त्रियः इति
तद्ब्राह्मणजातक्षत्रियादिपुत्रविषयं। न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै इति विशेषस्मरणात्। याज्यं याजनलब्ध
धं। शौर्यादिप्राप्तमप्यविभाज्यमित्युक्तं मैत्रत्वापवादमाह व्यासः। साधारणं समाश्रित्य यत्किंचिद्वाहनादिकं। शौर्यादिनाप्नो
ति धनं भ्रातरस्तत्र भागिनः। साधारणं समुदितद्रव्यमाश्रित्य। याज्ञवल्क्यः। सामान्यार्थसमुत्थाने विभागस्तु समः

स्मृतः॥ समुदितार्थस्यापि ऋषिकाणिज्यादिना संवर्द्धितस्य पितृसार्वर्थं सम एव विभागः। नाउर्जकस्याद्विभागो विद्यार्थः॥ ॥
अथ सर्वविभागशेषः॥ तत्र याज्ञवल्क्यः॥ अन्योन्यापहृतं द्रव्यं विभक्ते यत्तु दृश्यते। तत्पुनस्ते समैरंशैर्विभजेरन्नि
ति स्थितिः॥ विभागानंतरमन्योन्यापहृतं द्रव्यं ज्ञात्वा तत्समैरंशैर्विभजेरन् ज्येष्ठस्य विंशउद्धारस्तु इति द्विभागाद्धारक्र
मेण न पर्यः। तथा विभागनिह्नवे ज्ञातिबंधुसाक्ष्यभिलेखितैः। विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः॥ विभागानं
तरे कालीनतो विभागानज्ञानतश्च यत्नापेक्षत ज्ञातिभिः पितृबंधुभिर्मातुलादिभिः कुल्यैश्च साक्षिभिर्लिखितेन विभा
गपत्रेण च विभागस्य भावना निर्णयो विज्ञेयः। तथा यौतकैः पृथक्कृतगृहक्षेत्रैश्च विज्ञेयः। पृथक्कृष्यादिप्रवर्त्तनेन पृथ
कीवमहायज्ञाद्यनुष्ठानेन च विज्ञेय इत्यर्थः॥ नारदः॥ विभागधर्मसंदेहे दायादानां विनिर्णयः। ज्ञातिभिर्भागलेख्येन
पृथक्कार्यप्रवर्त्तनात्॥ भ्रातॄणामविभक्तानामेको धर्मः प्रवर्त्तते। विभागे सति धर्मोऽपि भवेत्तेषां पृथक् पृथक्॥ साक्षित्वं
प्रतिभाव्यं च दानं ग्रहणमेव च। विभक्ता भ्रातरः कुर्युर्नाविभक्ताः कथंचन॥ यद्येवं ज्ञाता वदंत्येषु गृहधर्माः प्र
यक्रियाः पृथक् पृथग्गुणापणानावकार्यं सुसंगतानां स्वनागानपि दृश्यंते विक्रीणन्ति पुरुषा पिवा। उर्वियेष्टं वसवर्मीशा
स्वस्वधनस्य वा। बृहस्पतिः। विभक्ता अविभक्ता वा दायादाः स्थावरे समाः। एको ह्यनीशः सर्वत्र दानाध्ययनविक्रये॥ अधमनमा २१

धीकरणे एतद्व्यवहारास्तोकपातिप्रायणानउ पृथक्कृत्यचान्नावातिप्रायेण। विभागनिर्णयः पृथक्कृतश्च ज्ञातः॥ इह मदनपा
रिजाते मदनक्षितिपालदानजलरूढ॥ स्तबकष्षष्ठमत्रासीद्दामोदरात्मप्रेडितत्वमरः। समतिर्यपौशाख्येप्रस्तुतिरमाणाया
च वहृतिः परशीलैस्राद्येजगति जनवास्त्रवति पाय। विरविवात्रनिषेमुकुरतलन्द्वातस्थितिमियादिर्यद्यासारण्यप्रव
रमुनिशिष्यस्यचाणितिः॥ इति पंडितपारिजातक हारमध्ये त्यादि विरुदावली विराजमानस्य निबंधे मदनपारिजाते विभ
आष्टमस्तबकः॥ ॥छ॥ ॥ अतिहिताविसीभ्रमधर्मश्रुथेदानीं तद्युक्तमजनितदुरितापवीपहरणहेतुर्भूतः प्रायश्चित्त
परपर्यायानि मिश्रिकधामीविधीयते। तत्र तावत्संसारावनार्थं पापकर्मफलादीनि प्रदर्श्यंते। हारीतः॥ अनृतभाषणमनोज्ञ
भोजनमपेयपानमयाज्ययाजनमसत्प्रतिग्रहः परदाराभिगमनं परद्रव्याभिहरणं प्राणिहिंसा वतिशारीराणि पारुष्य
मनृतं विवादः श्रुतिविक्रयश्चेति वाचिकानि परापतापनं परापनाभिद्रोहः क्रोधो लोभो मोहोहंकारश्चेति मानसानि। तदेता
न्यष्टादशनिरयाणि कर्माणि यस्मिन्नस्मिंश्च यसियकर्माणि कारातिष्ठत्यशुभानि तस्मिंस्तस्मिन्नेयसि शारीरवाचिकमान
सान्याप्नोति। एवंस्याद्यस्पीयस्यामवस्थायां यत्करोति शुभाशुभं। तस्यां तस्यामवस्थायां तत्फलं शारीरेणेत्यशारीरं वाचयेन
उवामयी॥ मानसं मनसावेव स्वकर्मफलमश्नुते॥ मनुः॥ वाउदंडस्यस्पन्टः स्नायमुक्ताधर्मश्चियान घा। कर्मणां फलनिर्वृत्तिं शं

सनस्त्वतः परं। स तानुवाच धर्मात्मा महर्षीन्मानवो भृगुः। अस्य सर्वस्य शृणुत कर्मयोगस्य निर्णयं। शुभाशुभफलं क
र्म मनोवाग्देहसंभवं। कर्मजा गतयो नॄणामुत्तमाधममध्यमाः॥ तस्येह त्रिविधस्यापि त्र्यधिष्ठानस्य देहिनः। दशलक्षण
युक्तस्य मनो विद्यात्प्रवर्त्तकं त्रिविधस्योत्तममध्यमाधमरूपगतिलाभात्त्रिविधस्य वाग्मनःकायलक्षणाधिष्ठानलाभात्त्र्यधिष्ठा
नस्य वक्ष्यमाणपरद्रव्याभिध्यानरूपदशलक्षणोपेतस्य एवंविधस्य देहिनो मनःप्रवर्त्तकं विद्यात्। दशलक्षणान्येवाह॥ प
रद्रव्येष्वभिध्यानं मनसानिष्टचिंतनं॥ वितथाभिनिवेशश्च त्रिविधं कर्म मानसं। पारुष्यमनृतं चैव पैशुन्यं चापि सर्व
शः। असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधं। अदत्तानामुपादानं हिंसा चैवाविधानतः॥ परदारोपसेवा च कायिकं त्रिविधं स्मृ
तं। मानसं मनसैवायमुपभुंक्ते शुभाशुभं। वाचा वाचा कृतं कर्म कायेनैव च कायिकं। शरीरजैः कर्मदोषैर्याति स्थावरतां न
रः। वाचिकैः पक्षिमृगतां मानसैरंत्यजातितां। तथा॥ येन यांस्तु गुणेनैषां संसारान्प्रतिपद्यते। तान्समासेन वक्ष्यामि सर्व
स्यास्य यथाक्रमं॥ देवत्वं सात्विका यांति मनुष्यत्वं च राजसाः। तिर्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः। त्रिविधा त्रिविधैषा
तु विज्ञेया गौणिकी गतिः। अधमा मध्यमाग्र्या च कर्मविद्याविशेषतः। स्थावराः कृमिकीटाश्च मत्स्याः सर्पाः सकच्छपाः। पशवश्च मृ
गाश्चैव जघन्या तामसी गतिः। हस्तिनश्च तुरंगाश्च शूद्रा म्लेच्छाश्च गर्हिताः। सिंहा व्याघ्रा वराहाश्च मध्यमा तामसी गतिः। चारणाश्च २१५

सुपर्णाश्च पुरुषाश्चैव दांभिकाः। रक्षांसि च पिशाचाश्च तामसीषूत्तमा गतिः। झल्ला मल्ला नटाश्चैव पुरुषाः शस्त्रवृत्तयः। द्यूत
पानप्रसक्ताश्च जघन्या राजसी गतिः। राजानः क्षत्रियाश्चैव राज्ञां चैव पुरोहिताः। वादयुद्धप्रधानाश्च मध्यमा राजसी गतिः। गं
धर्वा गुह्यका यक्षा विबुधानुचराश्च ये। तथैवाप्सरसः सर्वा राजसीषूत्तमा गतिः। तापसा यतयो विप्रा ये च वैमानिका ग
णाः। नक्षत्राणि च दैत्याश्च प्रथमा सात्विकी गतिः। यज्वान ऋषयो देवा वेदा ज्योतींषि वत्सराः। पितरश्चैव साध्याश्च द्वितीया
सात्विकी गतिः॥ वेदवस्त्रशास्त्राण्येतदभिमानिन्यो देवता लक्ष्यन्ते। ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च। उत्तमां सा
त्विकीमेतां गतिमाहुर्मनीषिणः। महान्बुद्धिः अव्यक्तं प्रकृतिः। एष सर्वः समुद्दिष्टस्त्रिप्रकारस्य कर्मणः। त्रिविधस्त्रिविधः कृत्स्नः
संसारः सार्वलौकिकः। यादृशेन तु भावेन यद्यत्कर्म निषेवते। तादृशेन शरीरेण तत्तत्फलमुपाश्नुत इति॥ अथ नरकाः। शंख
लिखितौ॥ अथ निरयाः कुंभीपाकरौरवमहारौरवकूटशाल्मलिशिलासंघातवज्रकंटकशायनासिपत्रवनान्ययस्तुंडाः
पक्षिणः स्वयशोणितः कर्दमाः॥ केशकश्मलाशोवालाः क्षारनद्यो हालितीगात्रकुल्याश्च मकरस्त वालुकानि स्फैशस्तु दूरनिपा
ताः सूचिप्रतोदविधाअल्पोदकाः साग्निगर्त्ताः प्रदीपायःपिंडाला हकंटकशायनानि मकरपंजराणि कालसूत्राणि तीक्ष्णा
ग्राश्च श्लक्ष्णाः पामशवालो वज्रदंष्ट्रिणः तप्तोदकवैतरणाः एषु पच्यंते पापकर्माण इति॥ याज्ञवल्क्यः॥ प्रायश्चित्तमकु

वणिजः पापकेषु निरता जनाः॥ अपश्चात्तापिनः कष्टान्नरकान्यान्ति दारुणान्॥ तामिस्रो लोहशंकुश्च महारौरवशाल्मली॥
रौरवः कुड्मलं पूतिमृत्तिकं कालसूत्रकं॥ संघातं लोहितोदं च सविषं संप्रतापनं॥ महानरककाकोलं संजीवनं नदीपथः॥
अवीचिमंधतामिस्रं कुंभीपाकं तथैव च॥ असिपत्रवनं घोरं तपनं चैकविंशतिं॥ महापातकजैर्घोरैरुपपातकजैस्तथा॥
अन्विता यांत्यचरितप्रायश्चित्ता नराधमाः॥ यमः॥ सुरापो ब्रह्महा गोघ्नः सुवर्णस्तेयकृन्नरः॥ पतितैः संप्रयुक्तश्चन्नत
द्वौगुरुतल्पगः॥ एवं पतंति सर्वेषु नरकेष्वनुपूर्वशः॥ महापातकसंयुक्ता युगांतिष्वधोमुखाः॥ रौरवः कूटसाक्षी च यश्च
मिथ्याभिशंसति॥ कुलयाद्दृष्टवादी स वा यत्र पतेन्नरः॥ कुलविषयसीदहेउ ज्ञान्यो वादिस्यो कुलयाहे कुलज्ञान यः प्र
माणीस्तत्कुलज्ञापि संयः पक्षं वदति स पक्षवादी स्यात्॥ रोद्रउ ब्रह्महा गोघ्नः सुरापो गुरुतल्पगः॥ सुवर्णस्तेयकृत
अगारदाहाग्निदायकः॥ क्षत्रियीयानारोहस्यात्स्पष्टकर्ता व्रजी॥ तत्रसः राजपत्नीराजपुत्रे हचाराजन्तान्नरान्तालीकिप
चातसघोविवर्णहंति वायानरः व्यासापहः क्रौञ्चः मतिर्विषामाध्ययश्च हन्निष्ठुः॥ नमश्चैनोव्यस्त्गामीगोघ्नो राजन्य
स्त्रयाउन्नमाधममर्मीयाविपरीतप्रवर्तनं वृत्तिविषम्यौ॥ राजन्यदाराजबलात्पारापहवकारिणः॥ तत्र नमस्तं पतंती
अर्थः॥ महाज्वालं दुहितरं स्नुषां गच्छन्मातरं॥ अजाविकः सौकरिकस्तेन धाक्रोधनो नरः॥ रंगोपजीवी पशुहा ग्रामजनी यामया २१६

जकः॥ अतत्त्वताज्ञावीताशीविप्रोधर्मविहिंसकः॥ अगम्यगामी गारदानरकं शबलं व्रजेत्॥ कूटदलादिना पाखिपोषकः
राकुनीस्ताजनार्थसूकुलागात्रवकावीताशीतिकल्पतरो॥ विदविक्रयिणो यचाकशविक्रयिणो नराः॥ वेदानी दूषकाये चस
मयानी च दूषकाः॥ समयानी शास्त्राविरुद्धानी दूषकाः कर्मशास्त्राणी हेतुवादकूटहल्लाः॥ एतेविहंगामघोरपश्चातप
पकारिणः॥ सर्वविक्रयकर्तारो मित्राणीत्तदकारकाः॥ निर्ममर्यादाः क्रोधनाश्च कदर्यैश्वर्यसंयुताः॥ कोटारविनिपात्यंते
बंधुनद्धाश्ववाणिजाः॥ दानापत्नो गहन्यधनवचं कदर्यैश्वर्यं च॥ बंधुपीडाकरे बंधुनद्धाः॥ वेमवाणिजा निषिद्धवाणिज्यकि
रः॥ विमुखेपतिताविरमयी दीयश्चलंघति॥ विमुख आवारश्चान्यो पुद्धा द्विषु पराङ्मुखो वा पतिता पितृसुहृद एव॥ विमुख्यादि
विषयेमयदोयालंघयतां चर्धः॥ शास्त्रामृगघ्नोगाघ्रश्च कृमिनर्हं व्रजंति॥ तात एकाकी मिष्टमश्नाति चैव पिचासुहृत्सुतान्।
दारान्नन्यति धीरश्चैव तथासी वंधिवी भवान्॥ उग्रसन्नपिष्टादावसाःपशुघातीचायाव्रथा॥ लालावनराकघोरे दुर्गंधे पाच्य
तेनरः॥ मानकक्षकृतिलानवस्त्वमकारश्चिकिस्सकाः॥ पतंतिनराकघोरे कूटकर्त्री विवाशान्मानकर्त्रा दीनोस विषीकू
टकर्त्रीति विशाषणी ~~विशेषणं~~॥ देवब्राह्मणविद्वेष्टा गुरूणां चावमन्यता॥ अवाक्शिरः प्रपद्यते रत्नदूषयातनयः॥ मी
सीमधींसुरालाक्षीमधाहून्वस्त्रघृतपयः॥ विक्रीणाति य एतानि स तु प्रयवहे अजता॥ आगारागारदाहो वदुष्टः पापनदे

चवापतंतिरुधिरार्द्रत्विन्नस्तघ्नादीनिकानराः॥श्रद्धहत्यौउयःकुर्यात्तिपापाण्गुरुदूषकः।सोधुत्सन्मधुस्तदंडीकर्मकारानि
राष्ठतिः।दंडीनिषिद्धदंडग्राहीकर्म्मकारःकर्मकाराधिष्ठाताभिरान्हतिरस्वाध्यायः।श्रुतितीव्रस्यंडहृत्तिरूपघातपरुःश
वः।रूपेनाजीवीकान्तहिकःउपाध्यापाध्यायएवसा।उपाउपाध्यायायस्यसतादृशाः।घृतसंव्यवहारीवप्राणिहिंसारता
श्चये।वितराण्पानिपातांतायचवाबंधुघातकाःइत्येवमादीन्यन्यान्यपिवाक्यान्यनुसंधेयानि।अथकर्मविपाकः।
याज्ञवल्क्यः।महापातकजान्घोरान्नरकान्प्राप्यदारुणान्।कर्मक्षयात्प्रजायंतेमहापातकिनस्त्विह।मृगश्वशूक
रोष्ट्राणांब्रह्महायोनिमृच्छति।खरपुल्कसवेनानांसुरापानात्रसंशयः।पुल्कसःप्रतिलोमनिषादेनशूद्रायांजातः।वे
बध्यांविदेहाकेनजाताःवेनः।कृमिकीटपतंगत्वंस्वर्णहारीसमाप्नुयात्।तृणगुल्मलतात्वंचक्रमशोगुरुतल्पगः।ब्रह्म
हाक्षयरोगीस्यात्सुरापःश्यावदंतकः।हेमहारीतुकुनखीदुश्चर्मागुरुतल्पगः॥योयेनसंवसत्येषांसतल्लिंगोभिजा
यते।एतच्चाकामकारकामकारेत्वन्यास्वपिदुःखबहुलासुतिर्यग्योन्यादिषुसंसरति।तथाचमनुः॥श्वशूकरखरोष्ट्रा
णांगोजाविमृगपक्षिणां।चंडालपुक्कसानांचब्रह्महायोनिमृच्छति॥याज्ञवल्क्यः।अन्नहर्तामयावीस्यान्मूकोवागप
हारकः।धान्यमिश्रोतिरिक्तांगःपिशुनःपूतिनासिकः।तैलहृत्तैलपायीस्यात्पूतिवक्त्रस्तुसूचकः।परस्यापयितिहृत्वाब्रह्म २१२

स्वमपहृत्यवा।अरण्येनिर्जलेदेशेभवतिब्रह्मराक्षसः।हीनजातौप्रजायेतपररत्नापहारकः।पत्रशाकंशिखीहृत्वा
गंधान्छुछुंदरिःशुभान्।मूषकोधान्यहारीस्यात्यानमुष्ट्रःफलंकपिः।जलंप्लवःपयःकाकोगृहकारीह्युपस्करं।मधु
दंशःफलंगृध्रोगांगोधाग्निंबकस्तथा॥श्वित्रीवस्त्रंश्वारसंतुचीरीलवणहारकः।प्रदर्शनार्थमेतत्तुमयाकीर्तितकर्मणि
द्रव्यप्रकाराहियथातथैवप्राणिजातयः।शंखः॥ब्रह्महाकुष्ठीतेजसापहारीमंडलीदेवब्राह्मणाक्रोशकःखल्वतिःग
रदोग्निदोवुन्मत्तोगुरुप्रतिहंतापस्मारी।गोघ्नोंधः॥धर्मपत्नींमुक्त्वान्यत्रप्रवृत्तःशाखावध्योप्राणिविरोधः।ॐअरहीतगन्न
ष्ठोदेवब्राह्मणस्वापहारीपांडुरोगी।न्यासापहारीकाणः।स्त्र्यपहारीषंढः।शीसकस्यपहारीकपाली।दीपापहारी
कोशिकामित्रध्रुकुष्टीमातापितृगुर्वाक्रोशकःखंडकारकइति।वृद्धगौतमः।अत्रैवतवाकृष्यत्वलोमुद्गुर्मुदुःसील
नवाक्जालादारादारत्यागीरूक्षसाक्षीक्लीपदीउकूनउघरणोविवाहविघ्नकर्ताछिन्नोष्ठःश्ववगोरणेछिन्नहस्तो
मातृघ्नोवातत्रविकलःसुषागामीवानवृषणःस्थूलिकरूक्षस्तुष्यथमूत्रविसर्जनेमूत्रकृच्छ्री।कन्यादूषकःपंढः।
इथिलिमशिकः।पित्राविबद्दमातापस्मारी।न्यासापहार्यनिपत्यात्पीतदरिद्रोरत्नापहार्यत्पीतदरिद्रःअन्नपाच्याद्वेदवि
क्रयीपुरुषमृगोवदविक्रमीद्वीपीबहुयाजकाजलप्लवः।अयाज्ययाजकावराहः।अनिमंत्रितभोजीवायसोमृष्टेकाणा

जीवानरायतस्त्रात्राष्टमार्जीरः। कृत्स्नवनदहनात् खद्योतो दारकाचा येमुखविगंधः। पर्द्भिपिता। भोजीननिः। अदशाचा
यीखेलीवाहमिसरीत्रमरः। अम्फस्यादीमंउलूकः। श्रीसङ्गनार्यःश्वपाकाणाहन्त्री सर्पः। श्रेद्रापहारीक्षयी। अन्नापर्यजासी
ज्ञानापहारी। मूकः। अश्वडालीपुल्कसीगमनजगरः प्रव्रजितागमनमरुपिशाचः शूद्रागमनाद्दीर्घकीटः। सवर्णिगामीद
रिद्राजलहारीमत्स्यः। क्षीरहारीबालाकाचा कृषिकीणहीनः। अविक्रयविक्रयी शूद्रराजमहिषीगामीनपुंसकाराजाक्रो
शाकाग्निहीना। गोगामीमंडूकः। अनध्यायाध्ययनस्तु गालः। परद्रव्यापहारी परप्रेष्यो मत्स्यवधे गर्भवासी चोरा अनर्हगामि
न इति। अनर्हगामिनोनरकगामिन इत्यर्थः। स्त्रियोप्येतेन काल्पनह् चाद्राषमवाप्नुयुः। एतेषामेव वर्जनीयांचसुप
यीतिनाइति। अथ प्रायश्चित्तकर्त्तव्यतानिर्णयः। गौतमः। अथ खल्वयं पुरुषः पापेन कर्मणा लिप्यते याचेदयाज्यया
जनमत्तङ्गलक्षणमवघवदनेशिष्टस्यक्रियाप्रतिषिद्धसेवनमिति तत्र प्रायश्चित्तंकुर्यान्नकुर्यादितिमीमांसंतकुर्यादिथ
न्याहुर्नकर्मक्षीयत इति कुर्यादित्यपरं पुनास्तामालक्ष्य पुनःसवनमायातीतिविज्ञायात व्रात्यस्तोमैरिष्ट्वा रतिसर्वपा
ष्मानीतरति ब्रह्महत्यायामश्वमेधेनयजते अग्निष्टुताभिशस्यमानोयाजयेदिति चाशिष्टस्य क्रियाविहि स्याकरणा।
नहि कर्मक्षीयत इति फलोपभोगमिनाशात् यथाऽकुर्यादित्यपरंमतमितिसिद्धान्तरत्पर्यः। पुनःस्तोमानादिभुत्पत्ते २१८

नप्रायश्चित्तरूपेण पुनःस्तोमेनेष्ट्वा पुनरपि सवनप्रातर्मध्यंदिनसायंसवनसाध्यकर्मआयातीति तत्कर्मानुत्पन्नपोथ्या
नर्वतोत्यर्थः। याज्ञवल्क्यः। विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्। अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति। तस्मात्त
नेह कर्त्तव्यं प्रायश्चित्तं विशुद्धये एवमस्यांतरात्मा च लोकश्चैव प्रसीदति। हारीतः। यथाक्षाराण्यसदेवंउनिर्णिदिनप्रस्था
लनादिनिर्वासीसिंधुशौत्यवेतापायसुदानिःपापस्तनःशुद्धिमुपयातिधस्यमानइवाग्नौ धातवो दोषेभ्यः स्माद्धित्र
नात्कोहात्लोनाम्नमादाकल्याणमभ्यस्येदितिवैउनिस्पोदिने वृद्धाधित्रयणादिनाछेदनौ। अंगिराः। प्रायोनाम तपः
प्रोक्तं चित्तं निश्चय उच्यते। तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतं। पापैश्चाभिमान्यतना हमस्मीतिद्रुरूषु विकीर्ष
न्नवकल्याणीश्रद्धानोनसूयकः। वाग्मनःकर्मसिन्नूनमनआविष्कारातियः। विकर्मणातप्यमानः पापाद्विरिमुच्यते।
उदयन्पदवदादिश्चयस्तमःसर्वं व्यपोहति तद्वत्कल्याणमातिष्ठन् सर्वपापं व्यपोहति। अत्र कल्याणशब्दः प्रायश्चित्तपरः॥
अथ कामाकामकृतपापेषु प्रायश्चित्तकर्त्तव्यताविकल्पः। तत्र याज्ञवल्क्यः। प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं त्वेन
कामतोव्यवहार्यस्तु वचनादिह जायते। अज्ञानकृतमानाब्रह्महत्यादिपापं प्रायश्चित्तेर्वद्भिपमाणेजच्चंणोरपग
छति। कामतो ज्ञानंकृते महापातकादिप्रायश्चित्तेनापैतिअपितुप्रायश्चित्तेत्जानवचनादिहलोकप्रराजनानावा

त्पारलौकिकमेव प्रयोजनं कल्पनीयं। न च पापापनोदनमपि वेति मरणांतिकं पापमपगच्छतीति सिद्धांतागलेयोपि। प्रायश्चित्तमकामतो कामतो वा शोनविधाने उपपातक एव स्यात्तथा चात्मापघातनो अस्यायः। कामतो वा ज्ञानात् व-
कष्टापनोदकापत्यागनिवारकं प्रायश्चित्तं च विधातौ उपपातकात्महननाया स्तु ज्ञानस्य चापि स्यात् विधत एवेति।
आत्महननार्थं विषभक्षणादिकं कृत्वा यदि जीवति तदा प्रायश्चित्तं न विधातौ। अथ मृतस्तदा तद्वितहुताकर्त्व्ये।
मुक्तयथापि प्रायश्चित्तं विधत इति न विरोधः॥ मनुः। अकामतः कृतपापप्रायश्चित्तं विधीयते कामकारकृतपाप्-
केप्याहुः इति निदर्शनात्। अकामतः कृतं पापं वेदाभ्यासेन शुध्यति। कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथक् २ इंद्रो यतीन्
सालावृकेभ्यः प्रायच्छत्तमश्लीला वागभ्यवदत्स प्रजापतिमुपाधावत् तस्मा एतमुपहव्यं प्रायच्छदित्यादिश्रुतिनि-
दर्शनात्। तस्मात्कामकारकृतेपि प्रायश्चित्तमस्तीत्यर्थः। स्वयं शालावृकेभ्यः यतीनां घातेपि प्रायश्चित्तं शुद्धिहेतुकं दर्शि-
तं इदं वेदनं इंद्राय प्रजापतिरुपहव्याख्यं कर्म प्रायश्चित्ताय दत्तवान् तस्मात्कामकृतेपि प्रायश्चित्तमस्तीति हारीतः। मन-
सा कल्पयति वाचा वदति कर्मणा कारयतीति कामकृतमकामकृतमप्यशानि वद निघातके नावि तस्मात्कामकृते प्रायश्चि-
त्तं कामकृते थे करतीदं बलः। यस्मादनभिसंधाय पापकर्म सकृत्कृतं तस्येयं निष्कृतिः प्रोक्ता धर्मविद्भिर्मनीषिभिः। विद्व- २

प्राथमिकात्तस्माद्द्वितीये द्विगुणं स्मृतम्। तृतीये त्रिगुणं कृच्छ्रं चतुर्थे नास्ति निष्कृतिः। अभिसंधिकृते पापे सकृद्दाने निष्कृ-
तिः। अपरे निष्कृतिं प्राहुरभिसंधिकृतेपि च॥ अत्र कृच्छ्रमिति विहितप्रायश्चित्तोपलक्षणं। चतुर्थे नास्ति निष्कृतिरित्यस्याय-
मर्थः। यथा अज्ञानाद्द्वितीयवारकृतपापे द्विगुणं प्रायश्चित्तं यथा तृतीयवारकृते त्रिगुणं एवं चतुर्थवारकृते प्रवन्यायेन
न चतुर्गुणं प्रायश्चित्तं न निष्कृतिर्न। अपि त्वधिकं भवतीति किं च न। अपरे तु चतुर्थे प्रायश्चित्तमेव नास्तीति वदंति। वयं तु ब्रूमः।
प्रथममनभिसंधिकृते महापातके द्वादशवार्षिकं द्वितीयवारकृते द्वे तृतीये त्रीणि चतुर्थे चत्वारीति द्वादशवार्षिका-
णि दत्तानवेति। एतेषामाचरणकालो विंशत्युत्तरशतं शरदां तत्र वेति एतावता आयुषः अल्पत्वात् कृतुमशक्यत्वेन प्राय-
श्चित्ताभावान्न तु स्वरूपत एव प्रायश्चित्ताभाव इति। कामतस्तु स्मृतिषु द्विगुणं विहितप्रायश्चित्तं नास्तीत्युक्तं कामतस्तु विहि-
त इति। तत्रेयं व्यवस्था मरणांतिकप्रायश्चित्तं सर्वत्र महापातकेषु विधत एव। कामात् द्विगुणं प्रोक्तमित्यादिवचनबलात् द्वादश-
वार्षिकादि द्विगुणादियुक्तं प्रायश्चित्तमपि न विधातौ। वचनं प्रायश्चित्तैर्नरः इहलोकव्यवहार्यत्वनियकर्मानुष्ठानं प्रति बोधक-
पापशक्त्यपनयनं भवति तथा च कर्मस्वधिकाराद्विहितकर्मकरणात् प्रत्यवायजात्वेन पापी नरं न तात्पर्यात् अतः प्रायश्चित्तम-
स्तीति प्रायश्चित्तास्तिप्रतिपादकवचनानामपि प्रायः परलोकयातनाकापत्यागहेतुकृतपापशक्तिनाशसायन पायान्

डाक्टर भाऊदाजी इस्यारकम्
DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इस्यारकम्
DR. BHAU DAJI MEMORIAL

दृशाशक्तस्यपनायकप्रायश्चित्तान्तरायाश्चित्तं नास्तीति प्रायश्चित्तान्तरप्रतिपादकवचनानामभिप्रायः । अथ पादकृच्छ्रादि
लक्षणानि ॥ तत्र पादकृच्छ्रमाह याज्ञवल्क्यः ॥ ॥ एकभक्तेन नक्तेन तथैवायाचितेन च ॥ उपवासेन चैवायं पादकृच्छ्रः
प्रकीर्तितः ॥ एकभक्तेन दिवा वा रात्रौ कालसकृद्भोजनेन । तथा रात्रावुक्तकालसकृद्भोजनेन नक्तेन । दिवा रात्रौ वाऽप्र
प्रार्थितोपनतभोजनेनायाचितेन परकीयान्नस्य स्वीयान्नस्य पावनं न कुर्यात् । तथा च गौतमः ॥ अथापरं त्र्यहं नक्त
भनयाचितं तेन रात्रावन दिवाभोजनमुपवासेन तेन च ॥ एवं चतुरहःसाध्यः पादकृच्छ्रः । एकभक्तादौ ग्राससंख्यानियमः
पराशरेणोक्तः । सायं तु द्वादश ग्रासाः प्रातः पञ्चदश स्मृताः । चतुर्विंशतिरयाच्याः परं निरशनं स्मृतमिति सायं नक्ते प्रातर
एकभक्ते आपस्तम्बस्तु प्रकारान्तरेणाह सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिः स्मृताः । चतुर्विंशतिरयाच्याः परं निरशना
श्रयः ॥ कुक्कुटाण्डप्रमाणाः स्युर्यथा वास्यं विशेत्सुखमिति । अनयोश्च पक्षयोः शक्त्यपेक्षया विकल्पः । एवमुत्तरत्रापि शक्त्य
पेक्षया विकल्पो वेदितव्यः ॥ आपस्तम्बस्तु चतुर्धा प्राजापत्यं कृच्छ्रं विभज्य वर्णानुक्रमेण पादकृच्छ्रव्यवस्थामाह । त्र्यहं निरश
नं पादः पादश्चायाचितं त्र्यहं सायं त्र्यहं तथा पादः पादः प्रातस्तथा त्र्यहं । प्रातः पादं चरेच्छूद्रः सायं वैश्यस्य दापयेत् ॥
अयाचितं तु राजन्ये त्रिरात्रं ब्राह्मणे स्मृतम् ॥ प्रातःपाद एकभक्तत्रयी । सायं पादो नक्तत्रयी । अयाचितमयाचितत्रयं त्रिरात्र २१०

मुपवासत्रयं । अयाचितपाद उपवासपादश्चेति । पादद्वयं मिलित्वार्द्धकृच्छ्रः । नक्तपादरहितमवशिष्टं पादत्रयं पा
दोनकृच्छ्रः । यदाह स एव सायंप्रातर्विना र्द्धं स्यात्पादोनं नक्तवर्जितमिति । अर्द्धकृच्छ्रस्य प्रकारान्तरमथाह स एव सायं
प्रातस्त्वेकैकं दिनद्वयमयाचितं । दिनद्वयं च नाश्नीयात्कृच्छ्रार्द्धं तद्विधीयते ॥ ॥ अथ प्राजापत्यकृच्छ्रः याज्ञवल्क्यः ॥
यथाकथंचित्त्रिगुणः प्राजापत्योऽयमुच्यते । यश्चोक्तो दिनचतुष्टयात्मकः पादकृच्छ्रः स एवायमित्यननुनिर्दिष्टेऽपि । अयं
पादकृच्छ्रो यथाकथंचित्त्रिगुणः प्राजापत्यो भवति । यथाकथंचिदित्याननवचारूपक्ता उपात्ताः । एकभक्तेन नक्तेन तथैवाया
चितेन च ॥ उपवासेन चैवायमित्येतत्क्रमेणैकभक्तादीनामानुलोम्येन स्वस्थाने विवृद्धिरित्येकः प्रातिलोम्येन स्वस्थानवि
वृद्धिरिति द्वितीयः । दण्डकलितवदावृत्तिरिति तृतीयः । सर्वत्र जपादिपक्षरहितश्चतुर्थः । तत्राद्यं पक्षमाह मनुः । त्र्यहं प्रातस्त्र्यहं
सायं त्र्यहमद्यादयाचितं । त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन्द्विजः । अत्रैकभक्तादीनां स्वस्वस्थान एवावृत्त्या स्वस्थान
विवृद्धिः द्वितीयमाह वसिष्ठः प्रातिलोम्ये चरेद्युक्त्या कृच्छ्रं चान्द्रायणोत्तरं ॥ उपवासत्रयमयाचितत्रयं नक्तत्रयमेकभक्तत्रय
मिति प्रातिलोम्यं । तृतीयमपि स एवाह त्र्यहः प्रातरहर्नक्तमहरेकमयाचितं ॥ अहः पराकं तत्रैकमेवं चतुरहौ परौ । परा
कशब्द उपवासपरः । तथा अनुग्रहार्थं विप्राणां मनुर्धर्मभृतां वरः । बालवृद्धातुरेष्वेवं शिशुकृच्छ्रमुवाच ह । इति । चतुर्थं प

द्भमाहीगिराः॥तस्मात् शूद्रं समासाद्य सदाश्रमपि ये स्थिता। प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितं जपाद्यधिकारवत उद्दिश्य
ति कर्त्तव्यता विशेषमाह गोतमः॥ अथातः कृच्छ्रान् व्याख्यास्यामः हविष्यान् प्रातराशान् भुक्त्वा तिस्रो रात्रीर्नाश्नीयात् अथाप
रं त्र्यहं नक्तं भुंजीत अथापरं त्र्यहं न कंचन याचेत अथापरं त्र्यहमुपवसेत् तिष्ठेदहनि रात्रावासीत क्षिप्रकामः सत्यं वदेदहना
र्यैर्न संभाषेत रौरवयौधाजये नित्यं प्रयुंजीत अनुसवनमुदकोपस्पर्शनमापो हि ष्ठेति तिसृभिः पवित्रवतीभिर्मार्जयीत हि
रण्यवर्णाः शुचयः पावका इत्यष्टाभिरथोदकतर्पणं नमो हमाय मोहमाय धृन्वते तापसाय पुनर्वसवे नमो मौंज्यायोर्म्या
य वसुविंदाय सर्वविंदाय नमः पाराय सुपाराय पारदाय पारयिष्णवे नमो रुद्राय पशुपतये महते देवाय त्र्यं
बकायैकचराधिपतये हराय शर्वायेशानायोग्राय वज्रिणे घृणिने कपर्दिने नमः सूर्यायादित्याय नमो नीलग्री
वाय शितिकण्ठाय नमः कृष्णाय पिंगलाय नमो ज्येष्ठाय श्रेष्ठाय वृद्धायेन्द्राय हरिकेशायोर्ध्वरेतसे नमः सत्याय पा
वकाय पावकवर्णाय कामाय कामरूपिणे नमो दीप्ताय दीप्तरूपिणे नमस्तीक्ष्णाय तीक्ष्णरूपाय नमः सौम्याय सुपुरुषाय महापुरुषाय मध्यम
पुरुषायोत्तमपुरुषाय ब्रह्मचारिणे नमश्चन्द्रललाटाय कृत्तिवाससे नम इति तथा एतदेवादित्योपस्थानमेता एवा २१७
ज्याहुतयो द्वादशरात्रस्यान्ते चरुं श्रपयित्वैताभ्यो जुहुयाद् अग्नये स्वाहा सोमाय स्वाहाग्नीषोमाभ्यामिंद्राग्निभ्यामिंद्राय
न्या

विश्वेभ्यो देवेभ्यो ब्रह्मणे प्रजापतये अग्नये स्विष्टकृत इत्यंतं ब्राह्मणतर्पणमिति अस्यार्थः॥ हविष्यान् प्रातरा
शान् भुक्त्वा तिस्रो रात्रीर्नाश्नीयादिति प्रातराशा एकभक्तानि तानि त्र्येकभक्तदिनेषु तिसृषु पितृस्रो रात्रीर्नाश्नीयात् त्र
त्रिषु तत्र नक्तं कुर्यात् तिष्ठेदहनि रात्रावासीत क्षिप्रकाम इति यस्तु प्राजापत्यकृच्छ्रं दयापनाद्यत्या पाप्मिप्रमोचनेव
ञ्छा बुद्धिविशुद्धान्तविष्यामीति चैकामयात अयमहन्यावश्यककर्माविरुद्धेषु कालेषु तिष्ठेत् रात्रावासीत न तथा रौरव
यौधाजये सामनी कुर्यात् अनुसवनं त्रिषवणमुदकोपस्पर्शनं स्नानं त्रिषवणस्नानमित्यर्थः॥ हिरण्यवर्णा इत्यष्टाभिर
पि मार्जनमेव एतच्च मार्जनं स्नानानन्तरमेव अथोदकतर्पणं नमोऽहमाय इत्यादयः अत्र मोहसे दर्शयित्वा देवा
तर्पणमः शब्दश्रवणान्नैता देवतास्तेन नमःशब्दोऽत्र वर्तितव्यः तथा च त्रयोदश प्रयोगाः नमो हमाय मोहमाय धृन्वते तापसाय पुनर्व
सवे नम इति एवं नमो मौंज्याय ऊर्म्याय वसुविंदाय सर्वविंदाय नम इत्येतामात्रकामिनः॥ एवमुत्तरत्रापि द्रष्टव्यं। एवं त्रयोदशमंत्रैस्त
र्पणं कुर्यात् तथैतदेवादित्योपस्थाने आदित्योपस्थानमाधनं कार्यं कारणाद्यारम्भादौ पचारः॥ तर्पणमेनैतरामेतैरे
व मंत्रैरादित्योपस्थानं कुर्यादित्यर्थः॥ एता एवाज्याहुतयः अत्राप्यनादौ पचारः॥ एतैरेव मंत्रैराज्यहोमः कर्त्तव्यः॥ स
चालौकिकाग्निं प्रतिष्ठाप्य एवं प्रतिदिनं कुर्यात् द्वादशरात्रस्यान्ते चरुं श्रपयित्वा एताभ्यो देवताभ्यो जुहुयात् आदि देवताभ्या

कुर्यात्। नवमीत्राः स्यादाकारीतान्नवेति॥ ततश्च ब्राह्मणभोजनमिति एतच्च गौतमोक्तं प्राजापत्यं याज्ञवल्क्याधिकप्रा
जापत्य इत्यस्थाने द्रष्टव्यं॥ इति कृत्व्यतां वाङ्कल्पात् त्रिप्रकार इति विशेषोपादानाच्च॥ अथातिकृच्छ्रः मनुः। एकैकं ग्रा
समश्नीयात्त्र्यहाणि त्रीणि पूर्ववत्। त्र्यहं चोपवासेदत्यमतिकृच्छ्रं चरन्द्विजः। त्रीणि त्र्यहाणि नव दिनानि पूर्ववत् एकन्न
क्ष्यादिकालतन्त्रनियमयुक्तः सन्नित्यर्थः॥ याज्ञवल्क्यः अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः॥ अयमेव पूर्वोक्तः प्राजा
पत्यधर्मक एवाऽयं तु विशेषः॥ एकभक्तनक्तायाचितदिनेषु पाणिपूरणमात्रमन्नं तिष्ठरणमात्रमन्नं भुंजीत न तु प्रागुक्त
द्वाविंशत्यादिग्रासानिति। अत्र च पाणिपूरणान्नमात्रमेव विधीयते न तु भोजनं। अतोऽयं षु दिनेषु प्राजापत्ये भोजने प्राप्ते त
दनुवादेन पाणिपूरान्नता विधीयत इति तोपवासदिनेषु पाणिपूरान्नभोजनप्राप्तिः। मनुयाज्ञवल्क्योक्तपाणिपूरयोर्मायाः
शक्त्यपेक्षो विकल्पः॥ पापापेक्षो वा अतिकृच्छ्रप्राजापत्यादिष्ववस्थाप्राजापत्यवदेव॥ अथ कृच्छ्रातिकृच्छ्रः॥ गौतमः॥ त्र्यहं
स्तृतीयः स कृच्छ्रातिकृच्छ्र इति। द्वादशरात्रमुदकेनैव वर्तमानेनान्ते नयमः। एकैकं पिंडमश्नीयात्त्र्यहं कालत्रयं दिनिशा। अ
याचितेत्र्यहं पिंडं वायुभक्षस्त्र्यहं परं। अतिकृच्छ्रं चरन्नेतत्त्ववित्रं पापनाशनं। यद्विंशतिरात्रं तु नियतात्मा जितेंद्रियः कृच्छ्राति
कृच्छ्रं कुर्वीत एकस्थानादि जोड्रमइति। कात्ये प्रातः एकनक्तकाल इति यावत्। एकस्थान इति वचनात् चतुर्विंशतिरात्रसाध्य २१२
२२२

मतिकृच्छ्रद्वयं कृच्छ्रातिकृच्छ्रात्मक एकः कृच्छ्रो भवतीत्यर्थः॥ याज्ञवल्क्यः॥ कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिं। यमेन त्वेकविं
शतिरात्रसाध्यः कृच्छ्रातिकृच्छ्रो भोजनादिशेषके कयासविधानादुग्धभोजनपिपासुरे टिकादिनियमस्य परिमाणं कृच्छ्रा एकग्रा
सपर्याप्तं दुग्धमश्नीयात्॥ एवं कर्तुमशक्तस्य कृच्छ्रप्रकृतित्वात् प्राजापत्योक्तरीत्या द्वाविंशत्यादिग्राससंख्यया तावदुग्धं पातव्यं।
अथवा यावता प्राणधारणं भवति तावत् ग्रासे अनुक्तद्रव्यपरिमाणेषु सर्वत्र च ग्रासः प्राणयात्रामात्रमिति गौतमाधकृप
ऽलिषु शक्त्यपेक्षया विकल्पः॥ एवमुत्तरत्रापि द्रष्टव्यं॥ अथ पराकः॥ याज्ञवल्क्यः॥ द्वादशाहोपवासेन पराकः परिकीर्तितः।
अथ सौम्यकृच्छ्रः॥ जाबालः॥ पिण्याकं सक्तवस्तक्रं चतुर्थेह्न्यात्भोजनं वासो विदक्षिणां दद्यात् सौम्यायं कृच्छ्र उच्यते। पिण्या
कपिंडी आचाम उदनावस्रावः पिण्याकादिके प्राणयात्रोपायागादिकं याद्यैनाधिकं याज्ञवल्क्यः। पिण्याकाचामतक्रांबु
सक्तूनां प्रतिवासरं एकरात्रोपवासश्च कृच्छ्रः सौम्योऽयमुच्यते। एतच्च षड्दिनसाध्यं॥ अथ तुलापुरुषः कृच्छ्रः। याज्ञवल्क्यः।
एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमं। तुलापुरुष इत्येष ज्ञेयः पंचदशाह्निकः। एषां पिण्याकाचामतक्रांबुसक्तूनां
पंचानां प्रत्येकं क्रमेण त्रिरात्रमभ्यासात् पंचदशाह्निकस्तुलापुरुषसंज्ञकः कृच्छ्रो भवति। यमस्त्वेकविंशतिरात्रसाध्यं तुलापु

रुषमादद॥आचामममथपिण्याकतन्नौवादकसक्तवः॥व्यदंत्र्यदंप्रयुंजातावायुनञ्चाद्यंत्र्यदद्।वायुनञ्चाअदद्यमिनिमा
वः। एकविंशतिरात्रस्तुतुलापुरुषउच्यतऽइतिहारीतः॥अथातस्त्रिनयनोक्तस्यतुलापुरुषस्यकल्पंव्याख्यास्यामः॥अया
उपयाजनेत्रवाप्राशयमूत्रपुरीषाक।अप्रतिग्रहमादाययाजयिचातुनिंदितान्।विनायाकापसृष्टस्यमहाव्याधिद
तस्य।एकत्रस्तुतुलापुरुषेमहापातकनाशने।सर्वप्रकारमिदंपुण्यंमहादेवेननिर्मितं॥आचाममथपिण्याकतक्रौ
दकसक्तुकान्।व्यहंत्र्यहं प्रयुंजानानायुनञ्चाद्यहंपरं।वाक्यादेवेलराज्ञाविहिता निवृता निवा॥आचामस्तानि निर्हृतिन
वश्राद्धेतुसूतके।तेलस्यदारुणीकिंचिच्छकोटहतेयत्।प्राश्यमूत्रपुरीषेवब्रह्मदस्पृष्टामवा॥पिण्याकतानिनिर्हृति
अस्थिनिचाउयतस्थिता॥आचामस्तुपादाषाःस्नेहादाषाद्यायद्विचिन्॥खराष्ट्रमुखसंस्पृष्टेमघसंस्पृष्टामवा।तक्रणा
तानिर्हृतियज्ञावाधातस्थावालाकिंता॥कनकाश्वतिलागावाभूमिराच्छादमेषिमः।सर्वेपुनातिधर्मात्मायूदंवादकस
क्तुनिः।ब्रह्मद्नीत्क्रूरलद्नीसुवसीस्त्रयसुरापाणगुरुदारानिगमनेकन्यादूषणोचावानिगमनेवासुनञ्चपुनातितत्।ग
धोशीरमायोकार्यापुरुषोपलसमितो॥नदीमृत्तिकयावापिपुरुषोद्वौउकारयेत्॥महापसुर्वनिशारणाविंशोयश्चापिपश्चसु २२३

पुत्रायाउत्खिलदद्।तनायसौसुत्ततांकारयित्वाप्रादशमात्रासुत्रायाश्रोनशिकौ॥सोवर्णीराजतीवापितुल्यादवौ
तुकारयेत॥अपिवेदनदृढस्यखदिरस्यापिकारयेत्।तस्यालाजतुलाकार्यायथावाह्रपपयतो॥यःपुरुषःपिंगलो
बभ्रुहलमुशलवक्रपाणिस्तमहंपिगलंबभ्रुंहलमुशलवज्रपाणिमावाहयिष्यामिस्वागतएहिनागएहित्रसाजिनएहि
स्वागतमनुस्वागतेनावतुतुलापुरुषायमहादेवायरदमर्घ्यइदंपाद्यमिदमाचमनीयमिदमादानेवप्रसीदगौधमा
ल्यधूपदीपप्रतिग्रहणोयादानाममरुद्रःस्तुमनान्त्वा॥अथतुलामन्त्रिमेन्त्रयात।ऋषिसत्येदवसत्येब्रह्मसत्येयज्ञसत्येत
नसोत्यनसत्यवादिनिदशानीसंपदंब्रूहिकोदशंवदयिष्यसीति।बीजानीसंपदंब्रूहिकंबीजंवदयिष्यसि।राजौवसीप
दंब्रूहिकंनपेवदयिष्यसि॥अस्माकंसीपदंब्रूहिकिमस्माकंनविष्यति।यदाच्छगुरुमान्मानमात्मतुलयाधृते।परावे
वलधुमयेतदाकर्मसमाचरेत्॥नमायपृथिव्यधिपतयेस्वाहा।सूर्यायदिवाधिपतयेस्वाहा॥सोमायनक्षत्राधिपतयेस्वाहा
ऊविरायपक्षाधिपतयेस्वाहा।इन्द्रायदेवाधिपतयेस्वाहा।ब्रह्मणेत्रिलोकस्याधिपतयेस्वाहा॥दाथेजगाधिपतयेस्वा
हा।शालकटंकटायस्वाहा।कूष्माण्डराजपुत्रायस्वाहा॥महावक्रउंडायविनायकायगणानीपतयेस्वाहा।धर्मायस्वा
हा।अधर्मायस्वाहा।तुलायैस्वाहा।तुलापुरुषायस्वाहा॥प्रजापतिदेवायमरुद्भिःसदेवपुनरागमनायस्वाहा।सन्नबरित्रा

अविः कर्मणोत्र वतिहि श्वरि यागाणपथमवाप्नोति त्रिः स्नात्वा महादेवाद्यसिन्नं प्राप्नोति। आषाढ्यां कार्त्तिक्यां फाल्गुन्यां
पुण्ये वा नक्षत्रे एषां विहितो धर्मः इति यमः। अथातो भगवत्तुलापुरुषस्य कल्पं व्याख्यास्यामः। अनन्तरं सन्तर्पणी
न्नयाविकर्मकरणे तथा। प्रसूतानां द्विजातीनां संकीर्णमुखिनां मानिषु संकीर्णियानिषु प्रतिलोमायानिषु तथा निषिद्धयानि
षु च प्रसूतानामुत्पादितापत्यानां प्रायश्चित्तं पुरीषं वाजयित्वा वनिंदितानां। अगम्यागमनं तत्राद्दूषयित्वा च कन्यकां। विना
याकाप सृष्टस्य महाव्याधितस्य च। पापभनाद विहीनस्य सद्विहीनस्य वा पुनः। स्वर्णमायीवल्लभस्य निर्वेदोपहतस्य चात्र ग्र
मायीवल्लभस्याग्रेयोलाः इदं यंत्रं दुराधर्षं महापातकनाशनं। स्वयं हरमिदं श्रेष्ठं महादेव प्रभाषितं। वाङ्मनोभ्यां च कायेन
यानि पापानि देहिनः। आवामस्तानि निर्हंति नवयाद्ये च संसूतकं। तिलस्य द्रोणं विंशतिकेशः पद्मिद्दं तं उपयतं। पिण्याक
स्तानि निर्हंति अस्थिनिचयत्रयता अस्थितो। तिलस्य चन्द्रमाणस्य तथा निषिद्धदिन अन्यंगाद्विजायाज्यमानस्य द्रोणम
लन्मीकरणीयत्वापां। केशपद्धिद्दतो अस्थिनिचाश्रितं यत्र वर्जितं पापं दीर्घकाल च कूटं संस्थितं तदास्थिनिचाश्रितमित्यु
च्यते। आरार्खुवापदोषाः सार्चिदीषाश्रयक्रवित्तानाक्रमणानि सततानि सर्व नियंत्रावत्नो कितो। कनकं च तिलागावापृथि
च्छादनं स्त्रियः सर्वं पुनाति धर्मात्मा तथैवोदकसंकृतिः। कनकादि प्रतिग्रहजनितं पापं पुनाति अर्थाः। वाचानृतं कर्मकृतं म २२८

नसादुर्विचिंतितं। सर्वमेतत् क्रियात्राणं पुनातीति नसंशयः। अयाज्ययाजने चौर्ये कन्यायामथ दूषणे। यच्चाग्यामेथुनात्पा
पं वा पुंपीचाषु नातितनूः। आहारात्र मपिजुहोति। आवामा दिकापञ्चा हारस्य स्थाग्रं ग्रासचतुष्टयं। कुकुटाउपरिमितग्रा
सानुमानेन ग्रासचतुष्टयं जुहोति। आहरायम पितृलहोनी अपिशष्टोपादानादाल्पाद्धामो। पिगच्छेत। अग्नये पृथिव्य
धिपतये स्वाहा। सूर्याय दिवस्पतये स्वाहा। इंद्राय सुराधिपतये स्वाहा। यमाय प्रेताधिपतये स्वाहा। वरुणाय पाशाधि
पतये स्वाहा। महासेनाय अधिपतये स्वाहा। रुद्राय भूताधिपतये स्वाहा। ब्रह्मणे लोकाधिपतये स्वाहा। विष्णवे सर्वाधिपत
ये स्वाहा। यत् देवाः पवित्रेण तुलापुरुषमारुह्य पुनरुद्धताः। तमहं पवित्राणि तुलापुरुषमावाहयामि स्वाहा। कराल पिं
गलं बद्धं विश्वरूपमुमापतिं। या हि वदेताता जातस्य मृते च महामतिः। अंजसः पारस्तु वनस्य मध्येनाकस्य पृष्ठे महतो
महिमा तेम दीयातो उदयति स्माब्रह्मा सनीसनयति पुराणातियः। यो जाजाग्रहण जाजमानुजामेतो महाध्वजः। एका
दश बद्धं बद्ध्या यजमाने बहुविधाने। बद्ध्वा विश्वरूपः प्राणाश्चिहितो निहितो विश्वकर्मणो नामानमस्तिः। स्वागतं नवते
तुलापुरुषाय इदमासनं नमस्ते भगवान् ततः पाद्यार्घ्याचमनमनुलेपनमाल्यदीपधूपनैवेद्यैश्चार्च्य जगदंतेषु पन्नीकं
सपार्षति पशुपतिमन्त्वीयतां सपार्षतंसगणं। धूपमंत्रः। वनस्पतिरसो दिव्यो गंधाढ्यो गंध उत्तमः। आहारः सर्वदेवानां धू

।पार्यैप्रतिगृह्णतो।सर्वत्रार्यं धूपमेऽत्रः।अथ तुलात्तवति।महापशुर्यनिशारणविद्धोयद्यपिशस्त्रमुक्तयोर्लक्ष्यलक्षौ।ततनायसं
तुलीसुत्रतोकारयित्वाविप्रादशमात्रामुत्तयाजोनशिक्यौ।महापशुर्मदोज्जः।यछस्रमुत्तयोर्लक्ष्यलक्षौउत्तायाराघंतासौ।प्र
द्धतलक्ष्ण्त्राद्येतयास्त्रीद्धौसद्विहमृगादिकं।अथवा।।उत्तायाःपार्श्वयाःप्रद्धतलक्षौधाराद्वायनप्रद्धलतक्षौखड्गादिकामवेवि
धिनालोह्नप्रादशत्रयपरिमितामुलाकार्यंचयथाःउत्तयाजोतशिक्यौपार्श्वद्वियत्तनस्मिकौ।सौवर्णीराजतीवापितुला
दवीतुसास्मृता।अथचेंदनवृक्षस्यखदिरस्याथकारयेत्।एतेषामथवातुतुलान्यायापपद्यतेप्रतिमावौ।हनीकार्या
एकैवस्वर्णसंहिता।।उसीरस्यापराकार्यानियानरकसंहिता।नदीमृत्तिकयावापिप्रतिमांद्वेतुकारयेत्।।विहितस्यप्रभुत्वि
त्रेचतत्रवीजानिस्थापयेत्।विहितत्नूनाधिकरहितदारोतात्रपलपरिमाणइतियावत्।मूपलिप्तपृष्टतःसुसंस्पृष्टइतिस्मृ
तिमंजर्यां।पृष्टभागअवयवविस्तारणयथा।नज्ञायतेतथासमीस्तरतितात्पर्यार्थः।तत्रतत्स्थापनप्रदाराबीजानिव्रीह्या
दिवीजानिस्थापयेत्।अद्रितिमुतुलामाताश्चयंत्रूडीनितानवा।चंहिसत्यंचधर्मश्चचयिलाकाःप्रतिष्ठिताःसत्यंवदसत्यवादि
तिसाद्यनरमतोमनःस्पानीसेपदंब्रूहिकिंसत्यंवदयिष्यसिबीजानांसपदंब्रूहिकिंबीजंवर्दयिष्यसिराशीचसेपदंब्र २२५
।दि।कंनरंवर्दयिष्यसि।।अस्मांकंसेपदंब्रूहिकिमस्मात्त्वर्द्धयिष्यसि।यदातुगुरुमात्मानमसत्त्वतुलयाधृतौ।परंवलाद्य

वंमान्याततःकर्मसमारभेत्।एतनिबंधकल्पेनब्राह्मणस्यविधीयते।राजन्यावैश्ययोस्त्वैवकाष्ठप्रतिकृतस्मात्।परित्व
लाद्येमन्त्रेपरशिक्यारापितमस्मात्तिलघुपदाभवतीतिस्मृतिमंजर्यांव्याख्याता।यदातुगुरुमात्मानमित्यादरयमर्थः।
अप्रासत्तुलयाधृतमित्यभिधानात्।तथाराजन्यावैश्यायाश्चैवकाष्ठप्रतिकृतीस्यातिइत्युक्तत्वाज्ञधादिप्रतिमाद्वय
स्याकृत्वाबप्रतिकृतिरूपंश्रायकैपलपरिमितंचंदनादिप्रतिमाद्वयंत्वचापलपरिमितपाषाणादिएकस्मिन्शिक्यनि
क्षिप्यद्वितीयशिक्येस्वप्रतिकृतिरूयमपिपृथक्पृथग्निक्षिप्यतालयेदिति।अतएवासत्त्वत्राजनंभवति।त्रिप्रादशमा
त्रतुलाविधिरविप्रविकृतितालनएवापपद्यते।साक्षात्स्वरूपतालनेतस्यास्त्रपर्याप्तत्वात्।तथाश्वेताश्वोगुरुदक्षिणाश्वेताश्वे
णगुरुप्रसादादानमस्तुलापुरुषायतियमरति।यकिंचिद्गुरुरावायःप्रसादनीयः।सएवप्रसादावादक्षिणेत्य
र्थः।अथादिसंपादनासमर्थविषयमेतत्।अत्राउक्तानक्रमः।हारीतवचनतुलारोहणानंतरंहोममीत्राःपठिताः।यमेन
तूपक्रमएवाज्ञनयहोमेक्रमोविकल्प्यते।होमंकृत्वाउमामाहेश्वरपूजांविधायतुलाभिमंत्रणानंतरंमाहेश्वरपुरस्थि
तेप्रतिमाद्वयमादायतुलोपृथक्पृथक्कृत्वाप्राक्विधिनारोपयेत्।तातावादामःकर्तव्यः।स्मृतिभायविय दातुगु
रुमात्मानमित्युपक्रम्यततःकर्मसमारभेदित्युक्तत्वात्तुलापुरुषानंतरामपञ्चाशामपिण्याकादिनहुणादिनव्रतमा

यारत॥ अत्र गुरुमित्य पलक्षणी साम्यपि कर्त्तव्यं तुलादि व्यपकरणेभ्यो साध्यपि दोषगुरुत्वाभिधानात्॥ एतच्चादा
षसीदाहाद्दोष इति श्रायतां दिवाद्य घुत्वापि प्रायश्चित्तं कर्त्तव्यमेवासीदाहेऽज्ञद्धत्वेऽत्र रत्नक्रियमाणे प्रायश्चित्ते
नकर्त्तव्यमेव। सीदाहेऽल्पद्धावत्र स्वक्रियमाणे प्रायश्चित्तं न कर्त्तव्यमिति निगम्यते। अल्पत्वानैलाघवेमान्यं ततः कर्म
समारंभादितिहृत्स्वपावनात्। केवलस्य प्यो पार्जनार्थं तुलाद्युरूपस्त्वं करणे गुरुत्वसाम्ये लघुत्वे चकर्त्तव्यमेवाव
शिष्टस्यैव स्वग्नातात्पादनाहेतुत्वात् हारीतेन यायमाषाद्यादिकालानि हितः सोपि सुन्नताधनि एव दुरितोपनस्य
निमित्तानंतरामेवकर्त्तव्यत्वात्॥ ॥अथ सांतपनं कृच्छ्रं याज्ञवल्क्यः। कुशोदकं तु गोक्षीरं दधिमूत्रं सकृत्। प्राश्यापरेऽह्नि
उपवसेत् कृच्छ्रं सांतपनं चरन्। इत्यपरार्कपाठः॥ मिताक्षरापाठस्तु। गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं। मिति। गोमूत्रा
दीनि षडेव्यैकस्मिन्नहनि पीत्वा परेऽहनि उपोषितस्य पारणरूपं सांतपनमिति द्विदिनसाध्यं कृच्छ्रं याज्ञवल्क्यो नात्र श्लोक
गोमयादीनां पृथक् पृथक् षट्सु दिनेषु प्राशनविधानात्। अत्रमिलितानामेकदिन एव प्राशनं गम्यते पराशरस्तु गो
मूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं। निर्दिष्टं पंचगव्यं तु पवित्रं कायशोधनं। गोमूत्रं ताम्रवर्णायाः श्वेतायाश्चापि गोमयं
पयः काञ्चनवर्णाया नीलायाश्च तथा दधि। घृतं च कृष्णवर्णायाः सर्वं कापिलमेव वा। अलाभे सर्ववर्णानां पंचगव्येष्वयं वि २२६

धिः। गोमूत्रं माषकास्त्वष्टौ गोमयस्य तु षोडश। क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश कीर्तिताः। गोमूत्रवद् घृतस्येष्टा स्त
दर्धं तु कुशोदकं। गायत्र्यादाय गोमूत्रं गंधद्वारेति गोमयं। आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि।
तेजोसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकं। पंचगव्यमृचा पूतं होमयेदग्निसंनिधौ। सप्तपत्रास्तु ये दर्भा अच्छिन्नाग्राः
शुकत्विषः। एतैरुद्धृत्य होतव्यं पंचगव्यं पिबेद्द्विजः। प्रणवेन समालोड्य प्रणवेनाभिमंत्र्य च। प्रणवेन समुद्धृत्य पि
बेत्तत्प्रणवेन तु। मध्यमेन पलाशस्य पद्मपत्रेण वा पिबेत्। स्वर्णपात्रेण ताम्रेण ब्रह्मतीर्थेन वा पुनः। यत्त्वगस्थिगतं
पापं देहे तिष्ठति मानवे। ब्रह्मकूर्चोपवासस्तु दहत्यग्निरिवेंधनमिति। याज्ञवल्क्योक्तसांतपनमेव ब्रह्मकूर्चोपवास इति
वाभिधीयते। विज्ञानेश्वरस्तु प्रविधिरूपो थापरार्द्धरूकरास्या पंचगव्यप्राशनं ब्रह्मकूर्चं इति मन्यते। मरीचिः। देवताः सैश
व रूपाभिश्चानुमत्यैरायस्पयाः। वरुणो देवता मूत्रे गोमये हव्यवाहनः। सोमः क्षीरे दध्नि वायुर्घृते रविरुदाहृतः। गोमूत्रं
ताम्रवर्णायाः श्वेतायाश्चापि गोमयं। पयः काञ्चनवर्णाया नीलाया वा च यवा दधि। घृतं विकृष्णवर्णाया विनरूपवर्णा गो
वर्णा उदकं सर्वविवर्जितस्य वर्णाभग्रद्यात्। गोमूत्रस्य पलं ग्राह्यमंगुष्ठार्धं तु गोमयं। क्षीरस्य त्रिपलं ग्राह्यं पलानि
कं कुशोदकं। आपो हि ष्ठेति चालोड्य मध्यप्रणवेन। आप्यायस्वादाहा सोमाय इंद्र वातः इदं विष्णुर्मानस्तोके गायत्र्या

प्रजापातनश्चादनातीत्याज्यादुग्नीन। योजुहुयात्।। नदीप्रस्रवणेतीरस्य ह्रास्यनिर्झरतथा।। स्कन्दवामाः पविस्नात्मा ब्रा
ह्मणाद्वाषितः पिबेत्।। ब्रह्महा परदारावयच्चान्यच्छिगनामलाः। ब्रह्मकूर्वीदाहस्सर्वं यथाग्निस्तृणमिव चा।। अथापर
ब्रह्मकूर्चं गोमूत्रस्तोगम्यथास्यादर्धसरन्तुक्षीरस्यत्रयाद्दयं दध्नो घृतास्तोकामिकं कुशवारिण इति जाबालः। गोमू
त्रेणामयीक्षीरं दधि सर्पिः कुशादकं। एकैकं प्रत्यहं पीत्वा त्वहोरात्रमभोजनं। कृच्छ्रः सीतपना नाम सर्वपापप्रणाश
नः इति एतद्व्यस्तसप्ताहसाध्यं। अथ यतिसीतपनं। शंखः।। एतदेव त्र्यहाभ्यस्तं यतिसीतपनं स्मृतं। एतदेव विमिश्रं तु पिब
गव्यं दिनत्रयं पिबेदित्यर्थः। अथ महासीतपनं।। याज्ञवल्क्यः।। पृथक्सीतपनद्रव्यैः षडहः सोपवासकः सप्ताहेन तु कृच्छ्रोयं
महासीतपनः स्मृतः। गोमूत्रगोमयक्षीरदधिघृतकुशादाकैः सीतपनद्रव्याणि एकैकस्मिन्दिने एकैकं पिबेत्।। स
प्तमदिवसे उपवासः। एतानि कुशोदकादिप्राशनान्याहारीतरतिवर्त्तकानि एवमुत्तरत्रापि यमः। त्र्यहं पिबेत्तु गोमू
त्रं त्र्यहं वै गोमयं पिबेत्। त्र्यहं दधि त्र्यहं सर्पिस्त्र्यहं क्षीरं ततः शुचिः। महासीतपनं ह्येतत्सर्वपापप्रणाशनं। एतत्पंचदशा
हःसाध्यं जाबालः।। षण्णामेकैकमेतेषां त्रिरात्रमुपयोजयेत्। त्र्यहं चोपवसेदन्त्यं महासीतपनं विदुरिति षण्णां हवि
षां गोमूत्रादीनामयमेकविंशतिरात्रसाध्यः।। अथातिसीतपनं। यमः। एतान्येव तथा पेयान्येकैकं तु त्र्यहं त्र्यहं। अतिसीतप २२९

नेनाम सर्वपापक्रमपि शोधयेदिति एतानि गोमूत्रादिकुशोदकान्तानि षड्द्रव्याणि एतच्चाष्टादशाहसाध्यः।। अथ पर्णकृ
च्छ्रः। याज्ञवल्क्यः। पर्णोदुम्बरराजीवबिल्वपत्रकुशोदकैः। प्रत्येकं प्रत्यहाभ्यस्तैः पर्णकृच्छ्रउदाहृतः। पर्णपालाशः। पद्मादि
पत्राणि कुशानी चैकैकस्य क्वाथोदकमेकैकस्मिन्दिने पिबेत्। एवं पंचदिनसाध्यः। जाबालः।। पालाशबिल्वपद्मानी
पर्णान्योदुंबराणि च। अश्वत्थस्य च पर्णानि कुशोदकेन शस्तथा। अहोरात्रोपवासश्च पर्णकृच्छ्रः प्रकीर्त्तितः। अयं षडु
दसाध्यः।। विष्णुः।। कुशपलाशोदुंबरपद्मशंखपुष्पीवटब्रह्मसुवर्चलापत्रैः क्वथितस्याम्भसः प्रत्यहपाने पर्णकृच्छ्र इति
शंखपुष्पी लता विशेषः। ब्रह्मसुवर्चला ब्राह्मी विशेषः। कुशादीनां मध्ये अन्यतमान्निक्षिप्य क्वाथः कर्त्तव्यः। अयं तु स
प्ताहसाध्यः। शंखलिखितौ। पद्मबिल्वपलाशोदुंबरकुशोदकान्येकमेकमभ्यस्तानि पर्णकृच्छ्रः। समस्तान्येतानि त्रिरा
त्रमभ्युक्तानि पर्णकूर्च इति। अत्रापि काथ एवाभ्यासविशेषमाहः यमः। एकैकं त्र्यहमश्नीयात्पर्णकृच्छ्रो विधी
यत इति। एवं च पंचदशाहसाध्योयं। समस्तान्येतानीत्यादि। द्विबिल्वपलाशोदुंबरकुशोदकान्येतानि समस्तानि
क्वथयित्वा त्रिरात्रोपोषितः सन्पिबेत्। पर्णकूर्चः। तथा च यमः। एतान्येव समस्तानि त्रिरात्रोपोषितः शुचिः। क्वाथयि
त्वा पिबेदद्भिः पर्णकूर्चो विधीयत इति। अथ फलादिकृच्छ्रः।। ।।मार्कण्डेयः। फलैर्मासेन कथितः फलकृच्छ्रो मनीषिभिः।

शरीरयात्रामात्रोपयुक्तफलानि मासेनाश्नीयात्। तत्र सर्वत्र साधारणेतिकर्तव्यतापि कर्तव्या। तानि च फलानि कानी
त्याकांक्षायामाह स एवार्थी फलकृच्छ्रः श्रीफलैः प्रोक्तः पद्माक्षैरपरस्तथा। मासेनामलकैरेवं श्रीकृच्छ्रमपरं स्मृतम्। पत्रै
र्मतः पत्रकृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्यते। मूलकृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जलेन तु। इति पत्रैः श्रीवृक्षादिपत्रैः कृ
च्छ्रः पुष्पकृच्छ्रः। पुष्पाण्यपि श्रीवृक्षादीनामेव मूलान्यपि तेषामेव। अथ तप्तकृच्छ्रः॥ याज्ञवल्क्यः॥ तप्तक्षीरघृताम्बु
नामेकैकं प्रत्यहं पिबेत्। एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृतः। दिनचतुष्टयसाध्यः कृच्छ्रः। मिताक्षरायां तु अयं महातप्त
कृच्छ्रः। एतावत्समस्तैः सोपवासो द्विरात्रसाध्यः॥ शीततप्तनवकृच्छ्रस्तु ... मनुः॥ तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृ
तानिलान्। प्रतित्र्यहं पिबेदुष्णान् सकृत्स्नायी समाहितः। प्रतित्र्यहं जलादीन प्रत्येकं त्र्यहं त्र्यहं पिबेदित्यर्थः। अयं च द्वा
दशरात्रसाध्यः। जलादिपरिमाणमाह पराशरः। अपो पिबेत्तु त्रिपलं द्विपलं तु पयः पिबेत्। पलमेकं पिबेत्सर्पिस्त्रिमात्रेण वा
युमारुतमिति। त्रिरात्रमुष्णं सुखोदकं ... पिबेदित्यर्थः। अर्को शीतारण्याख्यातेन कृच्छ्रं पराशरः। षट्पलं तु पिबेद
म्भस्त्रिपलं तु पयः पिबेत्। पलमेकं पिबेत्सर्पिस्तप्तकृच्छ्रं विधीयते। जलादिकमुष्णमेव ...। अथ शीतकृच्छ्रः। त्र्यहमुष्णाः
पिबेदापस्त्र्यहमुष्णं पयः पिबेत्। त्र्यहमुष्णं घृतं पीत्वा नाश्नीयादपतप्तकृच्छ्रः॥ एवमेव शीतैः शीतकृच्छ्रः। अयं दिनद्वादशसाध्यः। २२८

पराशरः॥ त्र्यहं शीतं पिबेत्तोयं त्र्यहं शीतं पयः पिबेत्। त्र्यहं शीतं घृतं पीत्वा वायुभक्षस्त्र्यहं परं। द्वादशदिनसाध्य ए
ष॥ अथ वारुण्यादिकृच्छ्राः शंखः। लिखितान्युदकसिद्धानि मासमश्नीत संयतः। सक्तूंश्चामोदकान्मासी ... वारुणोऽय
बिल्वैरामलकैर्वापि पद्माक्षैरथवा शुभैः। मासेन लोकक्षीरकृच्छ्रः कथ्यते द्विजसत्तमैः। गोपुरीषाद्यवान्न
ष्टमासं नित्यं समाहितः। व्रतं तु यावकं कुर्यात् सर्वपापापनुत्तये ... विष्णुः। उदकादिसक्तूनां मासाभ्यवहरणेनोदककृच्छ्रः। बिसा
भ्यवहरणेन शीतकृच्छ्रः। उदकादीनि उदकप्रधानानि सक्तूनि। जाबालः॥ अनश्नन् जलमध्यस्थः स्वाहारात्रं तपन्बुधः। सर्वश्च
रं तं पापं जलकृच्छ्रो व्यपोहति। जपो वारुणसूक्तानि॥ योगियाज्ञवल्क्यः। वायुना त्वहो दिवा तिष्ठेद्रात्रिं नीत्वाप्सु सूर्यदृक्। स
त्प्रायश्चित्तंविहितंतदर्द्धमित्यर्थः। छेदद्वप्रबन्धाः एकवर्षहतवात्सन्नपादाविधीयतां। अबुद्धिसर्वपुंसक्ष्या द्विपादस्तु
द्विहायनेत्रिहायनत्रिपादस्थात्प्राजापत्यमतःपरमिति॥ गर्तग्रहणप्रवृत्तिप्रसंगनिर्णां। गावःषड्विंशन्मात्वित्रा
षः। पादउत्पन्नमात्रउद्दोपादोदृढतोगातो। पातादोनंब्रतमुद्दिष्टंहत्वागर्भमिवतनीं। अंगप्रत्यंगप्रसंउगात्रिवतःसम
चितं॥ द्विगुणंगाब्रतंकुर्यादिषागाब्रस्थनिःस्रतिरिति। उत्पन्नमात्रगर्तग्रहणमात्रयत्रयद्व्रतमुपदिष्टंतस्यचउर्थांशः
पादः। यत्रयदुपदिष्टंतद्विगुणंएवमुत्तरत्रापि। आयत्रेबः। एकावहूनांकाविहद्द्वाप्यापादितांकचितां। पादंपादंउह
त्यायाश्चरेयुस्तेःपृथक्पृथगिति। एतच्चाकामकारकामकारउद्विगुणंसिद्धसंप्रायश्चित्तंवा। एवंछायाबह्लीनांचव्यापादान

कामकारपादद्वयं पादोनं कामतः। कामकारतस्तु द्विगुणीविदितद्यैव। कानेवाराधनादिना बहुनीगवीद्यापादेने
सैवत्रं। व्यापन्नानी बहूनी आराधनविधानपिवा। निषमिथ्योपचारवद्विगुणीगाव्रतेवारदिति। अत्र ववनाद्द्रुव्यापा
दानपिनप्रतिनिमित्तं नैमित्तिकावृत्तिः किंतु द्विगुणमेव। निषिजिकस्या अपि मिथ्योपचारद्यापादनद्विगुणं। त्रिषष्टि
तिरिक्तस्यषुद्यासः अषष्ठलवणे विवक्षुणपार्थमपि प्राजनी। अतिरिक्तं न दातव्यं कालस्वल्पेउदापायतु। अतिरिक्ते
विपत्तिश्चन्तू ब्रपादाविधीयतद्‌इति। आपस्तम्बः। पादमेकं चरद्रोधद्वौ पादौ बंधने चरेत्। याजनपाददशानेस्पा
रस्तवं निपातनइति पादः। अनायैव दिशास्मृतीनाराक्तगुरुलघुप्रायश्चित्तानि ज्ञातिशक्त्यौघापेक्ष्या। अनुग्राहकाप
याउनाघापसूयावर्थेद्युवस्थापनीयानि। पुरुषं प्रतिवपनविषये विशेषादर्शितं संवर्त्तेन। पादेगरामवपने
द्विपादश्मश्रुणापि वा। त्रिपादेउशिखावर्जं सशिखंतु निपातनमिति। स्त्रियं प्रतिपराशरः। वपनं नैवनारीणां नानुव्र
ज्याजपादिकं। न गोष्ठेशयनं तासां न वसीत मवाजिनं। सर्वानाकशान्समुद्धृत्यच्छेदयदंगुलद्वयं। सर्वत्रैवं हि ना
रीणां शिरसा मुंडनं स्मृतमिति। विधवायास्तु मुंडनमास्यावतिप्राप्तिरूपितं। अथ ब्रात्याग्रुपपातकस्य प्रवर्त्तिका ति
दशाः। त्रिनविशेषः। प्रायश्चित्तं वा निधीयते। तत्र यत्र श्रृंगग्राहिकतया स्वल्पमाधिकं प्रायश्चित्तं नीवा विहि २१०

तं तत्रादवश्यादयं याज्ञवल्क्यः। उपपातकशुद्धिः स्यादेवं चान्द्रायणेन वा। पयसा वापि मासेन पराकेणाथवा पुनः
एवं प्रावत्तिगोवधप्रायश्चित्तनवा चान्द्रायणेन मासं पयोवर्तनेन मासं पराकेण चा। अकामकारशक्त्यपेक्षया व्रतवउष्ट
यं। याजनीयं कामकारउमनूक्तं त्रैमासिकं। व्रात्यतायीयमः। सावित्रीपतिता यस्यदशवर्षाणि पंचवा सशिखंवपनंकृत्वा
व्रतंकुर्यात्समाहितः। एकविंशतिरात्रं वा पिबत्प्रसृतयावकं। हविष्यं भोजयेच्चैव ब्राह्मणान्सप्तपंच वा। तातायावकस्य
व्रतं कुर्यात्समादिष्टं। एकविंशतिरात्रं वापि ब्रूयान्नतयावकं। हविर्ष्य भोजनं चैव ब्राह्मणानां नन्ब्राह्मणयाविधानाय तत्। उप
नास्यापनयनं स्मृतौ मनुः। यस्यां द्विजानां तांसावित्रीनाशयान्तयथाविधिनीश्चारयित्वात्रीन्ब्रह्मन्यथाविधानपनायत्। उप
नशाघ्नाविन कालातिक्रमया मूत्रमानवयाज्ञवल्कीयानि शक्त्यापेक्षया दृष्टव्यानि। आनापधतिक्रामगोवधप्रकरणे
प्रदर्शितं मनूक्तं त्रैमासिकं। अनापदिवक्तकालादूध्वमपि क्रियकालातिक्रामवसिष्ठोक्तं द्रष्टव्यं। पतितसावित्रीकद
स्तलकव्रतंचरेद्वौ मासौ यावकेन वर्तयेन्मासं पयसा पक्षमामिक्षया ष्टरात्रं घृतेन त्रिरात्रमयाचितमहोरात्रमुपव
सेदश्वमेधावभृथं गच्छ व्रात्यस्तोमेन वा यजेतेति उद्दालकव्रतस्वरूपमयदर्शयति द्वौ मासौ विस्तादिना। यस्यपि
त्रादायायन्नुपनीतानाम्नत्र विशेषमाहापस्तम्बः। अतिक्रांतसावित्र्यादिकालत्रउन्नविधकं ब्रह्मचर्यं चरित्वा यापनय
नेन ततः संवत्सरमुदकोपस्पर्शनं तथाध्याप्यः। अथ यस्य पितापितामहश्चानुपनीतौ स्यातां तत्र ब्रह्महा संस्तुतास्ते

डाक्टर भाऊदाजी इत्यस्य स्मारकम्
DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारकम्
DR. BHAU DAJI MEMORIAL

षोगमनीत्ताज्ञने विवाहमिति वर्जयित्वेषामिच्छतां प्रायश्चित्तं यथा प्रथमतिक्रमऋतुमवर्षं संवत्सरं आद्योपनयनं
ततउदाकोपस्पर्शनं प्रतिपुरुषं संख्यायसंवत्सरान्यावंतोऽनुपनीताः स्युः सप्तभिः पावमानीभिर्यदंति यच्चदूरकइ
त्यनेनायज्ञुःपवित्रेणसामपवित्रेणांगिरसानेत्यपिव्याहृतिभिरेव वासोऽध्यापयेयुः प्रपितामहादीनीनस्म
र्यतउपनयनं उदाकोपस्पर्शनं स्मशानसंस्तुतास्तेषां गमनीत्याजनं विवाहमिति वर्जयित्वेषामिच्छतां प्रायश्चित्तं द्वा
दशवर्षाणि त्रिविधं ब्रह्मचर्यंचरदथोपनयनं ततउदाकोपस्पर्शनं पावमान्यादिभिरथगृहमेधपादशनेना
ध्यापनेनात्तायोनिवर्त्तितनस्यसंस्कारो यथा प्रथमतिक्रामत ऋतुं इत्यंतेति वदिति। अयमर्थः। विप्रादीनां षोडशद्वा
विंशतिचतुर्विंशतिवर्षात्मिकासावित्र्याउपनयनस्य कालः अतिक्रांता ऋतुमासद्वयंयावा त्रिविधं ब्रह्मचर्यंवद
त्र्यसंबंधित्वेद्धासनगुरुशुश्रूषणादिकं चरता वेदत्रयार्थमृतुत्रयं ब्रह्मचर्यं चरदित्यर्थः। अथऋतुत्रयब्रह्मच
र्यानंतरं उपनयनं कार्यं। तत्र उपनयनानंतरं संवत्सरं यावदुदाकोपस्पर्शनं प्रत्यहं प्रायश्चित्तरूपं स्नानं कुर्यात्
अथाध्यापनीयः। एतदुद्दालकव्रतात्मकं ध्यत्रात्यस्य पितापितामहादुपनयनरहितौ स्यातां तत्राप्याविपिब्र
ह्मसंस्तुताः ब्रह्महशाष्टवाच्याः। तेषांगमनं तानप्रतिग्रहकार्यार्थं गमनं तत्संबंधिप्राजनादिवर्जयेत्। तेषां शुद्धि २७१

१६

मिच्छतामिदं वक्ष्यमाणं प्रायश्चित्तं। ज्ञातोऽस्थानसंवत्सरस्नानस्य प्रतिपुरुषं संवत्सरत्रितः यं ब्रह्मचर्यं कार्यं अथोपनयनं॥
तातायावंतोऽनुपनीताः पुरुषास्तत्संख्यायादिवावनुपनीतोऽनद्वेवसरायदित्रयस्त्रदात्रानिति प्रत्यहं स्नानं कुर्या
त्कवनसंवत्सरउदाकोपस्पर्शनामिति व्याचक्षते। तत्रमंत्राः। यदंतियच्चदूरकेनयं विंदति मामिहात्यनेनाभिःसप्तभिः
पावमानीभिः। ऋग्भिर्माजिनमघमर्षणं वयथाशक्तिकुर्यात्। येनदेवाःपवित्रेणेतियजुःपवित्रं। कयानश्चित्रआ
भुवदितिसामपवित्रं। हंसःशुचिषदित्यांगिरसी व्याहृतयो वा स्नानमंत्रा भवंति। प्रायश्चित्तार्थमिमा मंत्राः अध्यायाः
एवंकृतप्रायश्चित्तेभ्यसाध्यायाः। यस्य पितामहादेरुपनयनंनास्ति तथाविधानामपि पुरुषाणामुपनयनाभावः। तत्सर्वं
त्रमशानशाष्टवाच्याः अत्र पञ्चत्यथशि तेषामागतस्य ष्ठानं स्नाजनादिवापद्यापि न कुर्यात्। तेषां स्वयमेव शुद्धिमिच्छतां
प्रायश्चित्तं द्वादशवर्षाणि त्वादिस्पृष्टादिउदाकोपस्पर्शनमपि पुरुषसंख्या वत्सरान्त्रिः बाध्यसंवत्सरं वादकस्पर्शनं। तत्र
मंत्राः प्राक्तिएवन तोध्यापनंनास्ति किंतु गृहस्थाश्रमस्वीकारः। ननउपदिष्टगार्हस्थ्यात्पुरुषात्संततिर्वर्त्तते तस्मादत्य
न्तास्योपनयनसंस्कारः प्रथमातिक्रामयथा। अतिक्रांतसावित्र्याः कालस्तैस्त्रिविधं वर्यमिति तद्दुष्टं वति। ततऊर्ध्वं
प्रत्तनिवता। ततउत्पन्नस्यानतिक्रांतस्यसावित्रीकालापनयनादिति॥ अथ स्नायाक्षत्यादिद्रव्यविशेषापहारस्य

मान्यं प्रायश्चित्तापवादकं वचनं प्रायश्चित्तांतरमाह मनुः। धान्यान्नधनचौर्याणि कृत्वा कामाद्द्विजोत्तमः। स्वजातीयगृहा-
देवकृच्छ्रादेवकृच्छ्रादेव विशुध्यति। धनेषु वस्त्रादिन्यसारद्रव्येषु द्विजोत्तमो विप्रः। तस्य स्वजातिर्विप्र एव। एवं च ब्राह्मणप-
रिगृहीतधान्याद्यपहरणे ब्राह्मणस्यैव। क्षत्रियादीनां स्वस्वजातीयसंबंधिधान्याद्यपहरणे यथाक्रमं पादोनमर्द्धं पादश्चे-
ति कल्प्यं। ब्राह्मणेन क्षत्रियादिपरिगृहीतधान्याद्यपहारे क्रमेण षाण्मासिकं मनूक्तं त्रैमासिकाणां वधव्रतं वा चांद्रायणं कल्प्य-
नीयं। क्षत्रियवैश्यादिधान्याद्यपहारे षाण्मासिकं त्रैमासिकं वा। वैश्येन शूद्रापरिगृहीतापहारे त्रैमासिकमिति क-
ल्प्यं। इदं च कामकृते। अकामकृते तु शूद्रधान्याद्यपहृत्या अर्द्धं त्रैमासिकाणां वधव्रतं वा कल्पनीयं॥ धान्यं दशभ्यः कुंभे-
भ्यो हरतो वध इति दशकुंभाधिकहरणे याज्ञवल्क्येन वधदर्शनात् दशकुंभपरिमितधान्यहरणे एतत्प्रा-
यश्चित्तं कल्पनीयं। धान्यसाहचर्यादन्नस्यापि तुलादशकाप्यवामवा कुंभपरिमितधान्यमूल्यलाभ्यरजतादिधनाप्येवमे-
वाकुंभस्तु पंचसहस्रपलपरिमाणः। अल्पसाराणां त्रपुसीसादीनां हरणे मनुः। द्रव्याणामल्पसाराणां स्तेयं कृत्वा-
न्यवेश्मतः। चरेत्सांतपनं कृच्छ्रं तन्निर्यात्यात्मशुद्धय इति। एतच्च पंचविंशतिपणमूल्यस्य त्रपुसीसाद्यपहारे॥
तथा भक्ष्यभोज्यापहरणे यानशय्यासनस्य च। पुष्पमूलफलानां च पंचगव्यं विशोधनं। एककालाशनप- २९२

* त्र्यं वा पंचगव्यहारात् \

र्याप्तत्वात्ताज्यापहारे एतत्। द्विवारभोजनपर्याप्तहरणे उपोषणं स्मृतं। त्रिरात्रं तत्पलाज्यान्नस्याहरहरणमात्रस्य
हरणे त्रिरात्रमकार्षीदिति। एकरात्रपंचगव्याहारस्य शक्ताविषयः। तद्यादिसाहचर्याधानादीनामपि तावन्मूल्यस्या-
नामवहरणे एकरात्रादिकं। एकवारभोजनपर्याप्तत्वादित्रिगुणमूल्यस्य तृणकाष्ठादिहरणे त्रिरात्रं। अनेनापि प्रायेण
मनुः तृणकाष्ठद्रुमाणां च शुष्कान्नस्य गुडस्य च। चैलचर्मामिषाणां च त्रिरात्रं स्यादभोजनं। तथाद्यदशगुणतन्मूल्यादम-
णिमुक्ताद्यपहारे स एव। मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च। अयःकांस्योपलानां च द्वादशाहं कणान्नता। तद्वादित्रि-
गुणतुल्यकार्पासादिहरणे पि स एव। कार्पासकीटजोर्णानां द्विशफैकशफस्य च। पक्षिगंधौषधीनां च रज्ज्वाश्चैव त्र्यहं पय
इति। एवमन्यत्रापि कल्पनीयं। तथा मनुष्याणां तु हरणे स्त्रीणां क्षेत्रगृहस्य तु। वापीकूपजलानां च शुद्धिश्चांद्रायणेन तु। एतच्च
क्षत्रियादिमनुष्याद्यपहारे। निरोधेऽपहरणे न रौप्यरजतस्य तु। भूमिवज्रमणीनां च रुक्मस्यायसमं स्मृतमिति। अत्र ब्रा-
ह्मणसंबंधिमनुष्याद्यपहरणस्य सुवर्णस्तेयसमत्वानाकृत्वात्। कूपवापीजलानां चाल्पत्वे कूपवापीस्थजलविशे-
षाणां घटादिजलव्याहृत्यर्थं॥ तेन जलवापीकूपापहारप्रायश्चित्तमिदमित्यपरार्कः। सार्द्धशतेन द्विपंचपणजन्यजला-
पहारे इदं चांद्रायणं नियम्यत इति मिताक्षरायां। एतच्च प्रायश्चित्तं जातमपहृतं स्वामिने दत्त्वैव कर्त्तव्यं। यदाह विष्णुः॥

द्वादशवार्षिकं वा पद्व्रतं द्वयं स्यामि न व्रतमाचरन्। तिस्रो वाला दिशुद्ध्यर्थं वक्रिरीत्या कल्प्यं॥ ज्ञणानीयानपक्रियत्यत्रागावध
प्रायश्चित्तानि यथाशक्तियाज्यानि। अनाहिताग्नितायां। तत्र वत्सरादूर्ध्वं नापदि शक्यापद्दयायाज्ञवल्क्योक्तव्रतचतुष्टयं। या
ज्यं। अनापदि तु वत्सरादूर्ध्वमिवमसूक्तत्रैमासिकं। अष्टादशसंवत्सरका ह्यजिनि विंशषमाहा। कालचाक्षयकर्माणि कुर्यात्द्वि
ग्राविक्षनतः। तदूर्ध्वं त्रिरात्रेण मासिमासि विशुद्ध्यति। अवस्याक्षानपि स एव। तत्र दाराग्निहोत्रोपासनायानादध्यन्भुता
ज्ञानौ। चान्द्रायणं चरेद्वर्षं प्रतिमासमाहापिवति। वर्षातिक्रमे चान्द्रायणं मासातिक्रमे चरेदुपवासः। श्रौतस्मार्ताग्न्याध
नत्वाचरेदं प्रायश्चित्तं गृही तस्य नास्तिक्याद्विशात्परित्यागधर्मविश्रुत्यादिभिविशेषात्तिहितः। व्याघ्रपादः। मासद्वयं तु या
वाङ्ग्राजाद्वै समाचरेत्। नास्तिक्याद्ब्राह्मकं तु हामद्रष्टौ रदातिव्रतं। तथा। यो ग्नींस्त्यजति मास्तिक्यात् प्राजापत्यं चरे
द्विजः। अन्यत्र पुनराधानमुपदिष्टं मनीषिभिः। मासस्तु दृष्टयमतिथाथाग्निपरित्यागव्रति त्रयं। तथा वस एव वा तु ष्ट
यं तु संवत्सरं मासानां तु कृतानामनेनात्यक्तानिनस्तकुर्वीत तत्पापाद्विमुच्यते। षाण्मासपर्यन्तं पराकः। अत ऊर्ध्वमिष्ट
पर्यन्तं पापाद्व्रतं। यथाहोशनतः। षण्मासीत्यजतो या वे पराकं समाचरेत्। ऊर्ध्वं पाया व्रतं कुर्यान्निसाम कं सम २१३
हितः। वर्षपर्यन्तामवाद्भुमुनियः। शीसितव्रताः संवत्सरादूर्ध्वं तु स्कन्दपुराणे। ऊर्ध्वं संवत्सराद्ग्नियस्यजस्मपायाव्रतं द्वौ

मासिकं तत कुर्यात्त्रिमासिकमथापि वा। कालाल्पत्वं महत्वापद्दयाविकल्पः। प्रमादात्मासमग्निपरित्यागे पिस्कन्दपु
राणे। कृतनाशने द्वियाविप्रः प्रमादात्त्यजति शक्ता। प्राणायामशतं कुर्याद्दिनमवासमथापि वा। प्राणायामशतं त्रिरात्रपरि
त्यागकूर्मपुराणे। षष्टिरात्रं त्यजेद् ग्निं प्रमादान्ष्टगुणमप्रता। उपवासं तथा कुर्यात् प्राजापत्यमथापि वा। नायन्यानन तत्र
प्रकृतं त्रिरात्रं परा मृश्यानमासद्वयपरित्यागे त्रिरात्रं। अत ऊर्ध्वं वत्सरपर्यन्तं मासं प्राजापत्यमत ऊर्ध्वं कालबहुत्वप्रायश्चि
त्तबहुत्वं तथा चतारधाजगृह्ये। प्राणायामशतं मा त्रिरात्रादुपवासस्यादाविंशतिरात्रादत ऊर्ध्वं मावेषष्टिरात्रात्त्रिरा
त्रमुपवासेत्। अत ऊर्ध्वं मासं वत्सरात्प्राजापत्यं चरेदत ऊर्ध्वं कालबहुत्वादोषबहुत्वमिति। उपवासस्त्रिंशद्रात्रादित्यपिपा
ठः। आलस्यनपरित्यागस्मृत्यन्तरे। आलस्येन यदा वह्निं द्वादशाहं त्यजेत्पुनः। त्रिरात्रमुपवासं स चरेत्पापविशुद्धये। ना
रदाजगृह्ये द्वादशाहाविति क्रमे त्र्यहमुपवसेत्। मासातिक्रमे द्वादशाहमुपवासः। संवत्सरातिक्रमे मासोपवासः पयो
भक्षणं वा कृष्णकृच्छ्रं। सोमितिहाभिश्च कामाणानयों वति। उपवासासमर्थस्य मासं पयाभक्षणं संवत्सरानन्तरमधिककाला ति
क्रम उत्तरं। एतच्च गृह्याग्निविषयं। हारीतः। संवत्सरोत्सन्नाग्निहोत्रं चान्द्रायणं चरित्वा पुनरादध्यात् द्विवार्षिकं त्विन्नचान्द्रा
यणं सामायनं कुर्यात्। त्रिवार्षिके संवत्सरं तप्तकृच्छ्रमन्ततः पुनराधानमिति शौनकः। अग्न्युत्सादी संवत्सरं प्राजापत्यं

वारुणीवरुणादिति। एतदकामतोज्ञेयं स्मार्ते। कामतस्तु मनुः। अग्निहोत्र्यपविध्याग्नीन् ब्राह्मणः कामकारतः। चां
द्रायणं चरेन्मासं वीरहत्यासमं हि तत्। मासमग्नीननपविध्य त्यजतः। कवचनात्स्मार्तादिना मासमग्निपरित्यागे प्रथममासे
त्र्यहत्रयं तावन्मासं संख्याया त्र्यहं संख्येति। एवमादाय गुरुलघुकल्पा शक्त्याद्यपेक्षया व्यवस्थापनीयाः। एवं प्रायश्चित्ता
नंतरं प्रासङ्गिकं तु पुनराधानं तच्चानित्यकर्मक्रियन्ति। प्रायश्चित्तं वा होमद्रव्यं दद्यात्। तथा च नारदः जगृह्ये यावत्कालमहोमी
स्यात्तावद्द्रव्यमशेषतः। तद्दानं चैव विप्रेभ्यो यथा होमस्तथैव हि॥ अथापण्यविक्रये। तत्र स्मृतिषु प्रायश्चित्तं तावदुक्तं तत्र द्र
व्यानुबन्धापेक्षया अनापदि मानवं त्रैमासिकं। आपदि त्रैमासिकं याज्ञवल्क्योक्तं व्रतत्रयं शक्त्यपेक्षया योजनीयं क्व
न विशेषो हारीतेनोक्तः। गुडतिलपुष्पमूलफलपक्वान्नविक्रये सामान्यं लाक्षालवणमधुमांसतिलदधिघृततक्र
गन्धचर्मरक्तवाससाम् अकृतस्य विक्रये चान्द्रायणं तथा स्मृत्यन्तरे क्षीरसूत्रधनुवर्मशस्त्रविक्रये वा रसमांसघृतश्चेष्ट
गन्धरसशुक्तिविक्रये तप्तकृच्छ्रः। हिङ्गुगुग्गुलुहरितालमनःशिलाञ्जनगैरिकक्षारलवणमणिमुक्ताप्रवालवेणुवैणव
मृन्मयपात्रारामतडागोदपानपुष्करिणीसुकृतविक्रये त्रिषवणस्नायी अधःशायी चतुर्थकालाहारो द्वादशसहस्रं २१५
जपेद्गायत्रीमिति विशेषः। संवत्सरव्रतं नाम वहनमानादिविक्रये संकीर्णमिश्रितं एकतमविक्रये इति सर्वविशेषः।

शेषं लिखितो। अविक्रेयाणि तिलदधिक्षौद्रलवणद्राक्षामद्यमांसकृतान्नस्त्रीपुरुषहस्त्यश्वगावृषभगन्धरसाक्षौ
द्र ऊर्णाजिनासामादकनीलीविक्रयात् पतति ब्राह्मणः। तत्र प्रायश्चित्तमकामावालोकामतस्तु ... कपतिताद्ध्यात्मानमुद्ध
रेत् संवत्सरं तप्तकृच्छ्रमाचरेत्। नवापनं वा शिरोपाल्काप्य त्रिरकार्द्रवासा गोष्ठे मौनी वीरासनमासीत रात्रौ दिवा तिष्ठेत्
ग्निकार्यपरः सावित्रीं सवनानुगीं जपेत्। सर्वं व्रतमकृपणमध्यचरावीरवासा मौञ्जी मेखली दण्डपवित्राणि द्विविष्टी वा साय
म्बरं नखरोमश्मश्रु बाहु बहुवच आयान्तो दशरात्रं वा पवा सा ब्राह्मणतल्पेगेवाक्षिकमिन्ध्यं व्यवहारानित्या पतितः
शिष्टेरसैर्नाश्च इति विष्णुः। मांसलवणलाक्षाक्षीरविक्रयी चान्द्रायणं चरेत्। तैः न्यासापनयादिति। चतुर्विंशतिमते।
सुराया विक्रयं कृत्वा चरेत्। सोमं चतुष्टयं पयः पायसमूपपानीयं रसी चान्द्रायणव्रती दद्यात् इक्षुरसस्नेहगुडपिण्डादिविक्रयात् स
र्वेषां ... पकानीपाराकेण समाचरेत्। कुसुम्भशाकदग्धरं ... मद्यादिविक्रये। तिलानां विक्रये चैव प्राजापत्यं
समाचरेत्। धर्मार्थं तु मिलितानीष्ययज्ञार्थं विक्रयं नायतु रक्तपीतादि वस्त्राणि स्नानादीनि तथैव च। विक्रये च द्रामात
षाङ्गस्य वचनं यथा। गा विक्रीय नरः सद्वालानार्थं धनमाहितः। प्राजापत्यं चरेद्वा ... स्मृतौ। स्वराश्वाश्वत
रीणां च करेणूनां च विक्रये पराकं तत्र कुर्वीत स्मृतानां द्विगुणं चरेत्। नारीणां विक्रयं कृत्वा चरेच्चान्द्रायणव्रतं। द्विगुणं तु

रुषस्यैवव्रतमाङ्कमनिषिद्धमितिचान्द्रायणंप्रकुर्वीत।नष्टएकादशाद्दविक्रयात्।श्रीगानीउपराकस्मात्स्मृतीनीतत्र
मावरन्।अनितिहासपुराणानीवारस्मीतपनेद्विजः।रहस्यपैवरावाणीतव्रामवसमाचरेत्।श्रीगादिविक्रयेएकादशस्य
नुवर्त्तेत।एवमन्यान्यपिगुरुलघुप्रायश्चित्तान्यन्विष्यकामामहाजातिशक्त्याद्यपेक्षयायोज्यानि।अथपरिवेदन
पारिवित्यवा।तत्रवसिष्ठः।परिवित्तिःकृच्छ्रंद्वादशरात्रंचरित्वानिविशेत्तंचैवोपयच्छेदिति।परिवेत्ताउद्यान्नूढे
ज्येष्ठदारपरिग्रहात्परिवित्तिस्तुतथाया नियमरक्राशा।आसोपरिवित्तिर्ज्येष्ठस्तांपरित्यज्यप्राजापत्यंचरित्वानि
विशेत्तुउद्वाहेत्।कामित्याकांक्षामाशतीचैवोपयच्छेदितिनामवाच्छेन्पूर्वपरिणीयामवातथापरिविविदानः
कृच्छ्रातिकृच्छ्रौचरित्वातस्मैदत्वापुनर्निविशेततामेवापयच्छेदितिपरिविंदानःपरिवेत्ताकनीयान्।तस्मैज्येष्ठा
याख्यातंदत्वाश्यंवदायस्तुपचारार्थमिवदत्वाब्रह्मचार्यहितनिहत्यब्निविधत्स्ततिकृच्छ्रौचरित्वापुनस्तामेव
तेनाज्ञातानागुद्वाहेदित्यर्थः।एतच्चादर्शांतरव्यवस्थिताज्येष्ठस्यतविवाहइतिज्ञेयम्।कनीयसितुतविवाह
निर्गुणेनाज्येष्ठदृष्टव्यौ।ज्येष्ठनिविष्टकनीयान्निविशमानःपरिवेत्तापरिवित्ताज्येष्ठः।परिवेदनीकन्या २१५
परिहार्यादातापरियष्टायाजकःसावीतपतिताःसैवसरंप्राजापत्यंतत्राब्रूण्पावायउंयुरितिअत्रापि

परिवेत्रादीनांसावर्णीकामतःप्रवृत्तौप्रात्यर्कसंवत्सरस्त्राब्रूण्त्तिग्रद्योरन्।अज्ञानतःप्रवृत्तौतुयाज्ञवल्क्यो
क्तागावधव्रतंचतुष्टयंशक्त्याद्यपेक्षयायोजनीयं।अत्रैवविशेषमाहः।यत्नद्विजाञ्चपरिवित्तिःस्त्रकन्यायाः
कृच्छ्रमवचा।अतिकृच्छ्रंचरेद्दातापाहानाचीद्रायणंचरेदिति।ज्येष्ठायांयद्यनूढायांकन्यायामुह्यतेनुजा।या
साग्रदधिषूःज्ञेयापूर्वातुदधिषुःस्मृता।अत्रप्रायश्चित्तमाहवसिष्ठः।अग्रेदधिषूपतिःकृच्छ्रंद्वादशरात्रंचरि
त्वानिविशेत्तंचैवोपयच्छेत्दधिषूपतिः।कृच्छ्रातिकृच्छ्रौचरित्वातस्मैदत्वापुनर्निविशेतेति।कश्चनेवंप
ठंतिदिधिषूपतिःकृच्छ्रंद्वादशरात्रंचरित्वानिविशेत्तंचैवोपयच्छेत।अग्रेदिधिषूपतिःकृच्छ्रातिकृच्छ्रौविति।एवंप्रायश्चि
त्तविकल्पःप्रथमपाठ।अयमर्थः।अग्रेदिधिषूपतिःकनिष्ठायाःपतिर्ताःपरित्यज्यप्राजापत्यंचरित्वानिविशेत्तनूद्वाह
त्।कामित्याकांक्षायांतांचैवतीनांकृच्छ्रपूर्वपरिणीतांदधिषूपतिर्ज्येष्ठायाःपतिरितिस्मृतंतस्मैकनिष्ठापतिरपूर्वव
द्दत्वाकृच्छ्रातिकृच्छ्रौचरित्वापुनःपूर्वपरिणीतामवोद्वाहेत।द्वितीयपाठेत्वयमर्थःतस्मैदिधिषूपतयेदत्वापुनः
साढीतामवाग्रदिधिषूपतिरुद्वाहेत्।अत्रानुक्तस्थालकन्यायाःप्राढापुरुषमिप्रोढायाःपादइतिकल्प्यं।प्रायश्चित्ता
नीतरंज्येष्ठानुक्रमाणेवपूर्वविवाहेपूर्वदत्तांकन्यांदत्वाविवाहसंस्कारःकार्यः।यत्रवासारस्कनिष्ठात्रासा

दराज्यष्टकन्याप्रथमंविवाहिताताताज्येष्टभ्रात्राकनीयसीविवाहिता।अथवाज्येष्टभ्रात्राप्रथमंकनीयसी
कनिष्टेनपश्चात्ज्येष्टानत्रपरित्यागएवपरिवित्तिपरिविष्टकन्यादाष्टयाजकानांशादशरात्रंसकृ प्रायश्चित्तंब्राह्मण
तर्पणंचनीवुनक्तंवमित्याचक्षता।नन्वस्यायिनामनिगच्छदिति।सुमंतुस्मरणान्नानिगच्छन्प्राप्नुयात्परित्याजदितिया
वत्।अस्यवचनस्यविषयीतरापद्यायायामवविषयाज्यायान्।कवनकनिष्टःपरिवत्तास्यादौकन्याज्येष्टायदद्यात्॥
ज्येष्टापिकनिष्टविवाहितामावाहाहता।एवमाग्रदधिषादिषेपिव्यक्रमविवाहनविवाहसंस्कारस्यानिष्पन्नत्वादि
तिकथयंतितञ्चिंत्यं।अत्रैनालाकविद्विष्टेयात्॥अथव्रतकाध्यापनादेःतत्रब्रह्मसुवर्चनंपिबतरेत्यनुवृत्तोविष्णुः॥
व्रतकाध्यापनेसद्यःस्मृतकाध्यापितस्तथा।अन्त्येयागप्रदानेनत्रीन्पक्षान्नियतःपिबत्।अन्त्ययागःयारासेधनायवा
सम्यगध्यानस्यचयानसम्यगधीयतइत्याह्वयः।तथाचस्मर्यते।दत्त्वायागानधीतःपतितान्मनुरब्रवीत्।इतिइद
मपिप्रायश्चित्तंसामान्यागाधंवधप्रायश्चित्तैःशाल्याघापहृयाविकल्पितं॥अथमहापातकतत्समतदतिदिष्टव्यति
रिक्तपारदार्येत्तत्राजकामकारणजातिमात्रब्राह्मणीगमनवार्षिकंब्रह्महत्याप्रायश्चित्तंतथाचवार्षिकप्राकृ
तब्रह्महत्यायाक्तिरक्तोगौतमः।उपपातकाचेवमिति।तत्रकालअग्निहोत्रादिसाधनचगुणअयुक्तब्राह्मणीगमने २७

वर्षद्वयंब्रह्महत्याव्रतंत्यदृश्विधश्रोत्रियपत्नीगमनत्रिवार्षिकंयदाहसएवाह्नपरदारत्रीणिश्रोत्रियस्यद्रव्यला
त्तावासाग्रयिथास्थानेवागमयदिति॥द्विवार्षनियादत्तंद्रव्यमुत्सृष्टव्यं।यदीयंद्रव्यंतत्रवागमयितव्यमित्यर्थः।अथवा
श्रोत्रियपत्न्यांगुणवत्यांविरूपायांगमनवार्षिकं।तादृरूपामवक्षत्रियायांद्विवार्षिकं।तादृरूपामवब्राह्मण्यांत्रिवार्षिक
मितिकल्प्यं।तथाचशंखः।विरूपायामवकीर्णःसंवत्सरंब्रह्मचर्यंत्रिषवणंचानुतिष्ठत्।क्षत्रियायांद्विवार्षत्रीणिब्राह्मण्यांवि
रूपावद्यशूद्रायांब्राह्मणपरिणीतायामिति।अत्रब्रह्मचर्यंद्वादशवार्षिकव्रतंविरूपावदित्यतिदशात्यादानवार्षिकंषा
ण्मासिकंवाकल्प्यं।एतच्चब्राह्मणस्यैवएवेनद्विगवत्वेवाननक्षत्रियस्यक्षत्रियादिषु।अष्टाविंशतिगुणशालिनाअगमनक्र
मेणद्विवार्षिकवार्षिकषाण्मासिकानिएवंविरूपस्यविरूपाशूद्रायांगमनवार्षिकंषाण्मासिकमितिकल्प्यंशूद्रस्यशूद्रायांपरस्त
ययोषाण्मासिकंयच्चापस्तंबानाकं॥सवर्णायामनन्यपूर्वायांसन्नर्संनिपातपादःपदातीत्युपदिशंत्यवमन्यासपा
दश्चउर्ध्वंसर्वमितिं।एतच्चाग्निहोत्रादिसाधनचगुणशालिनीश्रोत्रियपत्नीगमनाचदितव्यं।अनन्यपूर्वायामितिवि
शाषापादानादकान्नेवागमनान्यासहितीयवारादिगमनअनन्यपूर्वकेचद्रूपप्रथमात्यागात्रावासन्नृतमा
नन्यपूर्विकाऽन्यासःवनप्रत्यन्यासंपादपादाधिक्यंअपितुप्रतिगमनंपादपादन्यूनेकल्प्यं॥एतदखिलमेपिका

मकारे। अकामकारे तु प्रातिलोम्यविषये तु प्रातिलोम्यप्रायश्चित्तान्यवगन्तव्यानि। अन्ततु कालकामताजातिब्रा
ह्मण्यामव्यभिचारिण्यामगमनमनृतौ। त्रैमासिकं तथा क्षत्रियागमनमनृतौ कामवत्कामवद्वैमासिकं तथा वैश्यागमने
चान्द्रायणं शूद्रागमने मासं पावकव्रतं। एतच्च ब्राह्मणस्य क्षत्रियस्य क्षत्रियस्य क्षत्रियादिस्त्रीगमने द्वैमासिकं चान्द्रायणं
मासिकयावकव्रतं चकामतः। एवं वैश्यस्य वैश्यस्त्रीगमने चान्द्रायणं मासिकयावकव्रतं वा। शूद्रस्य शूद्रागमने मासि
कयावकव्रं सँवकामतः। एवं वैश्यस्य वैश्यस्त्रीगमने चान्द्रायणं मासिकयावकव्रतं वा। शूद्रस्य शूद्रागमने मासिकयावकव्र
व्रतं। अकामतस्तु ब्राह्मण्यादि द्विजातिस्त्रीगमने कामतो याज्ञवल्क्योक्तं मृषपालिकादृशागादानं मासपंचगव्याशनं मास
प्राजापत्याचरणं वा द्रष्टव्यं। क्षत्रियस्य क्षत्रियादि द्विजातिस्त्रीगमने कामतो मासपंचगव्याशनं मासप्राजापत्याचरणं वा द्रष्टव्यं
वैश्यस्य वैश्यागमने प्राजापत्यं। शूद्रागमने त्वेवं सर्ववर्णैः। शूद्री तु ब्राह्मणगमने मासं मासार्धमेव वा। गोमूत्रयावकाहार स्थि
ष्टव्यापामाद्यकं इति। कामतातामासमानां इतरक्षत्रियादीनामपि शूद्रागमने प्रातिलोम्ये मासार्धमेव वा यत्तु स्मृत्यंतरे ब्राह्मण
पत्नीं शूद्रायामपद्यात्पूर्वकं मत्तु द्विपूर्वकं निवृत्तधर्मिणी दुष्टाचारस्य द्विस्त्रियर्यभिचारिण ब्राह्मणस्त्री विषये वा काम २११
पद्यात्पूर्वकं मत्तु द्विपूर्वकं निवृत्तधर्मिणी दुष्टाचारस्य द्विस्त्रियर्यभिचारित ब्राह्मणस्त्री विषये वा कामकारे तु द्विगुणं एत

असकृद्गमनवास्तव्यं वा व्यभिचारिण्यामकामतो गमने त्रीण्यब्दानि द्रष्टव्यानि सर्ववर्णस्त्री च दशौंतं दद्याद् ब्राह्मणायाचे
त्युपायां चतुर्थकालाहारो ब्राह्मणो नान्यजायंतु क्षत्रियायां त्रिरात्रोपोषितो यवाढकं दद्यात् ब्राह्मण्यां ध्रुवं मुपाप्य पुत
पात्रं दद्यादिति। चतुर्थ्यां वैरिणी प्रायोक्तोपैरम बंधकी मानतिस्मरणाच्चतुर्थ्यां वैरिणीजाति व्यभिचारिणी तु स्यात्। षड्त्रिंशन्मते।
ब्राह्मणीं बंधकीं गत्वा किंचिद्दद्याद् द्विजातये। राजन्यां तु धनुर्दद्याद् वैश्यां गत्वा तु चेलकं। अष्टमुष्टिर्नावतिर्वित्ता। अत्रैव यमः। ब्राह्म
णो ब्राह्मणीं गत्वा द्विज दद्यान्मृगाजिनं। क्षत्रियायां धनुर्दद्याद्वैश्यायामायसीं शिलीं। शूद्रीं गतेन विप्रेण उदकुम्भः प्रदीयते।
त्रिरात्रोपोषितः स्नात्वा दद्यास्मार्जनीं तथा। अत्र रात्रकविषाय त्रिरात्रोपवाससहितानि मृगाजिनादिदानानि। अत्रारात्रस्य
दिवासा पोषितो वा स्याद् दद्याद् द्विप्रायनाजन मिति षड्त्रिंशन्मते। क्षोपवाससहितानि दानानि। अत्राप्यत्रारात्रस्य दानमात्र
मिति व्यवस्था। एतच्च गन्तुं तुल्यजातौ तुल्यजात्योः तु न द्विगुणं। तथा चाङ्गिरसः गमने तु व्रतं यत्तु गाज्ञाति द्विगुणं तावदिति शूद्रां
गत्वा क्षिपन् चतुर्विंशतिमानं। वृषल्यामनिजानन्तु त्रीणि वर्षाणि चतुर्थकालसमायन्तं भुंजीत। तत्र वृषल्यां जनिताप
त्या वृषल्यामनिजानः। वृषली शूद्रा। स्वजात्यास्त्रीत्यांप्रातिलोम्यनगछतः सवर्णा स्त्रिकेमिति कामतस्तु वधः। प्रातिलोम्ये
यधृनें दर्शिति। अन्त्यं तद्व्यभिचारिणी ब्राह्मणी गमने तु सर्वानत्रिं कथं विब्राह्मणीं गच्छेत् क्षत्रियायां वैश्य एव वा। तत्र सीतप
×ध्रुं सीतार्यः क सीदिकत्तनामिति स्मरणात् महापातकप्रकरणे पि शूद्रमाता प्रायपेदित्यादिव सिष्टवचन लिखितं तत्कर्म।

नैवास्यात्प्रायश्चित्तं विशुद्ध्यै। शूद्रस्तु ब्राह्मणीं गच्छन् कथंचित्कामतो मोहितः। गोमूत्रयावकाहारो मासेनैकेन शुध्यति
नि स्त्रीणामप्यनुलोमव्यवाये पुरुषस्य यत्प्रायश्चित्तं तदर्धं तासां प्रायश्चित्तं योजनीयं। मनुः यस्तु सःपरदारेषु ताढि
नीयारायद्रुतमिति। अत्र प्रायश्चित्ताद्दमर्हतीति स्त्रिया रागिण एवावतिनप्रवर्त्तिता। यस्तु सःपरदारेषु समानेषु स्मृतं व्रतं व्य
भिचाराद्वत्सरं स्त्री तदा शेषं समाचरेदिति। बृहस्पतिस्मरणात् समानेषु सवर्णेषु एतदुक्तं स्यात् उपलक्षणं बलात्सवर्णे
ऽनाशापन्नायाः। सैव स्त्री बलात्संमथ्य तु ज्ञातव्या उद्धमाननापि तत्सा प्राजापत्येन शुद्ध्यते स्यात् तत्तस्या ज्यावर्तेपर। अत्राश
क्तोऽस्य शूद्रगामी बालनकामितानारी सवर्णेन कथंचन। प्रायश्चित्तं त्रिरात्रं वित्तस्याऽर्धमादिशेदिति। प्रातिलोम्यव्यवा
ये तु स्त्रीणां पृथक् प्रायश्चित्तं। तत्र महापातकप्रकरणे वासिष्ठे दर्शितं सैवात्र न प्रायश्चित्तान्तरमभिहितं। ब्राह्मण्यकामा
न्नगच्छेत्क्षत्रियं वैश्यामथवा। गोमूत्रयावकमासेनात्र दृष्ट्वा विशुध्यति। कामतो द्विगुणं षड्भिः शून्यमातः। ब्राह्मणीक्षत्रियावै
श्यसवायामतिकृच्छ्रपादं चान्द्रार्द्धं प्राजापत्यं शूद्रायाः शूद्रासवान प्राजापत्यं ब्राह्मण्या राजन्यवैश्यासवायां चाहोरात्रं चान्द्रा
र्द्धमिति बृहस्पतिः। विप्रा शूद्रेण संसक्ता न चेत्तस्मात्प्रसूयते। प्रायश्चित्तं स्मृतं तस्याः चान्द्रं वा चान्द्रायणत्रयं चान्द्रायणार्द्धं च २७८
कृच्छ्रं च विप्राया वैश्यसंगमे। चान्द्रं चान्द्रायणस्यार्धं तस्याः क्षत्रियसंगमे। क्षत्रिया शूद्रसंपर्के चान्द्रं चान्द्रायणद्वयं चान्द्राय

णं स्मृतं चान्द्रं तु चाण्डालश्वपचसंगमे। शूद्रं गच्छन्त्याः चारद्वैश्या चान्द्रं चान्द्रायणं त्रयं। आनुलोम्येन कृच्छ्रं तत्कृच्छ्रं पादावरोपितमिति॥
गर्भे क्षत्रियेण तु चान्द्रं तु विंशतिमितः। विप्रगर्भे परिपाकः स्यात् क्षत्रियस्य तथैव च। एवं वैश्यपराक्रमवैश्यस्याकामकारतः। शूद्रगर्भिणी
वत्स्यागर्भे पीडा लोके जायते यतः। गर्भस्रावे वक्ष्यमाणादा पिबेत्स्वर चान्द्रायणत्रयमिति। कामकारे द्विगुणं। गर्भस्रावे चान्द्रायणत्रयं। शूद्र
गर्भस्रावे एव। यदा तु शूद्रगर्भे प्रसवस्तदा प्रायश्चित्तं नास्त्येव। तथा च वसिष्ठः। ब्राह्मणक्षत्रियविशां नार्यः शूद्रेण संगताः। अप्र
जाता विशुध्यन्ति प्रायश्चित्तेन नेतराः इति। यदा सा शूद्रगर्भं विभ्रती चरति न दा प्रसवात्तरकाले प्रायश्चित्तं। अतिवर्णेन तु या नारी
सा मताक्रम्य कामिना। प्रायश्चित्तं न कुर्यात्सा यावद्गर्भं न निःसृतं। जाते गर्भे व्रतं पश्चात् कुर्यान्मासं तु यावकं। न गर्भे दोषस्त
त्रास्ति संस्कार्यः स यथाविधीति स्मरणम् तु। आक्रम्य बलात् रक्षा सर्वे विधेयं युक्तं न द्विगुणं यदा तु प्रायश्चित्तं न विकीर्षेत् दर्पा
दिना तदा नाभ्यधिकस्मादिकं तन्निमित्तं गच्छेत्। अन्त्यजगमने तु स्त्रीणां प्रायश्चित्तं विशेषः स्मृत्यन्तरे। रजकव्याधशैलूषवेणु
चर्मोपजीविनः। ब्राह्मण्येतान् यदा गच्छेदकामादिंद दद्यात्। चण्डालं पुल्कसं म्लेच्छं श्वपाकं पतितं तथा। ब्राह्मण्यकाम
तो गत्वा चान्द्रायणचतुष्टयं। केशसंशिरः स्वंवपनं कुर्यात् भुंजीयाद्यावकादनं। त्रिरात्रमुपवासः स्यादेकरात्रं जले वसेत्। आ
त्मनाऽसंमिताऽऽपागामाया दकर्दमे। तत्र स्थिता निराहारा सा त्रिरात्रं ततः। क्षिपेत् क्षीरवृक्षादिजनामूलपत्रं वा कुसु
× मतो द्विगुणं कल्प्यं अकामतः प्रायश्चित्तान्तरमपि स्मर्यते। चण्डालेन तु संपर्के यदि गच्छेत् कथंचन। अतिकृच्छ्रं

सुमेफलं।क्षीरं स्नुवर्णसंमिश्रं क्वाथयित्वा ततः पिबत्।एकनक्तं चरेत् स्यश्चाद्यावत्पुष्पवती तावत्।वहिः स्नावत्तु निव
सेद्यावद्धरतितद्व्रतं।प्रायश्चित्तं तत्र तस्याः संक्रियाद्ब्राह्मणभोजनं।गां दद्याद्दक्षिणां दद्यात्सुवर्णं स्वार्थं सुतुलं वा व्रवीदिति
एतच्चाकामतः सकृद्गमने।कामतः सकृद्गमने तु ऋष्यशृंगः।संसृष्टस्याद्यथाशौतियसी तत्र श्चांद्रं समाचरेत्।अन्नं वर्जितं तु
युवतिः संसृष्टश्चावीत्यायानिना।प्रायश्चित्तेन सा शुद्ध्यद्यावद्गर्भो निनिःसृतः।न प्रवासं चरेत् ऋत्यन्नं वा गंधप्रसाधनी।नश्ययी
तसमं तत्र निवा भुंजीत वाधोविः।प्रायश्चित्ते गतगर्भे विधिवद्ब्राह्मकं चरेत्।हिरण्यमथवा धेनुं दद्याद्विप्राय दक्षिणा
मिति।कामातोत्पजसंसयंत्यासुउशनाः।अंत्यजनउसंपर्कोजाजातमेथुनत्वात।प्रविशसी प्रदीप्ताग्नौ मृत्युनास
विशुध्यतीतियदा तु प्रायश्चित्तं न कारोतिद पादिनातदा तु ह्निगनांकनीयवधमवा।अन एव परासरः।हीनवर्णोपि तुत्रा
यासोक्याबध्यस्तावदिति।वस्तेत्रस्नासिकादि कर्त्तनमित्यपरार्को।अरुषस्यीत्पजागमान दूदसंवर्त्तः।रजकव्याधशैलू
षावणुचर्मोपजीविनां।स्त्रियाविप्राय दागाछ चांद्रं चांद्रायणं चरेदिति।अत्राथ शंकस्यापस्तंबाक्तौ।अकामतः स्त्रि
यागत्वा पराकं व्रतमाचरेदिति।रतः सकाद्वाग्निर्दाउशानातापाक्तौ।केवर्त्तोरजकौ वेवावणुचर्मोपजीविनौ। २१९
ज्ञात्वा पत्यविधानं नत्र ब्राह्मणोकनश्यघ्नतीति।कपालिनी केवर्त्ताद्विज्ञानाद्ज्ञानाद्वाल्वा सउशनसाक्तौ कापा

लिकान्नात्मनः शूर्णीत नारीगामिनी तथा।ज्ञानात्तप्तकृछुमुद्दिष्टमज्ञानादैंदवद्वयमिति।अज्ञानाचांडाल्यादिगमनाधि
करवाद्शवापिकिंतानिवार्कं दृष्टो।चंडाल्यां गमनमाराध्यगुरुतल्पव्रतं चरेदिति।ज्ञानाचापस्तंबाकं अंत्यजायां प्रसूत
स्य निःचतिर्न विधीयते।निर्वासनं तत्रैकस्य तस्य कार्यमसंशयमिति।एवमत्यान्यपि वचनानि विषयविशेषव्यवस्थापन्या
नि।पारदार्यप्रसंगादन्यदपि किंचिदुच्यते।याज्ञवल्क्यः।रजकव्याधशैलूषवेणुचर्मोपजीविनः।एतासु ब्राह्मणो गत्वा च
रेच्चांद्रायणद्वयं।आपस्तंबोपि।म्लेच्छी नटी चर्मकारी।रजकी बुरुडी तथा।एतासु गमनं कृत्वा चरेच्चांद्रायणद्वयं।रजकश्च
र्मकारश्च नटो बुरुड एव च।कैवर्त्तमेदभिल्लाश्च सप्तैतेत्यजाः स्मृताः इति।चांडाल्यादिगमने गुरुतरप्रायश्चित्तत्वाद्गुरुत
ल्पप्रकरणप्रसंगाद्दर्शितं।उशनाः।बहूनामकधर्माणामकस्यापि यदुच्यते।सर्वेषां तद्भवेत्कार्यमेकरूपा हि ते स्मृताः
यत्र पुल्कसादिगमने प्रायश्चित्तविशेषानाम्नातस्तत्र चांडाल्यादिगमनप्रायश्चित्तं तादेव कर्त्तव्यं।रजक्यादिगमन
प्रायश्चित्तं तादृक् तत्सदृशीष्वपि कर्त्तव्यमित्यर्थः।सर्वत्रैव चांद्रायणद्वयं ब्राह्मणस्य कामतो रजक्यादिगमने तु उद्द
त्रियादीनीऊपादपादानं कल्पनीयं।अकामतस्तु ब्राह्मणस्य संवर्त्तः।रजक्यादि नियुक्तो वा अंत्यजां यो गच्छेच्चांद्रायणं चरे
त्।घृतात्यक्तस्तनाविया दित्यादिनियोगप्रकारमंतरेण भ्रातुर्ज्येष्ठस्य कनिष्ठस्य वा जायां गच्छन्नित्यर्थः।एतत्सकृद्

कामकारविषयं। कामकारतो गौतमोक्तं। परिवित्तिपरिवेत्तारौ संवत्सरं ब्राह्मणगृहे भुंजीतेत्येवमादि तत्प्रपष्टन्नायां
म नियुक्तागच्छेत्स्यादेवकनिष्टन्नायां वितं। अकामतःसकृत्स्वन्नायायामपि रजस्वलायां गमने याज्ञवल्क्योक्तं त्रि
रात्रं निष्टत्प्राकृपगम्यादकौ विशुध्यतीति। त्रिरात्रं त्रिरात्रोपवासो तत्र अकामतोभ्यासे कामतःसकृद्गमने च ज्ञाता त
प्पोक्तं। रजस्वलागमने सप्तरात्रमिति। कामतोभ्यासे स्वदेसंवादेनोक्तं। रजस्वलां तु यो गच्छेद्गर्भिणीं पतितां तथा। तस्य पापवि
शुध्यर्थमितिकृच्छ्रं विशोधनमिति कामतोत्यंताभ्यासे हारीतोक्तं त्रैवार्षिकं पादं स्याच्छूद्रहत्यायामुदक्यागमने तथेति। रज
स्वलास्तु परदारेषु गमने रजस्वलागमनप्रायश्चित्तं चेत्तदतिरजस्वलागमनप्रायश्चित्तप्रसंगाद्रजस्वलानामन्योन्यस्प
र्शप्रायश्चित्तमुच्यते। बृहद्वसिष्ठः। स्पृष्टे रजस्वलान्योन्यं सगोत्रा स्वजनान्योन्यं सगोत्रा त्वेककर्त्तृका। कामादकामतो
वापि सद्यःस्नानेन शुध्यतीति। सवर्णस्त्रिपसपत्नीविषयं उमार्कंडेयः। उदक्या उसवर्णायास्पृष्टा स्यादुदक्यया। त
स्मिन्नेवाहनि स्नात्वा शुद्धिमाप्नोत्यसंशयः इति। एतवाकामतः कामतस्तु कश्यपोक्तं। रजस्वलासंस्पृष्टा ब्राह्मणी ब्राह्म
णी यदि। एकरात्रं निराहारा पंचगव्येन शुध्यति। एवं क्षत्रियादीनामपि एतद्वप्रायश्चित्तं सवर्णे देमि स्नानानंतरं
कर्त्तव्यं तथा वाग्रवक्ष्यात। यत्तु सवर्णे इत्यस्थ्यविवचनीतादेविकापैतृककर्मविषयं। बृहद्वसिष्ठः। स्पृष्टा रजस्व

२८०

२४

डाक्टर भाऊदाजी इत्यस्य स्मारकम्
Dr. BHAU DAJI MEMORIAL

लान्योन्यं ब्राह्मणी शूद्रजापिवा। कृच्छ्रेण शुध्यात्पूर्वा शूद्री दानेन शुध्यति। दानेनापादकृच्छ्रं डान्या प्रायश्चित्तं निष्कद्वयं
रादानेन। तथा स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी क्षत्रजापिवा। पादहीनं चरेत्पूर्वा त्रिपादं तथोत्तरा। स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्म
णी क्षत्रिया तथा। कृच्छ्राद्वतिशुध्यात्पूर्वा त्रिरात्रभ्वनदर्द्दितः। स्पृष्ट्वा रजस्वलान्योन्यं क्षत्रिया शूद्रजापिवा। उपवासैस्त्रिभिः पूर्वा त्रिहाराच्च
वोत्तरा। स्पृष्ट्वा रजस्वलान्योन्यं क्षत्रिया विट्जापिवा। त्रिरात्रात्शुध्यते पूर्वा विहारात्रेणावोत्तरा। स्पृष्ट्वा रजस्वलान्योन्यं विट्पी शूद्री तथैव च
त्रिरात्रात् शुध्यात्पूर्वा त्रिरात्रावरि नद्वयात्। वसानिनी कामतःस्यादशुद्धिरपाक्षुरा तनीति। अकामतो हंदद्धि पक्तौ द्रष्टव्यौ। रजस्वली दीनवं
ससारि रजस्वला स्पृष्टा न तावदश्नीयाद्यावत्शुद्धा स्यात् सवर्णामिधिकवर्णां वास्पृष्ट्वा सद्यःस्नाचा शुध्यतीति। बृहद्वसिष्ठः। पतितां त्यश्वपा
कन सीस्पृष्ट्वा ष्टावद्रजस्वला। तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत्। उपवासनरा जादोषादिना व्यतिक्रम्यनी। बत्यर्थः। एवं सर्व
त्रापि दिनव्यतिक्रमाय अत्र प्रायश्चित्तमाम्नातं तथा प्रथमह्नि त्रिरात्रं स्याद्द्वितीये व्यहमेव च। आहोरात्रं तृतीये ह्नि परतो नक्तमाचरेत्। स्पृष्ट
याद्वि श्यास्पृष्टा शुना स्वशहमाचरेत्। एतत्कामतःस्यादशक्ति कामतो विज्ञायनोक्तं। रजस्वला संस्पृष्टा चंडालेन स्पृश्य वायसेन तावत्रिष्ट
न्निराहारा यावत्कालनशुध्यतीति। राजादत्र निनिमित्त त्रिरात्ररूपका कालो नत्यर्थः। अत्रारात्रयास्नानेवाक्तौया द्यौ। रजस्व
लासंस्पृष्टायामकुक्कुटश्वकरैः। श्वभिः स्नात्वा क्षिपन्नावया वद्यंद्रस्य दर्शनमिति तथा। रजस्वलाउच्छिष्टं जानाद्यौ त्यजादीतस्पृ

डाक्टर भाऊदाजी इत्यस्य स्मारकम्
Dr. BHAU DAJI MEMORIAL

त्र घटि। गोमूत्रयावकाहाराः षड्रात्रेणैव शुध्यति। अशक्तौ कांचनं दद्याद् द्विप्रस्था वापि भोजनं। उच्छिष्टायाः परस्य शनिस्त्रि-
उच्छिष्टोच्छिष्टसंस्पृष्टा कदाचित्स्त्री रजस्वला। कृच्छ्रेण शुध्यते पूर्वा शूद्रा दानेनोपोषिता। श्वउच्छिष्टा। मार्कण्डेयः। द्विजान् कथंचिदु-
च्छिष्टान् द्विजस्त्री यदि संस्पृशेत्। प्रावा उच्छिष्टश्चाहोरात्रं मूढा उच्छिष्टस्य दद्यादिति। आबिडीमूत्रपुरीषादिना। तथा शूद्रसूतकसंप-
र्कं त्र्यहं दृष्ट्वा कथं न वनात्। नास्नानकालमश्नीयाद्दुश्चान्ती द्वादशरात्रेण चरेत्। अस्नानकाले चतुर्थदिनपर्यन्तं मनुः। अप्रायीत समुत्पन्नमल-
वद्वाससी यदि। अनिर्णेकं त्रिःस्याद्दिनत्रयमभोजनी। अप्रायत्नसूतकाद्याशौचमलवद्वाससी रजस्वला। अनिर्णेकं तु
त्रिःसद्यःस्नानेनाभोजनी। एतच्च बालापत्याविषयं। अशक्तविषयं वा। अबालापत्या वास्तु दिनत्रयं भोजनाभावः। दिनत्रयमित्य-
वसिष्ठकालापलक्षणं स्नानप्रकारश्च। क्लिकाने नैमित्तिकस्नानप्रकरणे निर्दिष्टः। परिवित्तिप्रायश्चित्तानि परिवेदनप्रकरणे निर्दि-
तानि। वार्धुष्यलवणक्रियायास्तु मन्वाद्युक्तगोवधप्रायश्चित्तानि शक्त्याद्यपेक्षया योज्यानि। अथ स्त्रीशूद्रविट्क्षत्र-
विधस्तत्र कर्मसाधनत्वादिगुणशालिन्या व्रतिनारितब्राह्मण्यादिस्त्रीवधे हारीतो त्र्यहं दृष्टवा। षड्वर्षाणि राजन्यप्राकृतं ब्रह्म-
वर्यं त्रीणि वैश्यप्रसार्द्धं शूद्रक्षत्रियवद्ब्राह्मणीभ्रूणवैश्यवत्क्षत्रियायां शूद्रवत् वैश्यायां शूद्रीं हत्वा नव मासानिति॥ प्राकृतं ब्रह्म- २०७ २८ २६
ब्रह्महत्याप्रायश्चित्तं। एतच्च कामतो वधे। अकामतस्त्वर्द्धं माषप्रतिवारादिदोषदुष्टब्राह्मण्यादिवधे त्वर्द्ध-

त्रैकामतस्त्वर्धं प्रावत्तसोक्तौ। अनृतुमतीं ब्राह्मणीं हत्वा तु ब्राह्मः षण्मासान् चरेत् क्षत्रियीं हत्वा षण्मासान् मासत्रयं वा वै-
श्यां हत्वा मासत्रयं सार्द्धमासं वा। शूद्रीं हत्वा मासार्द्धं मासं सार्द्धं विंशत्यहानि वेति। अत्र सर्वविकल्पः पूर्वः पूर्वः
कामकारविषयः। उत्तर उत्तर अकामकारविषयः। प्रातिलोम्येन क्षत्रियादिनिर्वर्तितानां ब्राह्मण्यादीनां व-
धे मनुयाज्ञवल्क्योक्तगोवधप्रायश्चित्तानि शक्त्याद्यपेक्षया योज्यानि। मिश्रीत्यजातिप्रसूतानां ब्राह्मण्यादीनां कामतो
वधे ब्रह्मगात्रत्रिंशत् प्रतिलोमप्रसूतानां स्त्रीणां मासा वधे स्मृताः। अंतरप्रभवानां तु सूतादीनां चतुर्द्दिश इति। अस्यार्थः
प्रतिलोमप्रसूतानां स्त्रीणां वधे चतुर्द्दिश षण्मासाः स्मृताः। अंतरप्रभवानां सूतादीनां च वधे सूतादिवधविषयं वक्ष्यमाणं
वद्व्रतं। ब्राह्मणीहनने षण्मासाः। क्षत्रियाया हनने च वारः। विश्पाया द्वाविति। शूद्राया हनने मासिकव्रतं कल्प्यं। अ-
कामतः स्त्रावृत्तिविषयं याज्ञवल्क्योक्तं दुर्वृत्तब्रह्मनृपविट्शूद्रयोषाः प्रमाप्य तु दृतिं धनुर्बस्तमविं क्रमाद्दद्याद्विशुद्ध-
य इति। दृतिश्चर्ममयं जलपात्रं। बस्तश्छागः। अविर्मेषः। इदं चान्यत्तदरिद्रस्य तपस्यसमर्थस्य। एतद्धि परीतस्य उ शक्त्य-
पेक्षया यैव दानतपसी कल्प्ये। विप्रा हनने किंचिद्देयं वैशीकनकिं चिदिति गौतमस्मरणात्। अष्टसु प्रुष्टि-
त्वं किंचित्। अथवा स्वल्पजलीं विप्रां हत्वाजलं स्पृशन्नाहितां गिरः स्मरणात्। निर्द्धनस्य मनुस्मृतिरिति तस्य वा अष्टमु

ष्टिदानं जलदानं च। इतरस्य किंचिदधिकं कल्प्यं। एवमन्यान्यपि विषयविशेषेणोह्यानि॥ अथ क्षत्रियादिवधे
तत्राकामतो जातिमात्रक्षत्रादिवधे याज्ञवल्क्यः। वृषभैकसहस्रा गा दद्यात् क्षत्रवधे पुमान्। ब्रह्महत्याव्रतं वापि वत्स
रत्रितयं चरेत्। विश्पहाऽब्दं चरेदेतद्दद्याद्वैकशतं गवां। षण्मासान् शूद्रहाप्येतद्दद्याद्दशाथ वा। एकवृषभाधिकसह
स्रा गा दानं वा त्र्यब्दं व्रतं वा क्षत्रवधे। अयं तु निर्धनादस्य तु वृषभैकसहस्रदानं इतरस्य त्र्यब्दं एवं विश्पहननेपि व्यवस्था
एतत् ब्रह्महत्याव्रतं। धनुर्वित्तप्रसूतानः सवनस्थः मनुः। अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः। वृषभैकसहस्रा गा
दद्यात्सुचरितमात्मनः। त्र्यब्दं चरेद्वा नियतो जटी ब्रह्महणो व्रतं। अकामत ईषद्वृत्तस्थविट्शूद्रवधे मनुः। विश्पेष्टमांशो
वृत्तस्थे शूद्रे ज्ञेयस्तु षोडश इति। द्वादशवार्षिकापेक्षयाष्टमांशः सार्द्धवर्षं षोडशांशो नवमासाः एतद्द्विगवलंबने
सार्द्धवर्षं वृत्तस्थ्यमीषद्वृत्तस्थस्तत्र हननान कल्प्यं। वृत्तस्थरूपं च स्मृत्यंतरे दर्शितं। गुरुपूजा घृणा शौचं सत्यमिंद्रियनिग्रहः।
प्रवर्त्तनं हितानां च तत्सर्वं वृत्तमुच्यत इति। कामतस्तु जातिमात्रक्षत्रियादिवधे हारीतः। ब्राह्मणः क्षत्रियं हत्वा षड्व
र्षाणि व्रतं चरेत्। विश्यं हत्वा चरेदेवं व्रतं त्रिवार्षिकं द्विजः। शूद्रं हत्वा चरेद्वर्षं वृषभैकादशाश्च गा इति। कामतःआत्रियक्ष ~~२७८~~
त्रियादिवधेपि एवं तुरीयानी क्षत्रियस्य वधे ब्रह्महणो व्रतं। अर्द्धं विश्पवधे कार्यं तुरीयं वृषलस्य हि चेति। यत्तु वसि २८२

ष्ठः ब्राह्मणो राजन्यं हत्वाष्टौ वर्षाणि व्रतं चरेदिति। तत्किंचिन्न्यूनगुणहननं। नववार्षिकासमर्थस्य वा। एतद्वत् क्षत्रियादिहंतु
ब्राह्मणस्य क्षत्रियादिहंतॄणां क्षत्रियादीनां पादपादहान्या कल्पनीयं। एवमुत्तरत्रापि। अकामतश्चात्रिययागस्थक्षत्रियागस्थक्षत्रिया
दिवधे गोतमाः। क्रतुदानतपसां समुच्चयः ब्राह्मणस्य राजन्यवधे षड्वार्षिकं प्राकृतं ब्रह्मचर्यमृषभैकसहस्राश्च गा दद्याद्वैश्यवधे त्रैवा
र्षिकमृषभैकशताश्च गा दद्यात्। शूद्रवधे संवत्सरिकमृषभैकादशाश्च गा दद्यादिति। शूद्रस्यात्रियत्वं द्विजशुश्रूषापंचमहायज्ञमंत्रपाठ
श्च यागस्थत्वं पंचमहायज्ञादिकरणं। अत्र च किंचिन्न्यूनगुणस्य क्षत्रियस्य क्षत्रियस्य वधे गुणाधिकाया वैश्यशूद्रयोश्च वधश्रीखात्कौ। पूर्व
वद्मतिपूर्वं वृत्तस्थं वाऽस्थितं प्रमाप्य द्वादशषट्त्रीन् संवत्सरान् व्रतान्यादिशात्तेषामंते गोसहस्रं तदर्द्धं तस्यार्द्धमर्द्धं वा दद्यात् सर्वेषा
मानुपूर्व्येणेति। शूद्रविट्क्षत्रादिहननं तु ब्राह्मणापेक्षया न्यूनं क्षत्रियापेक्षयाधिकमित्येवं प्रकारेण कल्पनीयं। शूद्रविट्क्षत्रादि
हननं तु ब्राह्मणापेक्षया याज्ञवल्क्येन दर्शितं। विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां विशः स्त्रियां। अंबष्ठः शूद्र्यां निषादो जातः पारशवोपि वा
वैश्यासु शूद्र्यां राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ। वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृत इति॥ विन्नासु विवाहितासु। अथ व
धप्रायश्चित्तप्रसंगात्प्रतिलोमवधप्रायश्चित्तं॥ तत्र काकतः सूतादिवधे शातबः। सावर्णामवत्तष्टानो वधप्रात्यकं चांद्रायणमिति। अत्रयद्य
पि प्रात्यकं चांद्रायणमिति सामान्येनाभिहितं। तथापि सूतापेक्षया वैदेहकादीनां न्यूनत्वात् दानादि वा चांद्रायणं कल्प्यं। अ

तएव निबंधीनारथसूतवाक्षसीत्ससँवीद्रायणीविदेहकस्य वाधपादानैबीडालस्य वाधहैमागधस्य पादानैत्तत्र शि
दद्दयीआयोगवाधयद्दमित्युक्तं॥ अकामानावाधअंगिरसोक्तः सर्वस्त्विजानीगमनेनाजानसैप्रमापएा॥ पराकेण
विशुद्धिःस्यादित्यंगिरसत्राषितमिति॥ अत्रापिसूतादिषु पूर्ववाद्वद्वीवस्था। आद्यत्रासूतादि वधि ब्रह्मगङ्गात्रि।
त्रैतरप्रजवानीत्रसूतादीनी वत्र द्विषिडिति। अत्रमासाइत्यनुवर्त्तते। अहत्रासूतस्यावाधएमासाः। वैदेहक
स्य वाधवचारः बीडालवाधद्वौ मागधवाधवचारः त्त्रत्रिमासद्वयी॥ आयोगववाधपिमासद्वयामवासूतादि
स्वरूपमाहयाज्ञवल्क्यः। ब्राह्मण्यांक्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा। शूद्राज्जातस्तु चंडालः सर्वधर्मबहिःकृतः। क्षत्रि
यामागधंवैश्याच्छूद्रात्क्षत्तारमेव च। शूद्रादायोगवं वैश्याजनयामासवैसुतं। माहिष्येण करिण्यांतु रथकारः प्रजायते। अ
ससैतस्तु विज्ञेयाः प्रतिलोमानुलोमजाः। निंदितार्थोपजीवानमनुयायोगी खराध्यक्ष्याः पपातकसामान्यप्रायश्चित्तानिजाति
भ्रंशकराद्युपपातकानाम्यान्यानि तथा नास्तिकानानास्तिकायोजनाप्रकारः। अत्यैतान्निनिवाशन बहुकालंनास्तिक्यात्यासन्
ीस्वाकृतनास्तिकानास्तिकवृत्तिः कृतघ्नः कूटव्यवहारी मिथ्याभिशंसीत्यातपेत्रसैवसरं ब्राह्मणाहत्रिदौवरसे
रिति। अस्मिन्नेव विषये हारीतोऽक्रमपि। तत्रस्मृत्यंतरंतावगैतव्यो। अन्यासतूपपातकसामान्यप्रायश्चि। २७९ २८३
२८

श्चित्तानिसमत्नकरणेउवासिष्ठः। नास्तिकः कृच्छ्रंद्वादशरात्रंचरित्वाविरमन्नास्तिक्यात्। नास्तिकवृत्तिस्तु अतिकृच्छ्रमितिनास्ति
कवृत्तिर्वदनिंदकजीवी॥ अथ व्रतलोपः। अत्र व्रतलोपोनामावकीर्णित्वं। अवकीर्णिस्वरूपंप्रायश्चित्तमाहयाज्ञवल्क्यः। अ
वकीर्णीभवेद्गत्वा ब्रह्मचारी च योषितं। गर्दभंपशुमालभ्य नैरृतंसविशुध्यति। निरृतिर्देवताकंगर्द्दभमालभ्ययागः कर्तव्य
इत्यर्थः। पशुयागयथावपादिहोमः क्रियातेनद्वदत्रापिकर्त्तव्यः। अत्र विशेषमाहवसिष्ठः। ब्रह्मचारी चेत्स्त्रियमुपेयादरण्ये चत्व
ष्पाथे लौकिकाग्नौ राक्षादैवतंगर्द्दभंपशुमालभेत। नैरृतंवाचरुंनिर्वपेत्तस्यजुहुयात्। कामायस्वाहा कामकामायस्वाहा
निरृत्यैस्वाहा राक्षोदेवताभ्यःस्वाहेति पाशारत्नावचरुः मलुः। अवकीर्णीचकाणेनगर्द्दभेनचतुष्पाथे। पाकयज्ञवि
धानेनयजेतनिरृतिंनिशि। ^ हुत्वाग्नौविधिवद्धोमानंततश्चसमित्यृचा। वातेंद्रगुरुवह्नीनांजुहुयात्सर्पिषाहुतीः। का
ननपरिसमूहनपर्युक्षणादीतिकर्तव्यतया। प्रधानाहुतिभ्यः पूर्ववातायस्वाहा इंद्रायस्वाहा वह्नयेस्वाहादेवेतंचतुर्भि
मैंत्रैराज्यहोमः। प्रधानहोमोत्तरंसमासिंचंत्वित्यृचाहोमः। इत्यपरार्कस्मृतिमंजर्योः। प्रधानहोमानंतरंसमासिंच
न्त्वित्यनयर्चाघृतादीनांसर्पिषाहुतीर्जुहुयादिति। अत्र च विकल्पः। रात्रिश्चामावास्यायाः कालः। तथा तैत्तिरीयको
यायो ब्रह्मचार्यवकिरेदमावास्यायांरात्र्यामग्निंप्रणीयेत्यादि। इदंचाशक्तस्याशक्तस्यपुनराश्वत्रियब्राह्मणजाया।

× मत्तारतमः स्मकै अ तरुस्यदि उम्नतः अनिक मं यनस्याह. धर्मेहो ब्रह्मचारिणः। पाकयज्ञविधौ॥३५

यीं।श्रोत्रियपत्नीं विश्यायीं वावकीर्णिचि गोतमा मात्रोक्तंप्रः सन्तु विलोगर्द्दभपशुश्चरुं चा गिर्द्दीत्तेनावकीर्णी निर्ऋति
यजेत् श्वाध्ययाजनतस्याजिनमूर्द्ध्ववालं परिधाय लोहितपात्रः सप्तगृहान् भैक्षं चरन् कर्म विख्यापयन् संवत्सरेण शुद्ध्येदिति।
अत्र त्रिषवणस्नानमकालाभोजनं च मनूक्तं द्रष्टव्यं। गोतमाद्युक्तेति कर्त्तव्यतानुवृत्तो शौखलिखितोक्तं गुप्तायां वैश्या
यामवकीर्णः संवत्सरं त्रिषवणमनुतिष्ठेत्। क्षत्रियायां द्विवर्षं ब्राह्मण्यां त्रीणि वर्षाणीति। एतच्च गुणवत् श्रोत्रियपत्नी
गमनविषयं। शूद्रायां षाण्मासिकं कल्यं ईषच्च निवारिणीं सर्वगि राज्ञो। अवकीर्णिनिमित्तं ब्रह्महत्याव्रतं चरे
त्। चीरवासा षण्मासानिति। चीरं वस्त्रखंडः। अत्र च तेनत्य निवरितास्तु शौखलिखिताक्तो। वृषल्यामवकीर्णः सचैल
स्नानं उदकुंभं दद्यात् ब्राह्मणाय। वैश्यायां चतुर्थकालाहारो ब्राह्मणान् भोजयेत् यवसभारं च गोभ्यो दद्यात्। क्षत्रिया
यां त्रिरात्रमुपोषितो घृतपात्रं दद्यात्। ब्राह्मण्यां षड्रात्रमुपोषितो गां दद्यात्। गो अवकीर्णः प्राजापत्यं चरेत् खंडायाम
वकीर्णः पलालभारं सीसमाषकं च दद्यादिति। एतच्च प्रायश्चित्तं द्विजातिमात्रविषयं। यदाह शांडिल्यः। अवकीर्णी द्वि
जो राजा वैश्यश्चापि खरेण तु। इष्ट्वा भैक्षाशिनो नित्यं शुद्ध्यन्त्यब्दात्समाहिता इति। यश्चा सौतागमीतरेण कामता २८५
रेतो विसृजति दिवास्वापादिना प्रायश्चित्तार्थं गच्छन् ब्रह्म वयं विनवकीर्णी। तस्यागर्द्दभपशुर्वाले नैऋतचरुर्वा। यदाह व

सिष्ठः। एतदेव रेतस्कंप्रयत्नात् स्याग्निदिवास्वप्ने व्रतान्तरितेविवमिति। एतदेव योगमात्रमवा रात्रिस्वप्ने स्खलनेन च म
नुः। स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः। स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत्। वानप्रस्थादिषु विशेषमाह
शांडिल्यः। वानप्रस्थो यतिश्चैव खंडने सति कामतः। पराकत्रयसंयुक्तमवकीर्णिव्रतं चरेदिति। खंडनं ब्रह्मचर्यखंडनं।
अवकीर्णिप्रसंगादन्यदपि किंचिदुच्यते। संवर्तः। सन्यस्य दुर्मतिः कश्चित् प्रत्यापत्तिं व्रजेद्यदि। स कुर्यात्कृच्छ्रमश्रांतः षण्मासान्
प्रत्यनंतरमिति। प्रत्यापत्तिर्गार्हस्थ्यपरिग्रहः। पराशरश्च। यः प्रत्यवसितो विप्रः प्रव्रज्यातो विनिर्गतः। अनाशकनिवृत्तश्च
गार्हस्थ्यं चिकीर्षति। स चरेत् त्रीणि कृच्छ्राणि चांद्रायणानि च। तिषाण्मासिकाशक्तो चांद्रायणानि। नदशाक्तो कृच्छ्राणि। यस्तु मरणसं
न्यासी परमहंसाख्यः। तथा च प्रजापतिः। तत्र परमहंसा नाम नदीपुलिनश्मशानादिशायिनः हरितशाद्वलभूशायानः सम
ऊर्ध्वमशीरकौपीनकषायवांस्तु प्राणान्परित्यजन्ति स परमहंसो नामेति। अस्य मरणनिकृत्तस्य यामान्तौ जलाग्न्यादि
धनत्रष्टाः प्रव्रज्यानाशकच्युताः। विषमप्रपतनप्रायशस्त्रघातहताश्च ये। नवैते प्रत्यवसिताः सर्वलोकबहिष्कृताः। चां
द्रायणेन शुद्ध्येति तप्तकृच्छ्रद्वयेन वा। शास्त्रोपपत्तयांचांद्रायणेन सर्वत्र कृच्छ्रद्वयेन वा। शस्त्रघाति॥ यः शास्त्रेणात्मानं
व्यापादयति स चेन्मृतस्तदा तत्पुत्रादिभिः त्र्यब्दं चरितव्यं तदा खनिवकर्तव्यमित्यर्थः। एवं शास्त्राविहितमार्ग

णात्मत्यागं द्रष्टव्यौ। अत्राशक्तो वसिष्ठोक्तं द्वादशरात्रं। आत्मदहनाध्यवसाये त्रिरात्रं जीवन्नात्मत्यागी कृच्छ्रं द्वाद
शरात्रं चरेत् त्रिरात्रं वोपवसेदिति। आपस्तम्बः। विनिवृत्ताश्रयानाशमाशाद्विचलितात् ततः प्राजापत्यनशुध्य
त्तु तस्माद्विपापे कर्मणिः। न तु तिगमानविनिश्चष्टत्यर्थः। प्रासंगिकं परिसमाप्य ब्रह्मचारिविषयं किंचिदुच्यते। गु
रुतरकार्यव्यग्रतया लिप्याग्निकार्यलोपे त्वर्कं सप्तरात्रमकरणया ज्ञवल्क्योक्तं।। निद्राग्निकार्यत्यागे तु सप्तरा
त्रमनातुरः कामावकीर्ण इत्याज्याहुती जुहुयादाहुतिद्वयं उपस्थानं ततः कुर्यात् संमासिंचत्वनेन तु। कामावकीर्णो
स्म्यवकीर्णोस्मि काम कामाय स्वाहा कामावपन्नोस्मि काम कामाय स्वाहेति होममंत्रौ द्वयमात्रं मासिंचंतु म
रुतः समिंद्रः संबृहस्पतिः। संमायमग्निः सिंचंतीयशासा ब्रह्मवर्चसानस्तुपस्थानमंत्रः। यदा तु कार्यविषयव्याव
पित्तिद्वाचरणमग्निकार्यं वा त्यजति तदा मनूक्तं।। अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेदिति यदा त्वेककालम
काहादा त्यजति तदाहारीतोक्तं।। ब्रह्मचारी संध्यामनुपास्याप्रक्षितः। सावित्र्याः सहस्रं दिनमुपतिष्ठेत्।।
उक्तस्याग्निकार्यं व्रातपत्याहुत्वा नीतं संपाद्य प्रक्षिते कुर्यादिदं त्यजतीति। पुनर्मनां व्रतपतीत्यामिति।। उपप्र
तः स्थितः सूर्यमुपस्थानं। अग्ने व्रतपा न व्रतं चरिष्यामीति व्रतपतीश्वनीतमग्निकार्यादिकमुपस्थितं क्रम।। २८५

३

प्राप्तमथवा सूर्यमुपस्थानं अहन्यतीत एकदिनाभ्यासात् पुनर्मनः पुनरायुर्म आगादित्यादि मनुः। दिनद्वयादिषु स्थितो
त्पतादेव द्विगुणं त्रिगुणं वा सप्तरात्रपर्यंतं कल्प्यं। सप्तरात्रानंतरमवकीर्णिव्रतान्यवज्ञातिशक्त्याद्यपद्मया कल्प्यनिता
निगुरूणि लघूनि च स्वबुद्ध्या दर्शिनानियाज्ञोपवीतादिनाशे पि हारीतः। मनो व्रतपती निश्चाम रवलादंडाजिनयज्ञोपवीतावपतत्वा
शे भुवस्तत्त्वसावज्याहुतीर्हुत्वा पुनर्यथार्थं प्रतीयादसत्प्रतिग्रहात्तजनक्वादितिनिमुक्तो वीतादिवाश्वाप्रस्वेदाननग्नश्चोदर्श
ननग्नस्नानमस्मशानमाक्रम्य हत्यादीश्चारुह्य प्रत्यावानामविनाशं निरव जुहुयादग्न्यस्समिधानस्थावरसरीसृपादीनां वधाद्वा देवहडन
मिति लत्वाण्डीति राज्यं जुहुयान्मणि वा सागीवारीनीन प्रतिग्रहे सावित्र्यष्टसहस्रं जपेदिति। मनो व्रतपतीत्तिरिति मानाज्याति
रित्यादि मनालिंगानि त्वमग्ने व्रतपा असि अस्मीत्यादि व्रतलिंगानि अथ यथा यं सीमं त्रकमन्यकृदिति ते निमुक्ता सुमय स्मिन्नस्मामतिप्र
मय स्मिन्तु इति चात्र श्रुमानतिनिमुक्तानकृदितानो यथाक्रममित्यमरः। अग्न्यसमिंधने एककालाग्न्यसमिधाने याज्ञवल्क्यः।।
यान्मधारतं इत्याज्यं स्कन्नं रातानि मंत्रायता स्नानीतरं स्तुवा मर्ध्यंतनानामिकया स्पृशेत् यान्मधारतः पुनः
मामि विंद्रियमिति द्वोमंत्रो। तनारतसा व्रनाम्निमिकयारतः स्पृष्ट्वा स्नानीतरादिकं स्पृशेदित्यर्थः। कचनातान स्पृशे गु
ह्यांनतिकथर्यं तिश्रगुष्टानामिकाभ्यां स्नानीतरं स्पृशेदिति मरीचिः। ब्रह्मसूत्रं विनाश्नुंक्ते विण्मूत्रं कुरुते यथा गाय

च्चरेत्सहस्रेण प्राणायामैर्न शुद्ध्यति। अत्र यज्ञोपवीतादिनाशाया निप्रायश्चित्तानि तान्यनिषिद्धानि गृहस्थादीनामपि ज्ञे
वेति। श्वादिमांसभक्षणे वसिष्ठः। ब्रह्मचारी चेन्मांसमश्नीयादुच्छिष्टभोजनीयं कृच्छ्रं द्वादशरात्रं चरित्वा व्रतशेषं समापयेन्नास
त्स्वप्नाध्यायीत कामं गुरोरुच्छिष्टं तत्र स्वजार्थं सर्वं प्राश्नीयादिति मांसग्रहणं मधुनोऽप्युपलक्षणार्थं तथा च याज्ञवल्क्यः। मधुमांसाशने कार्यः
कृच्छ्रः शेषव्रतानि च। प्रतिकूलं गुरोः कृत्वा प्रसाद्यैव विशुद्ध्यति। तत्र त्रयं गुरुः कृत्यान्नियात प्रहितयदीति। प्रायश्चित्तानन्तरं
ब्रह्मचर्यव्रतान्यवशिष्टानि समापयेदित्यर्थः। चौरादिसंकुलादेशे प्रहितः। यस्त्वरूपातामन्द्रे मांसादिता देवगुरोरु
च्छिष्टं तच्चाऽपेक्षार्थेन त्याज्यायमित्यर्थः। सर्वं प्राश्नीयादिति सर्वग्रहणमत्र लशुनाद्युपसंग्रहार्थं। एवंविध स्खलितलशुना
दिभक्षणानन्तरं बौधायनः। यान्यनच्छन्नविकिर्मितं सपदाग्नादानवर्तितादाच्चायादित्यमुपतिष्ठतहंसः शुचिषदि
ति वसिष्ठः। अकामतोपनतं मधु वाजसनेयके न दुष्यतीति॥ अथ सुतविक्रये। यरकसुतस्त्रीसुतमनापदि कामतो
विक्रीणीत तदापि चान्द्रस्मृतम्। आरामतडागोदपानपुष्करिणीसुकृतसुतविक्रयक्रियविवर्णगायी अधःशायी स्व
र्थकालाहारः सवसा रण शान्तानवती तित्रकामतस्त्वेवं कल्पे। अनापद्यनेक सुतस्य चतुर्विंशतिमात्राक्तं नारीणां
विक्रये सचाचार चान्द्रायणव्रतं॥ द्विगुणं पुरुषस्यैव व्रतमाहुर्मनीषिण इति॥ एतत्तु कामकारे। अकामे चापापावार २८५

मकारे तु पराशरोक्तं॥ विक्रीय कन्यकां गां च कृच्छ्रं सांतपनं चरेदिति॥ अस्मिन्नेव विषये शंखः। दवग्रदप्रतिग्र
याघानारामसत्राग्रपातडागपुण्यास तु विक्रये चचातप्तकृच्छ्रं चरेदिति। मनुयोगीश्वराभ्यामन्यपपातकसामान्यप्रा
यश्चित्तानि जातिशक्त्याघापहत्यायाज्यानि। क्षत्राकृप्पपशुअयस्याभयप्रकरणान्तिहितं॥ अथायाज्ययाजने मनुः। व्रात्या
नीयाजनं चापरेषामन्त्यकर्म च। अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति। अन्यैः कर्मत्रिमशानि कौपारास पिंडश्चूडा
वा असपिंडास्वीतास्यासंस्कारे सप्त करणानि पि। अनभिचरणीयस्याभिचारः अहीनं यागविशेषस्तत्स्यायाजनय
तु पतितसावित्रीकान्नोपनयन्नाध्यापयेद एतानुपनायद्ध्यापयन्याजयन्वा उद्दालकव्रतं चरेदिति। शातातापोक्तं
तापोक्तं त्वकामकारविषयं शूद्रायाज्ययाजने तु कामतो मनूक्तं त्रैमासिकमकामतो योगीश्वरोक्तं मासव्रतादि
शाद्याघापह्नयोज्यं कामतः शूद्रयाजनाश्चीन्यासप्राशनं। एवमारामविक्रयः उपपातकसाधारणप्रायश्चित्तानि
जातिशक्त्याघापहत्यायाज्यानि। अथ कन्यादूषणे। तत्र सवर्णविषये त्रैमासिकं द्वैमासिकं वा चान्द्रायणं निजात्याघाप
ह्नयाध्याज्यानि। अनुलोमस्त्वनमासिकपायाशनं प्राजापत्यं वा दूषणं वा धाज्यं। स्त्रियावेशपायाः प्रातिलोम्येन कन्यादूष
णे हारीतोक्तं। कन्यादूषी सोमविक्रयी वृषलीपतिः। कौमारदारत्यागी अक्षरामघपः शूद्रयाजकः गुरोः प्रतिहे

वानास्तिकानास्तिकवृत्तिःकृतघ्नःकूटव्यवहारीब्राह्मणवृत्तिघ्नपंचतपाअग्न्यावकाशजलशयनान्यनुतिष्ठेयुर्थकाम
णग्रीष्मवर्षाहेमंतेषुमासंगोमूत्रयावकमश्नीयुरिति।एतच्चद्रव्याजकाः।कामतोऽभ्यासेतुगोतमोक्तं।प्र
तिषिद्धमंत्रप्रयोगसहस्रवाकश्चदिति।अत्रसंवत्सरंप्राजापत्यंब्रह्मचर्यंप्रजापतिषिद्धद्रव्यः।अत्र्यात्रात्र्याद्विजा
तिवत्तिस्यमंत्रप्रयोगाध्यापनेयाजनेवाभ्यासेनमंत्रप्रयोगःसहस्रवाकः।अत्यंतमधिकाबहुत्वंतनुत्वर्थःस
हस्रशाश्चाबद्धर्थः।यानिलघूनिप्रायश्चित्तानितत्रद्रव्यपरित्यागपूर्वकप्राणायामसहस्रंवत्यादीनितान्यशक्तवि
षयाण्याज्यानि।मनुः।शरणागतंपरित्यज्यावेदंविप्लाव्यच।द्विजःसंवत्सरंयवाहारस्तत्पापमपोहति।तन्त्रयत्राणा
र्थंप्रायश्चित्तार्थंवासमागतः।शरणागतस्तंशक्तःसन्परित्यजतिवेदविप्लवनेचैतदादिस्मृतिपाठश्चनध्यायप्र
वपाठः।तद्दपिगौतमीयनसमानविषयं।कामतःसत्सत्यहिंतादिश्रवणेवसिष्ठोक्तं।पतितचंडालशवश्रवणे
त्रिरात्रंवाग्यताअनश्नंतआसीरन्सहस्रपरमंवातदभ्यस्यंतःपूताभवंतीतिसहस्रावर्णंतसंनिधिपाठः।अका
मतःषड्त्रिंशन्मतोक्तं।चंडालश्रोत्रावकाशास्तुनिस्मृतिपाठएकरात्रमभोजनमिति।तथाऽसपस्यनकुलस्यापि
अजमार्जारियाश्चथा।मूषकस्यनाथाश्वस्यमंडूकस्यचाषापितः।पुरुषस्यैडकस्यापिश्चानाश्वस्यखरैरस्यच। २८१
२८१

अंतरागमनस्यघश्चायश्चित्तमिदंशृणु।त्रिरात्रमुपवासश्चत्रिरह्नश्चाभिषेचनं।ग्रामींतरंवागंतवीजानुस्यौनात्रसंश
यइति।पितृमातृसुतत्यागतडागारामविक्रयइत्युपपातकसाधारणप्रायश्चित्तानिजातिशक्त्याद्यपेक्षयायाज्यानि।
अथकन्यादूषणे।तत्रसवर्णविषायत्रिमासिकाद्विमासिकचांद्रायणानिजात्याद्यपेक्षयायाज्यानि।आनुलोम्येनमासि
कपायात्रानंप्राजापत्यंवापूर्ववद्याज्यं।क्षत्रियावैश्यायाश्चातिलोम्येनकन्यादूषणेहारीतोक्तं।कन्यादूषी।सोमविक्र
यीवृषलीपतिः।कौमारदारत्यागीअसुरामद्यपः।शूद्रयाजकःगुरोःप्रतिहंता।नास्तिकानास्तिकवृत्तिःकृतघ्नःकूटव्यव
हारीब्राह्मणवृत्तिघ्नमिथ्याभिशंसीपतितसंव्यवहारीमित्रध्रुक्शरणागतघातीप्रतिरूपकवृत्तिरित्येतेपंचतपाअग्न्यावका
शजलशयनान्यनुतिष्ठेयुर्ग्रीष्मवर्षाहेमंतेषुमासंगोमूत्रयावकमश्नीयुरिति।शीघ्रवाक्यादृष्टव्रमथस्मिन्नेवविषयप्रा
तिलोम्येनदूषणे।शूद्रस्यवधएव।परविंदकयाजने।कन्याप्रदानेतास्येवकौटिल्येव्रतलोपने।आत्मानार्थक्रिया
रंभामद्यपास्त्रीनिषेवणे।स्वाध्यायाग्निसुतत्यागमांबांधवत्यागएववरत्यादिषु।मनुयाज्ञवल्क्यः।युक्तापपातकसा
धारणप्रायश्चित्तानिपूर्ववद्याज्यानि।अत्रस्वाध्यायत्यागःसत्त्वाख्यस्रवणेऽदुंबापापषणाव्यग्रतयाप्रकारांतरेणत्या
गब्रह्महत्यासमंवा।अग्नित्यागश्चअनाहिताग्निताप्रकरणेनिहितः।अथद्रुमाछादमनुः।फलदानांतुवृक्षाणांछेदनेज

जघमूकुरानां।गुल्मवल्लीलतानांचपुष्पितानांचवीरुधां।आर्द्रवनीयंपंचमहायज्ञाद्यदृष्टार्थंचेन्नतदाप्रादृ
ष्टार्थेष्वपिकृषिदिरस्यनुज्ञांदर्शयतिवसिष्ठः।फलपुष्पोपगात्पादान्हिंस्यात्कर्षणकरणार्थंचापरत्र्यादिति।शूद्रादीनांतु
जपानधिकाराद्द्विरात्रत्रिरात्रादिकंकल्पनीयं।अन्यासामप्येतासामुपपातकसाधारणप्रायश्चित्तान्यपियाज्यानि॥स्त्रीहिंसौ
षधिजीवनेहिंस्रयंत्रविधानेव्यसनानांत्यागश्चपूर्ववदुपपातकसाधारणप्रायश्चित्तानियाज्यानि।व्यसनान्यासो
बोधायनोक्तानि।अथाष्टौविकराणि।द्यूतमभिचारःअनाहिताग्निताउञ्छवृत्तिःसमावृत्तस्यभैक्षचर्यातस्यगुरुकुलवास
ऊर्ध्वंचतुर्भ्योमासेभ्योयाजनमध्यापयतिनक्षत्रनिर्देशनंचेति।द्वादशमासान्द्वादशार्धमासान्द्वादशद्वादशाहा
न्द्वादशषडहान्द्वादशत्र्यहान्द्व्यहमेकाहमित्यष्टविकरनिर्देशइति॥आत्मविक्रयशूद्रसेवायांसाधारणप्रा
यश्चित्तानिपूर्ववद्याज्यानि।बहुकालंशूद्रसेवायांतुबौधायनोक्तंसमुद्रयानंब्राह्मणस्यन्यासापहरणंसर्वपण्यै
र्व्यवहरणंशूद्रसेवाशूद्रायामभिजायते।तदपत्यंचभवति।तेषांतुनिर्देशःस्तेयकालेमितान्न
जिनस्त्रियापाःस्नापयुसवनान्तस्त्र्यंस्थानासनाभ्यांविहरंतएवात्रिभिर्वर्षैस्तदपघ्नंतिपापमिति॥हीनसख्ये २८६
पिसामान्यप्रायश्चित्तानियाज्यानि॥हीनयानिनिषेवणंद्विविधं।अमूढसवर्णदारस्याकेवलहीनसेवनेपियमः

३३

साधारणस्त्रीगमनेच।तत्रप्रथममज्ञानतःतत्रशातातपः।ब्राह्मणोराजन्यांप्रवीणःब्रह्मचारीद्वादशरात्रंचरित्वानिर्विशेत्त्री
स्तापय।वैश्यांप्रवीणत्र्यहंशूद्रांप्रवीणःकृच्छ्रातिकृच्छ्रंराजन्योवैश्यांप्रवीणःकृच्छ्रंद्वादशरात्रंचरित्वानिर्विशेत्त्रींचा
पयाःशूद्रांप्रवीणःअतिकृच्छ्रंद्वादशरात्रंचरित्वापयाद्भ्यःदिति।राजन्याप्रवा।स्वर्णस्त्रीपरिणयनमंतरेणक्षत्रियजाती
यकन्यकापरिणयनंवानित्यर्थःप्रायश्चित्तानंतरंस्ववर्णस्त्रियाःपश्चाद्गमनंविवाहःकर्तव्यइत्यर्थः॥कामतस्तूप
पातकसामान्यप्रायश्चित्तानिपूर्ववद्याज्यानिपश्वावरूपागमनावरूपागमनंस्वकामातायामाक्ताद्रष्टव्यं।विरूपागमनं
जैपापंव्यापाहेतिद्विजानयनपीचासत्त्सत्त्रस्त्रसंसरात्रंऊशादकामिति॥अकामतःसैवत्रत्तं।पश्वावरूपात्रिगमने
प्राजापत्यंविधीयतइतिसाधारणप्रायश्चित्तान्यपिज्ञानासाप्येतयायाज्यानि।अत्रविशेषमाहलौगाक्षिः।अस्या
सगर्हणात्द्विमासादशंविधीयते।तानामासगणात्वृद्धिर्यावत्सवत्सरंतावत्।ततःसंवत्सरगुणायावत्पंचमासा
रन्तुइतिएतद्वृद्धिस्त्वव्यासविषयंचतुर्विंशतिमातासकृत्ततयज्ञोक्तंत्रिगुणेनत्रिभिर्दिनैः।मासात्संवगुणं
प्रोक्तंषण्मासाद्वादशकंतावत्।संवत्सरात्पंचदशात्पक्षाद्विशगुणंतावत्।तानायवंविकल्पंस्याछातातपवावाय
व्यति।एतदामतिपूर्वव्यासोएवंयात्रापपातकादिष्वनुक्तप्रायश्चित्तषुअश्वासाःसन्ख्यालायाज्यानि।अन्यप्रवृत्तिसा

क्षरणस्त्रीषु दुष्टास्वनवच्छिन्नाद्या।सप्तमासंगुरुतल्पव्रतंकुर्यात्॥ आश्रमस्वीकारसंतावस्त्वनाश्रमवास
त्वपपातकसाक्षरणप्रायश्चित्तानि प्रवक्ष्यामि। असंतावत्तहारीताः। अनाश्रमी संवत्सरं प्राजापत्यंकृच्छ्रंचरि
त्वा आश्रममुपयात्। द्वितीये तत्कृच्छ्रं तृतीये कृच्छ्रातिकृच्छ्रमतऊर्ध्वं चांद्रायणमिति। परान्नंपरिपुष्टता। असत्क्षास्त्रा
भिगमनमाकारभूषिकारिता। तायया विक्रयश्चैषामित्येषु साक्षरणप्रायश्चित्तानि प्रवक्ष्यामि। इत्युपपातक
प्रायश्चित्तानि॥ अथ तायया विक्रयश्चैषामित्यत्र वशाशापात्रानामसत्प्रतिग्रहादीनांजातिभ्रंशकरादीनांच प्रा
यश्चित्तानि जातिभ्रंशकरादिस्वरूपाणि मनुनातानि। ब्राह्मणस्य रुजःकृत्वा घ्रातिरघ्रेयमद्ययोः। जिह्मं पुंसि च मै
थुनं जातिभ्रंशकरं स्मृतं। खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा। संकरीकरणं ज्ञेयं मीनाहिमहिषस्य च। निंदि
तेभ्यो धनादानं वाणिज्यं शूद्रसेवनं। अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणं। कृमिकीटवयोहत्या मद्यानुगतभो
जनं। फलैधःकुसुमास्तेयमधैर्यं च मलावहमिति। बृहद्विष्णुः आतान्यत्वकीसंकिमिति। आतान्यन्नेहापातकादि
मलावहीतादन्यतोऽनत्र सत्प्रतिग्रहप्रायश्चित्तमभिधीयते। प्रतिग्रहस्यासत्वं त्रेधा दातृवशात् देशकालवशा
द्द्रव्यवशाच्च। तत्र यथा। म्लेच्छचंडालपतितादेः प्रतिग्रहः। कुरुक्षेत्रादिदेश उपरागादिकालद्रव्यस्यासुराजामे २८९

षष्टमृतशय्योभयमुख्यादेः। संख्यातदाद्वा तद्दादपि त्रिविधं। तथाच देवलः। नावोत्तमानि चत्वारि मध्यमानि
विधमानतः। अधमानीति शेषाणि त्रिविधत्वमिदं विदुः। अन्नं दधि मधु त्राणं गोभूरुक्माश्वहस्तिनः। दानान्युत्तमदानानि
उत्तमद्रव्यदानतः। विद्याच्छादनावासपरिभोगौषधानि च। दानानि मध्यमानीति मध्यमद्रव्यदानतः। उपानत्प्रेंख
यानानि छत्रपात्रासनानि च। दीपकाष्ठफलादीनि चरमं बहुवार्षिकं। बहुत्वादर्थजातानां संख्यादाशु न स्यात्। अध
मान्यवशिष्टानि सर्वदानान्यपि विदुः। अतिदानैश्चाँदाग्यन्तिरिति। त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वतीति मनुः। त
स्या आयणेभ्रष्टेनिजप्येन तपसैव वा। जपित्वा त्रीणि सावित्र्याः सहस्राणि। याज्ञवल्क्यः। गोष्ठे वसन् ब्रह्मचारी
मासमेकं पयोव्रतः। गायत्रीजप्यनिरतः शुध्यत्यसत्प्रतिग्रहात्। प्रतिदिनं सहस्रत्रयं गायत्र्याः कर्तव्यमित्यर्थः। ए
तच्च निंदितदातृनिंदितद्रव्यस्य प्रतिग्रहप्रायश्चित्तस्य गुरुत्वात्। वेत्र विंशतिमात्रो। तिष्ठामात्रगृहीतनुपुण्यमंत्र
मुदीरयेत्। प्रतिग्रहेष्वसार्वभौमश्चीत्रीपरिकल्पयेत्। जपहोमादिकं कुर्याद्विचार्य च प्रतिग्रहं परिकल्पयेद्वि
ज्ञात्वा दद्यात्। यदा च निंदितं द्रव्यं गृह्णाति निंदितात्पा वा निंदितं तस्मादिकं तत्र स्वतु विंशतिमात्रो कंपवित्र स्या
विशुद्धीति सावधारणः प्रतिग्रहः। एदावनमृगार्यास्याकदाचिन्मित्रनिंदया। दद्यात्सजपानेवशुद्धीतदुःप्र

तिग्रहाः। इति देवी गायत्री। अत्रैवाभ्यासे दैवोत्पातादौ रुद्राद्यत्र उपरागादौ स्नात्वा जिनादिप्रतिग्रहे च वृद्धहा
रीतोक्तेः। राज्ञः प्रतिग्रहे चान्द्रमासमब्दं सदा वा सत्त्व। षाष्टकाल्पपायानकृकृः सर्वमासं प्रमुच्यते। तद्यथा द्विजानुका
मिः सतो तो नियतव्रतः इति॥ हारीतः। मणिवासोगवादीनां प्रतिग्रहे सावित्र्याः सहस्रं जपेत्। पंचमध्यमदुग्धाद्वमेध
दशरात्रं पयोव्रतः सहस्रमतिप्रतिग्रहे स्थिति प्रतिग्राह्यद्रव्यमध्यमत्वेन प्रतिग्रहस्य मध्यमत्वं एवमुत्तमत्वं चाधमत्वं प्रति
ग्राहे पीवस सहस्राणि जप्त्वा मद्दशा एवमन्यान्यपि ज्ञानिशक्तिदेशकालद्रव्याद्यपेक्षया याज्यानि॥ अथ जातिदुष्टछत्रा
कादिभक्षणे। तत्र मनुः। छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटं। पलाण्डुं गृंजनं चैव मत्या जग्ध्वा पतेद्द्विज इति। अमत्यैता
नि षट्जग्ध्वा कृच्छ्रं सान्तपनं चरेत्। यतिश्चान्द्रायणं वापि शेषेषूपवसेदहः। कामात्तु अभ्यासे पतितत्वं पुराणे स्मृतम
त्वं। अन्नत्वाभ्यासे चान्द्रायणमत एव चान्द्रायणात्र होतो विष्णुः। लशुनपलाण्डुगृंजनविड्वराहग्रामकुक्कुटनरगामीस्नद
रण्यवसा विविधान्नेषु द्विजातीनां प्रायश्चित्तं तत्पुनः संस्कारं कुर्यादिति। अत्रापि ब्राह्मणापेक्षया क्षत्रियादिषु पादपा
दानी कल्प्यौ। शेषेषु छत्राकादिषड्व्यतिरिक्तेषु वार्ताकादिषु एतच्चाकामतः सकृद्भक्षणे अभ्यासे तु द्विरात्रादि
कल्प्यं। कामतः सकृद्भक्षणे। मत्स्यपीश्चकामातोजग्ध्वा सोपवासस्त्र्यहं वसेदिति याज्ञवल्क्योक्तं त्रिरात्रं। अत्रैवाभ्या

से द्व्यहं यामाक्तौ। खड्गो वार्ताकि कौन्तीकव्रश्चनप्रभवीस्तथा। वृक्षत्वर्णशिग्रुकं वैव कुरवंडं कववकानिवा। एतेषां भक्षणेन च चा
प्राजापत्यं चरेद्द्विज इति। खड्गा पक्षिविशेषः। शाकविशेषा वा। वार्ताकी भण्टाकी कं कूर इति दैतानकमिति देवालनविशेषस्म
रणात्। व्रश्चनप्रभवा लोहिता। लोहितान् वृक्षनिर्यासान् इति स्मरणात्। तथा शिग्रुविताकचना कववं चकुश्रासपश्वाकौ
नद्विशेषकुरुवेडयमः। नंदुलीयकं कौन्तीकव्रश्चनप्रभवीस्तथा। नालिकां नालिकरीं श्लेष्मातकफलानि वा। एतेषां
भक्षणेन चा प्राजापत्यं चरेद्द्विज इति एतदपि शाकविशेषाय। नलिका नालिका करी वशाक। नीलीभक्षणे वापस्तंबः। तद्भायधा
दिनी लौंउ प्रमाराद्ब्राह्मणः कवितु। चान्द्रायणेन शुद्धिः स्यादापस्तंबो ब्रवीन्मुनिरिति। कामतस्त्वभ्यासे वा द्विगुणादिकं कल्प्यं
बलात्कारेण तद्भक्षणे सुमंत्रः। कलशुनपलाण्डुगृंजनकभक्षणे। सावित्र्याष्टसहस्रेण मूर्ध्नि संपातान्नयेदुपवासश्च
तिसंपातमेउदबिंदुस्रोतःसंमार्जनं कुर्यादित्यर्थः। एवमन्यद्यत्रातापि एकाहाद्विरात्रादीनि यथायोग्यं याज्यानि॥
अथ संधिन्यादिक्षीरपाने। अकामतः सकृत्पाने मनूक्त एकादशोपवासश्च अनिर्दशाया गोःक्षीरमौष्ट्रमेकशफं तथा।
आविकं संधिनीक्षीरं विवत्सायाश्च गोः पयः। आरण्यानां च सर्वेषां मृगाणां माहिषं विना। स्त्रीक्षीरं चैव वर्ज्यानि सर्व
शुक्लानि चैव हि। दधि नदीं च शुक्लेषु सर्वं च दधिसंभवमित्यादि पविवाशेषेषूपवासदहः स्यात्पुनश्चात्। कामतस्त्रि

DR. BHAU DAJI MEMORIAL
DR. BHAU DAJI MEMORIAL

रात्रं याज्ञवल्क्येनोक्तं कामतोऽभ्यासे पिठीनस्फक्तं षड्रात्रं शीरवाक्तं सप्तरात्रं वा शक्यापद्मया। कामतो चीर्णतायां अभ्यासे
शीरवाकामवपञ्चरात्री। या निवद्धत्रियश्चापिकृत्वा स्तो विरूपः शूद्राथवा पुनः। यः पिबेत्कापिलां क्षीरं न तातोन्याभ्य
पुण्यन्त्रदित्यादीनि सत्राण्यकादीनि यथायोग्यं योज्यानि शूद्रस्याङ्क कपिलादुग्धपाने पातकमाध्यपरिगणितमिति।
तत्राय स्थितानि शात्र्याधापञ्चयायोज्यानि॥ अथ मांसभक्षणे तत्र मांसं द्विविधमसंस्कारदुष्टमसंस्कारदुष्टं च तत्र
स्वभावदुष्टं विट्सूकरादिविट्सूकरादीनां स्वभावदुष्टं च मग्निमवचननियामानिवगम्यात। असंस्कारदुष्टमनुपाक्त
तङ्गादश्चकदपानि द्विजातीनामित्युपक्रम्य अनुपाक्तमांसानि देवान्नानीतिमनुनानुपाक्तकागादिमांसस्याक्त
क्षवमुक्तं एवं विधस्याकामतः सकृद्भक्षणे शाष स्त्रुपवास इति मनूक्तं। कामतस्तूपवासध्यस्वमास इति याज्ञ
रात्कमात्र चाभ्यासे पि। जग्ध्वा मांसमभक्ष्यं सप्तरात्रं यवान्पिबेदिति तेनोक्तं द्रष्टव्यं॥ बृहद्यमः। वराहैकशफानीवका
ककूटायासथा। क्रव्यादानां च सर्वेषामभक्षायच कीर्तितां मांसमूत्रपुरीषाणि प्राश्य गोमांसमेव च। श्वगोमायु
कपीनां च तप्तकृच्छ्रं विधीयते। उपाष्यवाद्वादशाहं तु कूष्माण्डैर्जुहुयाद्घृतमिति। कामतस्त्वभ्यासे तु कृच्छ्रं अभ्यासे तु कूष्मा
ण्डसहितः पराकः कूष्माण्डमेव हि कृष्माण्डाद्यन्यनिधाय्यानि अथवा अकामतस्तप्तकृच्छ्रः कामतस्तु कूष्माण्डसहितः पराकः। २८१

यत्तु शातातपेन गोमांसभक्षणे चान्द्रायणमित्युक्तं तच्छक्तविषयं। एवमुक्तान्यान्यानि विषयविशेषे योज्यानि। कामतो
भ्यासे त्वङ्गिरसोक्तं। नरकाकखराश्वानां जग्ध्वा मांसं गजस्य च। एषां मूत्रपुरीषाणि द्विजश्चान्द्रायणं चरेदिति। मूत्रपुरीषग्रह
णं वसाशुक्रासृग्मज्जामस्तुपलक्षणं। मूत्रपुरीषणा मूत्रपुरीषव्यतिरिक्तकामतो त्वीतान्यासे शीरवाक्तं। शुचौ वा तत्र याता
दं तासृग्धा विकशफानि वा। अष्टाङ्गं वीत्तथा शुक्रा षण्मासानुव्रतमाचरेदिति। अष्टाङ्ग चैव मांसे कामतो त्वीतान वच्छिन्नाभ्या
सस्मृत्यन्तरोक्तं। जग्ध्वा मांसं नराणां च विड्वराहं खरं तथा। गवाश्वकुञ्जरोष्ट्राणां सर्वं पञ्चनखं तथा। क्रव्यादं कुक्कुटं ग्राम्यं कि
यस्मिं च सरवत्तमिति। एवं मूत्रपुरीषवसाशुक्रासृग्मांसमज्जास्वपि प्रायश्चित्तविषयाभ्यासाद्य चाप्रायश्चित्तानि योज्यानि। नत्रश्रो
त्रादिमलभक्षणे वह्विं कल्प्यं। अकामतस्त्वत्र नरवादिभक्षणे प्रायश्चित्तं नरवकेशास्योष्ठभक्षणे त्रिरात्रं ताजनात् शुद्धि
रिति। अकामतः कल्प्यं मुखमात्रप्रावेशे उक्तकेशकीटनखं प्राश्य मक्ष्यकीटकामवचा हेमतप्तं घृतं पीत्वा तद्भक्षणाद्विशु
द्ध नीति। स्मृत्यन्तरात्तं हारीतः। कृमिकीटपिपीलिकाजालाकः पतङ्गाश्छिप्राशनागोमूत्रगोमयाहारस्त्रिरात्रेण विशुध्य
तीति॥ अथ बिडालाद्युच्छिष्टभक्षणे। अकामतो बिडालाद्युच्छिष्टभक्षणे एकरात्रं ब्राह्मीं सुवर्चलां पिबेत्। तथा च मनुः॥
बिडालकाकाखूच्छिष्टं जग्ध्वा श्वनकुलस्य च। केशकीटावपन्नं च पिबेद्ब्राह्मीं सुवर्चलामिति। अकामतोऽभ्यासे तु काका

घवलीढस्याद्राच्छिष्टभोजने चैतिन्नद्रु इति शातातपोक्तं द्रष्टव्यं। कामतः सप्तरात्रं विष्णूक्तेः। पद्मिस्नापदजस्य
रसस्यान्नस्य न्यूयसः। संस्काररहितस्यापि भोजने तद्रूपादकमिति अत्रान्यासंशीरवाक्तेः। शुनामुच्छिष्टं तु क्षामासामकं व्र
तीन्नावत्। काकोच्छिष्टं गवाघ्रातं तु क्षापदं प्रनीनावदिति। अत्र यावकव्रतं प्रत्नतीं। वृद्धविष्णुः। ब्राह्मणः शूद्रोच्छिष्टाशाने सप्त
रात्रं पंचगव्यं पिबेद्वैश्योच्छिष्टाशाने पंचरात्रं राजन्योच्छिष्टाशाने पंचरात्रं राजान्योच्छिष्टाशाने त्रिरात्रं ब्राह्मणोच्छिष्टाशने
च्चैकादमिति। एतच्च कामतः सप्तरात्रं गव्यप्राशनमाहारीतर निदृत्यर्थं। तपस्वी शक्तत्वात्रूपचान्त्र अत्रिवाक्यात् सपाया
त्रं तु क्षासह ब्राह्मणेन प्राजापत्येन शुध्यति। नृपजासहत्तु क्षान्नं तप्तकृच्छ्रेण शुध्येति। विशा सहतु क्षान्नमतिकृच्छ्र
णशुध्यति। शूद्रेण सहत्तु क्षान्नं चांद्रायणमथाचारदिति। अकामतश्चात्रीरवाक्तेः। ब्राह्मणोच्छिष्टाशानं महाव्याहृतिभिस्त्रि
तिमैत्र्यापः पिबन् शुद्धत्रियाच्छिष्टाशाने ब्राह्मीरसविपक्वेन त्र्यहं क्षीरेण वर्त्तयेत्। वैश्योच्छिष्टभोजने त्रिरात्रपोषि
तो ब्राह्मीसुवर्चलौ पिबेत्। शूद्रोच्छिष्टभोजने षड्रात्रमभोजनमिति। अत्राभ्यासादि गुण्यादिकं कल्प्यं। क्वचिदुच्छिष्ट
स्य भोजनस्यांगुष्ठादर्शितापस्तंबेन। पितृज्येष्ठस्य चत्रोतरुच्छिष्टं भोज्यमिति। अंगिराः। चंडालपतितादीनामु २८५
च्छिष्टान्नस्य भक्षणे। चांद्रायणं चरेद्विप्रः क्षत्रः सांतपनं चरेत्। षड्रात्रं च त्रिरात्रं च वस्यायारन्तु शूद्रवशाः इति अत्र

पा २

सांतपनं महासांतपनं। एतच्च कामतः अकामतस्त्वर्द्धं कल्प्यं पराशरः। आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि। मन
स्तापेन शुध्येत द्रुपदां वा शतं जपेदिति। षड्त्रिंशान्मते। दीपोच्छिष्टं तु यानं तैलं रात्रौ रथ्याहृतं च यत्। अभ्यंगाद्वे वयच्छि
ष्टं तु क्षानान्कनशुध्यतीति। वृद्धशातातपः। पीतोच्छिष्टं तु पानीयं पीत्वा तु ब्राह्मणः क्वचित्। त्रिरात्रं तु व्रतं कुर्याद्वामह
स्तेन वा पुनरिति एतच्च कामतः अकामतस्त्वर्द्धं शंखः। अमध्यपतितं चैव चंडालश्वपाकसंकरजस्खलावधूतकोणकुहि
उनखिसंस्पृष्टानि तु क्षान्नत्रैवारदिति। कणेरख्यविकल्पः एतच्च कामतः अकामतस्त्वर्द्धं। रजकाद्यस्पृश्यस्पर्शे विष्णुः।
तु क्षास्पृश्यपश्वथा शोविकशाकीटश्चहृषिते। अशादुंबरबिल्वाद्येः पनसांबुजपत्रकेः। शीरवप्रष्णासुवर्चादिक्काथं पीत्वापि
शुध्यतीति। हारीतः। शूद्रेणापहृतमभोज्यं कीटैर्वामध्यासंविन्निर्धुं जानश्चुवायव्रच्छूद्र उपस्पृशेद्रनैर्हत्वाभ्रपंक्तौ भुंजा
नश्चुवायाशीवाद्यीयाच्छिष्टं प्रयाच्छेदावामध्यान्नस्मिक्वावायशान्ने दृघस्रत्रप्रायश्चित्तमाहारात्रमिति। क्रतुः। यस्तु भुंक्त
द्विजः पंक्त्यामुच्छिष्टायीकथंचन। आहारात्रोषितस्तत्वा पंचगव्येन शुध्यतीति। एतच्च कामतः अकामतस्तु पराशरोक्तं।
एकपंक्त्युपविष्टानां विप्राणां सह भोजने। यद्येकोपि त्यजेत्पात्रं शेषमन्नं न भोजयेत्। मोहाद्भुंजीत यस्तत्र पंक्त्या
मुच्छिष्टभोजने प्रायश्चित्तं चरेद्विप्रः कृच्छ्रं सांतपनं चरेदिति। त्यजत्पात्रं अमृतापिधानमसौत्यमन्नीकरणादकपानं

त्वचा त्पाजादित्यर्थः। शिवादिसंस्पृष्टजलपानादकपानविशुद्धौ। मृतपञ्चनखात्कूपादत्यन्तोपहताद्वा उदकं पीत्वा ब्रा
ह्मणस्त्र्यहमुपवसेत् द्व्यहं राजन्यः एकाहं वैश्यः शूद्रो नक्तं सर्वे चान्ते पञ्चगव्यं पिबेयुरिति। अत्यन्तोपहतं मूत्रपुरी
षादिभिः। कामतस्तु मानुषशवोपहतकूपजलपाने हारीतः। छिन्नभिन्नशवोपेतं तत्रस्थं यदि तत्पिबेत्। शुध्येद्द्विजश्चान्द्राय
णं त्रिपञ्चरात्रमथापि वा। यदि कश्चित्ततः पायात्प्रमादेन द्विजोत्तमः। जपेत् त्रिषवणस्नायी अहोरात्रेण शुध्यतीति। अका
मतो देवलोक्तं। छिन्नभिन्नं शवं चैव कूपस्थं यदि दृश्यते। पयः पिबेत् त्रिरात्रेण मानुषे द्विगुणं स्मृतमिति। आपस्तम्बः। चाण्डा
लकूपभाण्डस्थं नरः कामाज्जलं पिबेत्। प्रायश्चित्तं कथं तत्र वर्णे वर्णे विनिर्दिशेत्। चरेत्सान्तपनं विप्रः प्राजापत्यं तु भूमि
पः। तदर्धं तु चरेद्वैश्यः शूद्रः पादं विनिर्दिशेदिति॥ देवलः। यस्तु चण्डालनीडस्थमेवाज्ञानादुदकं पिबेत्। स तु त्र्यहेण शु
ध्येत शूद्रश्चैकेन शुध्यतीति॥ आपस्तम्बः। म्लेच्छादीनां जलं पीत्वा पुष्करिण्यां ह्रदेऽपि वा। जानुदघ्ने शुचि ज्ञेयमधस्ता
दशुचिस्मृतौ। तत्रोदाहार्यं यः पिबेद्विप्रः कामतोऽकामतोऽपि वा। अकामान्नक्तभोजी स्यादहोरात्रं तु कामतः इति॥ अत्र चान्त्या
त्सप्राजापत्यमपश्चात्पीत्वा प्राजापत्येन शुध्यतीत्यापस्तम्बस्मरणात्। एतच्चान्त्यजादिकूपादिषु। परासरः। नीड २८५
स्थमेव जानीत जलं दधिपयः पिबेत्। ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव प्रमादतः। ब्रह्मकूर्चोपवासेन द्विजातीनां

निःकृतिः। शूद्रस्य चोपवासेन तथा दानेन शक्तितः इति। एतदकामतः। कामतो द्विगुणं। आपस्तम्बः। मूत्रोच्चारं द्विजः कृत्वा
ह्यकृत्वा शौचमात्मनः। मोहाद्भुक्त्वा त्रिरात्रं तु यवान्पीत्वा विशुध्यतीति। मूत्रं कृत्वा द्विजो मार्गे स्मृतिविभ्रान्तो जलं पिबेत्। अहोरात्रो
षितो भूत्वा पञ्चगव्येन शुध्यति। कामतो द्विगुणं। संवर्तः। समुत्पन्ने यदा स्नाने भुङ्क्ते नाथ पिबेत्तु वा। गायत्र्यष्टसहस्रं तु जपेत्स्ना
त्वा समाहितः इति। एतदकामतः। स्नानार्हस्तु यदा भुङ्क्ते द्विजो विज्ञानदुर्बलः। प्राजापत्येन शुध्येत त्रिषड्भिः शान्मातिधनोत्॥
अथ वाग्दुष्टादिना स्नानं। परासरः। वाग्दुष्टं भावदुष्टं च अज्ञानेनावहृषितं। भुक्त्वान्नं ब्राह्मणः पश्चात् त्रिरात्रेण विशुध्यतीति। एतच्च
कामतः क्षत्रियादीनां कल्प्यं। अकामतो गोतमात्। उच्छिष्टं घृतप्राशने च वसिष्ठः। शौचस्थानसमुत्पन्ने आस्योज्यान्यस्य
सैज्ञितं। आहारशुद्धिं वक्ष्यामि तन्मे निगदतः शृणु। अक्षारलवणां रूक्षां पिबेद्ब्राह्मीं सुवर्चलां। त्रिरात्रं शंखपुष्पीं वा
ब्राह्मणः पयसा सह। पलाशबिल्वपत्राणि कुशान्पद्मानुदुम्बरान्। अपः पिबेत् क्वाथयित्वा त्रिरात्रेण विशुध्यतीति। पलाशा
दिसहितमपः क्वाथयित्वेत्यर्थः। कालदुष्टशुक्तादि ज्ञानाज्ञानयोरहणकालादि ज्ञानाज्ञानात् एकरात्रत्रिरात्रादिकं कामाकामादि
भेदेन कल्प्यं। अथाहुताग्नेरन्नाशने। लिखितः। यस्य चाग्नौ न क्रियन्ते यस्य चान्नं न दीयते। न तद्भोज्यं द्विजातीनां भुक्त्वा
चोपवसेदहः। वृथाकृसरसंयावपायसापूपशष्कुलीः। आहिताग्निर्द्विजो भुक्त्वा प्राजापत्यं समाचरेत्। अनाहिताग्नेरेका

हाराषष्ठउपवासः स्यादिति। मनुनात्राचान्तं तथा। शूद्रदीर्नउपयातु क्रिनरस्याद्वतिपंचकं। पद्माकृतेन यातु नृत्युक्ता
बौद्धायनीं चरेत्। सैवत्संशूद्राणीनाजान्नं भुक्त्वा वा निन्नाजान। आहारात्रात्रिषितः स्पृष्टापंचगव्येन शुध्यति। तथा। वटार्क
अश्वत्थपात्रेषु भुक्त्वा तिंदुकपत्रयोः। कोविदारकदंबेषु भुक्त्वा बौद्धायनीं चरेत्। पलाशपद्मपात्रेषु गृही भुक्त्वैन्दवं चरेत्।
वानप्रस्थो यतिश्चैव लभते चांद्रिकं फलमिति। पलाशपत्राणि वल्लीपलाशपत्राणीति कल्पतरुः। अथ रजस्वलादीनां
क्रियाः। दुष्टत्वज्ञानपरा सर्वः। माक्षिकं फाणितं शाकं गोरसं लवणं घृतं। हस्तदत्तं निभुक्त्वा उदिनामकमभोजनमिति।
एतदकामतः। कामतस्तु हारीतोक्तं त्रिरात्रं कृच्छ्रमेव वा। ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत् द्वयमेतदभो-
ज्यं स्याद्भुक्त्वा तूपवासः स्यादिति। कण्वः। शूद्रहस्तेन यातु त्यक्तपानीयं वा पिबन्नुषितः अहोरात्रोषितः स्नात्वा पंचगव्ये-
न शुध्यति॥ आसनारूढपादो वा वस्त्रार्द्धप्रावृतोपि वा। मुखेन धमितं भुक्त्वा कृच्छ्रं सांतपनं चरेत्। आपस्तंबः। तोयप्रसवि-
तृकन्याया अश्नीयाद्गृहेपि वा। अथ भुंक्ते उपायामाशान्तं कृच्छ्रं सांतपनं चरेत्। अप्रसवितृकन्या अप्रसूता कन्या पार्वण-
श्राद्धादिभोजनं चारस्यानां भुक्त्वा त्वपार्वणश्राद्धे प्राणायामषडाचरेत्। उपवासस्त्रिमासादि वत्सरान्तं प्रकीर्तितः॥ २८९
प्राणायामत्रयं वृत्तावाहोरात्रं सपिंडान्। असरूपस्मृतेनं व्रतपारणकं तथा। असरूपगुणशीलादिनिरसमानो- २९
=तथा। द्विगुणं क्षत्रियस्यैव त्रिगुणं वैश्यस्य स्मृतम्॥

सद्यश्चतुर्गुणो ह्युक्तः तत्स्मृतौ शूद्रस्य भोजने इति। एतदापद्विषयमामश्राद्धविषयमकामविषयं वा। एवमुत्तरत्रापि।
अत्यल्पप्रायश्चित्तानि भोजनीयानि अधिकप्रायश्चित्तानि कामकारअनापद्विषयाणि वा याज्यानि। आपदि नवश्राद्धा-
दिभोजने विस्तृतं प्राजापत्येन नवश्राद्धपादार्धेन आद्यमासिके। त्रिपक्षिके तदर्धं तु पंचगव्यं द्विमासिकमिति। अत्र हारी-
तस्य हारीतोक्तं एकादशाहे अहं तु भुक्त्वा सैवयानं तथा। उपोष्य विधिवद्भुक्त्वा कूष्माण्डैर्जुहुयाद्घृतमिति। अनापदि पर्येव बौ-
धायनीन नवश्राद्धे प्राजापत्यं तु मिश्रके। एकादशेषु पुराणेषु प्राजापत्यं विधीयते। मिश्रकं प्रथमसंवत्सरनवश्राद्धमिति कल्प-
तरुः। पुराणेषु संवत्सरानंतरमासिकश्राद्धेषु। वाचस्पतिमिश्रकं प्रथमातादायमानमाद्यश्राद्धमिति। आद्यश्राद्धस्य द्विरात्रं त्रिरात्र-
मेवाकनिर्हिता चांद्रायणेन नवश्राद्धे। शस्य तत्प्रथमनवश्राद्धादिविषये। अथवा नवश्राद्धे बौद्धायनस्त्रैणे क्षत्रियनवश्राद्ध-
विषये वा। द्वितीयनवश्राद्धादिषु त्रपक्षिरमन्नाता प्राजापत्येन नवश्राद्धपादार्धेनाद्यमासिके। त्रिपक्षिके तदर्धं स्यात्स्या-
द्वा द्विमासिके तथा। पादार्धेन ऊनमुद्दिष्टं षण्मासे च तथाब्दिके। त्रिरात्रं त्वाद्यमासेषु प्रत्यब्दं तु दहः स्मृतमिति। त्रिपक्षि-
के तदर्धं स्याद्विद्यादि कामकारविषयं षण्मासे च तथाब्दिके शास्य तत्प्रथमाब्दिकविषये। प्रत्यब्दं तु दहास्य तद्द्वितीया-
ब्दिकविषयं। एतच्च ब्राह्मणविषयं। क्षत्रियादिश्राद्धभोजने तु तत्र च बौद्धायनीं नवश्राद्धे परा को मासिकस्मृतः। त्रिपक्षि-

कसौ तपनेन्द्रकृच्छ्रं मासद्वयं स्मृतौ। द्वितीयस्य नवश्राद्धे अन्नाम तदुदाहृतं विशेषस्यामाशिकं प्रोक्तं तृतीयायां सुमनीषिभिः।
शूद्रस्य तु नवश्राद्धे चारश्चांद्रायणद्वयं। मासिके चांद्रायणं मासि त्रिपादोनं दर्शे स्मृतं॥ मासद्वयपराकः स्यात् कृच्छ्रं सांतपनं स्मृत
द निशौरवः। चांद्रायणेन नवश्राद्धे पराकोमासिके स्मृतः। पक्षत्रये ति कृच्छ्रं स्यात् षण्मासे तप्तकृच्छ्रं एव तु। आब्दिके पादकृच्छ्रः
स्यादेकादशे नराधिप। अन्नतः कृच्छ्रं निर्दोषः स्याच्छूद्रस्य वचनं यथेति। एवं विशेषेण्यन्यान्यपि गुरुलघुप्रायश्चित्तानि कामा
कामजातिशक्तिस्थानपतितस्त्रीवाधर्षीक्रयश्राद्धभोजनसंपदिना दिश्राद्धभोजन विषय विशेषापेक्षया योज्यानि
तथा चतारकाजतः चांडालादुदक्यासूपतिब्राह्मणादिकृतादपि दृष्टिभ्यः श्वपचश्चमरणे पापकर्मिणी। पतनानाश
केश्वेव विषाद्वंधोदाकरूथा। तुरकौषीषाउष्णा श्राद्धे कुर्यादिंदुघ्नेद्विजः तथा। अपीक्रयान्न तु दिश्य श्राद्धे मकादशे
ह नि। ब्राह्मणस्त्वत्र तु कामेत्रिशु चांद्रायणं चारेत्। आमश्राद्धे तथा तु ज्ञात सत्ता कृष्णं शुद्ध्यति। संकल्पितंतथा तु का
त्रिरात्रं क्षपणं चावदिति। कामातो ब्रह्मचारिणा नवश्राद्धे भोजने कृते घासकं। मधुमांसं यथा शीघ्रं याङ्का द्वैस
तकाम व चा प्राजापत्यं चारेत्कृच्छ्रं व्रतशेषं समापयदिति। अकामतो पितानेवावो कौमासिकादि भुयाशीया २२५
दसमावृतो द्विजः। त्रिरात्रमुपवासस्य प्रायश्चित्तं विधीयते। प्राणायामत्रयं कृत्वा घृतं प्राश्य विशुद्ध्यतीति। अ

मश्राद्धे वसे कृच्छ्रं सर्वत्र। आमश्राद्धे तु वदे कृच्छ्रं प्राजापत्यं तु सर्वदिति षट्त्रिंशन्मतस्मरणात्। अन्यत्र प्रायश्चित्तममा
वास्यादिश्राद्धभोजनेषु विशेषमाहोशनाः। दर्शे च शपि वदापागायत्र्यो श्राद्धं तु गद्द्विजः। ततः संध्यामुपासीत श्र
द्धे तु तदनंतरमिति। तथा निर्वृत्ते चूडाहोमे तु प्राग्नामकरणात्तथा। चारसांतपनं तु ज्ञात कर्म्मणि चेबहिः। आतोन्य तु
उ तु ज्ञात्वा संस्कार शुद्धि जातुन्मः। नियोगादुपवासः स्यात् संध्यां ततिं घातोजन। क्षेमं वृषं ब्राह्मणादानवासामिच्छसीमंतोन्नयने त
था। जातश्राद्धे नवश्राद्धे द्विजश्चांद्रायणं चारेदिति। सामसाहवयति ब्राह्मणादनारब्धीकमधिनीगत्नूतमितिकथयीति
अत्र तकर्मंगित्न तश्राद्धभोजने एवितत्प्रायश्चित्तं शक्त्याद्यपेक्षया योजनीयं॥ अथाभोज्यान्नभोजनाभोज्यान्नान्यम
नुनादर्शिताः। नाश्नीत्रियत तेया ज्ञग्रामयाजकानतथा॥ स्त्रियाक्लीवेन उहातो भुंजीत ब्राह्मणः क्वचित्। मत्तक्रुद्धातुराणां
तु न भुंजीत कदाचन। गणान्नं गणिकान्नं च विदुषा उजुगुप्सितं। स्तेनगायनयोश्चान्नं तक्ष्णो वार्धुषिकस्य च। दीक्षितस्य
कदर्यस्य बद्धस्य निगडस्य च। अभिशस्तस्य षंढस्य पुंश्चल्या दांभिकस्य तु। चिकित्सकस्य मृगयोः क्रूरस्योच्छिष्ट
भोजिनः। उग्रान्नं सूतिकान्नं च पर्याचांतमनिर्दशं। अनर्चितं वृथामांसं सवीरायाश्च योषितः। द्विषदन्नं नगर्यन्नं पति
तान्नमवक्षुतं। पिशुनानृतयोश्चैव क्रतुविक्रयकस्य च। शैलूषतंतुवायान्नं कृतघ्नस्यान्नमेव च। कर्मारस्य निषा

दस्य रंगावतरणस्य वा खुववर्मकर्त्तुर्विनिस्य त्र विक्रयिणस्तथा। श्ववतीं कौंडिकानां चैव चैलनिर्णेजकस्य च। रजक
स्य नृशंसस्य यस्य चोपपतिर्गृहे। मृष्यते यश्च चोपपतिं स्त्रीजितानां च सर्वशः। इत्येवमादयोऽन्ये पि स्मृत्यंतरोक्ता वर्ग
तव्याः। अत्र प्रायश्चित्तं तु कात्यायनः। तमस्यान्नमत्याद्यपर्णीग्यद्‌मत्या तु कार्यस्तत्कृच्छ्रं रात्रो विप्रस्त्रामवाचरेत्। अभ्य
न्यासे शीखार्कं चांद्रायणं। गौतमः। कृच्छ्रदृनिष्ठतप्राशनमापद्विषयं। आपस्तंबः। वेलाद्यासीतनायथवाम्ल छर्द्दडाल
दस्य क्लिष्टः। अस्पृश्यकारिताश्वकमर्गवादिप्राणिहिंसने उच्छिष्टमार्जने चैव तथा तस्यैव भोजने। चारायविद्वराहाणां
मामिषस्य च भक्षणे। तप्तकृच्छ्रं चरेन्नित्यासंगस्त्वाभ्यासहाद्भोजने। मासार्धिताद्विजातेनौ प्राजापत्यं विशोधनं। चां
द्रायणं वाहिताग्नेः पराकं त्वच्छ्रव्यवाचरेत्। चांद्रायणं पराकं च चरेत्संवत्सरार्द्धितः। शूद्रान्नासाद्यैयाव कं पिबेत्।
मासमात्राषितः शूद्रान्नप्रपादनं सुद्धतिः। ऊर्द्धं संवत्सरात्कल्प्यं प्रायश्चित्तं द्विजोत्तमैः। संवत्सरे स्थितिश्चैव तद्भावे
स नियच्छतीति। लिखितः। परपाकनिवृत्तस्य परपाकरतस्य च। अपचस्य च भुक्त्वान्नं द्विजश्चांद्रायणं चरेत्। एतच्च
कामतोऽभ्यासविषयं। अनभ्यासे च ब्रह्मत्र कामतस्त्रिरात्रमिति कल्प्यं। तथा गृहीत्वाग्नीन्समारोप्य पंचयज्ञान्न २९६
निर्वपेत्। परपाकनिवृत्तोऽसौ मुनिभिः परिकीर्तितः। पंचयज्ञान्स्वयं कृत्वा परान्नमुपजीवति। सततं प्रातरु

त्थाय परपाकरतस्तु सः। गृहस्थधर्मे यो विप्रो ददाति परिवर्जितः। ऋषिभिर्धर्मतत्त्वज्ञैरपचः परिकीर्तित इति॥॥
अथाशौचान्नभोजने॥ विष्णुः। ब्राह्मणादीनामाशौचे यः सकृदेवान्नमश्नाति तस्य तावदाशौचं यावत्तेषामाशौचं
व्यपगमे प्रायश्चित्तं कुर्यादिति कामकारमार्कंडेयः। ज्ञात्वा तु ब्राह्मणाशौचे स्वरसं तप्तं द्विजः। भुक्त्वा तु क्षत्रियाशौचे
तथा त्वाश्चा विधीयते। विशपाशौचे तथा भुक्त्वा महासांतपनं चरेत्। शूद्रस्यैव तथा भुक्त्वा द्विजश्चांद्रायणं चरेत्। अभ्यास
शीखार्कं। शूद्रस्य सूतके भुक्त्वा षण्मासान्व्रतमाचरेत्। वैश्यस्य तु तथा भुक्त्वा त्रीन्मासान्व्रतमाचरेत्। ब्राह्मणस्य तथा
शौचे भुक्त्वा मासव्रती भवेदिति। आकामतश्छागलयोक्तं। अज्ञानाद्भुक्तविप्रश्च सूतके मृतके तथा। प्राणायामशतं कृत्वा
चाश्रद्धीत शूद्रसूतके। वैश्यषष्टिर्विप्राः विंशति ब्राह्मणे दश। एकाहं त्र्यहं पंच सप्तरात्रमभोजनं। ततश्च विनिर्दि
ष्टः पंचगव्यं पिबेत्ततः। इत्येकाहादयः कामेन ब्राह्मणाद्याशौचान्नभोजने विज्ञेयाः। अथ जातिभ्रंशकरादिषु एत
त्स्वरूपं च प्राग्वदर्शितं। ब्राह्मणस्य रुजः करणं घ्रातिरघ्रेयमद्ययोः। जिह्मता दिति मत्स्यस्य सर्पाश्च रुजःकृत्स्नवैरो
र्मैथुनाटनादि। आख्येयं प्रतिगंधि। अत्र प्रायश्चित्तमाह स एव। जातिभ्रंशकरं कर्म कृत्वान्यतममिच्छया। चरेत्सांतप
नं कृच्छ्रं प्राजापत्यमनिच्छया। संकरापात्रकृत्यासु मासं शोधनमैंदवं। मलिनीकरणीयेषु तप्तस्यात् यावकं त्र्यहं।

बृहस्पतिः। ब्राह्मणस्य रुजः कृत्वा रासनादि प्रमापणे। निंदितान्याधनादाने तत्रार्द्धं व्रतमाचरेत्॥ यमः। सींकरीक
रणे तत्वा मासमश्नीतयावकं। तत्र जातिस्त्र प्रमथवा प्रायश्चित्तं समाचरेत्॥ अपात्रीकरणे तत्वा तप्तकृच्छ्रेण शुध्यति॥ शी
तकृच्छ्रेण वा शुद्धिर्महासांतपनेन वा मलिनीकरणीयेषु तप्तस्याद्यावि शोधनमिति॥ जातिभ्रंशकरादिष्वन्यतमप्रक
रणमन्वाघनं प्रायश्चित्तानि जातिशक्तिकामाकामसत्त्वदक्ष्यासापेक्षया योज्यानि॥ कृमिकीटवयोहत्यामद्यानुगतभोज
नी। फलैधःकुसुमस्तेयमधैर्यं च मलावहमित्यत्र तन्मपस्थचिष्टा अस्थिरदन्ता घुणादिर्जंतवः। ताप्यादिष्टानस्थि
जैंत्रदनान्यायाज्ञवल्क्यः। अस्थ्न्वतां सहस्रं तु तथानस्थ्न्वतामनः इति। अत्र शूद्रहत्याव्रतं चरेदित्यनुवर्तते। तत्र षण्मा
सव्रतं। अस्थिमंतः अस्थ्नवतः कृकलासकूटप्रभृतयः अनस्थिमंतो यूकमशकप्रभृतयः अनः शकटं तत्परिमाण
मित्यर्थः। अत्राप्यं संख्यापरिमाणापेक्षयान्यूनाधिकहननं प्रायश्चित्तमपि तथैव कल्पनीयं। तथा मार्जारगोधा
नकुलमंडूकश्वपतत्रिणः। हत्वा त्र्यहं पिबेत्क्षीरं कृच्छ्रं वापादिकं चरेत्॥ मनुः पयः पिबेत्त्रिरात्रं वा योजनं वाध्वनो
व्रजेत्। उपस्पृशेत्स्रवंत्यां वा सूक्तं वाब्दैवतं जपेत्॥ उपस्पृशेत्स्नानं। एतच्चाकामतः कामतो द्विगुणं कामाता २९१
भ्यासे विशिष्टं। श्वमार्जारमंडूकनकुलसर्पदर्दुरमूषकान् हत्वा कृच्छ्रं द्वादशरात्रं चरेत् किंचिद्वा दद्यादिति। दर्दुरः

छुछुंदरिरल्पमूषिका वा। एतच्च प्रत्येकघातमनेकेषां पाण्मासिकं। मनुः। हत्वा हंसं बलाकां च बकं बर्हिणमेव वा। वानरं श्ये
नभासौ स्पर्शयेद्ब्राह्मणाय गां। क्रव्यादस्तु मृगान् हत्वा धेनुं दद्यात्पयस्विनीं। अक्रव्यादा वत्सतरीमुष्ट्रं हत्वा तु कृष्ण
लं। याज्ञवल्क्यः। गजनीलवृषाः पंच शुकवत्सा द्विहायनः। खराजमाषभूपाला दयं क्रौंचं त्रिहायनः। उरगश्चायसो
दंडः षंढः त्रपुसीसकं। कालहंसघाटादय उद्भ्रे गुंजा ह्यंशुकं। षंढाकान हुंसकः। सर्वमृगपक्षिरूप एव नगा ब्राह्मणा
दिरूपः। त्रपुसीसकं वा माषपरिमितं। तथा च मनुः। अभ्रिकाकार्षसीं दद्यात्सर्पं हत्वा द्विजोत्तमः। पलालभारकं षंढे सी
सकं चैव माषकमिति। पलालभारः सीसकमाषाया विकल्पः। याज्ञवल्क्यः। तित्तिरौ तु तिलद्रोणं गजादीनामशक्नुवन्॥
दानं दातुं चरेत्कृच्छ्रमेकैकस्य विशुद्धये। तत्र निम्नोपलक्षणमतः शक्त्याद्यपेक्षयात्राधिक्यं कल्पनीयं। अष्टमुष्टि
तावकिंचिद्दाष्टौ तु पुष्कलं। पुष्कलानि तु चत्वारि आढकः परिकीर्तितः। चतुराढको भवेद्द्रोण इत्युक्तं मानलक्षणं। याज्ञ
वल्क्यः। फलपुष्पान्नरसजसत्त्वघाते घृताशनं। किंचित्सास्थिवधे देयं प्राणायामस्त्वनस्थिकां। घृताघनशमाहारीत्तरपरि
त्यागनायंत्रप्रायश्चित्तविशेषानाम्नातस्तत्र किंचित्सास्थितमनडत्यनडुद्द्रष्टव्यं। पराशरः। हंससारसचक्राक्रौंचकुक्कुट
घातकः। मयूरमाषोद्वारकताक्रनशुध्यति। मुद्रं चटि टिट्टिभं बकं पारापतं तथा। आडिं चित्रबकं हत्वा शुध्येद्दिन

क्रौंचाजानां वा बकाककपोतानां शारीति त्रिरिघातकः। अंतर्जले त्रिसंध्ये प्राणायामेन शुध्यति। गृध्रश्येनविहंग-
नामुलूकस्य घातकः। अपक्वाशी दिनं तिष्ठेत्काले मारुताशनः। इत्यामूषकमार्जारसर्पाजगरडुंडुभान्। तत्र श-
त्माजयद्विप्रान्लोहदंडश्च दक्षिणा। सर्पकच्छपगोधानां शशशल्यकघातकः। ईताकपलगुंजाशी अहोरात्रेण शु-
ध्यति। मृगाराहिवराहाणाममविकाबस्तघातनं। हस्तजंबूकऋक्षाणी तरक्षूणां तरक्षूणां वधातकः। तिलप्रस्थं व
सोद्यात् वायुभक्षो दिनत्रयं। गजामश्वउरगाष्ट्रगवयानां निपातनात्। प्रायश्चित्तमहोरात्रं त्रिसंध्यं वा वगाहनं॥ खर
वानरसिंहानां वित्रकव्याघ्रघातकः। शुद्ध्यति त्रिरात्रेण ब्राह्मणानां च भोजनेरिति। याज्ञवल्क्यः। पुंश्चरनीवान
रखरेदृष्टश्चाश्वादिवायसैः। प्राणायामं जले कृत्वा घृतं प्राश्य विशुध्यतीति। घृतप्राशनं त्वाजन प्रत्याम्नायः। मनुः।
श्वसृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च। नराश्वोष्ट्रवराहैश्च प्राणायामेन शुध्यतीति। एतद्दंशकविषये
शक्तस्य कल्प्यं। यत्तु सुमंतुवचनं श्वसृगालमृगमहिषाजाविकखरकरभनकुलमार्जारमूषिकालबकाकपुरु-
षदंष्ट्रानामापादिष्टया निःशानं प्राणायामत्रयं च वि। तत्रात्तरक्षदेवं दृष्टविषयं समर्थदृष्टविषये तु अंगिर-
सोक्तं। ब्रह्मचारी शुनादष्टस्त्र्यहं सायं पिबेत्पयः। गृहस्थश्च द्विरात्रं तु एकाहं वाग्निहोत्रवान्। नाभेरूर्ध्वं तु दष्ट २९८

स्यात्तदेव द्विगुणेन त्ववत्सस्यादत त्रिगुणं वक्त्रे मस्तके तु चतुर्गुणमिति। क्षत्रियादिकपादपादानं कल्पनीयं। स्त्री
विषये तु पराशरोक्तं। ब्राह्मणी तु शुना दष्टा जंबूकेन वृकेण वा। उदितं ग्रहनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेदिति। ब्राह्मणी तूप-
लक्षणं। व्रतस्थितायाविशेषस्तेनोक्तो बृहस्त्रिरात्रमाथापवासं शुनादष्टा तु सव्रतः। सघृतं यावकं भुक्त्वा व्रतशेषं समापयेदि-
ति। स च व्रतस्य त्रलिंगमविवक्षितं। अनुपादयग्नतश्चायान्यच्छलस्पृशः रजस्वलायदा दष्टा शुना जंबुकरासभैः। पंचरात्रं निरा-
हारा पंचगव्येन शुध्यति। ऊर्ध्वं तु द्विगुणं नाभेर्वक्त्रे तु द्विगुणं तथा। चतुर्गुणं स्मृतं मूर्ध्नि दष्टेन्यत्रा स्तुतिर्भवेत्। अन्यत्र अरज-
स्वलावस्थायां शानातपः। शुना घ्राताव लीढस्य नखैर्वा लिखितस्य च। अद्भिः प्रक्षालनं प्रोक्तं अग्निना चोपचूलनमिति। उ-
पचूलनं तापनं। नाड़ः। ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभवे। कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत्। गवां मूत्रपु-
रीषेण त्रिसंध्यं स्नानमाचरेत्। त्रिरात्रं पंचगव्याशी वधोनान्या विशुध्यति। नाभिकंठांतरा द्भूतव्रणे स्वात्मघातः कृमिः॥
षड्रात्रं तु तदा प्रोक्तं प्राजापत्यं शिरोव्रणे इति। क्षत्रियादिषु पादपादानं कल्प्यं॥ श्वादिदंशनिमित्तव्रणे कृम्यादिनिःस-
रणे श्वादिदंशनिमित्तप्रायश्चित्तं कृम्यादिनिःसरणप्रायश्चित्तं च॥ अथ प्रकीर्णकप्रायश्चित्तानि तत्र याज्ञवल्क्यः। वचनी-
नि प्रक्षनानि तत्यानि धीयीत। प्राणायामी जले स्नात्वा खरयानोष्ट्रयानगः। नग्नः स्नात्वा च सुप्त्वा च गत्वा चैव दिवा स्त्रि-

यः। खरयुक्तं यानं रथाद्यं वमुष्ट्रयानी खियोश्च स्त्रियोः इदं चकामतः ज्ञाते। उष्ट्रयानं समारुह्य खरयानं च कामतः
तिमन्तुस्मरणात्। अकामतः स्नानमात्रं उत्तयत्राभ्यासे कल्प्यं। साज्ञाखराष्टारापाणापिहि द्विगुणावृत्तिः कल्पनीया
तथा। गुरुं त्वंकृत्य हुंकृत्य विप्रं निर्जित्य वादतः बद्ध्वा वा वाससा क्षिप्रं प्रसाद्योपवसेद्दिनं। अभ्यासे यमात्क्रोबाद तद्दा
ताडने कृते वा प्रायश्चित्तविधिस्मृतिः। त्रिरात्रोपोषितः स्नात्वा प्रणिपत्य प्रसादयेदिति। तथा। विप्रदण्डोद्यमे कृच्छ्रस्त्वतिकृच्छ्रो
निपातने। कृच्छ्रातिकृच्छ्रोऽसृक्पाते कृच्छ्रोऽभ्यन्तरशोणिते। विप्रदण्डोद्यमो विप्रजिघांसया दण्डोद्यमः। हस्तस्थितैः का
ष्ठादिना ताडयित्वा वा ऽसृग्दर्शनमाचरेत्। अस्थिभङ्गादितिकृच्छ्रस्य त्वपराकस्त्वङ्गकर्तने। यमः। पादेन ब्राह्मणं स्पृष्ट्वा प्रा
यश्चित्तविधिस्मृतिः। दिवासोपोषितः स्नात्वा प्रणिपत्य प्रसादयेत्। एतच्च कामकृते। अकामतः प्रसादनमात्रमेव। असंनि
हिते ऽपि सर्वदा कवा। अकामतो मूत्रपुरीषोत्सर्गे मनुः। विनाद्भिरप्सु वाप्यार्तः शारीरं संनिषेव्य च। सचैलो बहिराप्लुत्य
गामालभ्य विशुध्यति। गामालभ्य स्पृष्ट्वा कामतस्तु यमाः। आपद्गतो विनातोयं शारीरं यो निषेवते। एकाहं क्षपणं कृ
त्वा सचैलं स्नानमाचरेत्। अनापदि मुत्रसमुत्सर्गे। अश्वमेधो वा महतस्तस्य सतत्रमिति। मनुः। वेदोदितानां नित्यानां कर्म २९८
णां समतिक्रमे। स्नातकव्रतलोपे च प्रायश्चित्तमभोजनं। तत्रापि तत्समात्रमेव नित्यहोमादिषु लोपसति प्राय

श्चित्तविशेषाणामाम्नानस्तत्रोपवासः प्रायश्चित्तं। आम्नातस्यत्वनस्य तदा भोजनेऽसमुच्चीयते। स्नातकव्रतानाधिकारकः उ। ए
तेषामाचाराणामेकैकस्य व्यतिक्रमे गायत्र्यष्टशतं जपेदित्येतद्बोध्यं। नित्यहस्य तिशे अनिवृत्तौ महायज्ञानां तु क्र
मशः प्रत्यहं गृही। अनातुरः सति धने कृच्छ्रार्धेन समश्नुते। महायज्ञाः पञ्च महायज्ञाः। एतच्च विशेषानुपादानादनापद्यकामकृते॥
कामकृते द्विगुणं। आपदि कामतः कृच्छ्रपादः। कामतः कृच्छ्रार्धमेवेति कल्प्यं। एतच्च सकृत्करणे अभ्यासे तु कल्प्यं। तथा। ज्ञानेन
णा ब्रह्मचर्यानाशा पिकृच्छ्रार्धमाचरेत्। देवलः। स्वनायन्त्रियदा काश्यदगाम्यतिना रावाद्रत्। प्राजापत्यं चरेद्विप्रः क्षत्रिया द्विवसा
न्वा षड्रात्रं उचरे द्विशश्च विरात्रं शूद्रश्चाचरेत्। हारीतः। वहन्नुकर्मण्डलुं रिक्तमस्नातो अश्रुपातजने। आहारात्रणशुद्धिः स्या
द्विनजाप्यनावेव हीति। उपवासदिनजपायोः समुच्चयः। यमः। नर्यो को विषमं दद्यान्न यास्वतनदापयत्। प्राजापत्यन
कृच्छ्रेण शुध्यात्कर्मणस्तस्मात्। नदीसंक्रमहं उद्यकन्या विघ्नकरस्य च सामविषमकर्तुश्च निःस्नातिनापि पद्येत। त्रयाणा
मपि वातषी प्रत्यापत्तिं उमार्यति। नद्यलाद्वैनचान्ने न द्विजश्चान्द्रायणं चरेत्। संक्रमउदकावतरणं वा लोसाम
विषमकर्तृष्टिजादौ द्विजस्य चान्द्रायणं क्षत्रियादीनां तु पादपादह्रास्या कल्पनीयं। ऋष्यशृङ्गः। रुद्रसापं पवनाद्याग्नि
यघन्यस्याम दत्तायितं। प्रायश्चित्तं महारात्रं धनुर्हं उक्षदक्षिणा। कामाण धनुर्हं द्रोदक्षिणा गौतमः। नास्तिकाद्य

क्षमिति॥ कःसहस्रं सान्तापनं सैत्तापनं उपपन्नातामनसाध्याययेत्॥ ब्राह्मणान्वासहस्रं संतापनं॥ तत्पाद्यथनलाभव
धःपृथक्वर्षाणि॥ति॥तल्पैनार्यां॥ तल्पादानीं च लाभस्य बाधविघ्नकरणं पृथक्प्रायश्चित्तं संवत्सरं प्राजापत्यं ब्रह्मचर्यमि
त्यर्थः॥ हारीतः॥ चण्डालश्वपचानां तु संकरसमुपस्थितं आहारात्त्रिरात्रं स्यात् द्विरात्रं षडहः स्मृतौ॥ अविज्ञातस्तु
चण्डालः सम्यग्गृहे निवसेद्यदि॥ तस्यात् ज्ञात्वा उपसन्नस्य विप्राः कुर्युरनुग्रहं॥ दधिक्षीरघृतैर्युक्तं त्र्यहं गोमूत्रयावकं॥ प्रा
शायसहस्रात् तेषु मासामर्कं निरन्तरं॥ तथा यद्गृहीत्वा नाचीनान्तु कृत्वा नासनानतः सद्यः स्नानं प्रकुर्वीत॥ तत्सा
म्यस्थाप्रयातान्यावत्॥ वसिष्ठः॥ दीत्वात्स्मार्ग्येराजिकरात्रमुपवासस्त्रिरात्रं ब्राह्मणः॥ रुद्रमध्ये दस्यदण्डानुभाराहित
स्त्रिरात्रं राजाकृनखीरूपावदेतस्य त्र्यहं द्रादशरात्रं वा रिवाहारयातामिति॥ देतान्नखीश्चदुष्टान्तुत्पादायदित्यर्थः॥
शंखः॥ अध्यस्यशायनैयानमासनैपादुकं तथा॥ द्विजः पलाशाद्वृक्षस्य त्रिरात्रं तु व्रतीभवेत्॥ क्षत्रियस्तु रणे पृष्ठं दत्त्वा
प्राणपरायणः॥ संवत्सरं व्रतं कुर्यात् छित्वा वृक्षं फलप्रदं॥ द्वौ विप्रो ब्राह्मणाग्नी वा दंपती गोद्विजाश्रमो॥ अन्तरेण
यदा गच्छेद्द्विजश्चांद्रायणं चरेत्॥ दोहयागो गच्छता दाहे॥ एतद्वाप्यासत्रनत्यासवर्षेसद्विद्वादित्याद्यरिष्टद २९९
र्शनादावपि स एव॥ दुःस्वप्नारिष्टदर्शनादौ घृतं हिरण्यं च दद्यादिति तथा पादप्रतापनं च वाहृत्य चावक्रमिषस्य॥ ३००

कृशोः प्रसूज्यपादो उदिनामकं व्रतीभवेत्॥ देवलः॥ सिंधुसौवीरसौराष्ट्रं तथा प्रत्यंतवासिनः॥ अंगवंगकलिंगो
ड्रान्गत्वा संस्कारमर्हति॥ एतद्वतीर्थयात्राव्यतिरिक्तेणयमः॥ प्रत्यादित्यं न मेहेत न पश्येदात्मनः शकृत् दृष्ट्वा सूर्यं
निरीक्षेत ब्राह्मणं गामथापि वा॥ हारीतः॥ क्षत्रियाभिवादने अहोरात्रमुपवासो द्विजस्यापि शूद्रस्याभिवादने त्रिरात्रमुप
वासः॥ तथा॥ शय्यारूढपादुकोपानद्दाराचितपादोच्छिष्टांधकारस्थश्राद्धकृज्जपदेवपूजादिरतानभिवादने त्रिरात्रमुपवा
सः स्यादन्यत्र निमंत्रितेनान्यत्राभिजानपि त्रिरात्रमिति॥ आपस्तंबः॥ समित्पुष्पकुशाज्याम्बुमृदन्नाक्षतपाणिकां जपहो
मं च कुर्वाणं नाभिवादयेद्द्विजः॥ अत्रापि जपहोमसाहचर्यात् ... ॥ ततः त्रिरात्रमेव॥ शंखः॥ नादकेन हस्तेनाभिवा
दयेन्नाभिरूपं हस्तेन पथा जपदाह्मानामुविन्नजपन्नादेवपितृकार्यं कुर्वन्नं शयानं इति॥ अत्रापि त्रिरात्रमेव॥ याज्ञवल्क्यः॥
दर्शकालेवयःशक्तिपापं चावेक्ष्य यत्नतः॥ प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिः॥ यथास्मृत्यंतरा॥ हसितं जंभिता
स्फोटनानि नाकस्मात्कुर्यात्॥ तथा नादद्यात् नसिक्तायामन्नस्य रश्मिश्चादिकर्त्तायित्रीत वर्ज्य सम्प्रतिः कुर्वन्नप्रजाभव
तिध्रुवमित्यादिषु प्रायश्चित्तानामिहितं॥ एवं विधस्थले दृष्टदशाद्यपेक्षया कल्पनीयमित्यर्थः॥ इति प्राकीर्णकं प्राय
श्चित्तं॥ अथ मिथ्याभिशंसनप्रायश्चित्तं॥ याज्ञवल्क्यः॥ महापापोपपापान्यां योभिशंसन्मृषापरं॥ अब्भक्षो मासमा

सीतस्य जापी नियतेन्द्रियः। जपश्च शुद्धवतीनां। तथा च वसिष्ठः। ब्राह्मणमनृतेनाभिशंस्य पतनीयेन वा मासम
ब्दं शुद्धवतीरावर्त्तयेदश्वमेधावभृथं गच्छेदिति। शुद्धवती शुद्धपापापतनाः एतन्नु सर्वं विषयत्रानुलोम्येन वा प्रा
लो३ तिलोम्येन वा मिथ्याभिशंसनं दंडानुसारेण कल्प्यं। दंडश्च याज्ञवल्क्येनाक्रोशातिलोम्यापवादे च द्विगुणत्रिगुणा द
माः वर्णानामानुलोम्येन तस्मादर्द्धार्द्धहानितः इति। सत्यदोषाभिशंसने तु मिथ्याभिशंसप्रायश्चित्तार्द्धं तथा। म
हापातकाभिशंसनमासमब्दं प्रायश्चित्तं तत्समत्वदतिदिष्टाभिशंसनेष्वर्द्धं उपपातकाभिशंसने पादः शल्य
कल्पनीयं। एवं प्रकीर्णकाभिशंसनेपि कल्पनीयं। यत्तु शंखलिखिताभ्यां। नास्तिकः कृतघ्नः कूटव्यवहारी ब्राह्मणवृ
त्तिघ्नो मिथ्याभिशंसी चेत्येते षड्वर्षाणि ब्राह्मणगृहे भैक्षं चरेयुः। संवत्सरं धौतेन द्विमश्नीयुः। षण्मासान्वा गावश्चानुग
च्छेयुरिति तदभ्यासतारतम्यापेक्षया योजनीयं। याज्ञवल्क्यः। अभिशस्तो मृषा कृच्छ्रं चरेदाग्नेयमेव वा। निर्वपेत्तु पुरोडा
शं वायव्यं पशुमेव वा। प्राजापत्यकृच्छ्रमाग्नेयपुरोडाशं वायुदैवत्यं पशुं वाभिशस्तस्तमःशक्त्याद्यपेक्षया योजनी
यं। यावता तेनैवाभिशस्तो व्याख्यात इति वसिष्ठेन मासमब्दं च यदुक्तं तन्मिथ्याभिशापानंतरं परं किंचित्कालमंतरा
प्रायश्चित्तस्य। याज्ञवल्क्यः। यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः। तत्र तत्र तिलैर्होमो गायत्र्या वाचनं तथा। अ ३०१

भिशस्त्यादिना महापातकादिपतनीयप्रायश्चित्तान्युक्त्वाधुना निष्कासनप्रकारं याज्ञवल्क्यः। दासीकुंभं बहिर्ग्रामान्निन
येरन् स्वबांधवाः। पतितस्य बहिः कुर्युः सर्वकार्येषु चैव तं। अभिशस्त्यादिना अकृतप्रायश्चित्तस्य पतितस्य ज्ञातिबांधवाः सपि
डादिप्रेषितया दास्या आनीतमुदकपूर्णं घटं ग्रामाद्बहिर्निनाय्य पर्यस्येयुः। अथवा सपिंडा दास्यैव पर्यस्येत्॥
तथा च मनुः। दासी घटमपां पूर्णं पर्यस्येत्प्रेतवत्पदा। अहोरात्रमुपासीरन्नशौचं बांधवैः सह इति। प्रेतवदिति प्राचीनावी
तित्वादि प्राप्त्यर्थं। अत्रापरं विशेषमाह स एव। पतितस्योदकं कार्यं सपिंडैर्बांधवैः सह। निंदितेहनि सायाह्ने ज्ञात्यृत्वि
ग्गुरुसंनिधौ। निंदितेहनि रिक्तातिथ्यादिषु। गौतमः। तस्य विद्यागुरून्योनिसंबंधांश्च संनिपात्य सर्वाण्युदकादीनि प्रेतकार्या
णि कुर्युः। पात्रं चास्य विपर्यस्येयुः दासः कर्मकरो वा अवकरात्पात्रमानीय घटात्पूरयित्वा दक्षिणामुखः पदा विप
र्यस्येदमुमनुदकं करोमीति नामग्राहं तं सर्वेन्वारभेरन्। प्राचीनावीतिनो मुक्तशिखा विद्यागुरवो यो
निसंबंधाश्च वीक्षेरन्नप उपस्पृश्य ग्रामं प्रविशेयुः। अत ऊर्ध्वं तेन संभाष्य तिष्ठेदेकरात्रं जपन्सावित्रीं ज्ञानपूर्वं त्रि
रात्रमिति। अयमर्थः। यः पतितत्वादिना हेतुनाभ्याज्यत्वेनाभिशस्तं विद्यागुरूनाचार्यादीन्योनिसंबंधान्मातामह
मातुलादींश्च पुत्रादयः संनिपात्य मन्त्रयित्वा तस्य सत्यानंगकारणमावेद्य तैरनुमताः पुत्रादयः सपिंडाः सर्वाणि पि

डोदकश्राद्धादीनि प्रेतकार्याणि जीवंतमेव समुद्दिश्य तत्पात्रं वास्य त्याज्यस्य ज्ञातिविपर्यस्येयुः कथमित्य
पेक्षायामाह स इत्यादि। तया मध्ये एक अवकरात्पुराणादि स्थानादसृविपात्रमानीय दास्यानीतोदकघटात्
त्पात्रमुदकेन पूरयित्वा तदनंतरं दक्षिणामुखो भूत्वा यदं मनुदकं कारामा त्यनिक्षयपदा विपर्यस्येत्। तद्विपर्यस्येत्
त्याज्यसपिंडाश्च ज्ञातयः प्राचीनावीतिनो मुक्तशिखा अवारांतरं। विद्यागुरवो यानि संबंधावीक्षरन्। ततः श्राव
ग्रामं प्रविशेति। अत ऊर्ध्वं अज्ञानात्तेन संभाष्य सावित्रीं जपेन्नाहोरात्रं तिष्ठेत्। ज्ञानात्तु त्रिरात्रमिति जपेन्नित्यर्थः॥ अथ म
हापातकादिपतनीयकर्मप्रायश्चित्तानंतरं कर्तव्यं। याज्ञवल्क्यः। चरितव्रत आयाते निनयेयुरन्नवं घटं। जुगुप्सेरन्नचा
प्यनं संपिबेयुश्च सर्वशः। तत्प्रायश्चित्तसमागतेन वमनुपदं तमुदकपूर्णं ऊते शुद्धजलाशये निनायपुंसः प्रक्षि
पेयुः सर्वशः सर्वकार्येषु संपिबेयुः संव्यवहरेयुः। मनुः। प्रायश्चित्ते तु चरिते पूर्णकुंभमपां नवं। तेनैव सार्धं प्रा
स्येयुः स्नात्वा पुण्ये जलाशये इति। प्रास्येयुः प्रक्षिपेयुः। गौतमः। यस्तु प्रायश्चित्तेन शुध्येत्तस्मिन् शुद्धे शातकौंभमयं
पात्रं पुण्यतमात् ह्रदात्पूरयित्वा स्रवंतीभ्यो वा तत एनमप उपस्पर्शयेयुरथास्मै तत्पात्रं दद्युस्तत्संप्रतिगृह्य
जपेच्छांता द्यौः शांता पृथिवी शांतं शिवमंतरिक्षं यो रोचनस्तमिह गृह्णामीत्येतैर्यजुर्भिः पावमानी ३०१

निःकूष्माण्डीभिश्चाज्यं जुहुयात् हिरण्यं ब्राह्मणाय दद्याद्गां वाचार्यायेति वयास्यप्राणीति कं प्रायश्चित्तं स्मृतः शुद्धे पादेनादश
शीत्युदकं सा विष्णुपपातकं क्षिति वसिष्ठः। तथाभिषिक्तस्य प्रत्युद्धारः पुत्रजन्मना व्याख्यात इति॥ अभिषिक्तस्य प्रवेशिरा-
त्यात्त तस्नानस्य प्रत्युद्धारात् नवति सवपुत्रजन्मना व्याख्यातः। शावक्षिरात्या प्रत्युद्धारानंतरं जातकर्मादिसंस्कारैः संस्कुर्या
दित्यर्थः। याज्ञवल्क्यः। घटापवर्जितं ज्ञातिमध्यस्थो यवसं गवां। प्रदद्यात् प्रथमं गोभिः सत्कृतस्य हि सत्क्रिया। घटापवर्जितज्ञ
ावक्षिरीत्या पुण्यह्रदादि घटनिक्षिप्तेयवसं त्रणं गोभिः सत्कारस्य हेतुत्वेन तच्छ्रेणं। हारीतः। स्वशिरसा यवसमादाय गोभ्यो
दद्यात् दत्ता प्रतिगृह्णीयुरथैनं प्रवदनीयस्तु रिति। गोनिरस्वीकरणे तु नः प्रायश्चित्तं कर्तव्यमित्यर्थः युक्तं भवति॥ अथ स्त्री
णां विशेषपतनादावाह वसिष्ठः। चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या। पतिघ्नी च विशेषेण जुंगितोपगता च या॥
जुंगितः प्रतिलोमजः। याज्ञवल्क्यः। नीचाभिगमनं गर्भपातनं भर्तृहिंसनं। विशेषपतनीयानि स्त्रीणामेतान्यपि ध्रुवं॥
अपि शब्दाद्ब्रह्महत्यादि पुरुषपतननिमित्तान्यपि। नीचाहीनवर्णः शूद्रः तथा। पतितानामेष एव विधिः स्त्रीणा
प्रकीर्तितः। वासो गृहांतिकादेयमन्नं वासः सरक्षणं। एष एव यः पुरुषाणामत्र तु प्रायश्चित्तानि परित्यागविधिः य
थ तत्प्रायश्चित्तानां परिग्रहविधिः स्यात् तत्र विशेषः। वासो गृहांतिकादेयमिति। अन्यापि विशेषः स्नानेवाक्तः श

रणागतबालस्त्रीहिंसकान्संपिबन्नपि। वा। सुव्रतानपि सततं कृतसहितानिमान्। वा। सुव्रतान्कृतप्रायश्चित्ता
न्संपिबन्नप्यावहारादित्यर्थः। इति प्रकाशप्रायश्चित्तानि। अथ रहस्यकृतपापप्रायश्चित्तानि कर्तृव्यतिरिक्तैरविज्ञातं
पापं रहस्यमित्युच्यते। अतश्च परस्त्रीसेवागादिषु व्याधिभिः कर्तृभिर्विज्ञातमपि यापं रहस्यमेव कर्तृव्यतिरिक्तैरनभि
ज्ञातत्वात्। इदं वक्ष्यमाणप्रायश्चित्तं यदि कर्ता धर्मशास्त्रनिपुणः स्यादन्यस्मात् अनिवाद्यैव यथाविधि तत्कुर्यात्। यदि
स्वयमन्यस्माद्दाकनापि रहस्यं महापातकादिकं कृतं तेनेतत्र कस्य यातकस्य का वा निष्कृतिरिति विदुषः पृष्ट्वा तदुक्त
मनुतिष्ठेत्। तद्व्रतं द्विविधं वक्ष्यमाणमघमर्षणजपादि दानादि च। जपविद्याधिकारः। स्त्रीशूद्राणां दानादि दा
नादिस्मृत्यैतरत्नानि। तथा च बृहद्वसिष्ठः। रहस्यं यत्किंचित्कुरुते पापं जन्मप्रभृति मानवः। अपि गायत्रीमात्रं तु प्राक्
वेदविदा जनाः। दशाहस्त्रं दशावंशानमेवतत्र पंच वाप्यधिकं दद्यात्तज्ज्ञोऽवमकिष्यते। वसिष्ठः। सुवर्ण
नातैत्त्वाउसरबुरं त्वम्रमात्रकं। तिलैः प्रच्छाद्य यो दद्यात्तस्य पुण्यफलं शृणु। कृष्णाजिने तिलान्कृत्वा हिरण्यं मधु
सर्पिषी। ददाति यस्तु विप्राय सर्वं तरति दुष्कृतं। तथा। वैशाख्यां पौर्णमास्यां तु ब्राह्मणान्सप्त पंच वा। तिलान्क्षौ २५५
द्रेण संमिश्रान्कृष्णाचायदि वितरान्। प्रीयतां धर्मराजा मनसि वर्तते। यावज्जीवकृतं पापं तत्क्षणे 303

देव नश्यति। एवं माघस्नानादीन्यपि पुराणोक्तव्रतानि। अतश्च स्त्रीशूद्राणामपि रहस्यप्रायश्चित्ताधिकारः। स्त्रि॥
याज्ञवल्क्यः। अनभिख्यातदोषस्तु रहस्यं व्रतमाचरेत्। त्रिरात्रोपोषितो जप्त्वा ब्रह्महा त्वघमर्षणं। अंतर्जले विशुध्य
तु गां दत्वा तु पयस्विनीं। त्रिरात्रेयावज्ञालोपवासस्य तृतीयदिवसे अघमर्षणेन दह्यमानं तु हुतेनाव हत्वा देवताकीर्तितस्य
त्यस्य तिसृत्रं जलमध्ये निमग्नसकलशरीरस्त्रिजपेत्। अनंतरं पयस्विनीं गां ब्राह्मणाय दत्वा विशुध्यति। तथा लामस्य
स्वाहेति दिवा दिवसं मारुताशनः। जले स्थश्चानि जुहुयाद्वारिशाहृताहुतीः। आहारान्नाभिषितस्त्ररात्रादुद्वासेत्त्वा
प्रातरुदकादुत्तीर्य लोमभ्यः स्वाहेत्याद्यैरष्टभिर्मंत्रैरेकैकेन पंच पंचाहुतीर्जुहुयात्। एतत्प्राणांतिकप्रायश्चित्तनि
मित्तब्रह्मवधस्य परार्कसुमंतुः। देवद्विजगुरून्हत्वाप्सु निमग्नो घमर्षणं। सूक्तं त्रिरावर्तयेन्मातरं भगिनीं गत्वा मातृ
ष्वसारं स्नुषां सखीं चान्यां चागम्यागमनं कृत्वाघमर्षणामवीतज्जील त्रिरावर्त्यतादतस्मात्पूतात्तवतीति एतच्चाकाम
कृते। अस्मिन्नेव विषये गोदानाशक्तस्य मनूक्तं। सव्याहृतिप्रणवकाः प्राणायामास्तु षोडश। अपि भ्रूणहनं मासा
त्पुनंत्यहरहः कृताः इति। अकामतो स्यास्त्वैनं मोक्ता। तद्व्रत एव ब्रह्महत्यासुरापानस्वर्णस्तेयगुरुतल्पेषु प्राण
यामैः श्रांताघमर्षणं जपेदिति। तद्व्रत एव श्रोतः। अत्र त्रिंशद्रात्रव्रतं कल्प्यं कामकारतो बोधायनोक्तं॥ ग्रामात्

वींवादीवींवादिशमुपनिःक्रम्यस्नातःस्थविवासाउदकौतस्थंडिलमुपलिप्यसकृत्क्लिन्नवासाःसकृत्स्नातनपा
णिनादित्याभिमुखोघमर्षणंस्वाध्यायमधीयीतप्रातःशतंमध्याह्नेशतमपराह्णेशतमपरिमितंवादितश्चन
क्षत्रश्चप्रसृतयायवंप्राश्नीयात्ज्ञानकृतस्याज्ञानकृतस्योपपातकस्यषड्रात्रात्समुच्यतेतथादशरात्रान्म
हापातकान्यापब्रह्महत्यासुवर्णस्तेयसुरापाणमितिवर्जयित्वाएकविंशतिरात्रेणतान्यपितरतीति।एतदेवका
मतःश्रोत्रियावार्यसवनस्थवधविषयंजपो।कामतःसहतश्रोत्रियादिवधेत्र।कामतस्त्वश्रोत्रियवधस्यासवमन्त्रौ
अरण्येवात्रिरभ्यस्यप्रयातात्वद्दर्शहितौमुच्यतेपातकैःसर्वैःपराकैःशोधितस्त्रिभिरिति।निमित्तकर्तृविषयवश
रीतात्रौद्रष्टव्यौ।महापातकादिपातकोपपातकपातकोपपातकानामकतमसन्निपातेवाघमर्षणमेवत्रि
र्जपेदिति।निर्गुणवधविषयंअनुयाद्दकाविषयंवविस्तौ।ब्रह्महत्यांत्रयाशामान्धासौमुदीचींवादिशमुपनिः
क्रम्यप्रस्नातैधाननाग्निप्रज्वाल्याघमर्षणेनाष्टसहस्रमाज्याहुतीर्जुहुयान्तादतस्मात्पापात्पूतोभवतीति।इदंतुगुणव
तांनिर्गुणवधविषयंप्राजापत्यकानुमैश्वस्वविषयत्वमन्त्रौ।आद्रेन्नपवासंयुक्तस्त्रिरह्नोऽभ्युपयन्नपःमुच्यतेपात
कैःसर्वैस्त्रिर्जपित्वाघमर्षणमिति॥अथसुरापाणप्रायश्चित्तं।तत्रवचारिंशाहृताङ्गतीरित्यत्रवर्त्तमानयाज्ञ ३०४

वल्क्यः।त्रिरात्रोपोषितोजुहुयात्कूष्माण्डीर्निघृतंशुचिः।इहकूष्माण्डीभिः।यद्देवादेवहेडनमित्याद्याभिर्ऋग्भिश्चत्वारिंशदा
ज्याहुतीर्जुहुयादिति।एतच्चाकामतःपेष्टीमद्यव्यतिरिक्तमद्यपानविषयंद्रष्टव्यं।अत्रकर्माङ्गत्वाद्गोदानं
कर्तव्यं।एतच्चाप्यदशाधिकपावत।अत्रैवविषयेत्रिरात्रोपवासयुक्तकूष्माण्डहोमाशक्तस्यमन्त्रौ।कौत्संजप्त्वापउदित्यनेनवा
सिष्ठंचप्रतिऋचं।माहित्रंशुद्धवत्यश्चसुरापोऽपिविशुद्ध्यतीति।अत्रापिषोडशातिमासमितिवानुवर्तते॥अतःप्रतिदिनंषो
डशकृत्वामासपर्यन्तंनियताहारस्तुकर्मत्रजपःकार्यः।अपशात्पतकोसः।अपनःशोशुचदघमित्यतस्यकौत्स
दृष्टंप्रतिऋचंप्रतीच्यामात्रिरुपर्यंवसिष्ठस्यतत्।माहित्रंमाहित्रीणामवास्त्वित्यतत्शुद्धवत्यः।एतोन्विन्द्रंस्तवा
मेत्याद्याः।एतेषामन्यतमजपःकामकारपितेनिवाकृतेद्रष्टव्यौ।मन्त्रैःशाकलहोमीयैरब्दंहुत्वाघृतंद्विजःसगुरु
प्यहत्यापानाजच्चावानमस्त्रचमिति।होमजपयोर्विकल्पःएतद्वसंवत्सरयानत्रात्पदंकार्यं।शाकलमन्त्राश्चदेवकृत
स्यैनसोऽवयजनमसीत्याद्याश्चनमहस्तस्कानमहडुयंनमश्चाविवासइति।कामतोमहापातकसमुज्ञायप्रत्ये
कस्यासपापितदुक्तामवमहापातकसंयुक्तोअत्तुगाच्छद्गाःसमाहितः।अन्यस्याशृपावमानीर्जिह्वादारोविशु
ध्यतीति।पावमान्यःस्वादिष्ठयामदिष्ठयेत्याद्याः।अथसुवर्णस्तेयप्रायश्चित्तं।तत्रत्रिरात्रोपोषितस्त्वन्नुपूर्वोया

ज्ञवल्क्यः। ब्राह्मणस्वसंहारी च रुद्रजापी जलस्थितः इति। त्रिरात्रोपवासानंतरं जलमध्ये स्थित्वा एकादशानुवा
नमष्टरुद्रमस्य वा इति शातातपः। यैर्ब्राह्मणस्य द्रव्यं हृतमित्यर्थः। तथा चात्रिः एकादशगुणान्वापि रुद्रानावर्त्य धर्मवित्। म
हापापैरपि स्पृष्टो मुच्यते नात्र संशय इति। शातातपेन विशेष उक्तः। मद्यपो यो गुरुदारी स्तेयगो ब्रह्महा ये च ब्राह्म
णस्त्वापवस्था नास्मस्नात्वा नस्मरेयुस्याशियाना रुद्राध्यायं मुच्यते सर्वपापैरिति। अत्रापि कर्माणि तु ब्राह्मणाय
गोदेया एतदत्र प्रकरणे स्फुटीभविष्यति एतच्चकामतः। अत्र वाभ्यासे द्विगुणं कल्प्यं। कामतस्तु स्तेयप्रकरणेद
र्शितं। मंत्रैः शाकलहोमीयैरिति मन्त्रोक्तं द्रष्टव्यं। कामतो भ्यासे तु मन्त्रोक्तं महापातकसंयुक्तोनुगच्छेद्गाः समाहित
इति पूर्वप्रकरणोक्तं द्रष्टव्यं। गुणवत्तापहर्तुर्निर्गुणस्वामिकस्वर्णहरणे तु स्वर्णपरिमाणान्न्यूनपरिमाणहरणे अ
नुग्राहकप्रायाजकविषये च मन्त्रोक्तं द्रष्टव्यं। सहस्रजप्त्वा अस्य वामीय शिवसंकल्पमेव च। सुवर्णमपहृत्यापि क्षणा
द्भवति निर्मल इति। अस्यवामीयं अस्य वामस्य पलितस्य होतुरिति सूक्तं। द्विपंचाशदृक्संख्याकं शिवसंकल्पं शि
वसंकल्पदृष्टं षडृचं॥ छ॥ अथ गुरुतल्पप्रायश्चित्तं। तत्र चत्वारिंशच्छतारुन्तारित्यत्र चत्वारिंशात्पदानुष्टतोया ज्ञवल्क्यः ३०५
सहस्रशीर्षजापी तु मुच्यते गुरुतल्पगः। गौर्देया कर्मणः स्यांते पृथगेभिः पयस्विनीति। सहस्रशीर्षजापीति ब्रा

ल्याणि नि:। अत एव जपात् त्रिर्गृह्यात। मासत्रिसंख्या चत्वारिंशत्पादननियम्यते। वृद्धहारीतस्तु त्रिरात्रोपोषितः पुरुष
सूक्तजपादामासं गुरुतल्पगः शुद्ध्येदिति। होमापि चत्वारिंशत्संख्या वेति। पृथगेभिः पयस्विनीति। एतत्सुरापस्वर्णस्तेय
गुरुतल्पगेष्वपि निरुपितं पृथक् त्रिरात्रे च तस्मिंतागा देयेत्यर्थः। एतच्चाकामकारे अत्रैव विषये त्रिरात्रोपवाससहि
तगोदाना शक्तस्य मन्त्रोक्तं द्रष्टव्यं। द्वितीयं तृतीयमन्त्यस्य नतमं हस्तीति वा जप्त्वा पौरुषं सूक्तं मुच्यते गुरुतल्पग इति। अ
त्र मासमित्यनुवर्तते। षोडशाविंशमासं नियताहारः सन् त्रयः सूक्तानामन्यतमसूक्तस्य जपः षोडशा संख्याकः कार्यः॥
हविष्यंतीयं हविष्यांतमजरं स्वर्विदीत्यनतं। न तमंहः। नेतमंहो न दुरितं कुतश्चनेति। इतीति चतुः इति वा इति ममनः
पौरुषं सूक्तं। सहस्रशीर्षेति अकामतोभ्यासे द्विगुणं। कामतस्तु सुरापानप्रकरणे दर्शितं। मंत्रैः शाकलहोमीयै
रिति मन्त्रोक्तं द्रष्टव्यं। कामतः अभ्यासे षड्विंशन्मात्रोक्तं। महाव्याहृतिभिर्होमस्तिलैः कार्यो द्विजन्मना। उपपातकशु
द्ध्यर्थं सहस्रपरिसंख्यया। महापातकसंयुक्तो लक्षहोमेन शुध्यतीति। व्यभिचारिणीगमने उपमानोक्तं द्रष्टव्यं। उपपतवा
स्य वामीयं पावमानीरथापि वा। कुंतापं वालखिल्यांश्च निवित्प्रैषान्वृषाकपिं। होतृन्रुद्रान्सकृज्जप्त्वा मुच्यते स
र्वपातकैरिति गुरुतल्पातिदेशविषये तु समानवक्ष्यमाणमेवादानम हीक्षे कल्पनीयं। अथ समग्रप्रायश्चित्तं॥

तत्रायनपातादिकानापसृष्टेन सह संसर्गः स्वाविक्कालावधिकायनवतः स तत्तत्पापप्रायश्चित्तामवकुर्या
त्। ननु रहस्यपातकिसंसर्गिणः संसर्ग एव दुर्ज्ञेय इति कथं संसर्गप्रायश्चित्तप्राप्तिः। उच्यते परदारगमनवक्रम
ग्रके रहसि रूपव्यतिरिक्तः स्वरूपी नरानवगमादाय्यव संसर्गप्रायश्चित्तप्राप्तिः। अथ संसर्गकिन्नापि पापकर्तुः पापयुक्त
त्वपरिज्ञानं रहस्यामवनन्नवतीति वर्तमानामन्त्र स्मात्मा ब्रह्महत्यादिकर्तृ रहस्यपापयुक्तश्चे॥ तत्संसर्गिणस्तु
पापं रहस्यामावतितस्य प्रायश्चित्तमस्त्येव। संसर्गशुद्धिनिष्ठ इति संसर्गिपरिज्ञानपि रहस्यामव एवमतिपातकया
दिसंसर्गवृत्ति॥ आकारप्रतिविवनाय विदुषी प्राची प्रवेशाधिकाः स्रोतस्मात्रपथे दृष्टुश्रमधुश्रीश्रीयानसीती तिना। सो
वामन्तृ तिरत्नवस्तुनस्तु एणोयस्य विसी नाद्यतीकत्ता विन्त्र विरंतनः किमियताह्रीनाीयतवः सज्जनाः॥ येके चि - त्र
सतु - नपिहृप्रयंति मत्तोष्यसीतइति तनविवासलीआ॥ यतु प्रगल्भमवम - तयश्वारा - - - [illegible]
मामवधारयंतु॥ २ इह मदनपारिजाते मदनक्षितिपालदातजल - - - - कायमन्त्रदामादाशा [illegible]
मरः॥ ३॥ मतिर्येषां शास्त्रे प्रसतिरमणीयाप्यवहति - - - - श्लाघ्यो नमतिरुजवास्त्र कतिपये॥ विरंचित्रे ३५५
त्तषांमुकुरतलस्त्रात स्थितिमियादि - - धासीरएपप्रवरमुनिशिष्यस्यनलिखितेः॥ ॥४॥ ॥४॥ ३०५

किं मियतात्ही येतवः सज्जनाः॥ १॥ येके चिदत्र गुणानपि हृष्यंति संतोष्यसंतइति तेतविचारणीयाः। येतु प्रगल्भमतयः
श्चयेषां लोकेषु तेसति मिमामवधारयंतु॥ २॥ इह मदनपारिजाते मदनक्षितिपालदातजल कृठानवमस्तवकोयमत्तद
सौदासहप्पंडितप्रमरः॥ ३॥ मतिर्येषां शास्त्रे प्रसतिरमणीयाप्यवहतिः पराशीलं श्लाघ्यो जगति सजवास्ति कतिपये॥
विरंचित्रे तेषां मुकुरतलरत्ने तेस्थितिमियादियं व्यासारएप्रवरमुनिशिष्यस्य नलिखितिः॥ ४॥ ॥ इति पंडितपारिजात
कहारमल्लदेवाग्रिविकरराजीविराजमानस्य श्रीमदनपालस्य निबंधे मदनपारिजाताभिधे नवमस्तवकः समाप्तः॥
॥ ॥ समाप्तोयं निबंधः॥ ॥ ॥ ॥॥ ॥ ॥ ॥ ॥ ॥ ॥॥

मदनपारि

ता

पृ.

॥ घोषस्तापय खजु पाठनीयं श्रीगोपिनाथ पंडित वराय॥

लक्ष्मीनृसिंहःऋजुदेवतं मे चिराय स्तूयात खजु पक्षपाती १

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

मदन पारिजात